चतुर्थी, षष्ठी, अष्टमी तथा चतुर्दशी तिथियाँ दीप्त हैं। विष्टिकरण अर्थात् भद्रा में करण दीप्त कहा गया है। मूल, ज्येष्ठा, श्लेषा, भद्रा, कृत्तिका, भरणी, मघा और तीनों पूर्वा को नक्षत्रदीप्त कहा जाता है। इन्हीं नक्षत्रों के मुहूर्त में मुहूर्त-दीप्त होता है। संज्ञा शून्यता अर्थात् विसंज्ञा को भाव कहते हैं। कठोर स्वर, भिन्न स्वर, भैरव (भयङ्कर) स्वर, आर्त स्वर, व्याकुल स्वर, विषम स्वर, विलुप्त-अक्षर, क्षीणस्वर और जर्जर स्वर को स्वर दीप्त कहा गया है। विद्युत् से आहत, गिरे हुए, छिन्न-भिन्न, भग्न, उत्पाटित, आधे कटे हुए, मसले हुए, शुष्क, रोग-ग्रस्त, पत्र-फल और दुग्ध विहीन, मलिन, विशीर्ण, छाल रहित, रस रहित, आम्ल, लवण, तिक्त, क्वथित चौड़े और विषम स्वरूप वाले, लताओं से संकुल, सूखे हुए, अवरोधक तथा आक्रान्त और अग्नि दग्ध वृक्षों पर जो शकुन होते हैं तथा प्राकार, गोपुर, अट्टालिका, ककुभ अर्थात् शिखर पर स्थित, स्थान दीप्त होता है। जो शकुन जीर्ण, विषम, निम्न और संकीर्ण, कोश, हड्डी, कपाल, वल्मीक, कोयला, माँस, टूटे हुए शस्त्र, जली हुयी लकड़ी, सर्प, विद्युत्, उल्का, सूर्य, वायु, शस्त्र और अग्नि की ओर दौड़ते हैं, उन्हें गति दीप्त कहा जाता है। पंख गिराना, चोंच को घिसना, गिरना, नीचे ऊपर होना और काटने के लिए दौड़ने को चेष्टा-दीप्त कहा जाता है। प्रचण्ड, कठोर और विपरीत वायु को वात-दीप्त कहते हैं। सूर्याभिमुख तथा दीप्त दिशाओं में स्थित शकुन को रवि-दीप्त कहा जाता है। यह भगवान् इन्द्र ने कहा है।।१५।।

विशेष व्याख्या—

दिग्ध (वि.) (दिह+क्त) सना हुआ, लिपा हुआ, पोता हुआ। हस्तायसृग्दिग्धौ मनु. ३/१३२। रघु १६/१५ दिग्धोऽमृतेन च विषेण च पक्ष्म-लाक्ष्या गाढनिखात इव मे हृदये कटाक्षः मा १/२। मिट्टी में सना हुआ, कलुषित, विषाक्त कु. ४/२५ जग्ध- (वि.) (अद्+क्त जग्धादेशः) खाया हुआ।

प्राकार— यष्टिकाकण्टकादिरचित वेष्टनस्य''

प्राचीनं प्रान्ततो वृत्तिः।

प्राचीनमिति।। प्रागेव विभाषाञ्चेरदिक् स्त्रियाम् (५/४/८) इति खः प्राचीरम् इति पाठे तु प्राचीयते। प्राङ्पूर्व। 'चिञ् चयने' शुचिचिमीनां दीर्घश्च (उ. २/२५) इति क्रान्दीर्घा।। प्रान्ततः सप्तम्यारतसिः वरण वृत्तिः। 'वृञ् वरणे' (स्वा. उ. अ.)। ठिन्

(३/३/९४) 'व्रियतेऽनया इति वृतिः इत्यपि नाम इति स्वामी–इति मुकुटः। तत्र करणे ल्युट् प्रसङ्गात्। **गोपुर**=ग्रन्थिपर्णं शुकं बर्हिपुष्पं स्थौणेयकुक्कुरे।। **ग्रन्थीति**।। ग्रन्थौ पर्णन्यस्य। ग्रन्थय इव पर्णान्यस्य इति वा। शोचति "शुच शोके' (भ्वा.प.से.) शु गतौ वा।। शुकवल्कोल्काः (उ. ३/४२) इति निपातः। ग्रन्थिपर्णे शिरीषे च शुकः स्यात् इति विश्वः। 'शुको व्यास-सुते कीरे रावणस्य च मन्त्रिणी। शिरीषपादपे पुंसि, ग्रन्थि-पर्णे नपुंसकम् (इति मेदिनी)-शुकस्येव वर्हाणि पर्णान्यस्य (शुक वर्हम्) इत्येकं नाम इत्येके वर्हं पत्रं प्रशस्तमस्य। इनिः (५/२/११५) **पुष्प्यति**। 'पुष्प विकसने' (दि. प. से.) अच् (३/१/१३०) वर्हिपुष्पम् इत्येकं नाम इत्येके।। 'बर्हपुष्पम्'।। बर्हम् इति पृथग् नाम इति कश्चित् स्थूणाया अपत्यम् 'स्त्रीभ्यो ढक्' (४/१/१२०) कुक्कुरीऽ-स्यास्ति। कुकुरशब्दस्तद् गन्धे लाक्षणिकः अर्श आघच् (५/२/१२७) (५) मज्ञत् इत्यश्राप्यन्वेति। 'मरुद्देशे समीरे न ग्रन्थिपर्णे नपुंसकम्' (इति मेदिनी) पञ्च ग्रन्थिपर्णस्य 'कुक्कुरवद्रा' इति ख्यातस्य।

अत्र विशेषमाह–

दशधैवं प्रशान्तोऽपि सौम्यस्तृणफलाशनः।
मांसामेध्याशनो रौद्रो विमिश्रोऽन्नाशनः स्मृतः।।१६।।

दीप्त-शकुन में विशेष बात कहते हैं–

इन दस प्रकारों में भी शान्त शकुन होते हैं। यदि तृण अथवा फल खा रहे हो तो शुभफल होता है। माँस तथा अभोज्य वस्तु खाने वाले शकुन का रौद्र अर्थात् अशुभ फल होता है। अन्न खाने वाले शकुन का शुभाशुभ मिश्रित फल कहा गया है।।१६।।

एवमनेन प्रकारेण दशधा दशभिः प्रकारैरपि शान्तः शकुनो भवति। तथापि यदि तृणाशनस्तृणभक्षः, फलाशनो वा फलान्यश्नाति, तदा सौम्यः शुभफलः। अथ मांसामेध्याशनो मांसमामिषममेध्यं विष्ठादि वाऽश्नाति तदा रौद्रो दीप्तः। अन्नाश-नोऽन्नमश्नाति। अन्नभोजी विमिश्रः शान्तो दीप्तश्च स्मृत उक्तः। उक्तं च–

इस प्रकार से दस प्रकार के दीप्त शकुन भी शान्त शकुन होते हैं। जैसा कि तृण का भक्षण करने वाले अथवा फल खाने वाले शकुन का सौम्य अर्थात् शुभफल

होता है। माँस अर्थात् आमिष, अमेध्य अर्थात् विष्ठा आदि खाने वाले रौद्र अर्थात् दीप्त शकुन होते हैं। जो अन्न को खाता है, वह विमिश्रित अर्थात् शान्त एवं दीप्त फल प्रदान करने वाला कहा गया है। जैसा कि कहा गया है–

पिशिताशुचिभोजनः प्रदीप्तस्तृण-
फलभुक् च निसर्गतः प्रशान्तः।
उभयः कथितस्तथान्नभोजी
दिक्-स्थानोदयकालतश्च चिन्त्यः।।इति।।१६।।

माँसादि अपवित्र भोजन करने वाले प्रदीप्त एवं तृण अथवा फल खाने वाले स्वभावतः प्रशान्त होते हैं। अनाज खाने वाले शकुन दोनों के मिश्रित फल देते हैं। दिशा, स्थान काल के अनुसार इनके फलों का विचार करना चाहिए।।१६।।

अथान्यदप्याह–

हर्म्यप्रासादमङ्गल्यमनोज्ञस्थानसंस्थिताः।
श्रेष्ठा मधुरसक्षीरफलपुष्पद्रुमेषु च।।१७।।

और भी कहते हैं–

भवन, अट्टालिका, माङ्गलिक स्थान और मनोहर स्थान पर स्थित शकुन उत्तम कहे गये हैं। मधुर, दूध वाले और फलों तथा फूलों से युक्त वृक्षों पर स्थित शकुन भी श्रेष्ठ माने गये हैं।।१७।।

हर्म्यं गृहम्। प्रासादो देवप्रासादः। मङ्गल्यस्थानानि देवब्राह्मणगोभिरध्यासितानि। मनोज्ञानि हरितशाद्वलासु शीतलद्रुमच्छायासंयुक्तानि। एतेषु स्थानेषु ये संस्थिताः शकुनास्ते श्रेष्ठाः शुभफलाः। तथा मधुरेषु सुस्वादफलेषु वृक्षेषु। तथा सक्षीरेष्वर्कादिषु। फलवृक्षेषु बीजपूरादिषु पुष्पवृक्षेषु च स्थिताः श्रेष्ठा एव।।१७।।

हर्म्य अर्थात् गृह, प्रासाद अर्थात् देवगृह, माङ्गलिक स्थान अर्थात् देवता, ब्राह्मण एवं गायों से युक्त भूमि, मनोज्ञ हरे-भरे, शीतल वृक्षों की छाया से संयुक्त स्थान। इन स्थानों में स्थित जो शकुन होते हैं वे श्रेष्ठ अर्थात् शुभ फल देते हैं। इसी प्रकार मधुर अर्थात् सुस्वादु फलदार वृक्षों पर तथा मन्दार आदि दूध वाले वृक्षों पर, फलदार वृक्ष अर्थात् नीबू चकोतरा आदि वृक्षों पर और फूलों पर स्थित शकुन श्रेष्ठ होते हैं।।१७।।

अधुना शाकुनानां बलविशेषफलमाह–

स्वकाले गिरितोयस्था बलिनो द्युनिशाचराः।

क्लीबस्त्रीपुरुषा ज्ञेया बलिनः स्युर्यथोत्तरम् ।।१८।।

शकुनों का बलाबल विचार करते हैं–

द्युचर तथा निशाचर अपने समय में क्रमशः पर्वत और जल में स्थित होने पर बली होते हैं। नपुंसक, स्त्री और पुरुष शकुनों को क्रमशः उत्तरोत्तर बली समझना चाहिए।।१८।।

स्वकाले आत्मीयसमये गिरितोयस्थाः पर्वतजलस्था यथासंख्यं द्युनिशाचरा बलिनो वीर्यवन्तो भवन्ति। द्युचरा दिवसे गिरिस्था बलिनः। गिरिशब्द उच्चदेशोपलक्षणार्थः। निशाचरा निश्यनूपे च। तथा च मनुधर्माः–

अपने समय में पर्वत और जल पर स्थित क्रमानुसार दिवाचर और निशाचर बलशाली होते हैं अर्थात् दिवाचर शकुन दिन में पर्वत पर स्थित हो तो बली होता है। यहाँ पर गिरि शब्द उच्चप्रदेश का द्योतक है। निशाचर शकुन रात्रिकाल में जलीयस्थान पर बली होते हैं। जैसा कि मनुधर्म का वचन है–

गिरौ दिवा दिवाचारी निश्यनूपे निशाचराः।
रोधवाक् शकुनो ज्ञेयो विभजेद् बलमन्यथा।।

दिन में पर्वतीय स्थल पर दिनचर और रात्रि में जलीयस्थान पर निशाचर शकुन शुभ होता है। जो शकुन अवरुद्ध वाणी वाला हो, उसका बल विपरीत एवं विभक्त हो जाता है।

क्लीबस्त्रीपुरुष इति। एषां शकुनानां यथोत्तरं यथासंख्यं क्लीबस्त्रीपुरुषा बलिनः। क्लीबेभ्यः स्त्रियो बलिन्यः। स्त्रीभ्यः पुरुषा इति। उक्तं च–

इन शकुनों में उत्तरोत्तर क्रमानुसार नुपंसक, स्त्री और पुरुष-शकुन बली होते हैं। अर्थात् नपुंसक शकुन से स्त्री शकुन बली होता है और स्त्री शकुन से पुरुष शकुन बली होता है। जैसा कि कहा गया है–

द्युनिशोभयचारिणः स्वकाले
पुरवनमिश्रचराः स्वभूमिसंस्थाः।
सफला विफला विपर्ययस्था
गमनेच्छोः पुरपार्थिवाः शुभास्ते।।इति।।१८।।

द्युचर, निशाचर और उभयचर शकुन अपने समय पर तथा नगर, वन और मिश्रित स्थल पर क्रमशः स्वस्थान पर स्थित होने से सफल होते हैं। इसके विपरीत क्रम में स्थित शकुन विफल माने गये हैं। प्रयाण करने के इच्छुक राजा के सम्मुख स्थित शकुन, शुफभल प्रदान करते हैं।।१८।।

अन्यदप्याह—

जवजातिबलस्थानहर्षसत्त्वस्वरान्विताः।
स्वभूमावनुलोमाश्च तदूनाः स्युर्विवर्जिताः।।१९।।

और भी कहते हैं—

गति, जाति, बल, स्थान, हर्ष, सत्व और स्वर से युक्त तथा अपनी भूमि पर स्थिति के अनुसार शकुन बली होते हैं। इनमें हीन बल वाले शकुन निर्बल माने गये हैं।।१९।।

जवो वेगो गतिरित्यर्थः। जातिर्योनिविभागः। बलं प्रमाणं वा। स्थानं स्थितिः हर्षश्चित्तहर्षः। सत्त्वं [1]सौन्दर्यनिर्भयमित्यर्थः। स्वरः शब्दः। एतैर्ये बलवत्तराः। वक्ष्यति च—“[2]ग्राह्यो यो बलवत्तरः”। तत्र न ज्ञायते शकुनानां बलं तदर्थमुक्तम्। द्वयोर्मध्ये यः शकुनो जवेनाधिकः। यश्च जातेरधिकः। यश्च बलाधिकः। यश्च स्थाने शोभने स्थितः। यश्च हर्षयुक्तः। यश्च सत्त्वयुक्तः। यश्च शोभनः स्वरान्वितः। यश्च स्वभूमावानुलोम्येन स्थितः स एव बली। तदूनाः स्युर्विवर्जिताः, तदित्यनेन जवादयः परामृश्यन्ते। तैरूना रहिता बलवर्जिताः स्युर्भवेयुः।।१९।।

जव अर्थात् गति, जाति अर्थात् योनिभेद, बल अर्थात् शारीरिक मात्रा का परिमाण, स्थान अर्थात् जिस जगह पर स्थित हो, हर्ष अर्थात् मन की प्रसन्नता, सत्व अर्थात् निर्भय सौन्दर्य और स्वर अर्थात् शब्द (ध्वनि) इनसे जो बली होते हैं, उनको बलवत्तर कहा जाता है। शकुनों का परस्पर बल का ज्ञान सामान्य रूप से नहीं हो पाता। इसलिये इनके बल को ज्ञात करने की विधि को बतलाते हैं। दो शकुनों के मध्य जो गति में अधिक हो, जो जाति में श्रेष्ठ हो, जिसका बल अधिक हो, जो सुन्दर स्थान पर स्थित हो, जो अधिक प्रसन्न हो, जो सत्व सम्पन्न हो, जो मधुर स्वर वाला हो, जो अपनी भूमि पर अनुकूलता से स्थित हो, वह शकुन ही बली होता है। इन गति, जाति आदि विषयों में हीन रहने वाला शकुन निर्बल होता है।।१९।।

अधुनैतेषां जातिविभागेन दिग्बलमाह—

कुक्कुटेभपिरिल्यश्च शिखिवञ्जुलछिक्कराः।

---

१. सत्त्वमौदार्यम्—इति ग. पू. पाठः।

२. अस्यैवाध्यायस्य ५४ श्लोकः।

बलिनः सिंहनादश्च कूटपूरी च पूर्वतः।।२०।।

शकुनों की जाति के अनुसार दिग्बल का विचार करते हैं। कुक्कुट (मुर्गा), इभ (हाथी) पिरली (पक्षी), मयूर, मञ्जुल (पक्षी), छिक्कर (पशु) सिंहनाद (पक्षी) और कूटपूरी (पक्षी) ये सभी पूर्व दिशा में बली होते हैं।।२०।।

कुक्कुटः कृकवाकुः। इभो हस्ती। पिरिली पक्षिविशेषः। शिखी मयूरः। वञ्जुलः खदिरचञ्चुः। छिक्करो मृगजातिः। सिंहनादः पक्षिविशेषः। कूटपूरी करायिका। एते पूर्वतः पूर्वस्यां दिशि बलिनः। प्राजापत्यात्र पूर्वा ज्ञेया, न यातुर्वशेनेत्येवं सर्वत्र ज्ञेयम्।।२०।।

कुक्कुट अर्थात् कृकवाकु (मुर्गा), इभ अर्थात् हाथी, पिरली एक प्रकार की पक्षी विशेष, शिखी अर्थात् मयूर, वञ्जुल अर्थात् खदिरचञ्चु, छिक्कर पशु विशेष, सिंहनाद एक प्रकार की पक्षि विशेष, कूटपूरी अर्थात् करायिका ये सभी पूर्व दिशा में बली होते हैं। यहाँ पर प्राजापत्य अर्थात् ब्राह्म-दिशा (सूर्योदय दिशा) से पूर्व दिशा जाननी चाहिए। यात्रिक के अनुसार दिशा का निर्धारण कहीं पर भी नहीं करना चाहिए ।।२०।।

अथ दक्षिणस्यामाह–

क्रोष्टुकोलूकहारीतकाककोकर्क्षपिङ्गलाः।
कपोतरुदिताक्रन्दक्रूरशब्दाश्च याम्यतः।।२१।।

दक्षिण-दिशा में बली शकुन का विचार करते हैं–

सियार, उल्लू, हारीत, (हारिल), कौआ, कोक, रीक्ष (भालू), पिङ्गला, कबूतर, रोदन, आक्रन्दन तथा क्रूर शब्द ये सभी दक्षिणदिशा में बली होते हैं।।२१।।

क्रोष्टुकः शृगालः। उलूकहारीतौ पक्षिविशेषौ। काको वायसः। कोकः पक्षी। ऋक्षः प्राणी। पिङ्गला उलूकचेटिका। कपोतः पक्षी। रुदितं रोदनम्। आक्रन्दमाक्रन्दितम्। अन्ये क्रूरशब्दा अप्रियाभिधायिनः। ते च सर्वे याम्यतो दक्षिणस्यां दिशि बलिनः।।२१।।

क्रोष्टुक अर्थात् सियार उल्लू तथा हारीत नामक पक्षी कौआ अर्थात् वायस, कोक नामक पक्षी, रुदन करना, आक्रन्दन अर्थात् चिल्लाना तथा अन्य क्रूर शब्द जो अप्रिय लगते हों, ये सभी दक्षिण दिशा में बली होते हैं।।२१।।

अथ पश्चिमायामाह–

गोशशक्रौञ्चलोमाशहंसोत्क्रोशकपिञ्जलाः।

विडालोत्सववादित्रगीतहासाश्च वारुणाः।।२२।।

पश्चिम दिशा में बली शकुन–

गाय, खरगोश, क्रौंच, लोमाश, हंस, उत्क्रोश, कपिंजल, बिल्ली, खरगोश, उत्सव, वाद्य-यन्त्र, गीत तथा हास-परिहास, ये सभी पश्चिम दिशा में बली होते हैं।।२२।।

गौः प्रसिद्धा। शशः प्राणिविशेषः। क्रौञ्चः पक्षी। लोमाशः प्राणी। हंसः उत्क्रोशाख्याः कुरवः। कपिञ्जाख्यः। सर्व एव पक्षिविशेषाः। विडालो मार्जारः। उत्सवो विवाहादिकः। वादित्राणि वीणामुरुजमर्दलकरटाभेरी-पणवगोमुखपटहादयः। गीतं प्रसिद्धम्। हास उपहासः। एते वारुणाः पश्चिमायां बलिनः।।२२।।

गाय तथा खरगोश जो कि सुप्रसिद्ध प्राणी हैं, क्रौंच अर्थात् चक्रवाक पक्षी, लोमाश प्राणी, हंस, उत्क्रोश अर्थात् कुरव तथा कपिञ्जल नामक पक्षी, ये सभी पक्षी विशेष हैं। विडाल अर्थात् मार्जार (विलाव) विवाहादि माङ्गलिक उत्सव कर्म, वीणा, मृदङ्ग, मर्दल, करट, तुरही, पणव, गोमुख, नगाड़ा आदि वाद्य-यन्त्र, प्रसिद्ध गीत, हास अर्थात् हँसी, ये सभी पश्चिम-दिशा में बली होते हैं।।२२।।

अथोत्तरस्यामाह–

शतपत्रकुरङ्गाखुमृगैकशफकोकिलाः।

चाषशल्यकपुण्याहघण्टाशङ्खरवा उदक्।।२३।।

उत्तर दिशा में बली शकुन–

शतपत्र पक्षी, हरिण, मूषक, मृग, एक खुर वाले पशु, कोयल, चाष पक्षी, शल्यक (साहिल पशु), पुण्याह वाचन, घंटी और शंख के शब्द उत्तर दिशा में बली माने गये हैं।।२३।।

शतपत्रः पक्षी, दार्वाघाट इति प्रसिद्धः। कुरङ्गो हरिणः। आखुर्मूषकः। मृगः प्रसिद्धो हरिणः। एकशफावश्वगर्दभौ। कोकिलः परभृतः। चाषः पक्षी। शल्यको विलेशयः प्राणी। पुण्याहरव आशीःसंयुक्तः शब्दः। घण्टाशङ्खौ प्रसिद्धौ। एषां सर्वेषां रवाः शब्दा उदगुत्तरस्यां दिशि बलिनः।।२३।।

शतपत्र अर्थात् दार्वाघाट नामक प्रसिद्ध पक्षी, कुरङ्ग अर्थात् हरिण, आखु अर्थात् चूहा, मृग नाम से सुप्रसिद्ध हिरण, एक शफ वाले घोड़े गदहे आदि, कोयल अर्थात् परभृत–जो दूसरों के द्वारापलित होता है, चाष अथवा चाख नामक पक्षी, शाल्यक प्राणि–जो बील में निवास करता है। (साहिल), पुण्याह के शब्द–जो

आचार्यों द्वारा आशीर्वाद स्वरूप बोले जाते हैं और घण्टा तथा शङ्ख के शब्द, ये सभी ध्वनियाँ उत्तरदिशा में बली होती हैं॥२३॥

विशेष व्याख्या–

"शफ क्लीबे खुरः पुमान्"–अमरकोश २.८.४९ शं फणति, पण गतौ, शफं मूले तरूणां स्याद् गवादीनां खुरेऽपि च (मेदिनी)। खुरति, खुर छेदने।

अधुना तेषां प्रतिभागमाह–

न ग्राम्योऽरण्यगो ग्राह्यो नारण्यो ग्राम्यसंस्थितः।
दिवाचरो न शर्वर्यां न च नक्तं चरो दिवा॥२४॥

इन शकुनो में भेद का निरूपण करते हैं–

गाँव में रहने वाले शकुनों का वन में और वन में रहने वाले शकुनों का गाँव में शकुन-विचार न करे। इसी प्रकार से दिन में विचरण करने वाले शकुन का रात में और रात्रिचर का दिन में विचार न करें॥२४॥

ग्राम्यशब्दः शकुनोऽरण्यगोऽरण्यस्थितः शुभोऽशुभो वा न ग्राह्यः। एवमारण्योऽपि ग्रामसंस्थितो न ग्राह्यः। दिवाचरो दिवसचरः शर्वर्यां रात्रौ न ग्राह्यः। नक्तंचरो रात्रिंचरो दिवसे न ग्राह्यः॥२४॥

गाँव के शकुन का शब्द वन में सुनाई पड़ने पर, उसका शुभाशुभ फल ग्रहण नहीं किया जाता है। इसी प्रकार वनचारी शकुन का गाँव में प्राप्त ध्वनि का विचारार्थ ग्रहण न करे। दिन में संचरणशील शकुन का रात में तथा रात में संचरण करने वाले शकुन का दिन में शुभाशुभ फल ग्रहण न करे॥२४॥

पुनरतिप्रतिषेधार्थमाह–

द्वन्द्वरोगार्दितत्रस्ताः कलहामिषकाङ्क्षिणः।
आपगान्तरिता मत्ता न ग्राह्याः शकुनाः क्वचित्॥२५॥

अन्य प्रतिषेधों को कहते हैं–

जोड़ा सहित (युग्म), रोगग्रस्त, भयाक्रान्त, कलह करने वाले और माँसादि के झपटने के इच्छुक, जल में डूबे हुए और मदमत्त शकुनों से शुभाशुभ का कथमपि विचार न करे॥२५॥

द्वन्द्वं युग्मं तच्च सारयुग्मं विना यतस्तदिष्टफलं वक्ष्यति–"[१]**सारसकूजितमिष्टफलं तद्युगपद्विरुतं मिथुनस्य" इति। रोगार्दितो गदपीड़ितः। त्रस्तो भीताः। कलहकाङ्क्षी कलहेच्छुः। आमिषकाङ्क्षी मांसाभिलाषी। आपगानतरिता नद्यन्तरिताः। मत्ता ऋतुकालवेशन सदर्पाः। एवंविधाः शकुनाः सदसत्फलेषु न क्वचिदपि ग्राह्यः। उक्तं च–**

शकुन में सारस की जोड़ी का अनुकूल शुभफल मिलता है। जैसा कि कहा गया है–"सारसयुग्म का एक साथ बोलना शुभ होता है।" अतः सारस के अतिरिक्त अन्य शकुनों की युग्मता, रोग से पीड़ित, त्रस्त अर्थात् भयभीत, कलह का इच्छुक, मांस की आकांक्षा वाला, आपगा अर्थात् नदी में अन्तर्हित, ऋतुकाल के अनुसार मतवाला, इस प्रकार का शकुन शुभाशुभ फल के लिए कथमपि ग्राह्य नहीं होता है। कहा गया है–

द्वन्द्वादिरोगार्दितभीतमत्तवैरान्तयुद्धामिषकाङ्क्षिणश्च ।

सीमान्तनद्यन्तरिताश्च सर्वे न चिन्तनीयाः सदसत्फलेषु।।इति।।२५।।

युग्म, रोग से पीड़ित, भयग्रस्त, मतवाला, कलहपूर्वक युद्ध करने वाला, मांस की इच्छा वाला, सीमान्त प्रदेश और नदी के भीतर स्थित, इस प्रकार के शकुनों का शुभाशुभ फल के ग्रहण हेतु विचार न करे॥२५॥

अधुना चैतेषामृतुकालज्ञानं निष्फलत्वं चाह–

रोहिताश्वाजवालेयाः कुरङ्गोष्ट्रमृगाः शशः।

निष्फलाः शिशिरे ज्ञेया वसन्ते काककोलिकौ।।२६।।

ऋतु के अनुसार इनकी विफलता को कहते हैं–

रोहित (पशु), घोड़ा, बकरा, गदहा, हरिण, ऊँट, मृग और खरगोश, शिशिर ऋतु में निष्फल होते हैं। वसन्तऋतु में कौआ तथा कोयल को निष्फल समझे॥२६॥

रोहितो मृगजातिः। अश्वस्तुरगः। अजश्छागः। वालेयो गदर्भः। कुरङ्गो मृगजातिः। उष्ट्रः करभः। मृगो हरिणः। शशः प्राणी। एते सर्वे शिशिरे माघ-फाल्गुनयोः सदसत्त्वान्निष्फला ज्ञेया ज्ञातव्याः। वसन्ते चैत्रवैशाखयोः काको वायसः, कोकिलः परभृतः। एतौ सदसत्त्वान्निष्फलावेव।।२६।।

रोहित, जो मृमजाति का पशु है, घोड़ा, अज अर्थात् बकरा (छाग), वालेय

---

१. बृहत्संहितायाम् ८७ अध्याये ३७ श्लोकः।

अर्थात् गदहा, कुरङ्ग संज्ञक मृग की एक जाति, उष्ट्र अर्थात् ऊँट (करभ) शश (शशक) अर्थात् खरगोश, ये सभी शिशिर ऋतु अर्थात् माघ और फाल्गुन मास में शुभ अथवा अशुभ फल देने में निष्फल होते हैं। वसन्त ऋतु अर्थात् चैत्र एवं वैशाख मास में कौआ तथा कोयल, ये दोनों ही शुभाशुभ फल हेतु निष्फल रहते हैं।।२६।।

अन्येष्वाह—

न तु भाद्रपदे ग्राह्याः सूकरश्ववृकादयः।
शारद्याब्जादगोक्रौञ्चाः श्रावणे हस्तिचातकौ।।२७।।

और भी कहते हैं—

भादो मास में सूअर, कुत्ता और भेड़ियों आदि का शकुन ग्रहण न करे। शरद् ऋतु अर्थात् आश्विन और कार्त्तिक मास में जलभक्षी हंसादि तथा गाय और चक्रवाक पक्षी का एवञ्च श्रावण मास में हाथी तथा चातक पक्षी का शकुन ग्रहण न करे।।२७।।

भाद्रपदे मासि सूकरो वराहः। श्वा सारमेयः। वृकः प्राणी। आदिग्रहणाद् मृगादयो विलेशयाः। एते न ग्राह्याः। सदसत्त्वाद्व निष्फलाः। शारद्याश्विनकार्तिकयोः। अब्जादा हंसादयः। अप्सु जायत इत्यब्जजम्। तददन्ति भक्षयन्ति इति अब्जादाः। गौः प्रसिद्धा। क्रौञ्चः पक्षिविशेषः। एते सदसत्त्वान्निष्फलाश्च ग्राह्याः। श्रावणे मासि हस्तिचातकौ न ग्राह्यौ। हस्ती गजः। चातकः पक्षिविशेषः।।२७।।

भाद्रपद मास में सूकर अर्थात् वराह, श्वान (सारमेय), वृक अर्थात् भेंड़िया तथा आदि पद से मृगादि पशु एवं विल में रहने वाले प्राणी, इनके शुभाशुभत्व का फल ग्रहण न करे, ये निष्फल होते हैं। शरद् अर्थात् आश्विन और कार्त्तिक मास में "अब्जाद" अब्ज अर्थात् जल में उत्पन्न पदार्थ का 'अद' यानि भक्षण करने वाले हंसादि पक्षी, गाय, क्रौञ्च अर्थात् चक्रवाक पक्षी, ये सभी शुभाशुभ व्यक्त करने में निष्फल होने से अग्राह्य हैं। श्रावण मास में हाथी और चातक का ग्रहण न करे। हस्ति अर्थात् हाथी (गज) पशु तथा चातक एक विशेष पक्षी है।।२७।।

अथान्येष्वप्याह—

व्याघ्रर्क्षवानरद्वीपिमहिषाः सबिलेशयाः।
हेमन्ते निष्फला ज्ञेया बालाः सर्वे विमानुषाः।।२८।।

अन्य मासों में कहते हैं—

बाघ, ऋक्ष (भालू), वानर, द्वीपी, भैंसा और बिल निवासी, ये सभी हेमन्त ऋतु में निष्फल होते हैं। मनुष्य के बालकों को छोड़कर अन्य सभी प्राणियों के बालक भी इस ऋतु में अग्राह्य हैं॥२८॥

व्याघ्रः प्रसिद्धः प्राणी नखी। ऋक्षः प्राणी। वानरः कपिः। द्वीपी चित्रकः। महिषः प्रसिद्धः। एते सविलेशयाः, विलेशयैः प्राणिभिः सहिताः। बिले शेते बिलेशयः, श्वाविन्नकुलादयः। विमानुषा मानुषवर्जिताः सर्वे प्राणिनः। बालाः शिशवः। हेमन्ते मार्गशीर्षपौषयोर्निष्फला ज्ञेया ज्ञातव्याः। मानुषा बालाः पुनः सफला एव। एतेषां यच्छुभाशुभचेष्टितं तत्सफलमेव।

व्याघ्र अर्थात् प्रसिद्ध नखों वाला प्राणी, ऋक्ष अर्थात् भालू नामक प्राणी, वानर, द्वीपी (चीता), (चित्रक), भैंसा, बिलेशय प्राणी अर्थात् बिल में शयन करने वाले श्वावित् साहिल (सेह) तथा नकुल अर्थात् नेवला आदि, मनुष्य को छोड़कर सभी प्राणियों के शिशु को, हेमन्त ऋतु अर्थात् मार्गशीर्ष और पौष मास में निष्फल समझना चाहिए। तात्पर्य यह है कि मनुष्यों के बालकों का शकुन सफल होता है। इन बच्चों की चेष्टाओं के अनुसार शुभाशुभ फल घटित होता है।

अत्र ऋतुकाललक्षणं भगवत्पराशरकृतं विस्तृतं लिख्यते—

"[१]अथ शकुनेषु कोकिलमयूरजीवजीवकप्रियपुत्रराजपुत्रीगोदापुत्रशतपत्रदात्यूहमदनसारिकावर्षाभूकोयष्टिमहामुक्तकमषकदण्डिमाणवकवायसकुक्कुटवकोत्क्रोशं शार्ङ्ग-प्लवकचित्रकपोतपुष्परथोष्ट्ररथादीनां वसन्तो मदकालः। शतपत्रोत्क्रोशभृङ्गराजमयूर-कोकिलवकवलाहकाप्लववाकधन्वनचातकसारङ्गाणां वर्षाः। चकोरकादम्बरमदनशारिका-कीरपुष्करचातकहंसचक्रवाकसारसकुररक्रौञ्चकारण्डवभ्रमराणां शरत्। श्येनकुर-रक्रौञ्चसारसादीनां हेमन्ते शिशिरे एवमादयः शकुनानां मदकालाश्च। मृगाणां पुनः पुरुषाणां च शिवाशशजम्बूकसृमरचमरवानरमार्जारनकुलगजगवयसिंहव्याघ्रकूर्मवराहा-दीनां प्रायः सर्वेषां मदकालश्च विशेषतश्च सारससृमरसिंहव्याघ्रादीनां ग्रीष्मे। हरिणगजवृषभादीनां प्रावृट्। वृषभरुरुमहिषगयसृमरचमराणां शरत्, गोगवयवृषादीनां हेमन्तः शिशिरः" इति।।२८।।

ऋतुकाल के पराशरकृत लक्षणों को लिखते हैं—

शकुनों में कोयल, मयूर, जीव-जीवक, प्रियपुत्र, राजपुत्री, गोदापुत्र, शतपत्रदा, अत्यूह, मदन-सारिका, वर्षाभू, कोयष्टि, महामुक्तक, मषकदण्डि, माणवक, वायस,

---

१. शार्दूल इति ग. पु. पाठः।

कुक्कुट, वक, उत्क्रोश, शार्ङ्ग, प्लवक, चित्र, कपोत, पुष्प-रथ और उष्ट्ररथ, इन सभी का मदकाल वसन्त-ऋतु है। शतपत्र, उत्क्रोश, भृंग, राजमयूर, कोकिल, वक, वलाहक, प्लववाक, धन्वन, चातक, सारङ्ग, इनका मदकाल वर्षा ऋतु है। चकोर, कादम्ब, मदनशारिका, कीर, पुष्कर, चातक, हंस, चक्रवाक, सारस, कुरर, क्रौञ्च, कारण्डव और भ्रमर का शरद् ऋतु में मद-काल होता है।

श्येन, कुरर, क्रौञ्च और सारस आदि का मदकाल हेमन्त ऋतु है। इस प्रकार से शिशिरादि ऋतुओं में शकुनों के मदकाल का निरूपण किया गया है। मृगों अर्थात् पशुओं तथा पुरुष-शकुनों शिवा, शश, जम्बूक, सृमर, चमर, वानर, मार्जार, नकुल, गज, गवय, सिंह, व्याघ्र, कूर्म तथा वराह आदि सभी का मदकाल ग्रीष्म ऋतु है। पुनः विशेषतः सारस, सृमर और व्याघ्र आदि का ग्रीष्म ही मदकाल होता है। हरिण, गज और वृषभ इत्यादि का वर्षाकाल, गवय, सृमर और चमर आदि का शरद् काल तथा गो, गवय, वृष इत्यादि का हेमन्त तथा शिशिर ऋतु मदकाल है॥२८॥

विशेष व्याख्या–

पशु पक्षियों के नाम हेतु परिशिष्ट द्रष्टव्य है।

अधुना द्वात्रिंशद्भेदभिन्नस्य दिक्चक्रस्य प्रतिभागप्रदर्शनार्थमाह–

ऐन्द्रानलदिशोर्मध्ये त्रिभागेषु व्यवस्थिताः।
कोशाध्यक्षानलाजीवितपोयुक्ताः प्रदक्षिणम्॥२९॥

बत्तीस भेद वाले दिक्चक्र को प्रदर्शित करते हैं–

पूर्वदिशा तथा अग्निकोण के मध्य तीन सम-भागों में क्रमशः कोशाधिपति, अग्निकर्मी एवं तपस्वीजन प्रदक्षिणावर्त क्रम से स्थित होते हैं॥२९॥

ऐन्द्री पूर्वा दिक्, अनला आग्नेयी। अनयोर्मध्येऽन्तरे त्रयस्त्रिभागास्तेषु व्यवस्थिताः क्रमेण कोशे गञ्जेऽध्यक्षः स चैकस्मिन् भागे। द्वितीये अनलाजीवी अग्न्युपजीवकः सुवर्णकारादिकः। तृतीये तपोयुक्तस्तापसः। एत एव प्रदक्षिणं प्रदाक्षिण्येनेति॥२९॥

ऐन्द्री अर्थात् पूर्व दिशा, अनला अर्थात् अग्निकोण, इनके मध्य तीन भागों में क्रमशः कोशाध्यक्ष अर्थात् गञ्जाध्यक्ष एक भाग में तथा सुवर्णकार आदि अग्नि-जीवी दूसरे भाग में और तपस्यारत तापसजन तीसरे भाग में स्थित रहते हैं॥२९॥

अन्येष्वाह—

शिल्पी भिक्षुर्विवस्त्रा स्त्री याम्यानलदिगन्तरे।
परतश्चापि मातङ्गगोपधर्मसमाश्रयाः।।३०।।

अन्य दिशाओं में कहते हैं–

अग्निकोण और दक्षिणदिशा के मध्य क्रमशः तीन भागों में शिल्पकार, भिक्षु और नग्नस्त्री रहती है। तत्पश्चात् दक्षिण और नैर्ऋत्यकोण के मध्यस्थ तीनों भाग में मातङ्ग (हाथी), गोपालनकर्ता और धार्मिकजन स्थित रहते हैं।।३०।।

याम्या दक्षिणा, अनला आग्नेयी। अनयोरन्तरे मध्ये ये त्रयो भागास्तेषु क्रमेण व्यवस्थिताः। शिल्पी चित्रकरलेखकरवर्धकिप्रायाः प्रथमे त्रिभागे। भिक्षुर्यतिर्द्वितीये। विवस्त्रा स्त्री नग्ना स्त्री तृतीये। परतो दक्षिणनैर्ऋत्योर्मध्ये ये त्रयस्त्रिभागास्तेषु प्रथमे मातङ्गो हस्ती तत्समाश्रितः पुमान्। द्वितीये गोपालकस्तत्समाश्रितः पुमान्। तृतीये धर्मसमाश्रयो धर्मानुरतः।।३०।।

याम्या अर्थात् दक्षिण, अनला अर्थात् आग्नेयी इन दोनों दिशाओं के मध्य जो तीन भाग हैं, उनमें क्रमशः प्रथमभाग में शिल्पकार, चित्रकार, लेखक, काष्ठ शिल्पी स्थित होते हैं। दूसरे भाग में भिक्षु अर्थात् संन्यासी रहते हैं। तीसरे भाग में नग्ना स्त्री का स्थान है। तदनन्तर दक्षिण और नैर्ऋत्य कोण के बीच जो तीन भाग होंगे उनमें से प्रथण भाग में मातङ्ग अर्थात् हाथी (पुरुष), तथा दूसरे में गोपालक और उनसे सम्बन्धित पुरुष और तीसरे भाग में धर्मानुरक्त पुरुष का स्थान है।।३०।।

अन्येष्वाह—

नैर्ऋतीवारुणीमध्ये प्रमदासूतितस्कराः।
शौण्डिकः शाकुनी हिंस्रो वायव्यापश्चिमान्तरे।।३१।।

अन्य दिशाओं में कहते हैं–

नैर्ऋत्यकोण और पश्चिमदिशा के मध्यस्थ तीन भागों में क्रमशः महिला, प्रसूति और तस्कर स्थित होते हैं। पश्चिमदिशा और वायव्यकोण के मध्य के तीन भागों में क्रमशः मद्यपायी, बहेलिया और हिंसक प्राणी स्थित होते हैं।।३१।।

नैर्ऋती दक्षिणपश्चिमा, वारुणी पश्चिमा, अनयोर्मध्ये ये त्रयस्त्रिभागा मध्ये स्थितास्तेषु प्रथमे प्रमदा स्त्री। द्वितीये सूतिः प्रसवः। तृतीये तस्कराश्चौराः। वायव्यापश्चिमान्तरे ये त्रयस्त्रिभागा मध्ये स्थितास्तेषु प्रथमे शौण्डिको मधुपानसक्तः। कल्पपाल इति केचित्। द्वितीये शाकुनी धीवरः। तृतीये हिंस्रः क्रूरः।।३१।।

नैर्ऋत्य अर्थात् दक्षिण और पश्चिम दिशा के मध्य का कोण एवं वारुणी अर्थात् पश्चिम दिशा, इन दोनों के मध्य के तीन भागों में से क्रमशः प्रथम भाग में स्त्री, दूसरे भाग में प्रसूति-स्त्री और तीसरे भाग में तस्कर अर्थात् चोर रहते हैं। पश्चिम दिशा और वायव्यकोण के बीच जो तीन भाग होते हैं उनमें से प्रथम भाग में शौण्डिक अर्थात् मद्य-पान करने वाले हैं, जिनको कुछ विद्वान् कल्प-पाल कहते हैं। दूसरे भाग में शाकुनी अर्थात् धीवर (मछुवारे) एवं तीसरे भाग में हिंसक अर्थात् क्रूर-प्राणी रहते हैं।।३१।।

विशेष व्याख्या–

'शाकुनी' शब्द का विवृति में 'धीवर' अर्थ किया गया है। 'शाकुनी' पक्षी पकड़ने वाला बहेलिया कहा जाता है। धीवर (मछुवारा) शब्द का पर्याय अमरकोश (१/१०/९५) में इस प्रकार है–"कैवर्ते दाशधीवरौ", विद्वज्जन कृपया विचार कर लें।

अन्येष्वाह–

विषघातकगोस्वामिकुहकज्ञास्ततः परम्।
धनवानीक्षणीकश्च मालाकारः परं ततः।।३२।।

अन्य दिशाओं में कहते हैं–

तदनन्तर (वायव्योत्तर के तीन भागों में) क्रमशः विषघात करने वाले, गायों के स्वामी, इन्द्रजाल विद्या के ज्ञाता रहते हैं। इसके पश्चात् उत्तर-ईशान दिशा के तीन भागों में क्रमशः सम्पन्न लोग, लक्षणज्ञ ज्योतिषी, और मालीगण रहते हैं।।३२।।

ततः परमनन्तरम्। वायव्योत्तरयोरन्तरे ये त्रयस्त्रिभागाः। तत्र प्रथमे विषघातकः। विषं घातयति मारयति। द्वितीये गोस्वामी गोमान्। तृतीये कुहकज्ञ इन्द्रजालवित्। ततः परमुत्तरैशान्योरन्तरे ये त्रयो भागास्तेषु प्रथमे धनवान्। द्वितीये ईक्षणीको दैवज्ञः। तृतीये मालाकारः पुष्पप्रचायकः।।३२।।

उसके बाद व्यायव्यकोण एवं उत्तर दिशा के मध्य में जो तीन भाग होंगे, उसके प्रथम भाग में विषघातक, दूसरे भाग में गोस्वामी अर्थात् गोपालक और तीसरे भाग में कुहक अर्थात् इन्द्रजाल के ज्ञाता जन होते हैं। तत्पश्चात् उत्तर दिशा और ईशान कोण के मध्य में जो तीन भाग होंगे, उनमें से प्रथम भाग में धनवान्, दूसरे भाग में ईक्षणीक अर्थात् दैवज्ञ ज्योतिषी और तीसरे भाग में माला बनाने वाले माली प्रभृति लोग रहते हैं।।३२।।

अन्येष्वप्याह–

वैष्णवश्चरकश्चैव वाजिनां रक्षणे रतः।
द्वात्रिंशदेवं भेदाः स्युः पूर्वदिग्भिः सहोदिताः।।३३।।

अन्य दिशाओं में कहते हैं–

ईशान-पूर्व के मध्यगत तीन भागों में क्रमशः वैष्णव-भक्तजन, गुप्तचर और अश्वपालक होते हैं। इस प्रकार पूर्वादिदिशाओं से प्रारम्भ कर ३२ भेद होते हैं।।३३।।

ऐशानीपूर्वयोरन्तरे त्रयस्त्रिभागास्तेषु प्रथमे वैष्णवो विष्णुभक्तः। द्वितीये चरकश्चरः। तृतीये वाजिनामश्वानां रक्षणे पालने रतः सक्तः। एवमनेनैव प्रकारेण द्वात्रिंशद्भेदाः पूर्वदिग्भिः प्रागुक्ताभिरष्टाभिर्दिग्भिः सह साकमुदिताः कथिताः स्युर्भवेयुः।।३३।।

ईशानकोण एवं पूर्वदिशा के बीच के तीन भागों में प्रथम विष्णुभक्त, द्वितीय में चरक अर्थात् गुप्तचर तथा तीसरे भाग में घोड़ों की रक्षा में लगे हुए लोग रहते हैं। इस प्रकार से पूर्वोक्त आठ दिशाओं के साथ बत्तीस भेद कहे गये हैं।।३३।।

अधुनाष्टासु दिक्ष्वधिपतीनाह–

राजा कुमारो नेता च दूतः श्रेष्ठी चरो द्विजः।
राजाध्यक्षश्च पूर्वाद्याः क्षत्रियाद्याश्चतुर्दिशम्।।३४।।

प्रमुख आठ दिशाओं के अधिपतियों को कहते हैं–

पूर्वादि आठ दिशाओं में क्रमशः राजा, राजकुमार, नेता, दूत, सेठ, गुप्तचर, विप्र और गज-प्रमुख का स्थान होता है। पूर्वादि प्रधान चार दिशाओं में क्रमशः क्षत्रिय, वैश्य, शूद्र और ब्राह्मण का स्थान है।।३४।।

राजा नृपः पूर्वस्यां दिशि। कुमारो राजपुत्र आग्नेय्याम्। नेता सेनापतिर्दक्षिणस्याम्। दूतो गमागमिको नैर्ऋत्याम्। श्रेष्ठी पश्चिमायाम्। चरो गूढपुरुषो वायव्याम्। द्विजो ब्राह्मण उत्तरस्याम्। गजाध्यक्षो हस्तिशालाध्यक्ष ऐशान्याम्। एते पूर्वाद्या ज्ञेया। क्षत्रियाद्याश्चतुर्दिशम्। पूर्वाद्यासु चतसृषु दिक्षु क्षत्रियाद्या वर्णाः। तद्यथा–पूर्वस्यां क्षत्रियाः। दक्षिणस्यां वैश्याः। पश्चिमायां शूद्राः। उत्तरस्यां ब्राह्मणाः।।३४।।

राजा पूरब दिशा में, कुमार अर्थात् राजपुत्र अग्निकोण में, नेता अर्थात् सेनापति दक्षिणदिशा में, दूत अर्थात् गमनागमन करने वाला नैर्ऋत्यकोण में, श्रेष्ठीजन पश्चिमदिशा में, चर अर्थात् गुप्तचर (गूढ पुरुष) वायव्य-कोण में, ब्राह्मण उत्तर दिशा में और हस्तीशाला का अध्यक्ष ईशानकोण में रहता है। इनको पूर्वादि क्रम से समझना चाहिए। पूर्वादि चार दिशाओं में क्षत्रियादि चातुर्वर्ण्य होते हैं। जैसा कि–पूर्वदिशा में क्षत्रिय, दक्षिणदिशा में वैश्य, पश्चिमदिशा में शूद्र और उत्तरदिशा में ब्राह्मण होते हैं।।३४।।

अथ चक्रस्य प्रविभागमाह–

गच्छतस्तिष्ठतो वापि दिशि यस्यां व्यवस्थितः।
विरौति शकुनो वाच्यस्तद्दिग्जेन समागमः।।३५।।

दिक्-चक्र के भागानुसार फल–

जिस दिशा के जिस भाग में जाते हुए अथवा बैठे हुए व्यक्ति के सम्मुख शकुन शब्द करता है, उस दिग्-भाग से सम्बन्धित पदार्थ का संयोग होता है।।३५।।

पुंसो गच्छतो यात्रायां व्रजतः। तिष्ठत एकदेशस्थस्य निश्चलस्य वाऽपि यस्यां दिशि व्यवस्थितः समवस्थितः। शकुनः प्राणी पक्षी वा विरौति शब्दं करोति, तद्दिग्जेन यस्यां दिशि यो जातस्तेन कथितेन सह तस्मिन् दिने तस्य समागमः संयोगो वाच्यो वक्तव्यः। यथेन्द्रानलदिशोर्मध्ये प्रथमत्रिभागस्थे शकुने कोशाध्यक्षेण सह संयोगः। द्वितीयेऽनलाजीविना। तृतीये। तापसेनेत्यादि सर्वत्रोदाहार्यम्।।३५।।

यात्रा हेतु गमन करता हुआ अथवा स्थिरता से बैठा हुआ व्यक्ति दिक्-चक्र के जिस किसी भाग में स्थित हो और उस समय शकुन-प्राणी अथवा शकुन पक्षी शब्द करता हो, तब जिस दिशा में वह जा रहा होता है, उसी दिशा सम्बन्धित व्यक्ति से उसका संयोग, उसी दिन हो जाता है। उदाहरणार्थ–पूर्व और अग्निकोण के तीन भागों में से प्रथम भाग में शकुन के होने पर कोशाध्यक्ष के साथ संयोग होगा। दूसरे भाग में अग्निजीवी तथा तीसरे भाग में शकुन के होने पर तापस के साथ संयोग होगा। इसी प्रकार से अन्य दिशाओं को भी समझे।।३५।।

अत्र शिष्यजनभ्रान्तिनिरासाय चक्रविन्यासः प्रदर्श्यते–



अधुना रुतान् शुभाशुभानाह–

भिन्नभैरवदीनार्तपरुषक्षामजर्जराः।

स्वना नेष्टाः शुभाः शान्तहृष्टप्रकृतिपूरिताः।।३६।।

शकुन-शब्दों के शुभाशुभत्व को कहते हैं–

छिन्न-भिन्न (टूटे) विच्छिन्न शब्द, भयङ्कर, दैन्यपूर्ण, कराहना, कठोर, पतला और जर्जरित शब्द शुभ नहीं होते हैं। शान्त, प्रसन्न तथा स्वाभाविकता से परिपूर्ण शब्द शुभकारी होते हैं।।३६।।

ये स्वनाः शब्दा भिन्ना विषमाः। भैरवाः क्रूराः। दीना दैन्यमागताः। जर्जरा भिन्नभाण्डसमुद्भूतशब्दसदृशाः। ते सर्व एव नेष्टा न शुभाः। ये स्वनाः शान्तेन शान्तदिक्स्थेनार्काभिमुखेन च हृष्टप्रकृतिना सहर्षेण पूरिताः कृतास्ते च शुभाः।।३६।।

जो शब्द भिन्न अर्थात् असमान (विषम), भैरव अर्थात् क्रूर (भंयकर), दीनता से पूर्ण, टूटे हुए के समान जर्जर शब्द, ये सभी नेष्ट अर्थात् शुभावह नहीं होते हैं। जो शब्द शान्त दिशा में, सूर्याभिमुख हों, माधुर्य पूर्ण हों, प्रसन्नता से भरे हुए हों, वे सभी शुभ होते हैं।।३६।।

विशेष व्याख्या–

विवृति में मूल श्लोक के कुछ शब्द छूट गये हैं। उनके अर्थ सामान्य हैं। मेरा श्लोकार्थ द्रष्टव्य है।

अथ यातुर्वामभागगता ये शुभा गतास्तेषां नामान्याह–

शिवा श्यामा रला छुच्छुः पिङ्गला गृहगोधिका।
सूकरी परपुष्टा च पुन्नामानश्च वामतः।।३७।।

यात्री के वामभागगत शुभशकुनों के नाम–

सियारिन, कबूतरी, रला, छुच्छुन्दरी, पिंगला, विछतूइया, सूकरी और कोयल ये सभी शकुन तथा पुरुषवाचक अन्य शकुन भी, वाम-भाग में शुभ होते हैं।।३७।।

शिवा शृगालिका। श्यामा पोतकी रला कलहकारिका। छुच्छुः छुच्छुन्दरी मूषकजातिः। पिङ्गला उलूकचेटिका गृहगोधिका पल्ली। सूकरी प्रसिद्धा परपुष्टा च कोकिला। ये चान्ये पुन्नामानः पुरुषसंज्ञास्ते यातुर्वामतो वामभागगताः शुभाः। उक्तं च–

शिवा अर्थात् सियारिन, श्यामा अर्थात् पोतकी, रला अर्थात् कलहकारी नामक पक्षी, छुच्छु अर्थात् मूषक जाति की छच्छुन्दरी, पिंगला अर्थात् उलूक-चेटिका नामक पक्षी, गृहगोधिका अर्थात् पल्ली (विच्छतुईया), सूकरी नाम से प्रसिद्ध प्राणी, परपुष्टा अर्थात् कोयल इनके साथ ही जो पुरुष संज्ञक शकुन हैं, वे सभी यात्रिक के वाम भाग में शुभ होते हैं। जैसा कि कहा गया है–

छुच्छुन्दरी सूकरिका शिवा च
श्यामा रला पिङ्गलिकाऽन्यपुष्टा।
शस्ताः प्रयाणे गृहगोधिका च
पुंसंज्ञिता ये च पतत्रिणः स्युः।।इति।।३७।।

छुच्छुन्दरी, सूकरी, शृंगालिका, श्यामा, रला, पिंगला, कोयल तथा विछतूईया तथा पुरुष संज्ञक शकुन-पक्षी यात्रा काल में शुभ होते हैं।।३७।।

विशेष व्याख्या–

सूकरी का अमरकोश में सन्दर्भ में नहीं है। मटमैले रंग की एक चिड़िया होती है, जिससे बदबूदार गन्ध निकलती है, बाल घने होते हैं और वर्षा एवं शरद् में कदम्ब आदि के वृक्षों पर इनका झुंड बैठता है। लोक-भाषा में इसे सूअरी (बादुर) कहा जाता है।

अथ यातुर्दक्षिणभागगता ये शुभास्तेषां नामान्याह–

स्त्रीसंज्ञा भासभषककपिश्रीकर्णधिक्करा:।

शिखिश्रीकण्ठपिप्पीकरुरुश्येनाश्च दक्षिणा:।।३८।।

यात्री के दक्षिणभाग-गत शुभ शकुनों को कहते हैं–

स्त्री संज्ञक सभी शकुन तथा भास पक्षी, भषक, कपि (वानर), श्रीकर्ण पक्षी, धिक्कर पक्षी, शिखि (मयूर), श्रीकण्ठ (नीलकण्ठ), पिप्पिका, रुरु तथा श्येन (बाज पक्षी), ये सभी दक्षिण भाग में शुभ होते हैं।।३८।।

ये च स्त्रीसंज्ञा: स्त्रीनामान:। तथा च भगवान् पराशर:–

स्त्री संज्ञक जो शकुन हैं, उनके नाम को भगवान् पराशर ने इस प्रकार कहा है–

"तेषां शिवागोधाकालकाराजपुत्रीभरद्वाजबलाकापोतकीसूकरिकापिप्पीकास्त्रुत-क्षिप्रचलापिण्डीकपिङ्गलाद्या स्त्रीसंज्ञा: शेषा: पुन्नामान:।"

"शिवा, गोधा, कालका, राजपुत्री, भरद्वाज, बलाका, पोतकी, सूकरिका, पिप्पिका, स्त्रुत, क्षिप्रचला, पिण्डीक, पिंगला आदि स्त्री-संज्ञक तथा शेष पुरुष संज्ञक हैं।"

तथा भास: पक्षी। भषक: करायिका। कपिर्वानर:। श्रीकर्ण: पक्षी। धिक्करो मृगजाति:। श्येनो वाजिक:। एते दक्षिणा यातुर्दक्षिणभागगता: शुभा:। उक्तं च–

इसके साथ ही भासपक्षी, भषक अर्थात् करायिका पक्षी, अर्थात् बन्दर, श्रीकर्ण पक्षी, धिक्कर नामक मृग की एक जाति, श्येन अर्थात् बाज पक्षी, ये सभी यात्री के दक्षिण भाग में शुभ होते हैं। कहा भी गया है–

श्येनो रुरु: पूर्वकुट: कपिश्च

श्रीकर्णधिक्कारकपिप्पिकाजा:।

स्त्रीसंज्ञिता ये च शिखिद्विपौ च

याने हिता दक्षिणभागसंस्था:।।इति।।३८।।

श्येन, रुरु, पूर्वकूट, कपि, श्रीकर्ण, धिक्कारक, पिप्पिका, अजा तथा स्त्री संज्ञक जो शकुन हैं तथा मयूर एवं हाथी यात्री के दक्षिण भाग में शुभ होते हैं।।३८।।

विशेष व्याख्या–

विवृति में शिखि, श्रीकण्ठ, पिप्पिका, रुरु की व्याख्या छूट गई है। श्लोकार्थ में मैंने इनको स्पष्ट कर दिया है।

अथान्येषामपि वामदक्षिणभागानां शुभाशुभफलमतिदिशन्नाह–

क्ष्वेडास्फोटितपुण्याहगीतशङ्खाम्बुनिःस्वनाः।

सतूर्याध्ययनाः पुंवत् स्त्रीवदन्या गिरः शुभाः।।३९।।

अन्य शकुनों के वाम-दक्षिण भाग का शुभाशुभत्व कहते हैं–

क्ष्वेडा अर्थात् ललकार, ताली बजाना, पुण्याह-वेदध्वनि, मङ्गल-गीत, शंख तथा जल से निकले शब्द, तूर्य (तुरहीवाद्य) और वेदाध्ययन के शब्द, ये सभी पुरुष शकुन के समान (वामस्थ) शुभ हैं। अन्य प्रकार के शब्द स्त्रीशकुन के समान (दक्षिण-भागस्थ) शुभ हैं।।३९।।

क्ष्वेडो मुखशब्दः, शोडनिकेति प्रसिद्धा। आस्फोटितं करशब्दः करास्फोटः, वक्षःस्थस्य बाहोर्द्वितीयहस्तेन ताडनम्। पुण्याहशब्दः प्रशस्तवादः। शङ्खः प्रसिद्ध एव। अम्बु जलम्। एषां सर्वेषां निःस्वनाः शब्दाः सतूर्याध्ययनाः, तूर्येण च सहिताः। अध्ययनशब्दा वेदानिर्घोषाः। एते सर्व एव पुंवयच्छुभाः। वामभागस्था इत्यर्थः। स्त्रीवदन्यः गिरः शुभाः। अन्याः सर्वा गिरो वाचः स्त्रीवच्छुभाः। माङ्गलिकवाचा दक्षिणभागस्थाः शुभा इत्यर्थः। उक्तं च–

क्ष्वेड अर्थात् मुख के शब्द जिसे शोडनिका कहा जाता है, आस्फोटित अर्थात् हाथ से बजाये गये शब्द, जो वक्ष पर स्थित हाथ पर दूसरे हाथ से ताडन द्वारा शब्द निकले, वह करास्फोट होता है। पुण्याह शब्द अर्थात् प्रशस्त (उत्तम) कथन, प्रसिद्ध शंख तथा जल की ध्वनि, इन सभी ध्वनियों के साथ तूर्य (तुरही) की ध्वनि और अध्ययन अर्थात् वेदध्वनि, ये सभी पुरुष शुकन के समान अर्थात् वाम भाग में शुभ हैं। अन्य शब्द स्त्री के समान अर्थात् अन्य सभी शब्द स्त्री शकुन के समान शुभ हैं। माङ्गलिक ध्वनियाँ दक्षिण-भाग में शुभ होती हैं। यह तात्पर्य है। कहा गया है–

आक्ष्वेडितस्फोटितशङ्खतूर्यपुण्याहगीतध्वनिगीतशब्दाः ।

वामाः प्रशस्ताः शुभदा नराणामाक्रन्दितो दक्षिणतः परेषाम् ।।इति।।३९।।

आक्ष्वेडित, स्फोटित, शंख, तूर्य, पुण्याह-वाचन, गीतध्वनि, गीतशब्द, ये वाम-भाग में शुभ होते हैं। अन्य शब्द यात्री के लिए दक्षिण-भाग में शुभ होते हैं।।३९।।

विशेष व्याख्या–

'क्ष्वेडा' शब्द मुख से की गई ध्वनि के लिए निर्दिष्ट है। अमरकोश १.९.९ में "क्ष्वेडस्तु गरलं विषम्' तथा २.८.१०७ में "क्ष्वेडा तु सिंहनादः स्यात्" तथा ३.३.४३ में "क्ष्वेडा वंशशलाकापि" कहा गया है। मेदिनी में–"क्ष्वेडो ध्वनौ कर्णामये विषे। क्ष्वेडा वंशशलाकायां सिंहनादे च योषिति" कहा गया है। मुख द्वारा जोर से निकले हुए शब्द का ही प्रकृत-प्रसंग में अभिप्राय है।

अधुना ग्रामस्वराणां शुभाशुभत्वमाह–

ग्रामौ मध्यमषड्जौ तु गान्धारश्चेति शोभनाः।
षड्जमध्यमगान्धारा ऋषभश्च स्वरा हिताः।।४०।।

गान-स्वरों का शुभाशुभत्व कहते हैं–

मध्यम, षड्ज और गान्धार ग्रामस्वर (संगीत के स्वर) शुभ होते हैं। इसी प्रकार षड्ज, मध्यम, गान्धार और ऋषभ स्वर हितकारक होते हैं।।४।।

विशेष–स्वरों के लिए परिशिष्ट द्रव्य है।

याने यात्रायां ग्रामौ मध्यषड्जौ तु शस्तौ शोभनौ। गान्धारश्चेति शोभन एव। इतिशब्दः प्रकारार्थः। स च गान्धारो देवेषु गीयते। मानुषेषु तथा षड्ज-मध्यमगान्धारा ऋषभश्चेति स्वराः शस्ताः। उक्तं च–

यात्रा काल में मध्यम एवं षड्ज ग्राम प्रशस्त है। गान्धार ग्राम (स्वर) भी शुभ हैं। 'इति' शब्द अन्य प्रकार का सूचक है। गान्धार-स्वर देवाराधन में गाया जाता है। षड्ज, मध्यम, गान्धार और ऋषभ स्वर मनुष्यों के लिए शुभ होते हैं। जैसा कि कहा गया है–

गान्धारषड्जऋषभः खलु मध्यमश्च
याने स्वराः शुभकरा न तु येऽवशेषाः।
ग्रामौ शुभावपि हि मध्यमषड्जसंज्ञौ
गान्धारगीतमपि भद्रमुशन्ति देवाः।।४०।।

गान्धार, षड्ज, ऋषभ और मध्यम स्वर यात्रा में शुभ होते हैं। शेष अन्य स्वर शुभ नहीं होते हैं। मध्यम एवं षडज् ग्राम (स्बर) होते हैं। गान्धार-गानस्वर को देवगण कल्याणकारक मानते हैं।।४०।।

अथान्यच्छुभाशुभशकुनमाह—

रुतकीर्तनदृष्टेषु भारद्वाजाजबर्हिणः।
धन्या नकुलचाषौ च सरटः पापदोऽग्रतः।।४१।।

अन्य शुभाशुभ शकुनों को कहते हैं–

भारद्वाज (भरदूल) पक्षी, बकरा और मयूर इनका शब्द करना, संस्मरण करना तथा दर्शन शुभ होता है। नकुल (नेवला) और चाख पक्षी भी शुभ होते हैं। सरट (सरगट) यात्रा काल में आगे पड़े तो शुभ नहीं होता है॥४१॥

भरद्वाज पक्षिविशेषः। लाटेति प्रसिद्धः। अजश्छागः। बर्हो मयूरः। एते सर्वे रुतेन शब्देन कीर्तनेन नामसङ्कीर्तनेन दृष्टेन दर्शनेन च धन्याः शुभाः। नकुलचाषौ, नकुलः प्राणी, चाषः पक्षिविशेषः। एतावपि च शब्दौ धन्यावेव रुतकीर्तनदृष्टेष्विति। सरटः प्राणी पक्षिभेदः। कृकलास इति केचित्। स चाग्रतः पुरतः पापदोऽनिष्ट-फलः।।४१।।

भरद्वाज नामक एक पक्षिविशेष है जिसे 'लाट' भी कहा जाता है, अज अर्थात् छाग (बकरा), बर्ह अर्थात् मयूर–ये सभी रुत अर्थात् शब्द (ध्वनि), कीर्तन अर्थात् नाम-चर्चा और प्रत्यक्ष दर्शन द्वारा शुभ होते हैं। नकुल नामक प्राणी (नेवला) और चाष नामक पक्षी, ये दोनों शब्द, कीर्तन और दर्शन द्वारा शुभ होते हैं। सरट नामक प्राणी पक्षियों का एक भेद है और कुछ लोग इसको कृकलास (सरगट) कहते हैं, यह सामने आने पर पाप अर्थात् अनिष्टफल करने वाला होता है॥४१॥

अथान्यदप्याह—

जाहकाहिशशक्रोडगोधानां कीर्तनं शुभम्।
रुतं सन्दर्शनं नेष्टं प्रतीपं वानरर्क्षयोः।।४२।।

और भी कहते हैं–

जाहक, सर्प, खरगोश, सूअर और गोधा (गोह) इन सभी का नाम-स्मरण करना शुभ है, परञ्च इनकी ध्वनि अथवा दर्शन शुभ नहीं होता है। वानर और ऋक्ष (भालू) इनका विपरीत फल कहा गया है॥४२॥

जाहकः प्राणी। अहिः सर्पः। शशः प्राणी। क्रोडः सूकरः। गोधा प्राणिविशेषः। एतेषां कीर्तनं नामग्रहणं शुभम्। एतेषामेव रुतं शब्दः सन्दर्शनमवलोकनं नेष्टमशुभम्। प्रतीपं वानरर्क्षयोः, वानरः, कपिः, ऋक्षः प्राणी। एतयो प्रतीपमेतद्विपरीतम्। एतयो रुतं सन्दर्शनमिष्टम्, न कीर्तनमित्यर्थः। उक्तं च—

जाहक नामक प्राणी, अहि अर्थात् साँप, क्रोड अर्थात् सूअर, गोधा नामक विशेष प्राणी (गोह), इनका कीर्तन अर्थात् नाम लेना शुभ होता है। इनका रुत अर्थात् शब्द और सन्दर्शन अर्थात् देखा जाना अशुभ होता है। वानर (कपि), ऋक्ष अर्थात् भालू इन दोनों का इससे विपरीत फल है। इन दोनों की बोली और दर्शन शुभ फल करता है, जबकि नाम लेना नेष्ट होता है। जैसा कि कहा गया है–

भारद्वाजजवन्तिचाषनकुलाः सङ्कीर्तनाद् दर्शनात्

क्रोशन्तश्च शुभप्रदा न सरटो दृष्टः शिवाय क्वचित्।

गोधासूकरजाहकाहिशशकाः पापा रुतालोकने

धन्यं कीर्तनमृक्षवानरकलं तद्व्यत्ययाच्छोभनम् ।।इति।।४२।।

भारद्वाज, जवन्ती, चाष, नकुल-इनका स्मरण, दर्शन और ध्वनि का श्रवण शुभ होता है। सरट किसी भी रूप में कल्याणकारी नहीं होता है। गोधा, सूअर, जाहक, सर्प, इनकी ध्वनि और दर्शन अशुभ होता है। इनका स्मरण शुभ है। ऋक्ष (भालू) और वानर का इसके विपरीत फल जानना चाहिए।।४२।।

अन्यदप्याह–

ओजाः प्रदक्षिणं शस्ता मृगाः सनकुलाण्डजाः।

चाषः सनकुलो वामो भृगुराहापराह्णतः।।४३।।

और भी कहते हैं–

मृग, नकुल और अण्डज जीव, ओज अर्थात् विषम संख्या में हों, तथा दाहिनी ओर निकलें तो शुभ होते हैं। चाख पक्षी तथा नेरला वामभाग में गमन करें तो शुभ हैं। आचार्य भृगु ने कहा है कि ये वामभाग में अपराह्ण के बाद गमन करें तभी शुभ हैं।।४३।।

मृगा हरिणाः। सनकुलाण्डजा नकुलाः प्राणिनः अण्डजाः पक्षिणः। ते चोजा विषमसङ्ख्याः। एकस्त्रयः, पञ्च, सप्त, नव इत्यादि। प्रादक्षिण्येन शस्ताः शुभाः। यातुर्वामपार्श्वादग्रत आगत्य प्रदक्षिणेन पार्श्वेन क्रामति यत् तत् प्रदक्षिणं सव्यं च। एतद्विपरीतं दक्षिणपार्श्वाद्वामपार्श्वगमनं यत् तदपसव्यम्। एतत्सर्वं शाकुने विज्ञेयम्। यस्मादाचार्य एव ज्ञापकः–

मृग अर्थात् हरिण, नकुल-प्राणी और अण्डज अर्थात् पक्षी, ये सभी विषम संख्या में १, ३, ५, ७, ९ आदि की संख्या में प्रदक्षिण होने पर शुभ होते हैं। यात्री के बाँए भाग से सामने आकर दक्षिणभाग में चले जायें तो उसे प्रदक्षिणगमन अथवा सव्य-गमन कहा जाता है। इसके विपरीत दक्षिणभाग से आकर वामभाग में जाने को

अपसव्य-गमन कहा जाता है। इन सभी का विशेष ज्ञान शकुन विचार में करना चाहिए। जैसा आचार्य वराहमिहिर ने (८५/२९) सूचित किया है–

[1]ऐन्द्रानलदिशोर्मध्ये त्रिभागेषु व्यवस्थिताः।

कोशाध्यक्षानलाजीवितपोयुक्ताः प्रदक्षिणम्।।इति।

पूर्व एवं अग्निकोण के मध्य तीन भागों में प्रदक्षिण क्रम से क्रमशः कोषाध्यक्ष, अग्निजीवी और तपस्वीजन व्यवस्थित रहते हैं।

चाषः सनकुलो वाम इति। चाषः सनकुलो नकुलेन सहितो वामो वाम-भागगतो धन्यः। भृगुराहापराह्णतः, भृगुर्नाम मुनिरेवमाहोक्तवान्। यथाऽपराह्णतोऽपराह्णात् परतो वामगौ धन्यौ, न पूर्वाह्णे।। तथा भृगुः–

नकुल सहित चाष वामभाग में जाने पर शुभ है। भृगुनामक मुनि ने कहा है कि अपराह्न (दोपहर बाद) के पश्चात् वामभाग में उक्त दोनों का गमन शुभ होता है, पूर्वाह्न में नहीं। जैसा कि भृगु का वाक्य है–

वामगौ चाषनुकलावपराह्णे शुभप्रदौ।

श्वशृगालयोरिदं व्यत्यासेन फलं प्रशस्यते। चाषो नकुलश्च वामगो दिवसार्धात् परतः शुभप्रदः।।४३।।

"अपराह्न में वामभागगत चाख और नकुल शुभ प्रदायक होते हैं।"

कुत्ते और सियार का इसके विपरीत क्रम से गमन शुभ हैं। अर्थात् पूर्वाह्न में वामभाग में गमन शुभ है। चाख, नकुल दिनार्ध के बाद वामभाग में गमन करें तो शुभ हैं।।४३।।

अथान्येषामप्याह–

छिक्करः कूटपूरी च पिरिली चाह्नि दक्षिणाः।

अपसव्याः सदा शस्ता दंष्ट्रिणः सबिलेशयाः।।४४।।

अन्य प्राणियों के लिए भी कहते हैं–

छिक्कर, कूटपूरी और पिरली ये दिन में, दक्षिण भाग में गमन करें तो शुभ हैं। दन्तुल और बील में रहने वाले जीव सदैव अपसव्य अर्थात् वामभाग में जाने पर शुभ होते हैं।।४४।।

---

१. अस्यैवाध्यायस्य २९ श्लोकः।

छिक्करः शृगालः, कूटपूरी करायिका, पिरिली पक्षिविशेषः, तेऽह्नि दिवसे दक्षिणाः शस्ताः। दंष्ट्रिणो वराहादयः। बिले शेरते ते बिलेशयाः श्वाविद्नकुलादयः। दंष्ट्रिणो बिलेशयैः सह अपसव्या वामभागगताः शस्ता शोभना।।४४।।

छिक्कर अर्थात् सियार, कूटपूरी अर्थात् करायिका तथा पिरिली नामक पक्षी, ये सभी दिन में दक्षिण-गत होने पर शुभ होते हैं। दंष्ट्री अर्थात् दाँतों वाले सूअर आदि पशु तथा विलेशय अर्थात् बिल में शयन करने वाले कुत्ते, नेवले ये सभी अपसव्य अर्थात् वामभाग में गमन करें तो शस्त अर्थात् शुभ होते हैं।।४४।।

अधुना दिग्वशेन शाकुनानां शुभाशुभमाह—

श्रेष्ठे हयसिते प्राच्यां शवमांसे च दक्षिणे।
कन्यकादधिनी पश्चादुदग्गोविप्रसाधवः।।४५।।

दिशा के अनुसार शकुनों के शुभाशुभ को कहते हैं–

अश्व और श्वेत पदार्थ पूर्व दिशा में प्रशस्त होते हैं। शव और मांस दक्षिण दिशा में शुभ हैं। कन्या, दधि पश्चिमदिशा में तथा गाय, ब्राह्मण एवं साधु-जन उत्तर दिशा में शुभ होते हैं।।४५।।

हयोऽश्वः। सितः श्वेतवर्णो यः कश्चिद्वस्तुरूपः। एते प्राच्यां पूर्वदिशि यातुः श्रेष्ठे शोभने। शवो मृतपुरुषः। मांसमामिषम्। एते दक्षिणे दक्षिणस्यां दिशि शुभे। कन्यका कुमारी। दधि क्षीरविकारः। एते पश्चिमे पश्चिमायां दिशि शोभने। गौः प्रसिद्धा। विप्रो ब्राह्मणः। साधुः सज्जनः। एत उदग् उत्तरस्यां दिशि शोभनाः। उक्तं च—

अश्व अर्थात् घोड़ा तथा जो कुछ भी श्वेत वर्ण की वस्तु हो, वह पूरब दिशा में हो, तब यात्रा करने वाले के लिए श्रेष्ठ अर्थात् शुभ होते हैं। शव अर्थात् मृतक एवं मांस अर्थात् आमिष, ये दक्षिण दिशा में शुभ होते हैं। कुमारी कन्या एवं दही (दुग्ध से निर्मित), ये पश्चिम दिशा में शुभ होते हैं। विप्र अर्थात् ब्राह्मण, साधु अर्थात् सज्जन पुरुष, गाय (प्रसिद्ध पशु) ये सभी उत्तर दिशा में शुभ होते हैं। जैसा कि कहा गया है–

द्रव्याणि श्वेतानि तुरङ्गमश्च
पूर्वेण याम्येन शवं समांसम्।
पश्चात् कुमारी दधि चाति-शस्तं

सौम्येन गोब्राह्मणसाधवश्च।।इति।।४५।।

श्वेत-द्रव्य और घोड़े पूर्व दिशा में तथा मृतक एवं मांस दक्षिण दिशा में और पश्चिम दिशा में कुमारी कन्या तथा दही शुभ है। गो-ब्राह्मण और साधु उत्तर दिग्गत शुभ होते हैं।।४५।।

अथाशुभानाह–

जालश्वचरणौ नेष्टौ प्राग्याम्यौ शस्त्रघातकौ।

पश्चादासवषण्ढौ च खलासनहलान्युदक्।।४६।।

अशुभ शकुनों को कहते हैं–

पूर्व दिशा में जाल तथा कुत्ते की सहायता से कार्य करने वाले (शिकारी) शुभ नहीं होते हैं। दक्षिण दिशा में शस्त्र तथा वधिक शुभ नहीं है। पश्चिम दिशा में मदिरा एवं नपुंसक अशुभ हैं। इसी प्रकार उत्तर दिशा में दुर्जन, आसन, हल शुभ नहीं होते हैं।।४६।।

जालः प्रसिद्धः। सूत्रतन्तुविरचितो जालः पक्षिणो यत्र बध्यन्ते। जालेन चरति शुना चरतीति जालश्वचरणौ। एतौ प्राक् पूर्वस्या दिशि नेष्टावशुभौ। शस्त्रमायुधवर्जितमन्यद्यत् किञ्चित्। घातको बधिकः। एतौ याम्यायां दक्षिणस्यां दिशि न शुभौ। आसवः पानविशेषः। षण्ढः क्लीबः। एतौ पश्चात् पश्चिमायां दिशि न शुभौ। खलो दुर्जनः। आसनं प्रसिद्धम्। पर्यङ्कादि। हलं लाङ्गलम्। एतान्युदगुत्तरस्यां दिशि न शोभनानि। उक्तं च–

जाल अर्थात् सूत के धागों से विनिर्मित पक्षियों को पकड़ने का तन्तुपट, जाल से आजीविका चलाने वाले तथा शून (कुत्ते) के द्वारा आजीविका हेतु विचरण करने वाला, दोनों प्रकार के व्यक्ति पूर्वदिशा में शुभ नहीं होते हैं। शस्त्र अर्थात् आयुधरहित अर्थात् अन्य प्रकार के मारकशस्त्र वाले तथा घात करने वाले व्यक्ति दक्षिणदिशा में शुभ नहीं होते हैं। आसव अर्थात् विशेष प्रकार का पेय-पदार्थ और षण्ढ अर्थात् नपुंसक, ये पश्चिमदिशा में शुभ नहीं होते हैं। खल अर्थात् दुष्ट, पलङ्गादि आसन, हल अर्थात् लाङ्गल,, ये सभी उत्तर-दिशा में शुभ नहीं होते हैं। जैसा कि कहा गया है–

जालकरश्वकरौ न शुभौ प्राग् घातकशस्त्रकरौ यमदिक्स्थौ।

षण्ढकमद्यकरावपि पश्चादासनशीरखलैः सह चोदक्।।इति।।४६।।

जाल और कुत्तों से सम्बन्धित व्यक्ति, पूर्वदिशा में शुभ नहीं होता है। घातक तथा शस्त्रधारी दक्षिणदिशा में शुभ नहीं हैं। षण्ढ और मद्यकर पश्चिम-दिशा में शुभ

नहीं हैं। आसन, हल और खलजन उत्तरदिशा में अशुभ होते हैं।।४६।।

अधुना कर्मादौ शकुनानां विशेषमाह–

कर्मसङ्गमयुद्धेषु प्रवेशे नष्टमार्गणे।
यानव्यस्तगता ग्राह्या विशेषश्चात्र वक्ष्यते।।४७।।

कर्मानुसार शकुनों की विशेषता कहते हैं–

कोई भी कर्म, सङ्गम (मिलन), युद्ध, प्रवेश और नष्टवस्तु के अन्वेषण में यात्राकालिक शकुनों से विपरीत शकुनों का ग्रहण करना चाहिए। इस सम्बन्ध में विशेष विचार आगे किया जायेगा।।४७।।

कर्म यत् किञ्चित् क्रियते। सङ्गमः केनचिद्वृद्धादिना सह संयोगः। युद्धः संग्रामम्। एतेषु। तथा प्रवेशे गृहप्रवेशादौ। नष्टमार्गणे नष्टस्यापहृतस्य वस्तुनो मार्गणेऽन्वेषणे। एतेषु सर्वेषु यानव्यस्तगता ग्राह्याः। याने यात्रायां येन प्रकारेणोक्तास्तद्व्यत्ययेनैतेषु ग्राह्याः। एतदुक्तं भवति–यात्रायां ये दक्षिणे शस्तास्तेऽत्र वामतः। यात्रायां वामतस्तेऽत्र दक्षिणतः। यात्रायां ये च पुरस्तात् तेऽत्र पृष्ठतः। यात्रायां ये च पृष्ठतस्तेऽत्राग्रत इति। दिक्ष्वप्येवमेव विपर्यया विज्ञातव्याः। तेन यात्रायां ये पूर्वस्यां दिशि तेऽत्र पश्चिमायाम्। ये च पश्चिमायां ते च पूर्वस्याम्। ये च दक्षिणास्यां त उत्तरस्याम्। य उत्तरस्यां ते दक्षिणस्यामिति। अत्रास्मिन्नर्थे कर्मसङ्गमादिके यो विशेषः स वक्ष्यते कथयिष्यते। उक्तं च–

कर्म अर्थात् जो कुछ भी किया जाता है, सङ्गम अर्थात् किसी वृद्धादि व्यक्ति से संयोग, युद्ध अर्थात् संग्राम, इन सभी में तथा गृह-प्रवेश इत्यादि में और नष्ट वस्तु के अन्वेषण में, यात्रा के विपरीत शकुन का ग्रहण करना चाहिए। यान अर्थात् यात्रा के लिए जिस प्रकार से शकुनों का विचार किया गया है, उसके विपरीत इन कार्यों में ग्रहण करना अभीष्ट है। इसका अभिप्राय यह है कि यात्रा काल में जो शकुन दक्षिण दिशा में प्रशस्त होते हैं, वे यहाँ पर वाम-दिशा में ग्राह्य हैं। इसी प्रकार यात्रा में वामभाग के शकुन यहाँ पर दक्षिणदिशा में शुभ होते हैं। यात्रा में जो आगे शुभ हैं, वे यहाँ पर पृष्ठभाग में तथा पृष्ठभाग वाले अग्रभाग में शुभ माने जाते हैं। दिशाओं में भी इसी प्रकार से विपरीत क्रम समझना चाहिए। यात्रा में जो शकुन पूर्वदिशा में ग्राह्य है, वह यहाँ पर पश्चिम-दिशा में जानना चाहिए। जो पश्चिमदिशा में शकुन अनुकूल होते हैं, उनको पूर्व-दिशा में और दक्षिण के शकुन को उत्तरदिशा में तथा उत्तर दिशा के शकुन को दक्षिणदिशा में शुभ कहा गया है। इस कर्मानुसार शकुन का

विवेचन आगे किया जायेगा। जैसा कि कहा गया है–

नष्टावलोकनसमागमयुद्धकर्म–
वेश्मप्रवेशमनुजेश्वरदर्शनेषु।
वृद्धागमेषु शुभकर्मषु चैव नित्यं
यानप्रतीपविधिना शुभदा भवन्ति।।इति।।४७।।

नष्टवस्तु का अन्वेषण, समागम, युद्ध, गृह-प्रवेश तथा राजा का दर्शन इत्यादि कर्म, यात्रा में ग्राह्यशकुनों से विपरीत होकर शुभदायक होते हैं।।४७।।

अथात्रैव विशेषमाह–

दिवा प्रस्थानवद्ग्राह्याः कुरङ्गरुरुवानराः।
अह्नश्च प्रथमे भागे चाषवञ्जुलकुक्कुटाः।।४८।।
पश्चिमे शर्वरीभागे नप्तृकोलूकपिङ्गलाः।
सर्व एव विपर्यस्ता ग्राह्याः सार्थेषु योषिताम्।।४९।।

यहाँ पर विशेष विचार करते हैं–

दिन में मृग, रुरु और वानर को यात्रा के समान ही ग्रहण करना चाहिए। दिन के प्रथमभाग में चाष, वञ्जुल और कुक्कुट (मुर्गा) का ग्रहण करना चाहिए। रात्रि के उत्तरार्द्ध भाग में नप्तृका, उलूका और पिङ्गला इन सभी पक्षियों को यात्रानुसार ही ग्रहण करना चाहिए। स्त्री यात्री के लिए सभी शकुनों को विपरीत क्रम में ग्रहण करना चाहिए।।४८-४९।।

दिवा प्रस्थानवदिति। कर्मादिषु दिवा दिवसे। कुरङ्गरुरुवानराः, कुरङ्गो हरिणः, रुरुर्मृगजातिः, वानरः कपिः, एते प्रस्थानवद् ग्राह्याः। यथा प्रस्थाने यात्रायां गृह्यते तथात्रापि। अह्नो दिवसस्य प्रथमे भाग चाषवञ्जुलकुक्कुटाः सर्व एते पक्षिणः प्रस्थानवद् ग्राह्यः।।४८।।

कर्मादि के लिए दिन में कुरङ्ग अर्थात् हरिण, रुरु नामक मृग-जाति, वानर अर्थात् कपि; इनको प्रस्थान के समान ही ग्रहण करना चाहिए। जिस प्रकार प्रस्थान अर्थात् यात्रा काल में इन शकुनों का शुभाशुभ विचार किया जाता है, उसी प्रकार यहाँ पर कर्मादि में भी ग्रहण करना चाहिए। दिन के प्रथम-भाग में चाष, वञ्जुल और कुक्कुट; इन सभी पक्षियों का प्रस्थान के समान ही शकुन विचार ग्राह्य है।।४८।।

शर्वरी रात्रिः, तस्याः पश्चिमेऽन्त्ये भागे। नप्तृका उलूका पिङ्गला एते सर्व एव पक्षिणः। पिङ्गलोलूकचेटिका, एते प्रस्थानवद् ग्राह्याः। योषितां स्त्रीणां

केवलानां सर्वेषु सर्व एव विपर्यस्ता विपरीतगता ग्राह्याः। यात्रायां कर्मसङ्गमादिष्वपि सर्वत्र विपरीता ग्राह्या इति।।४९।।

शर्वरी अर्थात् रात्रि के पश्चिम अर्थात् अन्तिम भाग में नप्तृका, उलूका और पिङ्गला ये सभी पक्षी "पिङ्गलालोलूकचेटिका" के यात्राकाल में कथित फल के समान ही फल ग्राह्य हैं। केवल स्त्रियों के यात्राकाल में सभी शकुनों का विपरीत फल ग्रहण करना चाहिए। यात्रा में तथा कर्मसंयोगादि में भी विपरीत फल ग्रहण करना चाहिए।।४९।।

अन्यदप्याह—

नृपसन्दर्शने ग्राह्यः प्रवेशेऽपि प्रयाणवत्।
गिर्यरण्यप्रवेशेषु नदीनां चावगाहने।।५०।।
वामदक्षिणगौ शस्तौ यौ तु तावग्रपृष्ठगौ।

और भी कहते हैं—

राजदर्शन और प्रवेश में भी यात्रा के समान ही शकुन का ग्रहण करें। पर्वत तथा वन-प्रवेश में और तीर्थस्नान में, जो शकुन यात्राकाल में वाम तथा दक्षिण-भाग में प्रशस्त होते हैं, उनको यहाँ पर अग्रभाग एवं पृष्ठप्रवेश में शुभ मानना चाहिए।।५०।।

नृपो राजा तस्य सन्दर्शनेऽवलोकने। यद्यपि प्रवेशो राजगृहे भवति, तथापि प्रयाणवद् ग्राह्यः। एवं यद्यपि प्रवेशस्तथापि तस्मिन् प्रयाणवद् ग्राह्यः। उक्तं च—

नृप अर्थात् राजा के दर्शन का विचार किया जा रहा है। यद्यपि राजगृह में प्रवेश होता है, तथापि यात्रानुसार ही शकुन का ग्रहण करें। यहाँ पर जो प्रवेश होता है इसमें प्रयाण के समान ही विचार करें। जैसा कि कहा गया है—

केचिज्जगुर्गमनवन्नृपदर्शनेषु....इति।

गिरिप्रिवेशे पर्वतप्रवेशे। अरण्यप्रवेशे अटव्याम्। नदीनां सरितामेवावगाहने उत्तरणे।।५०।।

कुछ विद्वानों के अनुसार यात्रा के समान ही राजदर्शन का भी निर्देश किया गया है।

गिरि अर्थात् पर्वतीय क्षेत्र में प्रवेश करते समय, अरण्य प्रदेश अर्थात् वन में प्रवेश करते समय, नदियों को पार करते समय, जो शकुन यात्राकाल में वाम तथा दक्षिणभाग में प्रशस्त कहे गये हैं, वे यहाँ पर प्रवेशदिशा से अग्रदिशा तथा पृष्ठदिशा में प्रशस्त होते हैं। यात्रा में जो शकुन वामदिशा में शुभ होते हैं, वे यहाँ पर

सम्मुखदिशा में और जो यात्रा में दक्षिणदिशा में ग्राह्य हैं, उनको यहाँ पर पीछे की दिशा में ग्रहण करना चाहिए।।५०।।

यौ शकुनौ यात्रायां वामदक्षिणगौ शस्तौ तावग्रपृष्ठगाविति प्रवेशादिशि सस्तौ। यात्रायां ये वामतः शस्तास्तेऽत्राग्रतः पुरतः। यात्रायां ये दक्षिणतस्तेऽत्र पृष्ठत इति।

अथान्येष्वाह–

क्रियादीप्तौ विनाशाय यातुः परिघसंज्ञितौ।।५१।।

तावेव तु याथाभागं प्रशान्तरुतचेष्टितौ।

शकुनौ शकुनद्वारसंज्ञितावर्थसिद्धये।।५२।।

अन्य भी कहते हैं–

यात्री के दोनों तरफ यदि क्रिया-दीप्त शकुन हों तो यात्री का विनाश होता है। वे यदि प्रशान्त-ध्वनि और चेष्टा वाले हों, तब उस शकुन की 'शकुन-द्वार' संज्ञा होती है, जो कि उद्देश्यों को सिद्ध करने वाली है।।५१-५२।।

क्रियादीप्तस्य लक्षणं प्रागुक्तम्–"१क्रियादीप्तो गतस्थानभावस्वर-विचेष्टितैः" इति। क्रियादीप्तौ शकुनौ यातुर्जिगमिषोर्यदि परिघसंस्थितौ उभयपार्श्वस्थितौ भवतस्तदा विनाशाय यातुरेव भवतस्तावेव शकुनौ परिधसंज्ञितौ।।५१।।

क्रिया-दीप्त का लक्षण श्लोक १५ में कहा जा चुका है–"गतस्थान-भावस्वरविचेष्टितैः" इत्यादि। इस प्रकार के क्रिया-दीप्त शकुन यदि यात्री के परिघ में अर्थात् दोनों पार्श्व-भाग में स्थित हों, तब यात्रिक के विनाश के लिए ये परिघ नामक शकुन हैं।।५१।।

यथाभागं यथास्थितौ भवतः। यः शकुनो दक्षिणस्थितः स च तत्रैव शुभः, यश्च वामभागस्थः स च वामभाग एव शुभः। तौ च प्रशान्तरुतचेष्टितौ, प्रशान्तं रुतं शब्दश्चेष्टितं च यतोस्तौ तथाभूतौ शकुनौ शकुनानां शुभानामर्थानां द्वारसंज्ञितौ मार्गभूत वर्थानां च सिद्धये भवतः।।५२।।

जो शकुन दक्षिणभाग में हो, वह उसी भाग में शुभ और जो वामभाग में स्थित हो वह वामभाग में ही शुभ होता है। वे दोनों प्रशान्तरुत अर्थात् शान्त-ध्वनि तथा

---

१. अस्यैवाध्यायस्य १५ श्लोकः।

चेष्टा वाले हों, तब इस प्रकार के शकुन शुभ अर्थों के द्वार अर्थात् शुभ-मार्ग हीं समझें जाते हैं, जिनसे वाञ्छित अर्थ की सिद्धि होती है।।५२।।

अधुना मतान्तरेण शकुनद्वारमाह—

केचित् तु शकुनद्वारमिच्छन्त्युभयतः स्थितैः।
शकुनैरेकजातीयैः शान्तचेष्टाविराविभिः।।५३।।

अब मतान्तर से शकुन-द्वार बतलाते हैं—

कुछ आचार्यों का अभिमत है कि एक जाति के ही शकुन दोनों भाग में स्थित हों तथा शान्तचेष्टा एवं शान्त ध्वनि वाले हों, तब वे शकुन-द्वार हैं।।५३।।

चेष्टालक्षणं वक्ष्यति—"[१]तिथिवाय्वर्कभस्थानचेष्टादीप्ता यथाक्रमम्।" एवं शान्तचेष्टा विरावः शब्दश्च येषां तैः शकुनैरेकजातीयैरेकयोन्युद्भवैरुभयतः स्थितैः पार्श्वद्वयगतैः केचित् शकुनद्वारमिच्छन्ति कथयन्ति। तथा च नन्दिः—

यदि चाषस्य काकेन वायसेन सह विरुद्धतः कलहं कुर्वतः काकाद् दक्षिणभागगतस्य चाषस्य पराजयः, तदा तस्मिन् काले प्रयातस्य गतस्य नरस्य पुरुषस्य वधो मरणं भवति। विपर्यये विपरीते काकादुत्तरभागे गतस्य जयः प्रदिष्ट उक्तः। जये सति प्रयातस्य जय एव। उक्तं च–

पूर्णाननो यस्य करोति चाषः
प्रदक्षिणं स्वस्तिकमेव वा खे।
लाभो महांस्तस्य पराभवाय
काकेन भङ्गो विजयो जयश्च।।इति।।२४।।

यदि चाखपक्षी का कौवे के साथ युद्ध करते हुए कौवे से दक्षिणभाग में गये हुए चाख की पराजय हो जाती है, तब उस समय यात्रा के लिए निकले व्यक्ति का मरण होता है। इसके विपरीत कौवे से उत्तरभाग में गए हुए चाख से विजय कहा गया है। चाख के जीतने पर यात्री की विजय होती है। जैसा कि कहा गया है–

आहार से भरे हुए मुखवाला चाख दक्षिणभाग में हो अथवा आकाश में स्वस्तिक के क्रम में उड़ता हुआ हो तो उस समय यात्री को प्रचुर लाभ होता है। यदि कौवे के साथ युद्ध में चाख पराजित हो जाये तो यात्री की पराजय और चाख के जीतने परयात्री की जय होती है।।२४।।

अन्यदप्याह–

केकेति पूर्णकुटवद्यदि वामपार्श्वे
चाषः करोति विरुतं जयकृत् तदा स्यात्।
क्रेक्रेति तस्य विरुतं न शिवाय दीप्तं
सन्दर्शनं शुभदमस्य सदैव यातुः।।२५।।

और भी कहते हैं–

यात्री के वामभाग में पूर्णकूट पक्षी के समान "केका" शब्द यदि चाख करता है तब उसके लिए जयकारक होता है। चाख का "क्रेक्रे" शब्द दीप्त होता है जो कि शुभदायक नहीं होता है। इस चाखपक्षी का यात्राकाल में दर्शन होना सदैव शुभदायक कहा गया है॥२५॥

चाषो वामपार्श्वे वामभागे केकेति विरुतं शब्दं करोति तथा पूर्णकुटवत् करायिकावत् किष्किषिकाहकहेति शब्दं करोति, तदा जयकृत् स्याद् भवेत्। तस्य चाषस्य क्रेक्रेति विरुतं दीप्तं तच्च न शिवाय न श्रेयसे भवति। अस्य चाषस्य सन्दर्शनमवलोकनं यातुः सदैव सर्वकालं शुभदम्।।२५।।

चाखपक्षी वामभाग में केका शब्द करता है तथा पूर्णकूट अर्थात् करायिका के समान "किष्किष" शब्द 'कहकह" शब्द करता है, तब जयकारक होता है। उस चाख पक्षी का "क्रेक्रे" शब्द दीप्त माना गया है जो कि कल्याणकाक नहीं होता। इस चाख पक्षी का दिखाई पड़ना यात्री के लिए सदा ही शुभदायक होता है॥२५॥

अथाण्डीरकफेण्टकयोश्चेष्टितमाह–

अण्डारकष्टीति रुतेन पूर्ण-
ष्टिट्टिट्टिशब्देन तु दीप्त उक्तः।
फेण्टः शुभो दक्षिणभागसंस्थो
न वाशिते तस्य कृतो विशेषः।।२६।।

अण्डीरक पक्षी की "टी" ध्वनि पूर्ण होती है और "टिट्टि" ध्वनि दीप्त कही गयी है। इस अण्डीरक तथा फेण्ट पक्षी का दक्षिणभाग में स्थित होना शुभ कहा गया है। फेण्ट पक्षी की ध्वनि के सम्बन्ध में कोई विशेष विचार नहीं किया गया है॥२६॥

अण्डीरकष्टीति। अण्डीरकः 'टी' इति रुतेन शब्देन पूर्ण उक्तः। टिट्टिट्टि अनेन शब्देन तु दीप्त उक्तः कथितः। फेण्टश्चाण्डीरको यातुर्दक्षिणभागसंस्थः शुभः तस्य फेण्टस्य वाशिते विरुते न विशेषः कृत उक्तः।।२६।।

अण्डीरक का "टी" शब्द पूर्ण कहा गया है। "टिट्टिट्टि" शब्द दीप्त होता है। फेण्ट और अण्डीरक पक्षी यात्रा करने वाले के दक्षिणभाग में होने पर शुभ होते हैं। फेण्टपक्षी की ध्वनि के सम्बन्ध में कुछ विशेष नहीं कहा गया है॥२६॥

अथ श्रीकर्णरुतमाह—

श्रीकर्णरुतं तु दक्षिणे
क्वक्वक्वेति शुभं प्रकीर्तितम्।
मध्यं खलु चिक्चिकीति य-
च्छेषं सर्वमुशन्ति निष्फलम्।।२७।।

श्रीकर्ण की ध्वनि को कहते हैं—

श्रीकर्ण पक्षी की ध्वनि "क्वक्वक्व" दक्षिण भाग में हो तो शुभ कही गयी है। इसकी "चिक्चिक्" ध्वनि मध्यम फलदायक होती है और इन दोनों से भिन्न प्रकार की ध्वनि को निष्फल कहा गया है॥२७॥

दक्षिणे दक्षिणभागे श्रीकर्णरुतं क्वक्वक्वेति शुभं प्रकीर्तितमुक्तम्। तस्यैव चिक्चिकि इति यद्रुतं तन्मध्यफलं न शुभं नाप्यशुभमित्यर्थः। शेषं परिशिष्टं यद्रुतं तत् सर्वं निष्फलं फलरहितमुशन्ति कथयन्ति मुनयः।।२७।।

दक्षिणभाग में श्रीकर्ण की ध्वनि "क्वक्वक्क" हो तो उसे शुभ कहा गया है। उसी की "चिक्चिक्" की ध्वनि मध्यमफलदायक अर्थात् न तो शुभ न अशुभ होती है। शेष प्रकार की ध्वनि मुनियों द्वारा निष्फल अर्थात् फलहीन कही गयी है॥२७॥

अथ दुर्बलिविरुतमाह—

दुर्बलेरपि चिरिल्विरिल्विति
प्रोक्तमिष्टफलदं हि वामतः।
वामतश्च यदि दक्षिणं व्रजेत्
कार्यसिद्धिमचिरेण यच्छति।।२८।।

दुर्बलि की ध्वनि को कहते हैं—

दुर्बलि की "चिरिल्विरिल्वि" ध्वनि वामभाग में होने पर इष्टफलदायक कही गयी है। यदि यह वामभाग से दक्षिणभाग में जाये तो शीघ्र ही कार्य की सिद्धि देती है॥२८॥

दुर्बलिर्भाण्डीकस्तस्य दुर्बलेश्चिरिल्विरिल्विति प्रोक्तमिष्टफलदं शोभनं कथितम्। वामतो वामभागे। यदि वामतो वामभागाद् दक्षिणभागे व्रजेद् गच्छति, तदाऽचिरेण शीघ्रमेव कार्यसिद्धिमर्थप्राप्तिं यच्छति ददाति।।२८।।

दुर्बलि अर्थात् भाण्डीक, इसकी ''चिरिल्विरिल्वि'' ध्वनि सुन्दर फलदायक होती है, यदि वह वामभाग में हो। यदि वह वामभाग से दक्षिणभाग में जाये तो शीघ्र ही कार्यसिद्धि अर्थात् अभीष्ट अर्थ को प्रदान करती है।।२८।।

अस्यैव विशेषरुतमाह—

चिक्चिकिवाशितमेव तु कृत्वा
दक्षिणभागमुपैति तु वामात्।
क्षेमकृदेव न साधयतेऽर्थान्
व्यत्ययगो वधबन्धभयाय।।२९।।

इसका विशेष-प्रकार कहते हैं—

यदि दुर्बलि ''चिक्चिक्'' ध्वनि करता हुआ वामभाग से दक्षिणभाग में जाता है तो कल्याण करता है, परन्तु अर्थसिद्धि नहीं होती है। इसके विपरीत होने पर वध तथा बंधन का भय होता है।।२९।।

स एव दुर्बलिकश्चिक्चिकीति वाशितमेव तु कृत्वा ततो वामाद् वामभागाद् दक्षिणभागमुपैति आगच्छति, तदा क्षेमकृदेव क्षेमं करोति, अर्थानभीष्टान् न साधयते, सिद्धिं तेषां न ददाति। व्यत्ययगो विपरीतश्चातो वधो मरणं बन्धो बन्धनं भयं भीतिः, एतानि करोति। यदि दक्षिणभागाद् वाममुपैति।।२९।।

यही दुर्बलि पक्षी ''चिक्चिक'' शब्द करता हुआ वामभाग से दाहिनेभाग में आता है तब वह कल्याणकारक होता है परन्तु अभीष्ट कार्य की सिद्धि नहीं कराता। इससे विपरीत मृत्यु, बन्धन और भय करता है अर्थात् जब इसी ध्वनि के साथ दक्षिणभाग से वामभाग में जाता है तब यह फल होता है।।२९।।

अन्यदप्याह—

क्रक्रेति च सारिका द्रुतं त्रेत्रे वाप्यभया विरौति या।
सा वक्ति यियासतोऽचिराद् गात्रेभ्यः क्षतजस्य विस्रुतिम्।।३०।।

और भी कहते हैं—

यदि सारिका (मैना) पक्षी ''क्रक्र'' शब्द करती हुई अथवा ''त्रेत्रे'' शब्द करती

हुई भयरहित होकर शीघ्रता से गमन करती है तब निश्चित ही यात्रा करने वाले के शरीर के आघात से निकलने वाले रक्त की शीघ्र ही सूचना देती है।।३०।।

या सारिका द्रुतं त्वरितं क्रक्रेति विरौति शब्दं करोति। या वा सारिकाऽभया भयवर्जिता त्रेत्रे इति विरौति शब्दं करोति, साऽचिराच्छीघ्रमेव यियासतो यातुमिच्छोर्गात्रेभ्योऽवयवेभ्यः क्षतजस्य रक्तस्य विस्रुतिं स्रावं वक्ति कथयति।।३०।।

जो सारिका शीघ्रता से "क्रक्र" ध्वनि करती है अथवा जो सारिका निर्भीक होकर "क्रेक्रे" शब्द करती है तो वह शीघ्र ही यात्री के अंगों से आघात के द्वारा रक्त के स्रवित होने की सूचना करती है।।३०।।

अथ फेण्टकरुतमाह—

फेण्टकस्य वामतश्चिरिल्विरिल्विति स्वनः।
शोभनो निगद्यते प्रदीप्त उच्यतेऽपरः।।३१।।

फेण्टक की ध्वनि को कहते हैं—

फेण्टक पक्षी की "चिरिल्विरिल्वि" ध्वनि वामभाग में हो तो वह शुभ कही जाती है। इससे भिन्न ध्वनि को प्रदीप्त कहा जाता है, जो अशुभ-सूचक है।।३१।।

वामतो वामभागे फेण्टकश्चिरिल्विरिल्विति स्वनं शब्दं यदि करोति, तदा शोभनः शुभफलप्रदो निगद्यते कथ्यते। अपरोऽन्यः प्रदीप्त उच्यते कथ्यत इति।।३१।।

वामभाग में फेण्टक की "चिरिल्विरिल्वि" ध्वनि यदि होती है तब उसे शुभ फलप्रदायक कहा जाता है। अन्य प्रकार के शब्दों को प्रदीप्त (अशुभ) कहा गया है।।३१।।

अथ गर्दभरुतमाह—

श्रेष्ठं खरं स्थास्नुमुशन्ति वाम-
मोङ्कारशब्देन हितं च यातुः।
अतोऽपरं गर्दभनादितं यत्
सर्वाश्रयं तत् प्रवदन्ति दीप्तम्।।३२।।

गर्दभ की ध्वनि को कहते हैं—

वामभाग में गर्दभ स्थित हो तो उसे शुभ कहा जाता है। उसका किया गया

"ओङ्कार" शब्द करने वाले के लिए हितकारक होता है। इससे भिन्न गर्दभध्वनि सर्वाश्रय तथा दीप्त कही गयी है॥३२॥

खरं गर्दभं वामं वामभागगतं स्थास्नुमेकस्थानस्थितं श्रेष्ठं शोभनमुशन्ति कथयन्ति, तथौङ्कारशब्देन यदि विरौति तदा यातुर्हितमनुकूलम्। अतोऽपरमन्यद् गर्दभनादितं खरविरुतं सर्वाश्रयम्, सर्ववर्णा आश्रया यस्य तत् सर्वाश्रयं दीप्तं प्रवदन्ति कथयन्ति॥३२॥

खर अर्थात् गदर्भ (गदहा) वामभाग में एक स्थान पर स्थित हो तो उसे श्रेष्ठ कहा जाता है। यदि "ओङ्कार" शब्द करें तो उस यात्री के लिए अनुकूल कहना चाहिए। इससे भिन्न दूसरे प्रकार की ध्वनि सर्वाश्रय अर्थात् जिसके सभी वर्ण आश्रित हो, इस प्रकार से दीप्त कहा गया है॥३२॥

अथ कुरङ्गमृगपृषतरुतमाह—

आकाररावी समृगः कुरङ्ग
ओकाररावी पृषतश्च पूर्णः।
येऽन्ये स्वरास्ते कथिताः प्रदीप्ताः
पूर्णाः शुभाः पापफलाः प्रदीप्ताः॥३३॥

कुरंग, मृग और पृषत की ध्वनि को कहते हैं—

मृग एवं कुरंग की ध्वनि "आकार" सदृश हो तो उसे शुभ कहा गया है। पृषत (चित्तीमार हिरन) यदि ओङ्कार की ध्वनि करें तो उसे पूर्ण कहा जाता है। इससे भिन्न प्रकार की ध्वनि को प्रदीप्त कहना चाहिए। पूर्णध्वनि शुभकारक तथा प्रदीप्त ध्वनि अशुभ-कारक होती है॥३३॥

कुरङ्गो मृगजातिः। समृगो मृगेण सहितः। सचाकाररावी, आकारं रौतीति आकाररावी, स च पूर्णः शुभः पृषत ओकाररावी पूर्णः। अन्ये परिशिष्टाः स्वरास्ते प्रदीप्ताः कथिता उक्ताः। सर्वेषां शकुनानां ये पूर्णाः स्वरास्ते शुभाः, ये च प्रदीप्तास्ते पापफला अशुभाः॥३३॥

कुरंग अर्थात् मृग (हिरण) की एक जाति तथा प्रसिद्ध मृग (हरिण): ये दोनों "आकार" की ध्वनि करते हैं तो उसे पूर्ण अर्थात् शुभ समझना चाहिए। इसी प्रकार पृषत की ओङ्कार-ध्वनि पूर्ण कही गयी है। अन्य अवशिष्ट ध्वनियाँ प्रदीप्त कही जाती हैं। सभी प्रकार के शकुनों में जो पूर्ण ध्वनियाँ हैं वे शुभकारक और जो प्रदीप्त होती हैं उन्हें अशुभ अर्थात् पाप फलदायक जानना चाहिए॥३३॥

अथ कुक्कुटरुतमाह—

भीता रुवन्ति कुकुकुक्विति ताम्रचूडा-
स्त्यक्त्वा रुतानि भयदान्यपराणि रात्रौ।
स्वस्थैः स्वभावविरुतानि निशावसाने
ताराणि राष्ट्रपुरपार्थिववृद्धिदानि।।३४।।

कुक्कुट की ध्वनि को कहते हैं–

कुक्कुट "कुकुकुकु" शब्द भयभीत होकर करता है। इससे भिन्न शब्द रात्रि में करें तो वह भयदायक होता है। प्रात:काल ब्राह्म-बेला में स्वस्थ भाव से उच्च स्वर में शब्द करता है अर्थात् "वाग्" देता है, तो राष्ट्र, नगर और राजा के लिए वृद्धिदायक होता है।।३४।।

ताम्रचूडाः कुक्कुटा रात्रौ निशि सभयाः कुकुकुकु-इति रुवन्ति शब्दं कुर्वन्ति। तानि तु रुतानि त्यक्त्वा परित्यज्यापराण्यन्यानि भयदानि भवन्ति। स्वस्थैः स्वभावस्थैर्नीरुजैरपरतन्त्रैः। स्वभावविरुतानि प्राकृतानि। स्वभाविकाः शब्दा निशावसाने राज्यन्ते ताराण्युच्चतराणि यानि क्रियन्ते तानि राष्ट्रस्य जनपदस्य पुरस्य नगरस्य पार्थिवस्य राज्ञो वृद्धिदानि वृद्धिं ददति।।३४।।

ताम्रचूड अर्थात् कुक्कुट (मुर्गा) रात्रि के समय भयपूर्वक "कुकु-कुकु" शब्द करता है। इन शब्दों को छोड़कर अन्य प्रकार के शब्द भयदायक होते हैं। अपने स्वाभाविक शब्द को स्वतन्त्रभाव से रात्रि के अन्त में जो उच्चस्वर में शब्द करता है वह राष्ट्र अर्थात् जनपद के लिए, नगर के लिए और राजा के लिए वृद्धि प्रदान करता है।।३४।।

अथ छिप्पिकाबिडालविरुतं गोक्षुतं चाह–

नानाविधानि विरुतानि हि छिप्पिकाया-
स्तस्या शुभाः कुलुकुलुर्न शुभास्तु शेषाः।
यातुर्बिडालविरुतं न शुभं सदैव
गोस्तु क्षुतं मरणमेव करोति यातुः।।३५।।

छिपकली तथा बिल्ली की ध्वनि और गाय के छींकने को कहते हैं–

छिपकली की ध्वनि अनेक प्रकार की होती है। इसकी "कुलकुलु" ध्वनि शुभ होती है। जबकि इससे भिन्न ध्वनि अशुभ मानी गयी है। यात्रा करने वाले के लिए बिडाल (बिलाव) का शब्द कभी भी शुभ नहीं होता है। यात्रा करने वाले व्यक्ति के लिए गाय का छींकना मृत्युदायक होता है।।३५।।

छिप्पिकाया नानाविधानि बहुप्रकाराणि विरुतानि भवन्ति। तेभ्यो मध्यात्

तस्यास्तु कुलकुलुशब्दाः शुभाः। शेषा अपरास्तु सर्व एव न शुभाः। विडालविरुतं मार्जारशब्दो यातुः सदैव सर्वकालमेव न शुभम्। गोस्तु पुनः क्षुतं यातुर्मरणमेव करोति। उक्तं च–

सर्वत्र पापं क्षुतमुद्दिशन्ति गोस्तु क्षुतं मृत्युकरं यियासोः।

मार्जाररावस्खलनं च यातुर्वस्त्रस्य सङ्गस्य न शोभनानि।।इति।।३५।।

छिपकली के विविध प्रकार के स्वर होते हैं। इसमें से ''कुलकुलु'' शब्द शुभ होते हैं। अन्य सभी प्रकार के शब्द शुभकारक नहीं होते हैं। गाय की छींक यात्रा करने वाले के लिए मृत्युकारक होती है। बिलाव का शब्द यात्रा करने वाले के लिए सदैव अशुभ होता है। जैसा कि कहा गया है–

छींकना सभी प्रकार के कार्यों के लिए अशुभ होता है। यात्राकाल में गाय का छींकना मृत्युकारक है। बिलाव का बोलना यात्रा करने वाले के लिए चोट पहुँचाने वाला तथा उसके वस्त्रों और सहयात्रियों के लिए शुभ नहीं होता है।।३६।।

विशेष व्याख्या–

''क्षुत'' शब्द छिक्का अर्थात् छींकने के लिए प्रयुक्त हुआ है। जैसा कि अमरकोष (२/६/५२) में कहा गया है–''स्त्री क्षुत् क्षुतं क्षवः पुंसि''।

अथोलूकविरुतमाह–

हुंहुंगुग्लुगिति प्रियामभिलषन् क्रोशत्युलूको मुदा

पूर्णः स्याद् गुरुलु प्रदीप्तमति च ज्ञेयं सदा किस्किसि।

विज्ञेयः कलहो यदा बलबलं तस्यासकृद्वाशितं

दोषायैव टटट्टटेति न शुभाः शेषास्तु दीप्तस्वराः।।३६।।

उल्लू अपनी प्रियतमा की इच्छा करता हुआ ''हुंहुंगुग्लुग्'' शब्द प्रसन्न होकर करता है। ''गुरुलु'' शब्द पूर्ण तथा शुभ होता है। ''किस्किस्'' शब्द सदैव प्रदीप्त (अशुभ) समझना चाहिए। जब वह अनेक बार ''बलबल'' शब्द करता है तब कलह जानना चाहिए। ''टटट्टट'' शब्द दोषकारक होते हैं तथा इनसे भिन्न शब्द दीप्त अर्थात् अशुभकारक होते हैं।।३६।।

उलूको मुदा हर्षेण प्रियां स्वपत्नीमभिलषन् वाञ्छन् हुंहुंगुग्लुगिति क्रोशति वाशति। गुरुल्विति शब्दः पूर्णः स्याद् भवेत्। सदा सर्वस्मिन् काले किस्किसि रुतं प्रदीप्तमपि ज्ञेयं ज्ञातव्यम्। यदा तस्योलूकस्यासकृत् पुनः पुनर्बलबलमिति वाशितं तदा कलहो विज्ञेयः। टटट्टटेति वाशितं दोषायैव भवति। शेषास्तु अन्ये

स्वराः सर्वे दीप्तास्ते चन शुभा इति ।।३६।।

उल्लू प्रसन्नतापूर्वक अपनी पत्नी की इच्छा करता हुआ "हुंहुं-गुग्गुल" शब्द करता है। "गुरुलु" शब्द पूर्ण कहा गया है। सभी कालों में "किस्किस" शब्द को प्रदीप्त समझना चाहिए। "टटट्टट" शब्द दोषकारक होता है। शेष सभी शब्द दीप्त होते हैं जो कि शुभ नहीं हैं।।३६।।

अथ सारसविरुतमाह–

सारसकूजितमिष्टफलं तद्यद्युगपद्विरुतं मिथुनस्य।
एकरुतं न शुभं यदि वा स्यादेकरुते प्रविरौति चिरेण।।३७।।

सारस की ध्वनि को कहते हैं–

सारस का जोड़ा यदि एक साथ बोले तब मनोभिलषित फल मिलता है। एक का बोलना शुभ नहीं होता अथवा एक के बोलने के पश्चात् दूसरा विलम्ब से बोले तब भी शुभ नहीं होता है।।३७।।

सारसकूजितमिति। सारसशब्दो मिथुनस्य युग्मस्य युगपत् तुल्यकालं विरुतं तदिष्टफलं शुभम्। एकरुतमेकस्य रुतं न शुभं यदि वैकरुते पश्चादन्यश्चिरेण प्रविरौति तदा न शुभम्।।३७।।

सारस के जोड़े का एक साथ किया गया शब्द इष्टफल अर्थात् शुभ फल देता है। एक का बोलना शुभ नहीं होता है। यदि एक के बोलने के पश्चात् देर से दूसरे का बोलना हो, तो वह शुभ नहीं होता है।।३७।।

अथ पिङ्गलारुतमाह–

चिरिल्विरिल्विति स्वरैः शुभं करोति पिङ्गलाः।
अतोऽपरे तु ये स्वराः प्रदीप्तसंज्ञितास्तु ते।।३८।।

पिंगला के शब्दों को कहते हैं–

"चिरिल्विरिल्वि" स्वरों से युक्त पिंगला शुभ करती है। इससे भिन्न जो भी स्वर होते हैं उनको प्रदीप्त (अशुभ) समझना चाहिए।।३८।

पिङ्गला चिरिल्विरिल्विति स्वरैः शब्दैः करोति। अतोऽस्मादपरे येऽन्ये स्वराः शब्दास्ते सर्वे प्रदीप्तसंज्ञितास्ते नेष्टाः।।३८।।

पिंगला "चिरिल्विरिल्वि" शब्दों के द्वारा शुभ करती है। इससे भिन्न जो दूसरे शब्द हैं, वे सभी प्रदीप्त संज्ञक अर्थात् अनिष्टकारक होते हैं।।३८।।

अथान्यत्–

इशिविरुतं गमनप्रतिषेधि

कुशकुशु चेत् कलहं प्रकरोति।

अभिमतकार्यगतिं च यथा सा

कथयति तं च विधिं कथयामि।।३९।।

और भी कहते हैं–

इसका "इशि" शब्द यात्रा के निषेधक होते हैं। यदि "कुशुकुशु" शब्द करे तब कलह होता है। यह अभीष्ट कार्य की सिद्धि जिस प्रकार व्यक्त करती है, उस विधि को कहता हूँ॥३९॥

इशीति विरुतं तस्या गमनप्रतिषेधि यात्राविघ्नं करोति। यदि कुशुकुशु-शब्दं करोति तदा कलहं करोति। सा च पिङ्गला यथा येन प्रकारेणाभिमतकार्य-गतिमभिमतकार्याणां गतिमभिमतसिद्धिं कथयति वक्ति। तथा तं च विधिमभीष्टार्थसिद्धिं कथयामि वदामि।।३९।।

"इशि" शब्द यात्रा में विघ्न करते हैं। यदि वह "कुशुकुशु" शब्द करे तब कलह होता है। वह पिंगला जिस प्रकार से अभीष्टकार्य की सिद्धि को कहती है, उस अभीष्ट-कार्य की सिद्धि की विधि को कहता हूँ॥३९॥

तमेवाह–

दिनान्तसन्ध्यासमये निवास-

मागम्य तस्याः प्रयतश्च वृक्षम्।

देवान् समभ्यर्च्य पितामहादीन्

नवाम्बरस्तं च तरु सुगन्धैः।।४०।।

एको निशीथेऽनलदिक्स्थितश्च

दिव्येतरैस्तां शपथैर्नियोज्य।

पृच्छेद्यथाचिन्तितमर्थमेव-

मनेन मन्त्रेण यथाशृणोति।।४१।।

इसको कहते हैं–

सायंकालीन संध्या की वेला में उसके निवास वाले वृक्ष के पास संयत होकर जायें और ब्रह्मा आदि देवताओं की पूजा करें। नवीनवस्त्र धारण कर उस वृक्ष की सुगन्धित द्रव्यों से अर्चना करें। फिर अकेले ही अर्धरात्रि में अग्निकोण में स्थित होकर

देवताओं से भिन्न लौकिक शपथ दिलाता हुआ अपने चिन्तित कार्य की सिद्धि के सन्दर्भ में प्रश्न करें। आगे कहे गये मन्त्रों को पढ़ें, जिसे वह सुन सके॥४०-४१॥

दिनान्तसन्ध्यासमय इति। तस्याः पिङ्गलाया दिनान्ते अस्तसमये या सन्ध्यासमयः सन्ध्याकालस्तस्मिन् दिनान्तसन्ध्यासमये निवासं गृहमागम्य गत्वा वृक्षं तरुं प्रयतोऽनुच्छिष्टः संचयः पितामहादीन् ब्रह्मविष्णुमहेश्वरान् देवान् सुरान् समभ्यर्च्य सम्पूज्य। कीदृशः प्रष्टा? नवाम्बरोऽभिनववसनः सन्, तं तरुं वृक्षं सुगन्धैः सुगन्धद्रव्यैश्चन्दनकुङ्कुमकस्तूरिकागुरुप्रभृतिभिरभ्यर्च्य।।४०।।

उस पिंगलापक्षी के निवास स्थान के वृक्ष के पास सायंकाल संयमित होकर जाकर ब्रह्मा, विष्णु और महादेव की अर्चना कर प्रश्न करें। प्रश्नकर्त्ता किस प्रकार का हो? नवीनवस्त्र धारण किया हुआ और उस वृक्ष की सुगन्धित द्रव्य अर्थात् चन्दन, कुमकुम, कस्तूरी, अगरु इत्यादि से पूजा करें॥४०॥

ततो निशीथे सुप्तजनेऽर्धरात्रावधौ एक एवानलदिक्स्थ आग्नेयाशासमवस्थितः तां च पिङ्गलां शपथैः प्रत्ययैर्दिव्येतरैर्देवानां सम्बन्धिभिः शपथैरितरैरन्यैर्लौकिकैश्च नियोज्य सन्निवेश्य ततो यथा येन प्रकारेणशृणोत्याकर्णयति तथाऽनेन वक्ष्यमाणेन मन्त्रेण यथाचिन्तितमेवार्थं तस्याः सिद्धिं पृच्छेत्।।४१।।

तत्पश्चात् लोगों के सो जाने पर आधी रात में अकेला ही आग्नेयकोण में स्थित होकर उस पिङ्गला को शपथपूर्वक भावित करें। देवताओं से भिन्न शपथ अर्थात् लौकिक-शपथ को प्रस्तुत क़र वह जिस प्रकार से सुन सके, उस प्रकार आगे कहे गये मन्त्र के द्वारा अपने मनोरथ की सिद्धि को पूछे॥४१॥

विशेष व्याख्या—पिङ्गला नामक पक्षी ऊल्लू की एक प्रंजाति है।

अथ मन्त्रमाह—

विद्धि भद्रे मया यत् त्वमिममर्थं प्रचोदिता।
कल्याणि सर्ववचसां वेदित्री त्वं प्रकीर्त्यसे।।४२।।
आपृच्छेऽद्य गमिष्यामि वेदितश्च पुनस्त्वहम्।
प्रातरागम्य पृच्छे त्वामग्नेयीं दिशमाश्रितः।।४३।।
प्रचोदयाम्यहं यत् त्वां तन्मे व्याख्यातुमर्हसि।
स्वचेष्टितेन कल्याणि यथा वेद्मि निराकुलम्।।४४।।

मन्त्र को कहते हैं—

"हे कल्याणकारिणी! जिस अर्थसिद्धि के निमित्त मेरे द्वारा निवेदन किया जा रहा है उसको तुम अच्छी तरह से जानती हो। हे कल्याणी! सभी प्रकार के बातों की

तुम ज्ञाता कही जाती हो। आज मैं तुमसे प्रश्न करता हूँ। मैं उस प्रश्न को जानकर चला जाऊँगा। प्रात:काल आकर आग्नेयदिशा में स्थित होकर प्रश्न करूँगा, जिन इच्छाओं से मैं प्रेरित हूँ, उन्हें तुम मुझे व्यक्त करने में समर्थ हो। हे कल्याणी! तुम्हारी चेष्टाओं के द्वारा मैं शान्त चित्त से (अभीष्ट फल को) जान सकता हूँ'' ॥४२-४४॥

विद्धि भद्रे इति। हे भद्रे कल्याणवति मया यत् त्वमिममर्थं प्रचोदिता प्रष्टुमारब्धा विद्धि: जानीहि। हे कल्याणि सौभागिनि सर्ववचसां नि:शेषवाक्यानां त्वं वेदित्री ज्ञप्त्री प्रकीर्त्यसे।।४२।।

हे कल्याणमयी! मैं जिस अर्थ की सिद्धि के लिए प्रेरित होकर प्रश्न आरम्भ कर रहा हूँ उसे तुम जानती हो। हे सौभाग्यशालिनी! तुम सम्पूर्ण बातों को जानने वाली कही जाती हो॥४२॥

अद्यापृच्छे। यत् करोषि। गमिष्यामि यास्यामि। गमितेति पृष्टश्च पुनर्भूयोऽहं प्रात: श्वरागम्य आग्नेयी पूर्वदक्षिणां दिशमाश्रित: स्थित: पृच्छे।।४३।।

जैसा तुम संकेत करोगी तदनुसार मैं जाऊँगा। गमन सम्बन्धित प्रश्न होने पर मैं फिर प्रात:काल आकर आग्नेय अर्थात् पूर्व-दक्षिण कोण की दिशा में स्थित होकर प्रश्न करूँगा॥४३॥

त्वां यदहं प्रचोदयामि पृच्छामि तत् कल्याणि सौभागिनि स्वचेष्टितेन आत्मीयेन चेष्टितेन यथा येन प्रकारेण निराकुलं नि:संशय: वेद्मि जानामि तथा तन्मे व्याख्यातुं कथयितुमर्हसि।।४४।।

आज मैं जिन प्रश्नों को पूँछ रहा हूँ हे कल्याणी! उन्हें अपनी चेष्टाओं के द्वारा जिस प्रकार असंदिग्ध जान सकूँ, उस प्रकार का व्याख्यान करने में तुम समर्थ हो॥४४॥

अथ चेष्टिमाह—

इत्येवमुक्ते तरुमूर्धगाया-
श्चिरिल्विरिल्वीति रुतेऽर्थसिद्धि:।
अत्याकुलत्वं दिशिकारशब्दे
कुचाकुचेत्येवमुदाहृते वा।।४५।।
अवाक्प्रदानेऽपि हितार्थसिद्धि:
पूर्वोक्तदिक्चक्रफलैरतोऽन्यत्।
वाच्यं फलं चोत्तममध्यनीच-
शाखास्थितायां वरमध्यनीचम्।।४६।।

अब चेष्टाओं को कहते हैं–

इस प्रकार कहने के पश्चात् वृक्ष के ऊर्ध्व भाग से "चिरिल्विरिल्वि" की ध्वनि हो तब इष्टकार्य की सिद्धि होती है। "दिशिकार" शब्द हो तो अथवा "कुचाकुचा" शब्द होने पर प्रश्नकर्त्ता की व्याकुलता अधिक बढ़ जाती है। मौन अर्थात् कोई भी शब्द न होने पर भी अभीष्ट कार्य की सिद्धि होती है। पूर्वोक्त दिक्चक्र के अनुसार अन्य फलों को समझना चाहिए। ऊपर, मध्य और नीचे की शाखाओं पर पिङ्गला के होने से अपने कार्य को क्रमशः श्रेष्ठतम, मध्यम और न्यून जानना चाहिए।।४५-४६।।

इत्येवमुक्त इति। इतिशब्दः समाप्तौ। एवमुक्ते कथिते तस्याः पिङ्गलायास्तरुमूर्धगाया वृक्षमस्तके स्थितायाश्चिरिल्विरिल्वीति रुते अर्थसिद्धिर्भवति। दिशिकारेति शब्दे रुतेव्याकुलत्वमिति चित्तव्याक्षेपो भवति। कुचाकुचेत्येवंप्रकारे उदाहृते वाऽत्याकुलत्वमेव।।४५।।

यहाँ पर श्लोक में "इति" शब्द समाप्ति का सूचक है। इस प्रकार मन्त्रोच्चारण के पश्चात् वृक्ष के ऊर्ध्व भाग पर स्थित पिङ्गला का "चिरिल्विरिल्व" शब्द हो तो अर्थसिद्धि होती है। "दिशिकार" शब्द होने पर अति व्याकुलता अर्थात् मन में विक्षोभ होता है। "कुचाकुचा" ऐसी ध्वनि होने से भी व्याकुलता ही होती है।।४५।।

अवाक्प्रदानेऽपीति। अवाक्प्रदानेऽपि न किञ्चित्सम्भाषणेऽपि हितस्याभीष्टार्थस्य सिद्धिर्भवतीति। अतोऽन्यदस्मादपरं शुभं पूर्वोक्तदिक्चक्रफलैः। यथा दिक्चक्रे द्वात्रिंशद्भागप्रविभक्ते फलान्युक्तानि तद्वदस्या वक्तव्यम्। ऐन्द्र्यां दिशि शान्तायामित्यादि। उत्तमायाः प्रधानायाः स्वशाखस्थिताया वरं श्रेष्ठ फलं वाच्यम्। मध्यमशाखायां स्थितायां मध्यमम्। नीचशाखायां स्थितायां नीचमल्पमिति।।४६।।

कुछ भी न बोले जाने पर भी अभीष्ट-अर्थ की सिद्धि होती है। इसके पश्चात् शुभाशुभ का विचार पूर्वोक्त दिक्चक्र के अनुसार जानना चाहिए। जैसा कि ३२ भागों में विभक्त दिक्चक्र में फल कहे गये हैं, उसी प्रकार इसका भी फल कहना चाहिए। उस चक्र में पूर्वदिशा में शान्त स्थिति होने पर शुभ बताया गया है, उसी प्रकार अन्य भागों का भी फल समझना चाहिए। मुख्यशाखा पर पिङ्गला के स्थित होने पर श्रेष्ठफल कहना चाहिए तथा मध्यशाखा पर स्थित होने से मध्यमफल और नीचे की शाखा पर स्थित होने से नीचफल अर्थात् न्यूनफल जानना चाहिए।।४६।।

दिङ्मण्डलेऽभ्यन्तरबाह्यभागे
फलानि विन्द्याद् गृहगोधिकायाः।

छुच्छुन्दरी चिच्चिडिति प्रदीप्ता
पूर्णा तु सा तित्तिडिति स्वनेन।।४७।।

दिक्चक्र के भीतरी तथा बाहरी भाग में छिपकली (गृहगोधिका) के होने पर चक्रोक्त फल का निर्देश करे। छुच्छुन्दरी "चिच्चिड" शब्द करने पर प्रदीप्त कही गयी है तथा "तित्तिड्" शब्द करने पर उसे पूर्ण (शुभ) समझना चाहिए।।४७।।

गृहगोधिकायाः कुड्यमत्स्यस्य दिङ्मण्डलेऽष्टासु दिक्षु अभ्यन्तरनाभ्यां बाह्यभागे द्वात्रिंशद्भागप्रविभक्ते दिक्चक्रे फलानि विन्द्याद् जानीयात्। अथ शान्ता दिक् सा च मधुरवा तदोत्तमं फलम्। अथ दुष्टरवा तदा मध्यमम्। अथ दीप्ता दिक् सा च मधुरवा तदानीं च शुभफलम्। अदीप्ता दिक् सा च दीप्तरवा तदा दुष्टफलमेव सर्वत्र पिङ्गलाया अप्येवमेव वेदितव्यम्। छुच्छुन्दरीति सुगन्धमूषिका चिच्चिडिति शब्देन प्रदीप्ता। सा तु तित्तिडिति स्वनेन शब्देन पूर्णेति ज्ञेया।।४७।।

।।इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ सर्वशाकुने विरुतं नाम

सप्ताशीतितमोऽध्यायः।।८७।।

गृहगोधिका अर्थात् कुड्यमत्स्य का दिक्चक्र के आठों दिशाओं में भीतरी नाभि में तथा बाहरी भाग में ३२ भागों में विभाजित दिक्चक्र के अनुसार फल का ज्ञान करें। वह यदि शान्त दिशा में मधुर स्वर कहे तो उत्तम फल, दुष्ट शब्द कहें तब मध्यम फल कहना चाहिए। यदि दीप्तदिशा हो और वह मधुर शब्द कहे तब शुभ फल देती है। यदि शान्तदिशा हो और शब्द दीप्त (कठोर) हो तब इस पिङ्गला के फल अशुभ ही होते हैं। इसी प्रकार अन्य फलों को भी समझना चाहिए। छुच्छुन्दरी अर्थात् सुगन्धमूषिका "चिच्चिङ्"-शब्द से प्रदीप्त होती है और वह "तित्तिड्" शब्द से पूर्ण होती है, यह समझना चाहिए।।४७।।

।।श्री भट्टोत्पलविरचित संहिता विवृति के सर्वशाकुन प्रकरण में विरुत नामक सत्तासीवें

अध्याय की हिन्दी व्याख्या पूर्ण हुई।।८७।।

❃ ❃ ❃

।।अथाष्टाशीतितमोऽध्यायः।।

श्वचक्राध्यायः

अथ श्वचक्रं व्याख्यायते।

तत्रादावेव चेष्टितमाह—

नृतुरगकरिकुम्भपर्याणसक्षीरवृक्षेष्टका-
सञ्चयच्छत्रशय्यासनोलूखलानि ध्वजं चामरं
शाद्वलं पुष्पितं वा प्रदेशं यदा श्वावमूत्र्याग्रतो
याति यातुस्तदा कार्यसिद्धिर्भवेदार्द्रके गोमये
मिष्टभोज्यागमः शुष्कसम्मूत्रणे शुष्कमन्नं गुडो
मोदकावाप्तिरेवाथवा।।

श्वचक्राध्याय ८८ की व्याख्या की जाती है।

आरम्भ में श्वान (कुत्ते की) की चेष्टाओं को दण्डक छन्द में कहते हैं—

कुत्ता यदि मनुष्य, घोड़ा, हाथी, घड़ा, घोड़े का जीन, दूध वाले वृक्ष, ईटों का ढेर, छाता, शैय्या, आसन, ओखली, ध्वज, चँवर, दूर्वा अथवा पुष्पितप्रदेश पर मूत्र करता हुआ यात्रा करने वाले के आगे से निकले, तब उसके मनोवाञ्छित कार्य की सिद्धि होती है।

गीले गोबर पर मूत्रत्याग करें तब मधुर भोज्य-पदार्थ प्राप्त होता है तथा शुष्क गोमय पर उसके मूत्र-त्याग करने से सूखा अन्न, गुड़ और मधुर पदार्थ की प्राप्ति होती है।

नृ (ना) मनुष्यः। तुरगोऽश्वः। करी हस्ती। कुम्भो घटः। पर्याणं प्रसिद्धम्। सक्षीरवृक्षोऽर्कादिः। इष्टकासञ्चय इष्टकाकूटः। छत्रमातपत्रम्। शय्या आस्तरणम्। आसनं पट्टादि। उलूखलं प्रसिद्धमेव। तथा ध्वजं चिह्नम्। चामरं बालव्यजनम्। शाद्वलं दूर्वा। पुष्पितं वा प्रदेशं सञ्जातपुष्पस्थानम्। यदा श्वा सारमेयः। अवमूत्र्य मूत्रेण सिक्त्वा यातुर्गच्छतोऽग्रतः पुरो यादि गच्छति तदा कार्यस्याभीष्टस्य सिद्धिर्भवेत् स्यात्। उक्तं च—

नरतुरगगजातपत्रकुम्भध्वजसयनासनपुष्पचामराणि।
व्रजति यदि पुरोऽवमूत्र्य पक्षः[१] क्षपयति शत्रुबलं तदा नरेन्द्रः।।

---

१. पक्षों वा यक्षो न कुत्रापि कुक्कुरवाची शब्द उपलभ्यतेऽतोऽत्र चेच्छवा-इति पाठः साधुः।

मनुष्य, अश्व, हाथी, घट, घोड़े का जीन, दुधारू वृक्ष, मदार इत्यादि, ईटों का ढेर, छत्र, शय्या, आसन पीढ़ा इत्यादि, प्रसिद्ध ओखली, ध्वज, चँवर, अर्थात् चवरी गाय के बाल से बना हुआ व्यजन, शाद्वल अर्थात् दूर्वा अथवा जिस स्थान पर फूल लगें हुए हों उस स्थान पर यदि श्वा अर्थात् कुत्ता मूत्र कर यात्री के आगे से चलता है तब उसके अभीष्टकार्य की सिद्धि होती है। जैसा कि कहा गया है–

नर, अश्व, गज, छत्र, घट, ध्वज, शय्या, आसन, पुष्प और चँवर पर मूत्र त्याग कर यदि कुत्ता आगे से निकल जाता है, तब राजा अपने शत्रुपक्ष को विनष्ट करने में सक्षम होते हैं।

आर्द्रके गोमय इति। आर्द्रके सरसे गोमये सम्मूत्रणे मिष्टभोज्यस्यागमो लाभः। शुष्कगोमयसम्मूत्रणे शुष्कमन्नं गुडो मोदकानामवाप्तिर्लाभोऽथवा भवति।

गीले गोमय पर मूत्र करने से मधुर भोजन का लाभ होता है। सूखे गोमय पर मूत्र करने पर सूखे भोजन, गुड़ और मिष्ठान्न का लाभ होता है।

अन्यदप्याह–

अथ विषतरुकण्टकीकाष्ठपाषाण-
शुष्कद्रुमास्थिश्मशानानि मूत्र्यावहत्याथवा
यायिनोऽग्रेसरोऽनिष्टमाख्याति शय्याकुलालादि-
भडान्यभुक्तान्यभिन्नानि वा मूत्रयन् कन्यकादोषकृद्-
भुज्यमानानि चेद् दुष्टतां तद् गृहिण्यास्तथा
स्यादुपानत्फलं गोस्तु सम्मूत्रणेऽवर्णजः सङ्करः।।

और भी कहते हैं–

कुत्ता यदि विषैले वृक्ष, काँटेदार वृक्ष, लकड़ी, पत्थर, सूखे वृक्ष, हड्डी एवं श्मशान पर मूत्र कर अथवा अपने पैरों से कर्षण (खुरज) कर यात्री के आगे होता है तब अनिष्ट की सूचना है। शय्या एवं मृत्तिकापात्र, जो कि न तो प्रयोग में लाये गये हों और न टूटे-फूटे हों, ऐसी वस्तुओं पर मूत्र करता हुआ, कन्या में दोष उत्पन्न करता है। यदि भोजन-पात्रों पर मूत्र करता है, तब गृहिणी की दुष्टता को प्रकट करता है। जूते पर मूत्र करने का भी यही फल होता है। गाय के ऊपर मूत्र करने पर वर्णहीन वर्णसंकर की सूचना देता है।

विषतरौ विषवृक्षे। कण्टक्यां सकण्टके वृक्षे। काष्ठे पाषाणेऽश्मनि। शुष्कद्रुमे शुष्कवृक्षे। अस्थिश्मशाने वा। एषामन्यतमस्थानमवमूत्र्य अथवा हस्तेन पादेन वाऽवहत्य सन्ताड्य यायिनो गच्छतोऽग्रेसरः पुरतो याति, तदाऽनिष्टमशुभमाख्याति कथयति। शय्या आस्तरणम्। कुलालादिभाण्डानि

कुम्भकारकृतानि मृन्मयानि। आदिग्रहणाद् दारुमन्यायपि। अभुक्तानि अभिनवानि। अभिन्नान्यस्फुटानि वा। अत्र मूत्रयन् कन्यकादोषकृत् कुमार्या दौःशील्यं करोति। यदि भुज्यमानानि भाण्डानि अवमूत्रयति तदा तद् गृहिण्या दुष्टतां करोति। उपानत्फलं तथा तेनैव प्रकारेण स्यात्। एतदुक्तं भवति—अभुक्ते उपानहाववमूत्रयन् कन्यकादोषकृत्, भुज्यमाने चेत् तद्गृहिण्या दुष्टतां करोति। गोस्तु सम्मूत्रणे अवर्णजो निकृष्टवर्णजातः सङ्करोऽत्र गृहे। उक्तं च—

विषकण्टकशुष्कवृक्षलोष्टानवमूत्र्यास्थिचितेन याति चेच्छ्वा।
न शुभोऽभिमुखं भषद्विधुन्वन् पुच्छाङ्गं विलिखन्नखे वसाश्च।।

विषैले वृक्षों पर, काँटेदार वृक्षों, पर, लकड़ी तथा पत्थर पर, सूखे वृक्ष पर, अस्थि अथवा श्मशान पर, इनमें से किसी भी एक स्थान पर मूत्र कर अथवा हाथ या पैर से भूमि को ताड़ित करता हुआ (खुड़चता हुआ) यात्रा करने वाले के आगे निकलता है तो अनिष्ट का आभास देता है। शय्या (बिस्तर), कुम्भकार द्वारा बनाये गये मिट्टी के बर्तन तथा "आदि" शब्द से काष्ठनिर्मित पात्र भी ग्राह्य हैं, जो नवीन हों और टूटे-फूटे न हों इन पर मूत्र करता है तब कुवाँरी कन्याओं में दुःशीलता उत्पन्न करता है। यदि प्रयुक्त पात्रों (पुराने पात्रों) पर मूत्र करता है तब उसकी पत्नी की दुष्टताओं को प्रकट करता है। उपानह (जूते) का फल भी इसी प्रकार से समझना चाहिए। इस कथन का अभिप्राय यह है कि बिना प्रयोग में लाये नूतन जूते पर मूत्र करता हुआ कन्या के लिए दोष उत्पन्न करता है और प्रयोग में लाये गये जूते पर मूत्र करने से उसकी पत्नी के लिए दोषकारी होता है। गाय पर यदि मूत्र करे तब गृह में निकृष्टवर्ण से उत्पन्न संकर-वर्ण की उपस्थिति को बतलाता है। जैसा कि कहा गया है—

विषयुक्त कँटीले तथा सूखे वृक्ष, टुकड़ों के ढेर और अस्थिसंचय पर मूत्र कर यदि कुत्ता सामने की ओर भौंकता हुआ अथवा जमीन को कुरेदता हुआ, पूँछ को हिलाता हुआ, नख से जमीन पर खरोचता हुआ गमन करतदा है, तब वह शुभ नहीं होता है।

अन्यदप्याह—

गमनमुखमुपानहं सम्प्रगृह्योपतिष्ठेद्यदा
स्यात् तदा सिद्धये मांसपूर्णाननेऽर्थाप्तिरार्द्रेण चास्थ्ना
शुभं साग्न्यलातेन शुष्केण चास्थ्ना गृहीतेन मृत्युः
प्रशान्तोल्मुकेनाभिघातोऽथ पुंसः शिरोहस्तपादादि-
वक्त्रे भुवोऽभ्यागमो वस्त्रचीरादिभिर्व्यापदः

केचिदाहुः सवस्त्रे शुभम्।
प्रविशति तु गृहं सशुष्कास्थिवक्त्रे प्रधानस्य
तस्मिन् वधः शृङ्खलाशीर्णवल्लीवरत्रादि वा बन्धनं
चोपगृह्योपतिष्ठेद्यदा स्यात् तदा बन्धनं
लेढि पादौ विधुन्वन् स्वकर्णावुपर्याक्रमंश्चापि
विघ्नाय यातुर्विरोधे विरोधस्तथा स्वाङ्गकण्डूयने
स्यात् स्वपंश्चोर्ध्वपादः सदा दोषकृत।।१।।

और भी कहते हैं-

यदि यात्री के सम्मुख कुत्ता अपने मुख से जूता पकड़ कर उपस्थित हो जाये तब कार्य की सिद्धि होती है। अपने मुख में माँस लेकर आये तब धन की प्राप्ति होती है। गीले मुख वाला (सरस) कुत्ता शुभ होता है। जलती हुई लकड़ी (लूकाट) अथवा सूखी हड्डी मुँह में पकड़ा हुआ हो तो मृत्यु होती है। बुझी हुई लकड़ी (कोयला युक्त) मुख में हो तो आघात (चोट) होता है। यदि मनुष्य के हाथ पैर आदि अंगों को मुख में लेकर सामने आये तब भूमि का लाभ होता है। वस्त्र, वल्कल आदि लेकर आता है तो विघ्न उपस्थित होता है। कुछ आचार्यों का मत है कि मुख में वस्त्र लेकर आना शुभ होता है। यदि सूखी हड्डी लेकर घर में प्रवेश करे तब घर के मुखिया की मृत्यु होती है। जंजीर, जीर्णशीर्ण-लता, चमड़े की रस्सी इत्यादि लेकर उपस्थित हो तब बन्धन (कारागार) होता है। यात्रा करने वाले के पैरों को चाटता हो तथा अपने कानों को फड़फड़ाना हुआ उसके ऊपर चढ़ता हो तब यात्रा विघ्नकारक होती है। यात्री के विरुद्ध होने पर यात्रा में विरोध उत्पन्न होता है। अपने अंगों को खुजलाने पर भी यात्रा में मार्गावरोध मिलता है। अगले दोनों पैरों को ऊपर कर सोता हुआ हो तो सर्वदा दोषकारक होता है।।१।।

गमनमुखमिति। यदोपानहं मुखेन सम्प्रगृह्योपतिष्ठेद् गमनमुखं यियासुमुपतिष्ठेत् समीपे तस्य तिष्ठेत् तदा सिद्ध्येऽर्थानां स्याद्भवेत्। मांसपूर्णानने आमिषपूरितवदने अर्थाप्तिर्धनानां लाभो भवति। आर्द्रेण सरसेनास्थ्ना पूर्णानने शुभम्। अग्निना अलातेन दग्धकाष्ठेन शुष्केण नीरसेन चास्थ्ना गृहीतेन मृत्युर्मरणं यातुर्भवेत्। प्रशान्तेनाग्नि-रहितेनोल्मुकेनाभिघात उपद्रवः। अथशब्दो विकल्पे। पुंसो मनुष्यस्य। शिरो मूर्धा। हस्तौ पाणी। पादौ चरणौ। आदिग्रहणादन्यमप्यवयवं वक्त्रे गृहीत्वा उपतिष्ठेत्, तदा भुवो भूम्या अभ्यागमो लाभो भवति। वस्त्रमम्बरम्। चीराणि वृक्षवल्कलानि। आदिग्रहणाद्वस्त्रचीरैकदेशमपि। एतैर्व्यापदो भवन्ति। केचिन्मुनयः

सवस्त्रे सारमेये शुभमाहुः कथयन्ति। तथा च पराशरः-

"गमने यातुर्वस्त्रगृहीतवक्त्रे सारमेये महानर्थलाभः" इति।

यदि कुत्ता मुख में जूता लेकर यात्री के सम्मुख खड़ा हो तब अभीष्ट कार्य की सिद्धि होती है। माँस से परिपूर्ण मुखवाला हो तब धनलाभ होता है। रसपूर्ण गीले मुख वाला शुभ होता है। जलती हुई लकड़ी अथवा सूखी लकड़ी लेकर आये तब मरण होता है। अग्नि-रहित काष्ठ (लूकाठ) से उपद्रव होता है। यहाँ पर "अथ" शब्द विकल्प का वाचक है। मनुष्य की खोपड़ी, हाथ अथवा पैर अथवा अन्य किसी अंग को मुख में लेकर उपस्थित हो तो भूमि का लाभ होता है। वस्त्र (कपड़ा) तथा चीर अर्थात् वृक्षों के वल्कल अथवा वस्त्र और वल्कल का टुकड़ा लेकर उपस्थित होता है, तब वह विपत्ति-कारक माना गया है। कुछ आचार्यगण कपड़ा लेकर कुत्ते के आने पर शुभ फल कहते हैं। जैसा कि आचार्य पाराशर ने कहा है–

"यात्राकाल में यात्रा करने वाले के सम्मुख, मुख में वस्त्र पकड़ कर यदि कुत्ता आता है तब प्रचुर अर्थ की प्राप्ति होती है।"

प्रविशति त्विति। सशुष्कास्थि वक्त्रे मुखे यस्य तथाभूते सारमेये गृहं वेश्म प्रविशति तु तस्मिन् गृहे प्रधानस्य पुरुषस्य गृहपतेर्वधो मरणं भवति। शृङ्खला प्रसिद्धा लोहमयी। शीर्णा पुरातना। वल्ली प्रसिद्धा। वरत्रा चर्ममयी रज्जुः। आदिग्रहणादन्यद्रज्ज्वादिकं बन्धननिगडादिकं चोपगृह्य यदोपतिष्ठेत् तदा बन्धनं स्याद् भवेत्। यातुः पादौ चरणौ लेढि। स्वकर्णौ स्वश्रोत्रे विधुन्वंश्चालयन्नुपरि यातुर्वा आक्रमन् प्लावितुमिच्छन् यातुर्यात्राविघ्नाय भवेत्। यातुः सविरोधे यातुरेव पथि विरोधः। विरोधोऽत्र मार्गरोधो ज्ञेयः। तथा च गर्गः–

प्रस्थितस्य यदा श्वा वै मार्गं बद्ध्वा तु तिष्ठति।
अवरुद्धं तदाध्वानं चौरैरिति विनिर्दिशेत्।।

मुख में सूखी हड्डी लेकर जो कुत्ता जिस घर में प्रवेश करता है उस घर के प्रधान पुरुष की अर्थात् गृहपति की मृत्यु होती है। लोहे की जंजीर, पुरानी जीर्ण-शीर्ण वस्तु, लता, चमड़े की रस्सी अथवा अन्य भी कोई बाँधने की रस्सी लेकर उपस्थित होता है तब बंधन प्राप्त होता है। यात्री के चरणों पर लोटता हुआ अथवा चाटता हुआ अपने कानों को फड़फड़ाता हुआ अथवा यात्री के ऊपर आक्रण अर्थात् गिराने की इच्छा करता हुआ हो, तब यात्रा में विघ्न उत्पन्न होता है। यात्री के लिए विरोध उपस्थित होने पर मार्ग में विरोध अर्थात् मार्गावरोध होता है, यह जानना चाहिए। जैसा कि आचार्य गर्ग ने कहा है–

प्रस्थान करते समय यदि कुत्ता मार्ग रोक कर खड़ा हो जाता है तब आगे का

मार्ग चोरों द्वारा अवरुद्ध होने वाला है, ऐसा निर्देश करना चाहिए।

तथा स्वाङ्गस्यात्मीयावयवस्य कण्डूयने यातुर्विरोधः स्यात्। ऊर्ध्वपाद ऊर्ध्वचरणः स्वपन् सदा सर्वस्मिन् काले गमने यातुरेकदेशस्थस्य वा दोष कृद्भवेत्।।१।।

अपने अंगों को कुत्ता खुजलाने लगे तब यात्री के सम्मुख विरोध उपस्थित होता है। ऊपर पैर उठा कर सोता हुआ किसी भी काल में यात्रा करने वाले के लिए विघ्न उपस्थित करने वाला होता है॥१॥

अथ दिग्विभागेन शुनः फलमाह—

सूर्योदयेऽर्काभिमुखो विरौति
ग्रामस्य मध्ये यदि सारमेयः।
एको यदा वा बहवः समेताः
शंसन्ति देशाधिपमन्यमाशु।।२।।

दिशाओं के अनुसार कुत्ते का फल कहते हैं—

सूर्योदय के समय सूर्य की ओर मुख कर गाँव के बीचो-बीच यदि कोई अकेला कुत्ता अथवा बहुत से कुत्ते मिलकर भौंकते हों तब शीघ्र ही उस देश का राजा कोई अन्य होने वाला है, ऐसा सूचना देते हैं॥२॥

सारमेयः श्वा ग्रामस्य मध्ये सूर्योदये अर्कोद्गमनकाले यद्यर्काभिमुख आदित्याभिमुखो विरौति शब्दं करोति। एकोऽथवा बहवो यदा प्रभूता समेताः सहितास्तदाऽऽशु शीघ्रं देशाधिपं देशस्वामिमन्यं द्वितीयं शंसन्ति।।२।।

सारमेय अर्थात् कुत्ता गाँव के बीच में सूर्योदय के समय सूर्याभिमुख होकर ध्वनि करता है, अकेले ही अथवा बहुत से मिलकर भौंकते हों तब शीघ्र ही देश के वर्तमान राजा को बदलकर किसी दूसरे के राजा होने का संकेत करते हैं॥२॥

विशेष व्याख्या—

कौलेयकः सारमेयः कुक्कुरो मृगदंशकः।

शूनको भषकः श्वा स्यात् (अमरकोष २.१०.२१)।

सरमाया अपत्यम्। "स्त्रीभ्यो ढक्" ४.१.१२०। सारमेय=कुत्ता।

अन्यदप्याह—

सूर्योन्मुखः श्वानलदिक्स्थितश्च
चौरानलत्रासकरोऽचिरेण।

मध्याह्नकालेऽनलमृत्युशंसी

सशोणितः स्यात् कलहोऽपराह्णे।।३।।

और भी कहते हैं–

सूर्य की ओर मुखकर तथा अग्निकोण में स्थित होकर यदि कुत्ते भौंकते हैं तब चोरों से और अग्निदाह के द्वारा शीघ्र ही भय उत्पन्न होता है। मध्याह्नकाल में सूर्याभिमुख होकर भौंकने पर अग्नि से मृत्यु की आशंका होती है और तीसरे पहर में सूर्याभिमुख होकर कुत्ता भौंके तब रक्तपात होता है।।३।।

श्वा सारमेयः। सूर्योन्मुख आदित्याभिमुखः। अनलदिक्स्थितश्च आग्नेय्यभिमुखो विरौति, तदा अचिरेण शीघ्रकालेन चौरानलत्रासकरः, चौरैस्तस्करैरनलेनाग्निना त्रासं भयं करोति। मध्याह्नकाले सूर्याभिमुखो भवन्। अनलमृत्युशंसी अनलमग्निं मृत्युं मरणं च शंसति कथयति। अपराह्णे तृतीये प्रहरे सूर्याभिमुखो भवन् सशोणितो रक्तसहितः कलहः स्याद् भवेत्।।३।।

श्वा अर्थात् सारमेय (कुत्ता)। यह यदि सूर्याभिमुख होकर और अग्निकोणाभिमुख होकर भौंकता है तब शीघ्र ही चोर तथा अग्नि से भय उपस्थित होता है। चोर अर्थात् तस्कर तथा अनल अर्थात् अग्नि के द्वारा भय उत्पन्न करता है। मध्याह्नकाल में सूर्याभिमुख होता हुआ यदि कुत्ता भौंकता है तब अग्नि और मृत्यु की आशंका कही जाती है। अपराह्ण अर्थात् दिन के तीसरे प्रहर में सूर्याभिमुख होकर यदि कुत्ता भौंके तब रक्तरञ्जित कलह होता है।।३।।

अन्यदप्याह–

रुवन् दिनेशाभिमुखोऽस्तकाले

कृषीवलानां भयमाशु दत्ते।

प्रदोषकालेऽनिलदिङ्मुखश्च

दत्ते भयं मारुततस्करोत्थम् ।।४।।

और भी कहते हैं–

सूर्यास्त के समय सूर्याभिमुख होकर रोता हुआ कुत्ता कृषीवल अर्थात् कृषकों को शीघ्र भय देता है। प्रदोषकाल अर्थात् रात्रि में (रात्रि के आरम्भ में) वायव्यकोण की दिशा में मुख करता हुआ कुत्ता रोता है तो मारुत् अर्थात् वायु और तस्कर अर्थात् चोर से उत्पन्न भय होने का सङ्केत देता है।।४।।

अस्तकाले अस्तमये, दिनेशाभिमुखोऽर्कसंमुखः। रुवन् क्रोशन्। कृषीबलानां कार्षिकाणाम्। आशु शीघ्रम्। भयं भीतिम्। दत्ते ददाति। प्रदोषकाले

रात्रिमुखेऽनिलदिङ्मुखो वायव्याशाभिमुखो रुवन् मारुततस्करोत्थं मारुताद् वायोस्तस्करेभ्यः समुत्थमुत्पन्नं भयं दत्ते ददाति।।४।।

अस्तकाल में सूर्याभिमुख होकर रोता हुआ कुत्ता कृषकों को शीघ्र ही भय प्रदान करता है। इसी प्रकार रात में वायव्यकोण की ओर मुखकर रोता हो, तब वायु तथा तस्करों से भय उपस्थित होता है।।४।।

अन्यदप्याह—

उदङ्मुखश्चापि निशार्धकाले

विप्रव्यथां गोहरणं च शास्ति।

निशावसाने शिवदिङ्मुखश्च

कन्याभिदूषानलगर्भपातान्।।५।।

और भी कहते हैं—

आधी रात को उत्तरमुख होकर शब्द करता है, तब ब्राह्मणों को पीड़ा और गायों का अपहरण होता है। रात्रि के अन्तिम प्रहर में ईशानाभिमुख होकर यदि कुत्ता रोता है तब कन्याओं में दोष उत्पन्न होता है, तथा[अ. ८८][अ. ८८] अग्निभय और गर्भपात होता है।।५।।

निशार्धकाले अर्धरात्रसमये उदङ्मुख उत्तराभिमुखो भवन् विप्रव्यथां ब्राह्मणपीडां गोहरणं गवां परैरपहरणं शास्ति कथयति। निशावसाने रात्र्यन्ते शिवदिङ्मुख ऐशान्यभिमुखो भवन् कन्याभिदूषं कन्यां कुमारीं दूषयति, अनलमग्निं गर्भपातं गर्भपतनं च स्त्रीणां शास्ति।।५।।

निशार्धकाल अर्थात् अर्धरात्रि के समय उत्तराभिमुख होता हुआ कुत्ता रोता है तब ब्राह्मणों को कष्ट देता है तथा दूसरों के द्वारा गायों का अपहरण होता है। निशावसान अर्थात् रात्रि के अन्तिम काल में ईशानदिशा की ओर मुख करके कुत्ता रोता है, तब कुमारी कन्याओं को दूषित करता है, अग्नि का भय और स्त्रियों का गर्भपात होता है।।५।।

अन्यदप्याह—

उच्चैः स्वराः स्युस्तृणकूटसंस्थाः

प्रासादवेश्मोत्तमसंस्थिता वा।

वर्षासु वृष्टिं कथयन्ति तीव्रा-

मन्यत्र मृत्युं दहनं रुजश्च।।६।।

और भी कहते हैं–

पुआल के ढेर पर तथा भवन के शीर्ष पर स्थित होकर उच्चस्वर में कुत्ता भौंकता है, तब वर्षा ऋतु में अतिवृष्टि तथा वर्षाऋतु से भिन्न ऋतु होने पर मृत्यु, अग्निदाह और रोग होते हैं॥६॥

तृणकूटस्तृणराशिस्तत्र संस्थिताः। प्रासादः उत्तमं वेश्म प्रधानगृहम्। एतेषु संस्थिता वा यद्युच्चैः स्वरास्तीव्रशब्दाः स्युर्भवेयुः। वर्षासु वर्षाकाले तीव्रां वृष्टिं कथयन्ति उद्दिशन्ति। अन्यत्र वर्षाभ्योऽन्यस्मिन् ऋतौ मृत्युं मरणं दहनमग्निं रूजो रोगांश्च कथयन्ति।।६।।

तृणकूट अर्थाथ् तृणसमूह (पुआल आदि) तथा प्रासाद अर्थात् श्रेष्ठभवन; उन पर स्थित होकर यदि कुत्ता तीव्र शब्द करता है तब वर्षाऋतु में अत्यधिक वर्षा होती है, ऐसा कहा गया है। वर्षा से भिन्न ऋतु में कुत्ते के भौंकने पर मृत्यु, अग्निदहन और रोगों की उत्पत्ति कही गयी है॥६॥

अन्यदप्याह–

प्रावृट्कालेऽवग्रहेऽम्भोऽवगाह्य प्रत्यावर्तै रेचकैश्चाप्यभीक्ष्णम्।
आधुन्वन्तो वा पिबन्तश्च तोयं वृष्टिं कुर्वन्त्यपरे द्वादशाहात्।।७।।

और भी कहते हैं–

वर्षाऋतु में यदि वृष्टि न हो और उस समय जल से भींगा हुआ कुत्ता भूमि पर लोटते हुए अपने शरीर को प्रकम्पित करता है और जल पीता है, तब बारह दिनों के भीतर वर्षा अवश्य होती है॥७॥

प्रावृट्काले वर्षासमये अवग्रहे वृष्टिनिरोधे सति अम्भो जलमवगाह्य तन्मध्ये स्थित्वा प्रत्यावर्तै रेचकेः। पार्श्वपरिवर्तनं प्रत्यावर्तः। पार्श्ववलितं कृत्वा पुनस्तदेव व्यत्येयन करोति। एतैः प्रत्यावर्तै रेचकैरभीक्ष्णं पुनः पुनर्यद्युपलक्षिता भवन्ति, अथवा तोयं जलमाधुन्वन्तः कम्पयन्तः पिबन्तो वा दृश्यन्ते, तदाऽवग्रहे सति वर्षाकाले द्वादशाहाद् द्वादशकादन्तरे मध्ये वृष्टिं वर्षणं कुर्वन्ति। द्वादशाहमध्ये देवो वर्षतीत्यर्थ।।७।।

प्रावृट्काल अर्थात् वर्षा के समय अवग्रह अर्थात् वर्षा का अभाव हो तथा जल में भींगकर कुत्ता प्रत्यावर्तन अर्थात् लोटता-पोटता है अर्थात् अगल-बगल दोनों पार्श्वों को बदलता हुआ लोटता है, ऐसा बार-बार करता है, अथवा जल को

उछालता हुआ जल पीता है, तब उस अनावृष्टि के काल में भी बारह दिनों के भीतर वर्षा होती है। तात्पर्य यह है कि बारह दिनों के भीतर ही इन्द्रदेवता अवश्य वर्षा करते हैं।।७।।

अन्यत् श्वचेष्टितमाह–

द्वारे शिरो न्यस्त बहिः शरीरं रोरूयते श्वा गृहिणीं विलोक्य।

रोगप्रदः स्यादथ मन्दिरान्तर्बहिर्मुखो वक्ति च बन्धकीं ताम्।।८।।

कुत्ते की अन्य चेष्टाओं को बतलाते हैं–

यदि कुत्ता अपना सिर दरवाजे पर तथा शेष शरीर बाहर रखकर गृहणी को देखता हुआ रोता है तो रोग उत्पन्न होता है। इसके विपरीत भवन के भीतर स्थित होकर सिर बाहर करके रोता है तब गृहपत्नी वेश्या होती है।।८।।

श्वा सारमेयो द्वारे गृहद्वारे शिरो मस्तकं न्यस्य क्षिप्त्वा शरीरं देहं बहिर्बाह्यभागे न्यस्य गृहणीं विलोक्य रोरूयते तदा तां गृहिणीं बन्धकीं वेश्यामिति च वक्ति कथयति।।८।।

सारमेय अर्थात् कुत्ता घर के दरवाजे पर सिर रखकर शेष शरीर को बाहर कर गृहणी को देखते हुए विलाप करता है, तब रोगप्रदायक होता है। यदि घर के भीतर स्थित होकर दरवाजे के बाहर मुखकर रोता है तब उस घर की गृहणी के वेश्या होने का संकेत देता है।।८।।

अन्यदप्याह–

कुड्यमुत्किरति वेश्मनो यदा तत्र खानकभयं भवेत् तदा।

गोष्ठमुत्किरति गोग्रहं वदेद्धान्यलब्धिमपि धान्यभूमिषु।।९।।

और भी कहते हैं–

यदि कुत्ता घर की भित्ति (दीवार) का खनन करता हो, तो घर में सेंध लगने का भय होता है। यदि गोष्ठ (गाय बाँधने का स्थान) का खनन करता हो, तब गाय का हरण (चोरी) होता है। धान के स्थान का उत्खनन करता हो तब धान्य की प्राप्ति होती है।।९।।

वेश्मनो गृहस्य यदा कुड्यं भित्तिमुत्किरति खनति तदा तत्र गृहे खानकभयं सन्धिभेदभीतिर्भवेत् स्यात्। गोष्ठं गोस्थानकं यद्युत्किरति तदा गोग्रहं गोहरणं च वदेद् ब्रूयात्। धान्यभूमिषु खनने धान्यलब्धिर्भवति। यस्यां भूमौ धान्यानि

भवन्ति सा धान्यभूमिः।।९।।

घर के कुड्य् अर्थात् भित्ति को यदि कुत्ता उत्कीर्ण अर्थात् खनन करता है, तब उस घर में खानक सन्धिभेद (सेंध) होने का भय होता है। गोष्ठ अर्थात् गोशाला का उत्खनन करे, तब गोहरण कहना चाहिए। धान्यभूमि को खनने पर धान्य की प्राप्ति होती है। जिस भूमि पर धान्य उत्पन्न होता है, उसे "धान्यभूमि" कहते हैं।।९।।

अथान्यच्चेष्टितमाह–

एकेनाक्ष्णा साश्रुणा दीनदृष्टिर्म-
न्दाहारो दुखकृत् तद्गृहस्य।
गोभिः साकं क्रीडमाणः सुभिक्षं
क्षेमारोग्य चाभिधत्ते मुदं च।।१०।।

अन्य चेष्टाओं को बतलाते हैं–

यदि गृह-श्वान एक नेत्र से आँसू गिराता हुआ कातर नयनों वाला हो और अल्प भोजन करे, तो उस घर के लिए दुःखकारक होता है। गायों के साथ खेलता हुआ श्वान, सुभिक्ष, कल्याण, आरोग्य और प्रसन्नता लाता है।।१०।।

एकेनाक्ष्णा एकेन नयनेन चाश्रुणाश्रुयुक्तेनोपलक्षितः स च दीनदृष्टिर्मन्दाहारोऽ-ल्पभोजनो यदि भवति, तदा तद्गृहस्य तस्य वेश्मनो दुःखकृद्भवति। गोभिः साकं गोभिः सह क्रीडमाणः सुभिक्षमभिधत्ते करोति। तथा क्षेमारोग्यं मुदं च हर्षमभिधत्ते करोति।।१०।।

एक आँख अश्रुयुक्त हो और वह श्वान भोजन कम करे, दीन-हीन नेत्रों वाला प्रतीत हो तब उस घर के लिए दुःख देने वाला होता है। गायों के साथ क्रीड़ा करे तब सुभिक्ष लाता है तथा क्षेम, आरोग्य और मुद अर्थात् हर्ष का कारक होता है।।१०।।

अन्यदप्याह–

वामं जिघ्रेज्जानु वित्तागमाय स्त्रीभिः साकं विग्रहो दक्षिणं चेत्।
ऊरु वामं चेन्द्रियार्थोपभोगः सव्यं जिघ्रेदिष्टमित्रैर्विरोधः।।११।।

और भी कहते हैं–

यदि श्वान बायें घुटने को सूँघें तब धनागम होता है। वह यदि दाहिने घुटने को

सूँघता है तब स्त्रियों के साथ कलह होता है। यदि कुत्ता बायीं जंघा को सूँघे तब ऐन्द्रिक सुख प्राप्त होता है। यदि दक्षिण जंघा को सूँघता है तब इष्ट-मित्रों से विरोध होता है॥११॥

सारमेयो यातुर्वामं जानु यदि जिघ्रेत् तदा वित्तागमाय धनलाभाय भवेत्। यदा दक्षिणं जानु जिघ्रेत् तदा स्त्रीभिः साकं योषिद्भिः सह विग्रहो भवति। वाममूरुं यदि जिघ्रेत् तदा इन्द्रियार्थोपभोगो भवति। इन्द्रियाणां बुद्धीन्द्रियाणां येऽर्था विषया-स्तदुपभोगो भवति। सव्यं दक्षिणमूरूं जिघ्रेत् तदा इष्टैर्बन्धुभिर्मित्रैः सुहृद्भिः सह विरोधो भवति।।११।।

कुत्ता यदि यात्री का बायाँ घुटना सूँघता है तब धन का लाभ होता है। यदि वह दक्षिण घटुना सूँघता है तब स्त्रियों के साथ विग्रह (कलह) होता है। यदि बाएँ जंघे को सूँघता है तब इन्द्रियों को सुखोपभोग प्राप्त होता है। अर्थात् ज्ञानेन्द्रियों के जो विषय होते हैं उनका उपभोग होता है। यदि दाहिने जंघे को सूँघता है, तब मित्रों के साथ विरोध होता है॥११॥

अन्यदप्याह—

पादौ जिघ्रेद्यायिनश्चेदयात्रां प्राहार्थाप्ति वाञ्छितां निश्चलस्य।
स्थानस्थस्योपानहौ चेद्विजिघ्रेत् क्षिप्रं यात्रां सारमेयः करोति।।१२।।

और भी कहते हैं—

यदि यात्री के पैरों को कुत्ता सूँघता है, तो यात्रा का निषेध होता है। यदि कुत्ता स्थिर स्थित रहे, तब मनोवाञ्छित धन की प्राप्ति होती है। अपने स्थान पर बैठे हुये यात्री के जूते को यदि कुत्ता सूँघता है, तो शीघ्र ही प्रस्थान होता है॥१२॥

सारमेयः श्वा यायिनो गच्छतः पादौ चरणौ जिघ्रेत् तदाऽयात्रां गमननिषेधं प्राह कथयति। निश्चलस्य तत्र स्थितस्यैव वाञ्छितामभीष्टामर्थप्राप्तिं धनागमं प्राह। स्थानस्थितस्यैकदेशस्थितस्योपानहौ चेद्यदि विजिघ्रेत् तदा क्षिप्रमाश्वेव यात्रां गमनं करोति।।१२।।

सारमेय अर्थात् कुत्ता यात्रा करने वाले व्यक्ति के चलते हुये पैरों को सूँघता है, तब उस यात्रा का निषेध अर्थात् स्थगन होता है। यदि वह निश्चल स्थित हो तब मनोभिलषित धनागम होता है। एक प्रान्त में स्थित जूते को यदि कुत्ता सूँघता है, तब शीघ्र ही यात्रा का आरम्भ होता है॥१२॥

अन्यदप्याह—

उभयोरपि जिघ्रणे हि बाह्वो-

विज्ञेयो रिपुचौरसम्प्रयोगः।

अथ भस्मनि गोपयीत भक्षान्

मांसास्थीनि च शीघ्रमग्निकोपः।।१३।।

और भी कहते हैं-

यदि कुत्ता दोनों बाहों को सूँघे तब शत्रु तथा चोर से हानि होती है। यदि कुत्ता भोज्य पदार्थों को भस्म (राख) में छिपाये अथवा हड्डी, मांस आदि को छिपाये, तो शीघ्र ही आग लगने का भय होता है।।१३।।

उभयोर्द्वयोरपि बाह्योर्जिघ्रणे रिपुचौरसम्प्रयोगो विज्ञेयः। रिपुः शत्रुः। चौरा स्तस्कराः। एतैः सम्प्रयोगो विज्ञेयो विज्ञातव्यः। अथ वा भस्मनि भस्ममध्ये भक्षानपूपादीन् गोपयीत स्थगित्वा स्थापयेत्, मांसास्थीनि वा गोपयीत तदा शीघ्रमाश्वेवाग्निकोपो भवति। तथा च गर्गः-

यदा श्वा जिघ्रति भुजौ यातुर्द्वावपि निर्दिशेत्।

रिपुचौरभयं घोरं तस्मिन्नुत्पातदर्शने।।

आमिषं तु यदाऽऽगृह्य तृणैराच्छाद्य तिष्ठति।

उत्पातं तादृशं दृष्ट्वा विन्द्यादग्निमुपस्थितम्।।इति।।१३।।

यदि दोनों भुजाओं को कुत्ता सूँघता है तब रिपु अर्थात् शत्रु और चोर अर्थात् तस्कर का सम्प्रयोग अर्थात् आघात जानना चाहिए। भस्म (राख) के भीतर पूआ आदि भक्ष्य पदार्थों को चुरा कर रखता है अथवा मांस एवं हड्डी को छिपा कर रखथा है, तब शीघ्र अग्निप्रकोप होता है। जैसा कि आचार्यगर्ग ने कहा है-

यदि कुत्ता दोनों भुजाओं को सूँघता है तब इस उत्पात (क्रिया) को देखने का फल शत्रु तथा चोर से घोर कष्ट की प्राप्ति है। यदि आमिष पदार्थ (मांसादि) को लेकर तृणों से ढँककर स्थित होता है, तब इस प्रकार के उत्पात का फल अग्निभय का होना कहा गया है।।१३।।

अन्यदप्याह-

ग्रामे भषित्वा च बहिः श्मशाने

भषन्ति चेदुत्तमपुंविनाशः।

यियासतश्चाभिमुखो विरौति

यदा तदा श्वा निरुणद्धि यात्राम्।।१४।।

और भी कहते हैं-

ग्राम में भौंक कर यदि श्मशान में भौंकने लगता हो, तब प्रमुख व्यक्ति का निधन होता है। इसी प्रकार यदि यात्री के सम्मुख आकर कुत्ता भौंकने लगता है, तब यात्रा रुक जाती है॥१४॥

ग्रामे भषित्वा शब्दं कृत्वा बहिर्बाह्ये श्मशाने च यदि भषन्ति। शब्द कुर्वन्ति सारमेयास्तदोत्तमस्य प्रधानस्य पुंसो नरस्य मरणं विनाशो भवति। यियासतो यातुमिच्छोरभिमुखः संमुखो विरौति यदा शब्दं कुरुते तदा यात्रा गमनं निरुणद्धि निवर्तयति।।१४।।

गाँव में भौंक कर यदि कुत्ते बाह्य श्मशानभूमि में भौंकते हैं, तब प्रधान अर्थात् प्रमुख व्यक्ति का मरण होता है। यात्रा की कामना करने वाले व्यक्ति के सम्मुख यदि कुत्ता भौंकने लगे तब उसकी यात्रा नहीं हो पाती है॥१४॥

अन्यदप्याह—

उकारवर्णे विरुतेऽर्थसिद्धि-
रोकारवर्णेन च वामपार्श्वे।
व्याक्षेपमौकाररुतेन विन्द्या-
न्निषेधकृत्सर्वरुतैश्च पश्चात्।।१५।।

और भी कहते हैं—

कुत्ता जब 'उ'कार ध्वनि का शब्द करे तब कार्यसिद्धि होती है। वाम-भाग में 'ओ'कार वर्ण की ध्वनि करे तब भी कार्य की सिद्धि होती है। 'औ' वर्ण की ध्वनि से व्याकुलता बढ़ती है। सभी वर्णों की सम्मिलित ध्वनि होती है, तब यात्रा का निषेध हो जाता है॥१५॥

उकारवर्णे विरुते उकाराक्षरेण विरुते उच्चारितेऽर्थानां सिद्धिर्भवति। तथा यातुर्वामपार्श्वे वामभागे ओकारवर्णेन रुतेऽर्थसिद्धिरेव। औकाररुतेन व्याक्षेपमाकुलतां विन्द्यात्। यातुः पश्चात् सर्वरुतैः सर्ववर्णानामुच्चारणे निषेधकृद्यात्राप्रतिषेधं करोति।।१५।।

यदि कुत्ता भौंकने समय उकार की ध्वनि करे, तब अर्थ की सिद्धि होती है। यदि वह कुत्ता बायीं ओर होकर ओकार-ध्वनि से भौंकता है, तब भी अर्थ की सिद्धि होती है। औकार-स्वर की ध्वनि करने पर व्याकुलता की वृद्धि समझनी चाहिए। यात्री के पीछे यदि सभी स्वरों की मिश्रित-ध्वनि कुत्ता करता है, तब यात्रा का निषेध हो जाता है॥१५॥

अन्यदप्याह—

खंखेति चोच्चैश्च मुहुर्मुहुर्ये
रुवन्ति दण्डैरिव ताड्यमानाः।
श्वानोऽभिधावन्ति च मण्डलेन
ते शून्यतां मृत्युभयं च कुर्युः।।१६।।

और भी कहते हैं–

जो कुत्ते डण्डे से मारे जाने की तरह "खं, खं" की ध्वनि जोर-जोर से करते हैं; अथवा वृत्ताकार में समूह-बद्ध होकर दौड़ते हैं, तब वह गाँव जनशून्य हो जाता है और मृत्यु का भय उत्पन्न होता है।।१६।।

ये श्वानः कुक्कुरा उच्चैः कृत्वा मुहुर्मुहुः प्रतिक्षणं खंखेति रुवन्ति शब्दं कुर्वन्ति तथैव मुहुर्मुहुः रुवन्ति। अथवा मण्डलेन मण्डलाकृतिना समूहेन परिवर्तुलेन धावन्ति गच्छन्ति ते नगरस्य शून्यतां शून्यत्वं मृत्युभयं मरणभयं च कुर्युः।।१६।।

जो कुत्ते ऊँचे स्वर में बार-बार खं, खं शब्द कर भौंकते हैं, अथवा समूह में मण्डलाकार अर्थात् गोले में दौड़ते हैं, तब वे उस नगर की शून्यता तथा मृत्यु का भय उपस्थित करते हैं।।१६।।

अन्यदप्याह–

प्रकाश्य दन्तान् यदि लेढि सृक्विणी
तदाशनं मृष्टमुशन्ति तद्विदः।
यदाननं लेढि पुनर्न सृक्विणी
प्रवृत्तभोज्येऽपि तदान्नविघ्नकृत्।।१७।।

और भी कहते हैं–

यदि कुत्ता दाँतों को निकालकर तथा जबड़ा फैलाकर खाता है, तब मिष्ठान्न भोजन मिलता है। जिस भोज्य-वस्तु को मुख से खाकर ओठ पर्यन्त न खाये, तो भोजन कर्ता की भोजन में रुचि होने पर भी भोजन करने में विघ्न उपस्थित हो जाता है।।१७।।

दन्तान् रदान् प्रकाश्य सन्दर्श्य सृक्विणी ओष्ठपर्यन्ते यदि लेढि, तदा तद्विदः श्वचेष्टितज्ञा मृष्टमशनं भोजनमुशन्ति। यदाननं मुखं लेढि न पुनः सृक्विणी ओष्ठपर्यन्ते लेढि, तदा प्रवृत्तभोज्येऽपि भोक्तुं प्रवृत्तेऽपि नरेऽन्नविघ्नं करोति। न भोजनं लभत इति।।१७।।

दाँतो को प्रदर्शित करता हुआ ओठ पर्यन्त यदि कुत्ता भोजन करे, तब कुत्ते के लक्षणों को जानने वाले विद्वान् मधुरान्न के भोजन का लाभ बतलाते हैं। यदि मुख से भोजन करे और ओठ पर्यन्त मुख खोलकर भोजन न करे, तब भोजनकर्त्ता की प्रवृत्ति होने पर भी उसके भोजन में विघ्न होता है। अर्थात् भोजन प्राप्त नहीं होता है।।१७।।

विशेष व्याख्या–

'सृक्विणी' शब्द मूल में प्रयुक्त है जिसका अर्थ विवृति में 'ओठपर्यन्त' कहा गया है। अमरकोष २/६/११ में "प्रान्तावोष्ठस्य सृक्कणी" शब्द आया है। इस प्रकार ये दोनों शब्द समानार्थी हैं। इसकी व्युत्पत्ति 'सृजति लालादि, सृज विसर्गे' है। रामाश्रमी टीका में इस शब्द पर निम्नलिखित सन्दर्भ प्राप्त होते हैं–

'महासृक्काय शोभितो नृसिंहनखाग्रवत्' इति लताश्लेषात् कद्वयम्। 'स्मतस्य संभावय सृक्वणा कणान्' इति श्रीहर्षप्रयोगात् वकार युक्तं च। "न संयोगाद्वमन्तात्" (५/४/१३७) इत्यल्लोपो न।। 'स सृक्कणीप्रान्तमसृक्प्रदिग्धं प्रहेलिहानो हरिणारिरुच्चैः" इति पाणिनेर्ङीवन्ता च।। 'सृक्के द्वे चैव विज्ञेये चत्वारिंशच्च वक्रजाः' इति वदनाददन्तं सृक्कमपि।। सृक्कणि इतीदन्तमपि 'क्लीवेवारिशब्दवत्' इत्युक्तेः। सृक्वि शब्दो ह्रस्वेकारान्तोऽपि क्लीवः–इत्यपरे। सक्थ्यक्षिदधिसृक्कि तथा वारि स्यात् इत्यरुणः– इति मुकुटः।।

अन्यदप्याह–

ग्रामस्य मध्ये यदि वा पुरस्य
भषन्ति संहत्य मुहुर्मुहुर्ये।
ते क्लेशमाख्यान्ति तदीश्वरस्य
श्वारण्यसंस्थो मृगवद्विचिन्त्यः।।१८।।

और भी कहते हैं–

यदि गाँव अथवा नगर के मध्यभाग में कुत्ते एकत्रित होकर बारम्बार भौंकते हैं, तब वे उस ग्राम अथवा नगर के स्वामी के क्लेश को संसूचित करते हैं। वनों में रहने वाले कुत्ते की चेष्टाओं का मृग के सदृश ही फल का विचार करना चाहिए।।१८।।

ये सारमेया ग्रामस्य मध्ये पुरस्य वा संहत्य समेत्य बहवो मुहुर्मुहुः प्रतिक्षणं

---

१. द्रष्टव्योऽस्यैव ग्रन्थस्य ८५ अध्यायस्य ४३ श्लोकः।

भषन्ति शब्दं कुर्वन्ति, ते तदीश्वरस्य ग्रामस्वामिनः पुरस्वामिनो वा क्लेशमाख्यान्ति क्लेशं कथयन्ति। अरण्यसंस्थः श्वा कुक्कुरो मृगवद्विचिन्त्यः। मृगेण तुल्यं मृगवत्। मृगस्य यच्चेष्टितमुक्तं तदारण्यस्यास्य सारमेयस्य विचिन्तनीयमिति। "ओजाः१ प्रदक्षिणं शस्ता मृगाः सनकुलाण्डजाः" इत्यादि।।१८।।

जो श्वान ग्राम अथवा पुर के मध्य में समवेत स्वर से बार-बार भौंकते हैं, वे उस ग्राम अथवा पुर के अधिपति को होने वाले कष्ट को प्रकट करते हैं। अरण्य में स्थित श्वान अर्थात् कुक्कुर का मृग के समान विचार करना चाहिए। मृग की चेष्टाओं के सम्बन्ध में जो कुछ बतलाया गया है, तदनुसार ही अरण्यवासी-श्वान का भी फल-विचार करना चाहिए। जैसाकि अध्याय ८५ के श्लोक संख्या ४३ में "ओजाः प्रदक्षिणं शस्ता मृगाः सनकुलाण्डजाः" इत्यादि के द्वारा कहा गया है।।१८।।

अन्यदप्याह—

वृक्षोपगे क्रोशति तोयपातः
स्यादिन्द्रकीले सचिवस्य पीडा।
वायोर्गृहे सस्यभयं गृहान्तः
पीडा पुरस्यैव च गोपुरस्थे।।१९।।
भयं च शय्यासु तदीश्वराणां
याने भषन्तो भयदाश्च पश्चात्।
अथापसव्या जनसन्निवेशे
भयं भषन्तः कथयन्त्यरीणाम् ।।२०।।

और भी कहते हैं—

वृक्ष के समीपस्थ यदि कुत्ता भौंकता है, तो वर्षा होती है। इन्द्रकील अर्थात् अर्गला के समीप में भौंकने पर सचिव को शारीरिक पीड़ा होती है। घर के मध्यभाग अथवा वायव्यकोण में कुत्ता भौंकता है, तो सस्य-भय होता है, तथा यदि नगर के द्वार पर स्थित होकर भौंकता है, तब नगर को भय प्राप्त होता है। शय्या के ऊपर श्वान शब्द करे तो शय्या के स्वामी को भय मिलता है। यात्रा हेतु प्रस्थान करने पर भौंके तो यात्री को भय की प्राप्ति होती है। जन-समूह के वामभाग में स्थित होकर कुत्ते भौंकते हैं, तो शत्रुओं का भय उत्पन्न होता है।।१९-२०।।

वृक्षोपग इति। वृक्षोपगे वृक्षसमीपवर्तिनि सारमेये क्रोशति सति तोयपातो जलपातः स्याद् भवेत्। देवो वर्षतीत्यर्थः। इन्द्रकीले अर्गलासमीपे सचिवस्य

मन्त्रिणः पीडा स्याद् भवेत्। गृहान्तर्गृहमध्ये वायोर्गृहे वा वायव्यां दिशि यदि क्रोशति, तदा सस्यस्य भयं भवति। गोपुरस्थे पुरद्वारस्थिते पुरस्यैव पीडा भवेत्।।१९।।

वृक्ष के निकट कुत्ते के भौंकने पर तोयपात अर्थात् जल-वृष्टि होती है। अर्थात् देवता वर्षा करते हैं। इन्द्रकील अर्थात् अर्गला के समीप स्थित होकर भौंकता है, तब मन्त्री को पीड़ा पहुँचती है। गृह के मध्यभाग में अथवा गृह के वायव्यदिशा में यदि श्वान शब्द करता है, तो सस्यों को भय होता है। गोपुर अर्थात् नगर के द्वार पर स्थित होकर कुत्ता भौंकता है, तो नगरवासियों को कष्ट मिलता है।।१९।।

भयं च शय्यास्विति। शय्यास्वास्तरणेषु तदीश्वराणां शयनस्वामिनां भयं कुर्वन्ति। याने यात्रायां पश्चाद्भषन्तो यातुरेव भयदा भयं ददति। अथशब्दश्चार्थे। जनसन्निधौ जनानामेवापसव्या वामभागस्था भषन्तोऽरीणां शत्रूणां सम्बन्धि भयं प्रवदन्ति कथयन्तीति।।२०।।

।।इत श्रीभट्टोत्पलविरचितायां संहिताविवृतौ शाकुने श्वचक्रं नामाष्टाशीतितमोऽध्याय:।।८८।।

यदि शय्या के ऊपर स्थित होकर कुत्ता भौंकता है, तो उसके स्वामी अर्थात् शय्या के स्वामी को भय प्रदान करता है। तथा यदि यात्री के गमन के अनन्तर भौंकता है, तो यात्री को भय होता है। यहाँ पर "अथ" शब्द का प्रयोग "च" (और) अर्थ हेतु किया गया है। जनसन्निवेश अर्थात् जनसंकुल (जन-समूह) के अपसव्य अर्थात् बायीं ओर स्थित होकर कुत्ता भौंकता है, तो शत्रुओं से सम्बन्धित भय को सूचित करता है।।२०।।

।।श्रीभट्टोत्पलविरचित संहिता विवृति में शाकुनपरक श्वचक्र नामक अट्ठासीवें अध्याय की हिन्दी व्याख्या पूर्ण हुई।।८८।।

❋ ❋ ❋

।।अथैकोननवतितमोऽध्यायः।।

शिवारुताध्यायः

अथ शिवारुतं व्याख्यायते।

तत्रादावेव श्ववदतिदेशं विशेषं चाह—

श्वभिः शृगालाः सदृशाः फलेन
विशेष एषां शिशिरे मदाप्तिः।
हूहू रुतान्ते परतश्च टाटा
पूर्णः स्वरोऽन्ये कथिताः प्रदीप्ताः।।१।।

शिवारुत अध्याय ८९ की व्याख्या करते हैं।

श्वान से सियार की साम्यता और उसका वैशिष्ट्य कहते हैं—

सियारों का (शुभाशुभ) फल कुत्तों के समान होता है। तथापि विशेषता यह है कि शिशिर ऋतु में इसको (सियार को) मद (कामोत्तेजना) की प्राप्ति हो जाती है। बोलने के अन्त में हू-हू शब्द के बाद टा-टा शब्द इसके पूर्णस्वर हैं। तथा अन्य स्वरों को प्रदीप्त कहा गया है।।१।।

शृगालाः श्वभिः सारमेयैः फलेन सदृशास्तुल्याः यादृशं चेष्टितं फलं च शुनामुक्तं तादृशमेव शृगालानां विज्ञातव्यम्, किन्त्वयं विशेषः—एषां शृगालानां शिशिरे माघफाल्गुनयोर्मदाप्तिर्मदप्रादुर्भावो भवति। तस्मात् तेषां शिशिरे निष्फलता। रुतान्ते रुतावसाने हूहूशब्दः परतोऽनन्तरं टाटा एष पूर्णः स्वरः। अन्ये सर्वे स्वराः प्रदीप्ता उक्तः कथिताः।।१।।

शृगालों अर्थात् सियारों का कुत्तों के सदृश फल होता है। जिस प्रकार की चेष्टा का जो फल कुत्तों का कहा गया है, उसी प्रकार का फल सियारों का भी जानना चाहिए। किन्तु यहाँ पर विशेष बात यह है कि इन सियारों को शिशिरऋतु अर्थात् माघ तथा फाल्गुन मास में मद उत्पन्न होता है। इस कारण से शिशिर ऋतु में उनकी (सियारों की) चेष्टाएँ निष्फल होती हैं। क्रन्दन के अन्त में हूहू शब्द के पश्चात् टा-टा शब्द सियार का पूर्णस्वर होता है। तथा अन्य समस्त स्वर प्रदीप्त कहे गये हैं।।१।।

अथात्रैव लोमाशिकायाश्चेष्टितमाह—

लोमाशिकायाः खलु कक्कशब्दः
पूर्णः स्वभावप्रभवः स तस्याः।
येऽन्ये स्वरास्ते प्रकृतेरपेताः
सर्वे च दीप्ता इति सम्प्रदिष्टाः।।२।।

यहाँ पर श्रृगाली की चेष्टाओं को बतलाते हैं–

श्रृगाली के कक्क शब्द ही पूर्ण हैं, जो कि उसके स्वभाव से उत्पन्न होता है। तथा जो अन्य स्वर होते हैं, वे उसकी प्रकृति के विरुद्ध होते हैं। अत: उन सभी स्वरों को दीप्त बतलाया गया है।।२।।

खलुशब्दचार्थे। लोमाशिकायाश्च कक्कशब्दः पूर्णः स च लोमाशिकायाः स्वभावप्रभवः स्वभावादेव प्रभवत्युत्पद्यते। येऽन्ये स्वराः शब्दास्ते प्रकृतेः स्वभावतोऽपेता अपगतास्ते च सर्वे दीप्ताः सम्प्रदिष्टाः कथिताः।।२।।

"खलु" शब्द यहाँ पर "च" अर्थात् "और" अर्थ में प्रयुक्त है। लोमाशिका अर्थात् श्रृगाली का "कक्क" शब्द पूर्ण (स्वर) है। तथा वह (कक्क स्वर) श्रृगाली में स्वभाव से ही उत्पन्न होता है। तथा जो अन्य स्वर अर्थात् शब्द उत्पन्न होते हैं, वे उसके स्वभाव के विपरीत उत्पन्न होते हैं तथा उन सभी (अस्वाभाविक) स्वरों को दीप्त कहा जाता है।।२।।

अथ शिवाचेष्टितमाह—

पूर्वोदीच्योः शिवा शस्ता शान्ता सर्वत्र पूजिता।
धूमिताभिमुखी हन्ति स्वरदीप्ता दिगीश्वरान् ।।३।।

श्रृगाली की चेष्टा बतलाते हैं–

पूर्व तथा उत्तरदिशा में श्रृगाली शुभ कही गयी है। तथा शब्द-रहित होने पर सर्वत्र शुभदायी मानी गयी है। सूर्याभिमुखी होकर श्रृगाली दीप्त स्वर करे, तो उस दिशा के राजा का नाश होता है।।३।।

शिवा शृगालिका पूर्वोदीच्योः पूर्वस्यामुत्तरस्यां च दिशि शस्ता शुभफलदा। सा च शान्ता शान्तरवा शान्तदिक्स्था च सर्वत्र सर्वस्यां दिशि पूजिता शुभदा। यां दिशमादित्यो यास्यति सा धूमिता। धूमिताभिमुखी शिवा स्वरदीप्ता च क्रूरशब्दा दिगीश्वरान् हन्ति। तस्यां दिशि योऽधिपतिस्तं विनाशयतीत्यर्थः।।३।।

शिवा अर्थात् श्रृगाली पूर्वदिशा तथा उत्तरदिशा में स्थित हो, तो शुभफल देती है। तथा वह शान्तरवा अर्थात् नि:शब्द होकर स्थित हो, तब सभी दिशाओं में

शुभप्रदायक होती है। जिस दिशा की ओर सूर्य गमन कर रहा हो, उस दिशा को "धूमिता" कहते हैं। धूमितामुखी शृगाली दीप्तस्वर अर्थात् क्रूरस्वर करे तो उस दिशा के स्वामी का नाश होता है। अर्थात् उस दिशा का जो अधिपति (स्वामी) होता है, उसका विनाश होता है॥३॥

अथ न ज्ञायते कस्यां दिशि क ईश्वरस्तदर्थमाह—

[१]राजा कुमारो नेता च दूतः श्रेष्ठी चरो द्विजः।
गजाध्यक्षश्च पूर्वाद्याः क्षत्रियाद्याश्चतुर्दिशम्॥४॥

किस दिशा का कौन स्वामी है, यह बतलाते हैं—

राजा, राजकुमार, सेनापति, दूत, श्रेष्ठी, गुप्तचर, ब्राह्मण तथा गजाध्यक्ष क्रमशः पूर्व आदि दिशाओं के स्वामी हैं। तथा क्षत्रिय आदि क्रमशः पूर्वादि चार दिशाओं के स्वामी हैं॥४॥

राजा नृपः पूर्वस्यां दिशि। कुमारो राजपुत्र आग्नेय्याम्। नेता सेनापतिर्दक्षिणस्याम्। दूतो गमागमिको नैर्ऋत्याम्। श्रेष्ठी पश्चिमायाम्। चरो गूढपुरुषो वायव्याम्। द्विजो ब्राह्मण उत्तरस्याम्। गजाध्यक्षो हस्तिशालाध्यक्ष ऐशान्याम्। ऐते क्रमेण पूर्वाद्या ज्ञेयाः। तथा क्षत्रियाद्याश्चतुर्दिशाम्। पूर्वस्यां क्षत्रियाः। दक्षिणस्यां वैश्याः। पश्चिमायां शूद्राः। उत्तरस्यां ब्राह्मणाः॥४॥

राजा अर्थात् नृप पूर्वदिशा का स्वामी होता है। कुमार अर्थात् राजा का पुत्र अग्निकोण का, नेता अर्थात् सेनापति दक्षिणदिशा का, दूत नैर्ऋत्यकोण का, श्रेष्ठी पश्चिमदिशा का, चर अर्थात् गूढ़-पुरुष (गुप्तचर) वायव्यकोण का, द्विज अर्थात् ब्राह्मण उत्तरदिशा का तथा गजाध्यक्ष अर्थात् हस्ति-शालाध्यक्ष ईशानकोण का स्वामी होता है। तथा क्षत्रिय आदि क्रमशः चारों दिशाओं के स्वामी होते हैं। अर्थात् पूर्वदिशा के स्वामी क्षत्रिय, दक्षिणदिशा के वैश्य, पश्चिमदिशा के शूद्र तथा उत्तरदिशा के स्वामी ब्राह्मण होते हैं॥४॥

अन्यदप्याह—

सर्वदिक्ष्वशुभा दीप्ता विशेषणाह्न्यशोभना।
पुरे सैन्येऽपसव्या च कष्टा सूर्योन्मुखी शिवा॥५॥

और भी कहते हैं—

दीप्त स्वर सभी दिशाओं में अशुभ होते हैं तथा दिन में विशेष अशुभ होते हैं। नगर अथवा सेना के दक्षिणभाग में सूर्याभिमुखी शिवा (शृगाली) कष्ट देती है॥५॥

---

१. इदं पद्यमस्य ग्रन्थस्य ८५ अध्यायेऽपि।

दीप्ता शिवा सर्वासु दिक्ष्वशुभा अनिष्टफला। अह्नि दिवसे विशेषेणातिशयेनाशोभना। पुरे नगरे सैन्ये सेनायां वा अपसव्या दक्षिणभागस्था सूर्योन्मुखी रव्यभिमुखी शिवा कष्टा कष्टफला। अशुभेत्यर्थः।।५।।

शिवा अर्थात् शृगालीका दीप्तस्वर सभी दिशाओं में अनिष्ट-फल देता है। दिन में विशेष रूप से अशुभकारक होता है। नगर अथवा सेना के दक्षिणभाग में स्थित सूर्योन्मुखी अर्थात् सूर्य की ओर मुँह की हुई शिवा (शृगाली) कष्ट देती है।।५।।

अथ रुतविशेषेण फलमाह–

याहीत्यग्निभयं शास्ति टाटेति [१]मृतवेदिका।
धिग्धिग् दुष्कृतिमाचष्टे सज्वाला देशनाशिनी।।६।।

शब्द-विशेष के द्वारा फल बतलाते हैं–

शिवा 'याहि' शब्द उच्चरित करे तो अग्निभय, 'टा-टा' शब्दोच्चार करे तो मृत्यु, 'धिग्-धिग्' शब्द करे तो अतिशय पीड़ा को सूचित करती है। ज्वालायुक्त शृगाली देश का नाश करती है।।६।।

याहीति रुते शिवा अग्निभयं हुताशनभीतिं शास्ति कथयति। टाटेति रुते मृतवेदिका। मृतं बन्ध्वादिकं वेदयति कथयति। केचिन्मृतिवेदिकेति पठन्ति। धिग्धिगिति रुते दुष्कृतिमतिकष्टमाचष्टे कथयति। सज्वाला ज्वालासंयुता देशनाशिनी देशान् नाशयति।।६।।

यदि शृगाली 'याहि' शब्द करे, तो अग्निभय को व्यक्त करती है। 'टा-टा' शब्द का उच्चारण करे तो बन्धु आदि की मृत्यु बतलाती है। कुछ लोग मरण को कहती है, ऐसा पाठ करते हैं। यह शृगाली 'धिग्-धिग् शब्द करती है तो अतिशय कष्ट की सूचना देती है। सज्वाला अर्थात् ज्वाला-युक्त (मुख से ज्वाला निकालती) हो तो वह देशनाशिनी अर्थात् देशों का नाश करती है।।६।।

अत्रैव मतान्तरमाह–

नैव दारुणतामर्के सज्वालायाः प्रचक्षते।
अ[२]र्काद्यनलवत् तस्या वक्त्र लालास्वभावतः।।७।।

---

१. मृतिवेदिकेति पाठान्तरम्।

२. आक्रान्तानलवदिति पाठान्तरम्।

यहाँ पर मतान्तर को बतलाते हैं–

शृगाली के मुख से ज्वाला का निकलना भयङ्कर नहीं होता, क्योंकि सूर्य आदि पिण्ड जिस प्रकार तेजयुक्त (ज्वालायुक्त) होते हैं, उसी प्रकार उसका (शृगाली का) मुख भी लार के कारण स्वभाव से ही ज्वाला का निकलना भयङ्कर नहीं होता है, क्योंकि सूर्य आदि पिण्ड तेजयुक्त (ज्वालायुक्त) होते हैं, उसी प्रकार उसका (शृगाली) का मुख भी लार के कारण स्वभाव से ही ज्वालायुक्त होता है।।७।।

एके काश्यपादयो मुनयः सज्वालायाः शिवाया दारुणतां क्रूरतां नैव प्रचक्षन्ते कथयन्ति। कुतो हेतोः? अर्काद्यनलवदिति। तस्याः शिवाया वक्त्रं मुखं लाला-स्वभावत अर्काद्यनलवत्। यथार्कादिको ज्योतिष्मान् पदार्थः स्वभावादेव साग्निक-स्तेजस्वी। एवमेतस्या वक्त्रं लालास्वभावादेव साग्निकमिति हेतोस्तस्य नैव दारुणता। तथा च काश्यपः–

नैव दारुणता तस्याः सज्वालाया स्वभावतः।
लालायाः साग्निकं वक्त्रमतः सा सुभदा शिवा।।

काश्यप आदि मुनियों का मत है कि ज्वालायुक्त शृगाली भयङ्करता को व्यक्त नहीं करती है। किस कारण से? यह बतलाते हैं–उसका अर्थात् शृगाली का मुख लार के कारण स्वाभाविक रूप से ज्वालायुक्त प्रतीत होता है। जिस प्रकार से सूर्य आदि ज्योतिष्मान् पदार्थ स्वभावतः अग्नियुक्त अर्थात् तेजयुक्त होते हैं, उसी प्रकार से इसका (शृगाली का) मुख लार के कारण स्वभावतः अग्नियुक्त दीखता है। इस कारण से ज्वालायुक्त शृगाली दारुण नहीं होती है। जैसाकि आचार्य काश्यप ने कहा है–

इसकी (शृगाली की) ज्वाला की भयङ्करता स्वभावतः नहीं होती है। अपितु लार से अग्नि (ज्वाला) युक्त प्रतीत होने वाला शृगाली का मुख हो, तो भी कल्याणदायक होता है।

केचिदाक्रान्तानलवदिति पठन्ति। यथा साग्निकं काष्ठमाक्रान्तं भ्राम्यमाणं साग्निकं सर्वत्र दृश्यते तद्वत् तस्या वक्त्रं लालास्वभावतः साग्निकमिति। एवं मुखपानीयस्वभावात् सा सज्वालेति।।७।।

"कुछ लोग यहाँ पर अग्नि से आक्रान्त" ऐसा पाठ करते हैं। जिस प्रकार अग्नियुक्त काष्ठ को घुमाने से सर्वत्र प्रज्ज्वलित अग्नि दिखायी पड़ती है, उसी प्रकार उसका मुख भी स्वाभाविक रूप से लार के कारण अग्नियुक्त प्रतीत होता है। एवं इस प्रकार उसके मुख के स्वाभाविक जलद्रव (लार) के कारण वह ज्वाला प्रकट होती है।।७।।

अन्यदप्याह—

अन्यप्रतिरुता याम्या सोद्बन्धमृतशंसिनी।
वारुण्यनुरुता सैव शंसते सलिले मृतम्।।८।।

और भी कहते हैं–

दक्षिणदिशा में अन्य किसी शिवा के शब्द के साथ ही प्रति-शब्द कोई शिवा करती है, तो वह किसी प्राणी की बन्धन से होने वाली मृत्यु को सूचित करती है। पश्चिमदिशा में वह ध्वनि करती हुई जल में डूबने से होने वाली मृत्यु की सूचना देती है।।८।।

याम्या दक्षिणादिग्भागस्थाऽन्यप्रतिरुताऽन्यया परया शिवया सैव कृतशब्दा सा शिवोद्बन्धमृतशंसिनी, उद्बन्धनेन मृतं शंसति कथयति। सैव शिवा वारुणी पश्चिमदिक्स्थाऽन्ययाऽनुरुता सलिले जले मृतं बन्ध्वादिकं शंसते कथयति।।८।।

याम्य अर्थात् दक्षिणदिशा में स्थित शिवा की ध्वनि को कोई अन्य शिवा प्रतिध्वनित करती है, वह शिवा बन्धन द्वारा मृत जीव को सूचित करती है। वही शिवा पश्चिमदिशा में स्थित होकर किसी अन्य शिवा द्वारा प्रतिरुदित होने पर जल में मृत किसी बन्धु (कुटुम्बी जन) की आशंका प्रकट करती है।।८।।

अस्याः शब्दवशेनफलमाह—

अक्षोभः श्रवणं चेष्टं धनप्राप्तिः प्रियागमः।
क्षोभः प्रधानभेदश्च वाहनानां च सम्पदः।।९।।
फलमासप्तमादेतदग्राह्यं परतो रुतम्।
याम्यायां तद्विपर्यस्तं फलं षट् पञ्चमादृते।।१०।।

ध्वनि के अनुसार शिवा का फल कहते हैं–

एक बार से सात बार तक शिवा द्वारा की गयी ध्वनि का क्रमशः क्षोभरहित, श्रवण (शुभ समाचार), धनप्राप्ति, प्रियसमागम, क्षोभ, श्रेष्ठजनों से मतभेद और वाहन-सम्पदा का लाभ होता है। इन सातों फलों को दूसरी शिवा के द्वारा प्रतिशब्द किये जाने पर ग्रहण नहीं करना चाहिए। दक्षिणदिशा में स्थित ये फल विपरीत होते हैं। परन्तु पञ्चम एवं षष्ठ फल विपरीत नहीं होते हैं।।९-१०।।

अक्षोभ इति। सा शिवा एकं वारमुक्त्वा यदि तूष्णीं करोति, तस्मिन् देशे अक्षोभोऽनाकुलता भवति। द्वितीये एवमुक्त्वा यदि तूष्णीं करोति, तदा श्रवणं

चेष्टमिष्टस्याभिप्रेतस्य श्रवणमाकर्णनम्। एवं तृतीये रावे धनप्राप्तिरर्थलाभः। चतुर्थे प्रियस्य वल्लभस्यागमः। पञ्चमे क्षोभ आकुलता। षष्ठे प्रधानभेदः। प्रधानानां राजपुरुषाणां परस्परं भेदो भवति। सप्तमे वाहनानामश्वादीनां च सम्पदो भवन्ति। सम्पदो वृद्धयः।।९।।

यदि शिवा एक बार ध्वनि करके मौन होती है, तो उस स्थान पर अक्षोभ अर्थात् अव्याकुलता होती है। दो बार ध्वनि करके शान्त होने पर श्रवण अर्थात् मनोभिलषित वस्तु विषय में सूचना मिलती है। इसी प्रकार तीन बार ध्वनि होने पर आर्थिक लाभ और चार बार की ध्वनि पर अपने प्रियजन का आगमन होता है। पाँच बार शब्द होने पर व्याकुलता और छः बार के शब्द से प्रमुख राजपुरुषों का परस्पर भेद उत्पन्न होता है। सात बार शब्द करने पर वाहन अर्थात् हाथी, घोड़ा आदि वाहन-सम्पदा प्राप्त होती है। अथवा सम्पत्ति की वृद्धि होती है।।९।।

फलमासप्तमादिति। यदेतत् प्रागुक्तं शिवारुते फलं तदासप्तमाद्रावात् परतो यदि विरौति, तदा तद्रुतमग्राह्यं निष्फलत्वात्। याम्यायामिति। याम्यायां दक्षिण-दिक्स्थितायां शिवायां तदेव फलं विपर्यस्यं विपरीतगतं ग्राह्यम्, किन्तु षट्पञ्चमादृते षष्ठं पञ्चमं च वर्जयित्वा। तयोः पूर्वोक्तमेव फलमन्येष्वपि विपर्ययः। अयमर्थः— प्रथमे क्षोभः। द्वितीये अनिष्टश्रवणम्। तृतीये धनहानिः। चतुर्थे प्रियविप्रयोगः। पञ्चमे क्षोभ एव। षष्ठे प्रधानभेद एव। सप्तमे वाहनानामसम्पदो हानयः। सप्तमात् परतो न ग्राह्यं निष्फलत्वात्।।१०।।

ये सभी शिवा शब्द के फल सात बार से अधिक किये जाने पर ग्राह्य नहीं होते हैं, क्योंकि उनका कोई फल नहीं होता है। दक्षिणदिशा में स्थित शिवा के ये सभी फल विपरीत ग्रहण करने चाहिए। किन्तु पञ्चम और षष्ठ को छोड़-कर ही विपरीत फल प्राप्त होता है। तात्पर्य यह है कि प्रथम में क्षोभ, दूसरे में अशुभ श्रवण, तीसरे में धनहानि, चतुर्थ में प्रिय-वियोग, पञ्चम में क्षोभ, षष्ठ प्रधानपुरुषों में भेद, सप्तम में वाहनों की हानि होती है। सात बार से अधिक ध्वनि निष्फल होने के कारण ग्रहण नहीं की जाती है।।१०।।

अथाशुभां शिवामाह—

या रोमाञ्चं मनुष्याणां शकृन्मूत्रं च वाजिनाम्।
रावात् त्रासं च जनयेत् सा शिवा न शिवप्रदा।।११।।

अशुभ-शिवा का फल कहते हैं—

जिसा शिवा की ध्वनि से मनुष्यों में रोमाञ्च हो जाये तथा घोड़े मूत्र त्याग करने लगें और उस ध्वनि से भय उत्पन्न हो, ऐसी शिवा की ध्वनि शुभाकरक नहीं होती

है॥११॥

या शिवा रावाच्छब्दान्मनुष्याणां पुरुषाणां रोमाञ्चं रोमहर्षं जनयेदुत्पादयेत्। वाजिनामश्वानां पुरीषमूत्रं जनयेत्। जनानां त्रासं भयं च। सा न शिवप्रदा शिवं श्रेयो न ददाति।।११।।

जो शिवा-ध्वनि पुरुषों में रोमाञ्च उत्पन्न करे, अश्वों में मूत्र एवं लीद (पुरीष) का विसर्जन होने लगे तथा लोगों में भय उत्पन्न होने लगे, तो वह शिवा श्रेयस्करी नहीं होती है॥११॥

अथ शुभलक्षणमाह—

मौनं गता प्रतिरुते नरद्विरदवाजिभिः।
या शिवा सा शिवं सैन्ये पुरे वा सम्प्रयच्छति।।१२।।

अब शुभ लक्षणों को कहते हैं—

जो शिवा मनुष्य, हाथी और घोड़े द्वारा प्रतिध्वनि किये जाने पर मौन हो जाती है, वह सेना अथवा नगर में कल्याण करने वाली होती हैं।१२॥

या शिवा नरैर्मनुष्यैः। द्विरदैर्हस्तिभिः। वाजिभिरश्वैः। प्रतिरुते प्रतिवाशिते मौनं गता तूष्णीं करोति। सा सैन्ये सेनायाम्। पुरे नगरे। शिवं श्रेयः। सम्प्रयच्छति ददाति।।१२।।

मनुष्यों, हाथियों, अश्वों द्वारा प्रतिध्वनि किये जाने पर जो शिवा मौन रहती है, वह सेना और नगर में शिव अर्थात् कल्याण को देती है॥१२॥

अन्यद्रुतलक्षणमाह—

भेभेति शिवा भयङ्करी भोभो व्यापदमादिशेच्च सा।
मृतिबन्धनिवेदिनी फिफे हूहू चात्महिता शिवा स्वरे।।१३।।

अन्य शब्दों के लक्षण कहते हैं—

"भेभा" ध्वनि करने वाली शिवा भयङ्करी होती है और यदि वह भो-भो ध्वनि करे, तब विपत्ति की सूचक होती है। फि-फे ध्वनि करने पर मृत्यु और बन्धन की सूचना देती है तथा हू-हू शब्द करने पर आत्मकल्याण करती हैं॥१३॥

भेभा इति रुते शिवा भयङ्करी भवति भयं करोति। भोभो इति रुते सा शिवा व्यापदं विशेषेणातीवापदमादिशेत् कथयेत्। मृतिबन्धनिवेदिनी फिफे इति। फिफे इति रुते मृतिं मरणं बन्धनं च निवेदयति कथयति। हूहू इति स्वरं शब्दं

रुवन्ती शिवा आत्महिता भवति। आत्मनः शिवं श्रेयः करोति श्रोतुः।।१३।।

शिवा भेभा शब्द करने वाली भयङ्करी अर्थात् भय उत्पन्न करती है। भोभो शब्द करने पर वह शिवा व्यापद अर्थात् विशेष आपदा का निर्देश करती है। फिफे ध्वनि करने पर मरण और बन्धन को संसूचित करती हैं। हूहू स्वर को निकालती हुई शिवा आत्महिता अर्थात् श्रोता का कल्याण करती है।।१३।।

अन्यदप्याह–

शान्ता त्ववर्णात् परमारुवन्ती
टाटामुदीर्णामिति वाश्यमाना।
टेटे च पूर्वं परतश्च थेथे
तस्याः स्वतुष्टिप्रभवं रुतं तत्।।१४।।

और भी कहते हैं–

जो शिवा अवर्णादि से रुदन करती है और शान्तदिशा में होती हैं अथवा टा-टा शब्दोच्चारण करती है अथवा पहले टेटे की ध्वनि करने के पश्चात् थेथे शब्द करती है, वह अपनी प्रसन्नता के लिए इन शब्दों का उच्चारण करती हैं, जिससे श्रोता का शुभ होता है।।१४।।

या शिवा शान्ता शान्तदिक्स्था मधुरस्वरा च। अवर्णादकाराक्षरात् परमनन्तरमारुवन्ती। अकारमादावुच्चार्य पश्चादाकारमुच्चारयतीत्यर्थः अथवोदीर्णामुद्भटशब्दां टाटामिति वाश्यमाना रुवन्ती, अथवा पूर्वं प्रथमं टेटे इति रुवन्ती, एतच्छोभनम् ।।१४।।

जो शिवा शान्ता अर्थात् शान्तदिशा में स्थित होकर मधुर स्वर में अवर्ण से आरम्भ कर पश्चात् रोती है। अर्थात् पहले अकार का उच्चारण कर तत्पश्चात् आकार का उच्चारण करती है। अथवा उद्भट शब्द "टाटा" का उच्चारण करती हुई अथवा पहले टेटे की ध्वनि करती हुई बाद में थेथे की ध्वनि करे, तब उस शिवा का यह रुदन आत्मीय-तुष्टि के लिए होता है और यह शुभकारक है।।१४।।

अन्यदप्याह–

उच्चैर्घोरं वर्णमुच्चार्य पूर्वं
पश्चात् क्रोशेत् क्रोष्टुकस्यानुरूपम्।
या सा क्षेमं प्राह वित्तस्य चाप्तिं
संयोगं वा प्रोषितेन प्रियेण।।१५।।

और भी कहते हैं–

प्रारम्भ में कठोर वर्णों का उच्चारण कर तत्पश्चात् अपनी जातिगत ध्वनि (हुँआ-हुँआ) करे, तब वह कल्याण करने वाली, धनप्रदात्री और प्रवासी-प्रेमी के साथ संयोग कराती है॥१५॥

या शिवा उच्चैः पूर्वमादौ घोरं क्रूरं वर्णमक्षरमुच्चार्य पश्चादनन्तरात् क्रोष्टुकस्य शृगालस्यानुरूपं सदृशं क्रोशेद्। ब्रूयात्। एवंविधा सा क्षेमं प्राह कथयति। क्षेमं लब्धपालनं वित्तस्य चाप्तिं लब्धिम्। अथवा प्रोषितेन प्रियेण देशान्तरगतेन प्रियेण वल्लभेन संयोगं प्राह कथयति।।१५।।

॥श्रीभट्टोत्पलविरचितायां संहिताविवृतौ शाकुने शिवारुतं

नामैकोननवतितमोऽध्याय:॥८९॥

जो शिवा उच्च स्वर में पहले घोर अर्थात् क्रूर वर्णों का उच्चारण करे, तदनन्तर क्रोष्टुक अर्थात् सियार के अनुरूप बोले, इस प्रकार वह कल्याण को व्यक्त करती है। क्षेम अर्थात् प्राप्त की रक्षा और धन की प्राप्ति कराती है, अथवा प्रोषित अर्थात् प्रवासी प्रियतम के साथ अर्थात् जो देशान्तर गया हो, ऐसे प्रिय-वल्लभ के साथ संयोग को अभिव्यक्त करती है॥१५॥

॥श्रीभट्टोत्पलविरचित संहिता विवृति में शाकुन के अन्तर्गत शिवारुत नामक

नवासीवें अध्याय की हिन्दी व्याख्या पूर्ण हुई॥८९॥

❄ ❄ ❄

।।अथ नवतितमोऽध्यायः।।

मृगचेष्टिताध्यायः

अथ मृगचेष्टितं व्याख्यायते।

तच्चाह–

सीमागता वन्यमृगा रुवन्तः
स्थिता व्रजन्तोऽथ समापतन्तः।
सम्प्रत्यतीतैष्यभयानि दीप्ताः
कुर्वन्ति शून्यं परितो भ्रमन्तः।।१।।

मृगचेष्टित अध्याय ९० की व्याख्या करते हैं।

जैसा कि कहा गया है–

जंगल में रहने वाला मृग गाँव की सीमा में स्थित होकर ध्वनि करता हो, और वहीं स्थित रहे, तो वर्तमानकालिक भय को तथा यदि भ्रमण करता हुआ हो, तो भूतकालिक भय को और यदि गाँव की सीमा में प्रवेश कर रहा हो, तब आगामी भय को प्रकट करता है। चुतर्दिक् भ्रमण करने वाले मृगों का फल यह है कि वह गाँव निर्जन हो जाता है।।१।।

वने भवा वन्याः। वन्यमृगाः ऋष्यपृषतरुरुप्रभृतयः। सीमागता ग्रामसीमायां स्थिताः, तत्र च रुवन्तो वाश्यमानाः। ते च स्थितास्तत्रैव यदि तिष्ठन्ति, तदा सम्प्रति तस्मिन्नेव दिने भयमावेदयन्ति यदि च दीप्ताः। अथ तस्मात् सीमाप्रदेशात् व्रजन्तो गच्छन्तस्तदातीतभयमतीतमतिक्रान्तं भयमावेदयन्ति। अथ समापतन्तः समागच्छन्तो दीप्ताश्च रुवन्तः। तदैष्यभयानि, आगामिभयान्यावेदयन्ति। परितः समन्ततः पुरे भ्रमन्तः शून्यं निर्जनं पुरं कुर्वन्ति।।१।।

वन में उत्पन्न मृग को वन्यमृग कहते हैं। ऋष्य, पृषत् तथा रुरु इत्यादि मृग यदि गाँव की सीमा में स्थित हों और वहाँ पर शब्द करें, तो उसका फल इस प्रकार होता है। यदि वे स्थित होकर शब्द करते हुए वहीं पर ठहरे हुए हों, तो उस दिन के साम्प्रतिक-भय को दीप्त होने पर सूचित करते हैं। उस सीमा-प्रदेश से गमन करते हुए, विगतभय को निवेदित करते हैं। आते हुए दीप्त होकर रुदन करें, तब भविष्यत् कालिक अर्थात् आगामी भय को सूचित करते हैं। नगर के चारों तरफ भ्रमण करते

हुए, मृग, उस नगर को शून्य अर्थात् निर्जन कर देते हैं॥१॥

अन्यदप्याह–

ते ग्राम्यसत्त्वैरनुवाश्यमाना
भयाय रोधाय भवन्ति वन्यैः।
द्वाभ्यामपि प्रत्यनुवाशितास्ते
वन्दिग्रहायै च मृगा रुवन्ति।।२।।

और भी कहते हैं–

वे सीमान्त मृग यदि ग्राम्य पशुओं द्वारा प्रतिशब्द किये जाते हों, तब भय और पुर के अवरोध को प्रकट करते हैं। दोनों के द्वारा शब्द-प्रतिशब्द किये जाने पर उस पुर के बन्धक होने का सूचक होता है॥२॥

ते सीमागता मृगा दीप्ताः। ग्राम्यसत्त्वैर्ग्रामीणैः प्राणिभिरनुवाश्यमाना भयाय पुरस्य भवन्ति। वन्यैः प्राणिभिरनुवाश्यमानाः पुरस्य रोधाय च भवन्ति। परैः पुरं रुध्यते। ते सीमागता द्वाभ्यामपि ग्राम्यैर्वन्यैश्च सत्त्वैः प्रत्यनुवाशिताः पश्चात् कृतशब्दा वन्दिग्रहायै च भवन्ति। वन्दिग्रहा हठहरणेन या स्त्री नीयते सा वन्दिग्रहा भीता। मृगा वन्दिग्रहायै च भवन्ति। तत्पुरं बलादेव शत्रुभिर्नीयत इत्यर्थः।।२।।

वे सीमान्त दीप्तमृग जब ग्राम-प्राणियों (ग्राम्य पशुओं) के द्वारा प्रतिशब्दित होते हैं, तब उस नगर के लिए भयप्रदायक होते हैं। वन्य-प्राणियों द्वारा प्रतिध्वनित होने पर उस नगर में अवरोध उत्पन्न करते हैं। अर्थात्शत्रु पक्ष के द्वारा वह नगर अवरोधित किया जाता है। वे सीमागत मृग यदि ग्राम्य एवं वन्य; इन दोनों ही प्राणियों से प्रतिरुदन किये जाते हों अर्थात् तत्पश्चात् शब्द करते हों, तब ''वन्दीग्रह'' के सूचक होते हैं। हठपूर्वक किसी स्त्री का अपहरण कर ले जाने को वन्दीग्रह कहते हैं। ये मृग वन्दीग्रह के सूचक होते हैं। अर्थात् वह नगर बलपूर्वक शत्रुओं के द्वारा अधिग्रहीत कर लिया जाता है॥२॥

अन्यदप्याह–

वन्ये सत्त्वे द्वारसंस्थे पुरस्य
रोधो वाच्यः सम्प्रविष्टे विनाशः।
सूते मृत्युः स्याद्भयं संस्थिते च
गेहं याते बन्धनं सम्प्रदिष्टम्।।३।।

और भी कहते हैं–

वन्य प्राणी यदि नगर-द्वार पर स्थित हों, तो उस नगर का अवरोध उत्पन्न होता है। यदि नगर में प्रवेश कर जाये, तब नगर का विनाश होता है। यदि वह नगर में प्रसव करें, तो मृत्यु तथा नगर में स्थित हो जाये तो भय उत्पन्न होता है। किसी घर में प्रविष्ट होने पर गृहपति का बन्धन होता है॥३॥

वन्ये सत्त्वे वनजाते प्राणिनि द्वारसंस्थे पुरस्य नगरस्यैव रोधो वाच्या। रोधः परैर्वेष्टनम्। पुरमध्ये सम्प्रविष्टे पुरस्यैव विनाशो वाच्यो वक्तव्यः। तस्मिन्नेव प्रसूते मृत्युर्मरणं स्याद् भवेत्। संस्थिते मृते च भयं स्यात्। गेहं याते गृहं प्रविष्टे गृहस्वामिनो बन्धन सम्प्रदिष्टम्॥३॥

॥इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ शाकुने मुगविरुतं नाम

नवतितमोऽध्यायः॥९०॥

वन्यसत्त्व अर्थात् वन में उत्पन्न होने वाले प्राणियों के पुर-द्वार पर स्थित होने से नगर का अवरोध कहना चाहिए। अवरोध अर्थात् शत्रुपक्ष द्वारा घिर जाना। नगर के मध्य में प्रविष्ट हो जाने पर उस नगर का विनाश कहना चाहिए। वन्य प्राणियों का नगर में प्रसव होने पर मृत्यु होती है। स्थित होने पर और मृत्यु हो जाने पर भय उत्पन्न होता है। गृह में प्रविष्ट होने पर गृहस्वामी का बन्धन कहा गया है॥३॥

॥श्रीभट्टोत्पलविरचित संहिताविवृति में शाकुन विचार के अन्तर्गत मृगचेष्टित नामक

नब्बेवें अध्याय की हिन्दी व्याख्या पूर्ण हुई॥९०॥

❄ ❄ ❄

।।अथैकनवतितमोऽध्यायः।।

गवेङ्गिताध्यायः

अथ गवेङ्गितं व्याख्यायते।

तदेवाह—

गावो दीनाः पार्थिवस्याशिवाय
पादैर्भूमिं कुट्टयन्त्यश्च रोगान्।
मृत्युं कुर्वन्त्यश्रुपूर्णायताक्ष्यः
पत्युर्भीतास्तस्करानारुवन्त्यः।।१।।

गवेङ्गिताध्याय ९१ की व्याख्या की जाती है।

इसके सम्बन्ध में कहते हैं—

दीनता प्रकट करने वाली गाय राजा के लिए अशुभ होती है। अपने पैरों से भूमि को कुरेदने वाली गाय रोगों को उत्पन्न करती है। अश्रुपूरित नेत्रों वाली गाय अपने स्वामी की मृत्यु को सूचित करती है। भयभीत होकर रँभाने वाली गाय चौरागम की सूचना देती है॥१॥

गावो दीना दैन्यं गता म्लानमुखाः पार्थिवस्य राज्ञोऽशिवाय अश्रेयसे भवन्ति। तथा भूमिमवनिं पादैः खुरैः कुट्टयन्त्यो विदारयन्त्यो रोगान् कुर्वन्ति। अश्रुपूर्णायताक्ष्यः, अश्रुपूर्णे आयते दीर्घे अक्षिणी यासां तास्तथाभूताः पत्युः स्वामिनो मृत्युं मरणं कुर्वन्ति। तथा भीताः सभया आरुवन्त्यः अतीव शब्दं कुर्वत्यः तस्करांश्चौरान् कुर्वन्ति।।१।।

जो गाय दीन अवस्था को प्राप्त हो, अर्थात् मलिन मुख (मुर्झायी हुई मुख वाली) हो, तब राजा के लिए अनिष्टकारक होती है। अपने खुरों से भूमि को विदीर्ण करने वाली गाय व्याधियों को उत्पन्न करती है। अश्रु-पूरित दीर्घ नेत्रों वाली जो गाय हो, वह स्वामी की मृत्यु करती है। भययुक्त रोती हुयी जब अत्यधिक शब्द करे, तब तस्कर अर्थात् चोरों के आने का सङ्केत देती है॥१॥

अन्यदप्याह—

अकारणे क्रोशति चेनदर्थो भयाय रात्रौ वृषभः शिवाय।

भृशं निरुद्धा यदि मक्षिकाभिस्तदाशु वृष्टिं सरमात्मजैर्वा।।२।।

और भी कहते हैं–

यदि वृषभ अकारण ही रात्रि में चिल्लाता है, तब अनर्थ और भय उत्पन्न करता है। यदि मक्खियों से वृषभ निरुद्ध (पीड़ित) हो जाये अथवा कुत्तों द्वारा घेर लिया जाये, तब शीघ्र ही वर्षा होती है॥२॥

यदाकारणं निष्कारणमेव क्रोशति वाशति, तदाऽनर्थो भवति। तस्य जल-तृणादिकं कारणं तद्वर्जमकारणम्। रात्रौ निशि यदि वाशति, तदा भयाय भवति। वृषभो दान्तो रात्रौ वाच्यमानः शिवाय श्रेयसे भवति। भृशमत्यर्थं यदि मक्षिकाभिर्निरुद्धा व्याप्ता, सरमात्मजैः श्वभिर्वा निरुद्धा व्याप्ता तदा आशु शीघ्रमेव वृष्टिं करोति।।२।।

वृषभ यदि अकारण चीखता हो, तब अनर्थ होता है। यदि जल अथवा तृण की इच्छा के बिना बोले तो उसको अकारण कहते हैं। रात्रि में यदि बोलता है, तब भयप्रदायक होता है। वृषभ अर्थात् दान्त रात्रि में शब्द करने पर कल्याण-कारक होता है। यदि अत्यधिक मक्खियों द्वारा निरुद्ध अर्थात् परिव्याप्त हो अथवा कुत्तों द्वारा रोका जाता हो, तब शीघ्र ही वर्षा करता है॥२॥

अन्यदप्याह–

[१]आगच्छन्त्यो वेश्मबम्भारवेण
संसेवन्त्यो गोष्ठवृद्ध्यै गवां गाः।
आर्द्राङ्ग्यो वा हृष्टरोम्ण्यः प्रहृष्टा
धन्या गावः स्युर्महिष्योऽपि चैवम्।।३।।

और भी कहते हैं–

बम्भा (रम्भाती) ध्वनि के साथ आती गौयें अपने गोष्ठ-समुदाय की वृद्धि करती हैं। आर्द्र अंगों वाली अथवा पुलकित अङ्गों वाली गौवें धन्य होती हैं। महिषी भी इन लक्षणों से युक्त होने पर शुभ कही गयी है॥३॥

वेश्म गृहमागच्छन्त्यो बम्भारवेण मधुरस्वरेण संयुक्ता गा गावः संसेवन्त्यो निषेवन्त्यो गवां गोष्ठवृद्ध्यै गोष्ठसंवर्धनाय धन्याः प्रशस्ताः स्युर्भवन्ति। अर्थ-वशाद्विभक्तिलिङ्गवचनविपरिणामः। गोवृद्धिं कुर्वन्ति। केचिदागव्यूतेरिति पठन्ति। गव्यूतिः क्रोशद्वयम्। तस्माद् बम्भारवेणेति पूर्ववद्योज्यम्। आर्द्राङ्ग्यो वेति। आर्द्राणि

---

१. आगव्यूतेरिति पाठान्तरम्।

जलेन क्लिन्नानि अङ्गानि अवयवानि यासाम्। हृष्टरोम्ण्यः संजात-पुलकाः। प्रहृष्टा हर्षसंयुक्ताः। एवंविधाश्च गोष्ठवृद्ध्यै धन्याः। महिष्योऽपि चैवम्। एवमनेन प्रकारेण— ''आगच्छन्त्यो वेश्मबम्भारवेण'' इत्यादिकेन। तथा—''दीनाः पार्थिवस्याशिवाय'' इत्यादिकेन शुभाशुभेन महिष्योऽपि स्युर्भवेयुरिति। यद् गवामिङ्गितं तन्महिषीणामित्यर्थः।।३।।

।।इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ शाकुने गवेङ्गितं नामैकनवतितमोऽध्याय:।।९१।।

वेश्म अर्थात् गृह की ओर आती हुई ''बम्भारव'' अर्थात् मधुर स्वर से संयुक्त गौवें, संसेवित होने पर गोशाला की वृद्धि करने वाली तथा उत्तम होती हैं। अर्थों के आधार पर विभक्ति, लिङ्ग और वचन में यहाँ पर परिवर्तन हुआ है। कुछ विद्वान् ''आगव्यूति'' ऐसा पाठ करते हैं। दो कोस अर्थात् छः किलोमीटर की एक गव्यूति होती है। इतनी दूरी से बम्भा शब्द करती हुई गौवें पूर्ववत् शुभ होती हैं। आर्द्र अर्थात् जल से भींगी हुई अंगों वाली तथा हृष्ट रोमावलियों अर्थात् पुलकित गौवें गोशाला की वृद्धि करने वाली तथा श्रेष्ठ मानी गयी हैं। महिषी का भी इसी प्रकार फल समझना चाहिए। जैसाकि ''बम्भारव के साथ गृह में आती हुई'' इत्यादि पूर्व में कहा गया है। इसी प्रकार ''दीन मुख वाली राजा के लिए अमंगलकर्त्री'' इत्यादि जो शुभा-शुभफल कहे गये हैं, वे महिषी के लिए भी कहे गये हैं। तात्पर्यार्थ यह है कि जो फल गौवों के लिए बतलाये गये हैं, वे ही महिषियों के लिए भी होते हैं।।३।।

।।श्रीभट्टोत्पलविरचित संहिता-विवृति में शाकुनविचार के अन्तर्गत गवेङ्गिताध्याय नामक इक्यानबेंवे अध्याय की हिन्दी व्याख्या पूर्ण हुई।।९१।।

❋ ❋ ❋

।।अथ द्विनवतितमोऽध्यायः।।

अश्वेङ्गिताध्यायः

अथाश्वेङ्गितं व्याख्यायते।

तच्चाह–

उत्सर्गान्न शुभदमासनात् परस्थ
वामे च ज्वलनमतोऽपरं प्रशस्तम्।
सर्वाङ्गज्वलनमवृद्धिदं हयानां
द्वे सर्वे दहनकणाश्च धूपनं वा।।१।।

अश्वेङ्गिताध्याय ९२ की व्याख्या की जाती है।

इसके सम्बन्ध में कहते हैं–

उत्सर्ग आसन से पृष्ठभाग तथा वामभाग में ज्वलन (दाह) का होना शुभ नहीं होता है। इसके विपरीत पूर्वभाग में और दक्षिणभाग का ज्वलन शुभप्रद होता है। अश्वों के सम्पूर्ण अङ्गों में ज्वलन का होना वृद्धिदायक नहीं होता है। दो वर्षों तक दहनकण अर्थात् स्फुलिङ्ग अथवा धूपन का होना अशुभ होता।।१।।

उत्सर्गान्न शुभदमिति। हयानामश्वानामुत्सर्गादयं नियमो यत्रापवादो नास्ति। आसनात् परस्थम्, आस्यते यस्मिन्नित्यासनं पर्याणस्थानम्। तस्मात्परस्थं पश्चिमभागे स्थितं ज्वलनं न शुभदमप्रशस्तम्। बामे च वामभागे वामपार्श्वे तस्मादेवासन-स्थानान्न शुभदम्। अतोऽस्मादपरं प्राग्भागे दक्षिणे च प्रशस्तमिष्टतरम्। अश्वानामुत्पातवशेन ज्वालारूपमवयवेषु दृश्यते तत् सर्वाङ्गज्वलनम्। तत् सर्वाङ्गानां समस्तावयवानां ज्वलनमवृद्धिदम्। अवृद्धिं विनाशं ददाति। उक्तं च–

तत्रोत्सर्गेणासनपश्चिमभागाश्रये ज्वलनमेवम्।
नेष्टमितरत्र शस्तं वामेतरपार्श्वयोस्तद्वत्।।इति।।

द्वे वर्षे दहनकणाश्च धूपनं वेति। यस्य हयस्य द्वे वर्षे वर्षद्वयमविच्छिन्नं कृत्वा दहनकणा अग्निविस्फुलिङ्गा धूपनं धूमो वा दृश्यते तदा तस्यावृद्धिदमेव।।१।।

अश्वों का उत्सर्ग सम्बन्धी यह नियम है, जिसका अपवाद नहीं होता है। जिस पर आसन लगाया जाता है उसको अर्थात् पर्याण स्थान को आसन कहा जात है। उस

आसन से पश्चिमभाग में स्थित ज्वलन अप्रशस्त अर्थात् अशुभ होता है। वामभाग में उस आसन से वामपार्श्वगत स्थित ज्वलन शुभदायक नहीं होता है। इससे भिन्न पूर्वभाग और दक्षिणभाग में प्रशस्त कहा गया है। अश्वों के उत्पातवशात् उनके अङ्गों में ज्वाला का रूप दिखायी पड़ता है, जिसको सर्वाङ्ग ज्वलन कहते हैं। इस प्रकार सभी अङ्गों का ज्वलन वृद्धिदायक नहीं होता है, वह अवृद्धि अर्थात् विनाश को देता है। जैसा कि कहा गया है–

आसन के पश्चिमभाग में उत्सर्ग द्वारा जलन होता है, जो अनिष्टकारक है। इससे भिन्न पूर्वभाग में प्रशस्त कहा गया है। वामभाग में अशुभ और दक्षिणभाग में शुभफलदायक माना गया है।

जिस घोड़े के दो वर्षों तक अनवरत दहनकण अर्थात् अग्निविस्फुलिङ्ग तथा धूपन अथवा धूम दिखायी पड़ते हों, तब उसके लिए अवृद्धिदायक समझना चाहिए।।१।।

विशेष व्याख्या–आसन शब्द को विवृति में "पर्याण" कहा है। इसको जीन अथवा काठी कहा जाता है। कादम्बरी-१२६, दत्त "पर्याणम्"

अथान्येष्वप्याह–

अन्तः पुरं नाशमुपैति मेढ्रे
कोशः क्षयं यात्युदरे प्रदीप्ते।
पायौ च पुच्छे च पराजयः स्याद्
वक्त्रोत्तमाङ्गज्वलने जयश्च।।२।।

अन्य प्रकार से बतलाते हैं–

अश्वों के लिङ्ग में ज्वलन होने पर अन्त:पुर का नाश होता है, तथा उदर में दाह होने पर कोश की हानि होती है। उपस्थ अर्थात् गुदाद्वार में और पूँछ में दाह पराजयकारक होती है। मुख और शीर्षभाग पर ज्वलन होने पर विजय प्राप्त होती है।।२।।

अश्वानां मेढ्रे लिङ्गे प्रदीप्ते राज्ञोऽन्तःपुरं नाशमुपैति विनाशं प्राप्नोति। उदरे जठरे प्रदीप्ते ज्वलिते कोशो गञ्जः क्षयं नाशं याति। पायावुपस्थे पुच्छे लाङ्गूले च प्रदीप्ते पराजयः स्याद् भवेत्। वक्त्रं मुखम्। उत्तमाङ्गं शिरः। वक्त्रोत्तमाङ्गज्वलने जयश्च भवति।।२।।

अश्वों के मेढ्र अर्थात् लिङ्ग में दाह हो, तो राजा के अन्त:पुर का विनाश होता है। उदर अर्थात् पेट में दाह हो, तो कोश अर्थात् धनागमप्रदेश का नाश होता है। पायु अर्थात् गुदा और पुच्छभाग में दाह होने पर पराजय होती है। मुख और उत्तमाङ्ग अर्थात्

शिरोभाग में ज्वलन होने पर जय होती है॥२॥

अथान्येष्वङ्गेष्वप्याह–

स्कन्धासनांसज्वलनं जयाय
बन्धाय पादज्वलनं प्रदिष्टम्।
ललाटवक्षोऽक्षिभुजे च धूमः
पराभवाय ज्वलनं जयाय॥३॥

अन्य अङ्गों में भी दाह का फल कहते हैं–

कन्धा और आसन; इनका ज्वलन विजयदायक होता है। पैर का ज्वलन बन्धन का द्योतक है। ललाट, वक्षस्थल, नेत्र और बाहु पर धूम हो, तब पराभव होता है और ज्वलन हो तो जयप्रदायक होता है॥३॥

स्कन्धवंसौ। आसनं पर्याणस्थानम्। ग्रीवापार्श्वगौ तदंसौ। एतेषां स्कन्धासनांसानां ज्वलनं जयाय भवति। पादाः शफाः। पादज्वलनं स्वामिनो बन्धाय प्रदिष्टं कथितम्। तत्र स्वामिनो बन्धनं भवति। ललाटेत्यादि। ललाटं मुखपृष्ठभागः। वक्षमुरः प्रदेशः। अक्षिणी नेत्रे। भुजौ बाहू। एषामन्यतमेऽङ्गेऽश्वानां यदि धूमो दृश्यते तदा पराभवाय भवति। शत्रोः सकाशात् पराभव उत्पद्यते। एतेषामन्यतमेऽङ्गे ज्वलनं जयाय भवति॥३॥

विशेष व्यवाख्या–

शफ = खुर। "शकं क्लीवे खुरः पुमान्, द्वे पादस्य" अमरकोश २/८/९.

आसन अर्थात् पर्याण (पृष्ठभाग), ग्रीवा अर्थात् कन्धे का उभय-भाग इन पर ज्वलन हो, तो जयकारक होता है। पैर अर्थात् खुर का ज्वलन स्वामी के लिए बन्धनकारक कहा गया है। ललाट, वक्ष अर्थात् उदर प्रदेश, दोनों नेत्र और दोनों बाँह; इनमें से किसी भी अङ्ग में यदि धूम दिखायी पड़े, तो पराभवकारक होता है। शत्रु द्वारा पराभव प्राप्त ही है। घोड़े के इनमें से किसी भी अङ्ग में यदि ज्वलन हो, तो जयप्रदायक होता है॥३॥

अन्यदप्याह–

नासापुटप्रोथशिरोऽश्रुपात-
नेत्रे च रात्रौ ज्वलनं जयाय।
पलाशताम्रासितकर्बुराणां
नित्यं शुकाभस्य सितस्य चेष्टम्॥४॥

और भी कहते हैं–

नासाछिद्र तथा नासिका का मध्यभाग, शिर, अश्रुपात का स्थान, दोनों नेत्र; इनमें रात्रिकाल में ज्वलन हो, तब विजय प्राप्त होती है। पलाश के वर्ण का, ताम्रवर्ण, कृष्णवर्ण, श्वेत-श्याम मिश्रितवर्ण का तथा शुकवर्ण एवं श्वेतवर्ण का ज्वलन नित्य ही मनोवाञ्छित फल देता है।।४।।

नासापुटौ नासारन्ध्रौ। प्रोथो नासामध्यभागः। शिरो मूर्धा। अश्रुपातोऽश्रुणः पातो यत्र। गण्डाधोभागः। नेत्रे चक्षुषी। एतेषामन्यतमस्य रात्रौ निशि ज्वलनं जयाय भवति। पलाशः पलाशवर्णः। ताम्रो लोहितवर्णः। असितः कृष्णः। कर्बुरः शुक्लकृष्णवर्णो व्यामिश्रः। कपोतवर्ण इत्यर्थः। एषां वर्णानां तथा तस्य शुकवर्णस्य सितस्य श्वेतवर्णस्य चैतेषामङ्गानामेकतमे द्वयोर्बहुषु वा ज्वलनं नित्यं सर्वकालं दिने निशायां चेष्टं शोभनं भवति। उक्तं च–

सममन्यत्पदकेसरपुच्छेषु ज्वलनदहनकणधूमाः।
राष्ट्रभयशोकसम्भ्रमसपत्नवक्त्रापमर्दकराः।।
प्राक्फलतुल्यं पृष्ठे जघने वालेषु चैव निर्दिष्टम्।
अन्तःपुरप्रकोपो मेढ्रज्वलने सधूमे वा।।
नित्यं च वालकिरणे दाहज्वालास्फुलिङ्गानाम्।
स्कन्धासनांसदेशे धूमा बन्धाय चरणेषु।।
वक्षोऽक्षिललाटभुजे त्वश्वानां ह्रेषितं च वदनेभ्यः।।
ज्वालोत्पत्तिर्जयदा धूमोत्पत्तिस्त्वभावाय।।
नासापुटाश्रुपातप्रोथशिरोलोचने च रजनीषु।
विजयाय प्रज्वलनं ताम्रासितहरितशवलानाम्।।
विजयाय सर्वदैव हि सुशुक्लशुकवर्णयोर्ज्वलनमेषु।
एवं च यथासम्भवमन्येष्वपि वाहनेषु फलम् ।।इति।।४।।

नासापुट अर्थात् नासिका के दोनों छिद्र, प्रोथ अर्थात् नासिका का मध्यभाग, शिर अर्थात् मूर्धा, अश्रुपात स्थल अर्थात् कपोल का अधः भाग, दोनो नेत्र; इनमें से किसी भी अङ्ग का रात्रि में ज्लवन होना विजयप्रदायक होता है। पलाश के रंग का, ताम्र अर्थात् रक्तवर्ण, असित अर्थात् काला, कर्बुर अर्थात् श्वेत-कृष्ण मिश्रित कपोतवर्ण के समान वर्णों का तथा शुकवर्ण (हरा) का और श्वेतवर्ण का ज्वलन; इनमें से किसी भी एक अथवा दो अथवा अधिक अङ्गों में नित्य अर्थात् रात्रि और दिन के किसी भी समय हो, तब शुभ होता है। जैसा कि कहा गया है–

पैर, पुच्छागुच्छ पर ज्वलन, दहन और धूमकण हों तो राष्ट्र में भय, शोक और संभ्रम पैदा होता है। रिपु से अपमान अथवा पराजय झेलना पड़ता है। यदि जंघे, पीठ तथा बालों पर ज्वलन हो तो भी पूर्वोक्त फल होते हैं। यदि लिङ्गभाग पर ज्वलन

अथवा धूम हो तब अन्त:पुर में अशान्ति होती है। दाह, ज्वलन और स्फुलिङ्ग बालों के अग्रभाग में हो तो नित्य ही, अशान्ति रहती है। कन्धा तथा पीठ और पैर पर धूम हो तब बन्धन होता है। वक्ष, नेत्र, ललाट और भुजा पर हो तब भी वही फल है। वह अश्व यदि मुख से ध्वनि करता हो तथा ज्वाला की उत्पत्ति हो, तब जयप्रदायक कहा गया है।

धूम की उत्पत्ति अभावकारक होती है। रात्रिकाल में नासिका, गंडस्थळ, सिर और नेत्र पर ताम्र, कृष्ण, हरित और मटमैले वर्ण के ज्वलन हों तब विजयकारक होते हैं। सुन्दर श्वेत वर्ण के, शुकवर्ण (हरा) के ज्वलन सर्वदा विजयकारक होते हैं। इसी प्रकार से यथासम्भव अन्य वाहनों का भी विचार करना चाहिए।।४।।

अन्यदपि चेष्टितमाह–

प्रद्वेषो यवसाम्भसां प्रपतनं स्वेदो निमित्ताद्विना
कम्पो वा वदनाच्च रक्तपतनं धूमस्य वा सम्भवः।
अस्वप्नश्च विरोधिनां निशि दिवा निद्रालसध्यानता
सादोऽधोमुखता विचेष्टितमिदं नेष्टं स्मृतं वाजिनाम्।।५।।

अन्य चेष्टाओं को कहते हैं–

भोजन और जल में अरुचि हो जाये, अकारण ही गिरने लगे तथा स्वेद हो और कम्पन अथवा मुख से रक्तश्राव होने लगे अथवा धूम उत्पन्न हो, रात्रि में निद्रा न आवे तथा दिन में निद्रा और आलस्य प्राप्त हो, पेट के नीचे मुखकर देखता रहे, तो इस प्रकार के लक्षण घोड़ों के शुभ नहीं कहे गये हैं।।५।।

प्रद्वेषो यवसेति। यवसस्य तृणादेरम्भसामपां च। प्रद्वेषो विरक्ता। तथा प्रपतनं प्रपातः। स्वेदो धर्मः। निमित्तं कारणम्। तस्माद्विना तद्व्यतिरेकेण। कम्पो वा निमित्ताद्विना। वदनान्मुखाद्वा कर्णादे रक्तस्य शोणितस्य पतनं स्रावः। अस्वप्नश्च विरोधिनां निशीति। निशि रात्रौ विरोधिनां वैरं कुर्वतामस्वप्नो जागरणम्। दिवा दिवसे निद्रालसत्वं ध्यानता चिन्ता। सादो वक्षाधः। अधोमुखाताऽनूर्ध्वनिरीक्षणम्। वाजिनामश्वानामिदं विचेष्टितं चेष्टितं नेष्टमशुभं स्मृतमुक्तम्। उक्तं च–

निद्रानिरोधालसनीलनेत्राः प्रध्यानशून्यस्मृतयो दिनेषु।
निशासु चान्योन्यविरोधनिद्रानष्टास्तुरङ्गा न शिवाय भर्तुः।।इति।।५।।

यवश अर्थात् तृण आदि के खाने और जल-ग्रहण करने में विरक्ति हो जाये, स्वेद अर्थात् पसीना हो तथा अकारण ही कम्पन होने लगे, मुख अथवा कान से रक्तस्राव होता रहे, निद्रा में विरोधी स्वभाव अर्थात् रात्रि में अनिद्रा और दिन में निद्रा तथा आलस्य हो, साद अर्थात् वक्षस्थल के नीचे अधोमुख रहे अर्थात् ऊपर की ओर

न देखे तो घोड़ों की ये चेष्टायें अशुभ कही गयी हैं। जैसा कि कहा गया है–

निद्रा का अभाव, आलस्य, नेत्र का नीलापन, दिन में स्मृति-शून्य होकर शान्त पड़े रहना, रात्रि में निद्रा का त्याग करने वाला घोड़ा अपने स्वामी के लिए कल्याणकारक नहीं होता है॥५॥

अन्यदपि चेष्टितमाह–

आरोहणमन्यवाजिनां पर्याणादियुतस्य वाजिनः।
उपवाह्यतुरङ्गमस्य वा कल्पस्यैव विपन्नशोभना॥६॥

अन्य चेष्टाओं को कहते हैं–

जीन, लगाम आदि से सुसज्जित अश्व यदि किसी अन्य अश्व पर आरूढ़ होने लगे अथवा यात्रा के लिए तत्पर अश्व पर आरूढ़ हो, तब वह आरोग्य एवं सम्पत्ति के लिए शुभ नहीं होता है॥६॥

वाजिनोऽश्वस्य पर्याणादियुतस्य पार्याणसंयुक्तस्य। आदिग्रहणात् पुरुषसहितस्य। अन्यवाजिनामन्यानामरोहणम्। पर्याणादियुतश्चान्योऽश्व आरोहति तन्न शोभनम्। अपवाह्यतुरङ्गगमस्य चेति। यस्मिन्नारुह्य गमनं प्रत्युपवाह्यते तस्योपवाह्यतुरङ्गमस्याश्वस्य कल्पस्यारोग्यस्य विपन्नशोभना नेष्टेति॥६॥

अश्व का पर्याणादि से संयुक्त होकर, यहाँ पर "आदि" शब्द का तात्पर्य अश्वारोहीयुक्त हो, वह अश्व यदि अन्य अश्व पर आरोहण करे अर्थात् पर्याण (जीन) सहित यदि किसी दूसरे घोड़े पर चढ़ता है, तो यह अशुभ माना जाता है। जिस अश्व पर सवार होकर यात्रा की जाती है, उसको प्रत्युपवाह्य कहते हैं, उस अश्व के आरोग्य एवं वृद्धि के लिए शुभ नहीं होता है॥६॥

अधुना ह्रेषितलक्षणमाह–

क्रौञ्चवद्रिपुवधाय ह्रेषितं
ग्रीवया त्वचलया च सोन्मुखम्।
स्निग्धमुच्चमनुनादि हृष्टवद्-
ग्रासरुद्धवदनैश्च वाजिभिः॥७॥

घोड़े के हिनहिनाने का फल कहते हैं–

जिस अश्व का ह्रेषित (हिनहिनाहट) क्रौञ्चपक्षी के समान हो, तब शत्रु का विनाश होता है। यदि अपने कन्धे को ऊपर की ओर स्थिर करे तो वह उन्मुक्त अश्व शत्रुवध का संकेत करता है। प्रसन्न होकर मधुर, उच्चनाद करे तथा मुखभाग ग्रास से

भरा हो, तो इस प्रकार के घोड़े विजयप्रदायक होते हैं॥७॥

क्रौञ्चः पक्षी। यस्य ह्रेषितं शब्दितं क्रौञ्चपक्षिसदृशं तद्रिपुबधाय शत्रुविनाशाय। तथा ग्रीवया कन्धरया त्वचलया स्थिरया च सोन्मुखं सह ऊर्ध्वेन मुखेन वर्तत इति सोन्मुखम्, तदपि रिपुबधायैव स्निग्धं मधुरमुच्चमुच्चैः कृत्वा स्पष्टतरम्। अनुनादि घण्टाशब्दवदनुनदति पश्चाच्छब्दं करोति। हृष्टवत् परितोषयुक्तैर्ग्रासरुद्धवदनैः। ग्रासेन कवलेन रुद्धं वदनं मुखं येषां तैस्थाभूतैस्तद्ध्रेषितं रिपुवधायैव भवति।।७।।

क्रौञ्च एक पक्षी है, जिसके समान ह्रेषित ध्वनि होने पर शत्रु का विनाश होता है। स्थिर कन्धेवाला, ऊर्ध्वमुख अर्थात् सोन्मुख होने पर भी शत्रु-संहारक कहा गया है। स्निग्ध अर्थात् मधुर, ऊँचा तथा स्पष्ट घण्टानाद की भाँति अनुनाद करता हुआ हिनहिनाता है, ग्रास अर्थात् कवल से रुद्ध अर्थात् भरे हुए मुख वाला अश्व हिनहिनाता है, तब शत्रु का वध होता है॥७॥

अन्यदप्याह—

पूर्णपात्रदधिविप्रदेवता-
गन्धपुष्पफलकाञ्चनादि वा।
द्रव्यमिष्टमथवा परं भवेद्-
ध्रेषतां यदि समीपतो जयः।।८।।

और भी कहते हैं-

पूर्णपात्र, दधि, विप्र, देवता, गन्ध, पुष्प, फल तथा सुवर्णादि-पदार्थ अथवा इष्ट-द्रव्य यदि हिनहिनाते हुए घोड़े के समीप स्थित हों, तो जय प्राप्त होती है॥८॥

पूर्णं च तत् पात्रं पूर्णपात्रम्। पात्रं भाजनम्। पूर्णं केनचिच्छुभद्रव्येण सर्षपाक्षततण्डुलकादिकेनेति। दधि क्षीरविकारः। विप्रो ब्राह्मणः। देव एक देवता। गन्धः सुगन्धद्रव्यविशषः। अगुरुकर्पूरकस्तूरिकादिः। पुष्पाणि कुसुमानि। फलं श्रीफलादि। काञ्चनं सुवर्णम्। आदिग्रहणाद् रजतमणिमुक्ताफलादि। अथवा परमन्यदिष्टं शुभद्रव्यं सिद्धार्थगोरोचनादि वा। ह्रेषतां शब्दं कुर्वतामश्वानां यदि समीपतः सन्निकर्षे निकटे भवेत्, तदा जयो भवति।।८।।

यदि पूर्णपात्र, दधि, विप्र, देवता, गन्ध, पुष्प, फल और सुवर्णादि पदार्थ अथवा प्रियद्रव्य ह्रेषित अश्व के समीप हों, तो विजय प्राप्त होता है। पूर्ण अर्थात् अन्नादि से पूरित, पात्र अर्थात् भाजन; ये किसी शुभद्रव्य अर्थात् सरसों, अक्षत, तण्डुलादि ये परिपूर्ण हों, दधि अर्थात् दुग्ध का विकार, ब्राह्मण, देवता एवं सुगन्धादि

द्रव्य-विशेष अर्थात् अगुरु, कर्पूर, कस्तूरी आदि, पुष्प तथा श्रीफलादि फल काञ्चन अर्थात् सुवर्ण "आदि" पद से चाँदी, मणि, मोती आदि अथवा अन्य कोई अभीष्ट शुभ द्रव्य सर्षप, गोरोचन इत्यादि, यदि हिन-हिनाते हुये घोड़े के निकट हों, तो विजय होता है॥८॥

अन्यदप्याह–

भक्ष्यपानखलिनाभिनन्दिनः पत्युरौपयिकनन्दिनोऽथवा।

सव्यपार्श्वगतदृष्टयोऽथवा वाञ्छितार्थफलदास्तुरङ्गमाः॥९॥

और भी कहते हैं–

खाद्य पदार्थ, पेय-पदार्थ, खली इत्यादि प्रसन्नतापूर्वक ग्रहण करे अथवा अपने स्वामी की प्रिय वस्तुओं का हर्षित नेत्रों से अभिनन्दन करे अथवा दक्षिणपार्श्व में दृष्टि रखे, तो ऐसा घोड़ा वाञ्छित अर्थ और फल को देता है॥९॥

भक्ष्यं भक्षणीयं द्रव्यम्। पानं जलम्। खलिनं कविका। एतानि यद्यभिनन्दयन्ति, अथवा पत्युर्भर्तुरौपयिकं यदुपयुज्यते तदभिनन्दयन्ति। अथवा सव्यपार्श्वे आत्मीयदक्षिणपार्श्वे गतदृष्टयो वीक्ष्यमाणाः। एवं विधास्तुरङ्गमा वाञ्छितार्थफलदा वाञ्छितस्याभीष्टस्यार्थस्य फलं ददति। उक्तं च–

इष्टानिष्टव्यञ्जकमतः परं ह्रेषितं समवधार्यम्।

तच्च चलितप्रसारितशिरोधरोद्भूतमिष्टफलम्॥

ग्रासान्तर्वक्त्राणामुच्चैःस्निग्धानुनादि गम्भीरम्।

द्विजपूर्णभाजनेष्टद्रव्यस्त्रग्गन्धसुरमूलैः॥

खलिनान्नापानाद्यर्मस्वाम्युपकरणाभिनन्दिता चैषाम्।

सर्वार्थसिद्धये स्याद् दक्षिणपार्श्वे विलोकयताम्॥इति॥९॥

भक्ष्य अर्थात् भक्षणयोग्य पदार्थ, पान अर्थात् जलादि पेय पदार्थ, खली अर्थात् कविका; इन पदार्थों का अभिनन्दन (ग्रहण) करता है अथवा अपने स्वामी के औपयिक अर्थात् प्रयुक्त पदार्थों का अभिनन्दन करता है अथवा अपने दक्षिण पार्श्व में दृष्टि रखता है, तब इस प्रकार का अश्व मनोभलिषित अर्थ का फल प्रदान करता है। जैसा कि कहा गया है–

इष्ट और अनिष्ट का प्रतिपादन अश्व के ह्रेषित शब्द से समझना चाहिए। यदि अश्व अपने कन्धे को ऊँचा उठाकर हिलाता है, तो इष्टफल का प्रदायक होता है। ग्रास में मुख देकर भोजन करे, मधुर और गम्भीर शब्द करे, तो शुभ होता है। द्विज, पूर्णपात्र, इष्टद्रव्य, माला, गन्ध, देववृक्ष, खली, अन्न, पेय तथा स्वामी के उपकरणों

को अभिनन्दित करे और दक्षिणपार्श्व में अवलोकन करे, तब सभी प्रकार के अर्थों की सिद्धि होती है॥९॥

अधुनाशुभचेष्टिमाह-

वामैश्च पादैरभिताडयन्तो महीं प्रवासाय भवन्ति भर्तुः।

सन्ध्यासु दीप्तामवलोकयन्तो ह्रेषन्ति चेद् बन्धपराजयाय॥१०॥

अब अशुभचेष्टाओं को कहते हैं-

यदि अश्व बायें पैर से भूमि का ताडन करे तो, स्वामी का प्रवास होता है। यदि सायंकाल दीप्त होकर देखे तथा हिनहिनाये तब बन्धन एवं पराजय होता है॥१०॥

महीं भूमिं वामैश्च पादैरपसव्यचरणैरभिताडयन्तो घ्नन्तो भर्तुः पत्युः प्रवासाय भवन्ति। सन्ध्यासु चतसृषु सूर्योदयमध्याह्नास्तमयार्धरात्रिषु। दीप्तां दिशमवलोकयन्तः प्रेक्षमाणा यदि ह्रेषन्ति शब्दं कुर्वन्ति, तदा बन्धपराजयाय भवन्ति। स्वामिनो बन्धनं पराजयं च कुर्वन्ति॥इति॥१०॥

भूमि को बायें पैर से कुरेदता हुआ घोड़ा अपने स्वामी के लिए प्रवास की सूचना देता है। सूर्योदय, मध्याह्न, सायं और रात्रि इन चारों संध्याओं में दीप्त दिशा की ओर देखकर यदि हिनहिनाता है, तब बन्धन एवं पराजय होता है। अर्थात् अश्व के स्वामी को बन्धन तथा पराजय प्राप्त होता है॥१०॥

अन्यदप्याह–

अतीव ह्रेषन्ति किरन्ति वालान्
निद्रारताश्च प्रवदन्ति यात्राम्।
रोमत्यजो दीनखरस्वराश्च
पांशून् ग्रसन्तश्च भयाय दृष्टाः॥११॥

और भी कहते हैं-

जो घोड़ा अत्यधिक हिनहिनाता हो और पूँछ को फटकारता हो तथा निद्रा में निमग्न हो तो यात्रा का संकेतक होता है। जो घोड़ा रोवों को गिराता हो, दीन-हीन अथवा खर-खर शब्द करता हो और मिट्टी खा रहा हो, तो वह भय का सूचक होता है॥११॥

अतीवात्यर्थं ह्रेषन्ति शब्दं कुर्वन्ति, तथा वालान् पुच्छवालान् किरन्ति विक्षिपन्ति। निद्रारताः स्वप्नशीलाश्च यात्रां गमनं प्रवदन्ति। तथा रोमत्याजो रोमाणि त्यजन्त्युत्सृजन्ति। दीनखरस्वराः, दीनस्वनाः क्षामशब्दाः। खरस्वना रूक्षद्ध्वनयः।

पांशून् मृत्तिका ग्रसन्तो भक्षयन्तो भयाय दृष्टाः। स्वामिनो भयमावेदयन्ति। उक्तं च–

सन्ध्यासु दीप्तदिङ्मुखसम्भ्रमगाढप्रनष्टनिद्राश्च।

ह्रेषन्तो भयजनना वधबन्धपराजयकराश्च।।

वक्रीकृतवालधयो दक्षिणपार्श्वानुशायिनो नेष्टाः।

वामचरणैः क्षितितलं घ्नन्तो ज्ञेयाः प्रवासाय।।इति॥११॥

जो अत्यधिक हिनहिनाहट करे तथा पूँछ के बालों को अत्यधिक हिलाता हो और निद्रारत हो, तो यात्रा करने का सूचक होता है। जो घोड़ा अपने रोम अर्थात् रोवों का त्याग करता हो, दीन अर्थात् दुर्बलशब्द अथवा खर अर्थात् रूक्ष (कर्कश) शब्द करता हो और मृत्तिका खाता हो, तो वह भय का निर्देश करता है। तात्पर्य यह है कि इस प्रकार के लक्षणों वाला घोड़ा अपने स्वामी के लिए भय का संकेत करता है। जैसा कि कहा गया है–

संध्याकाल में दीप्तदिशा में मुख किया हुआ, चकित और निद्रारहित, हिनहिनाने वाला घोड़ा भय, बन्धन, वध और पराजयकारक होता है। अपने बालों को टेढ़ा कर दक्षिण भाग में सोने वाला घोड़ा शुभ नहीं होता है। बाएँ पैर से भूतल को कुरेदने वाला घोड़ा प्रवास का सूचक होता है॥११॥

अथ शुभनिमित्तान्याह–

समुद्गवद्दक्षिणपार्श्वशायिनः

पदं समुत्क्षिप्य च दक्षिणं स्थिताः।

जयाय शेषेष्वपि वाहनेष्विदं

फलं यथासम्भवमादिशेद् बुधः।।१२।।

शुभ-लक्षणों को कहते हैं–

घुटने को ढँककर दक्षिणभाग में सोने वाला तथा दाहिना पैर आगे कर खड़ा होने वाला घोड़ा विजयप्रदायक होता है। पण्डितजन शेष वाहनों के भी इसी प्रकार से यथासम्भव फल की कल्पना करें॥१२॥

समुद्गवज्जानुनी ढौकयित्वा समुद्गवद्दक्षिणेन सव्येन पार्श्वेण शरीरार्द्धेन स्वप्नशीलाः। तथा सव्यं दक्षिणं पदं चरणं समुत्क्षिप्य भूमाववनाववस्थाप्य च स्थितास्तिष्ठन्ति। एवंभूतास्तुरगाः प्रभोर्जयाय भवन्ति। शेषेष्वपीति। शेषेष्वन्येषु गजकरभादिषु वाहनेष्विदं शुभाशुभं फलं यथासम्भवं यत् सम्भवति; धूमाग्निकणाश्च

न सम्भवन्ति, अन्यत् सम्भवति। तद्वद् बुधः पण्डित आदिशेत् कथयेत्।।१२।।

समुद्गव अर्थात् घुटने को ढँककर दक्षिणपार्श्व अर्थात् शरीर के आधे भाग से शयन करने वाला और दक्षिण पैर को भूमि पर आगे रखकर खड़ा होने वाला घोड़ा स्वामी के लिए जयकारक होता है। अन्य वाहन अर्थात् हाथी, ऊँट आदि का भी शुभाशुभ फल यथासम्भव इसी प्रकार होता है। धूम तथा अग्निकण आदि के फल नहीं होते हैं। परन्तु अन्य फल घटित होते हैं। विद्वान् पण्डित को तदनुसार ही फलादेश करना चाहिए।।१२।।

अथान्यदपि शुभचेष्टितमाह—

आरोहति क्षितिपतौ विनयोपपन्नो
यात्रानुगोऽन्यतुरगं प्रतिह्रेषते च।
वक्त्रेण वा स्पृशति दक्षिणमात्मपार्श्वं
योऽश्वः स भर्तुरचिरात् प्रचिनोति लक्ष्मीम् ।।१३।।

अन्य शुभचेष्टाओं को कहते हैं—

जो अश्व राजा के आरोहण करते समय विनम्र होता है, यात्रा की दिशा में गमनशील होता है, अन्य घोड़े को देखकर शब्द करता है, अपने दक्षिणभाग को मुख से स्पर्श करता है; इस प्रकार का अश्व अपने स्वामी के लिए शीघ्र ही श्री-सम्पत्ति को प्राप्त कराता है।।१३।।

क्षितिपतौ राज्ञि राजनि वाऽऽरोहति उत्कषति योऽश्वस्तुरगो विनयोपपन्नो नीतिसंयुक्तो भवति, तथा यात्रानुगो यात्रादिगभिमुखः। यां दिशं गच्छति राजा तस्यामेव गच्छति। अन्यतुरगं प्रतिह्रेषते च। अन्यस्मिन् तुरगे ह्रेषिते शब्दं कुर्वन्ति सति प्रतिह्रेषितं करोति। अथवा वक्त्रेण मुखेनात्मपार्श्वं दक्षिणं सव्यं स्पृशति, स भर्तुः प्रभोरचिराच्छीघ्रमेव लक्ष्मीं श्रियं प्रचिनोति वृद्धिं नयति।।१३।।

क्षितिपति अर्थात् राजा या रानी के आरोहण करने पर जो अश्व विनय संयुक्त व्यवहार करता है। यात्रा की दिशा की ओर अभिमुख होता है अर्थात् जिस दिशा में राजा जाने वाला होता है, उसी दिशा में जाता हो। अन्य घोड़े को देखकर प्रतिशभ्द करता हो अर्थात् अन्य घोड़े की हिनहिनाहट को सुनकर स्वयं हिनहिनाता हो अथवा मुख से अपने दक्षिणपार्श्व का स्पर्श करता हो, तो वह स्वामी के लिए शीघ्र ही लक्ष्मी की समृद्धि कराता है।।१३।।

अथाशुनिमित्तान्याह—

मुहुर्मुहुर्मूत्रशकृत् करोति

न ताड्यमानोऽप्यनुलोमयायी।

अकार्यभीतोऽश्रुविलोचनश्च

शिवं न भर्तुस्तुरगोऽभिधत्ते।।१४।।

अशुभ लक्षणों को कहते हैं-

बार-बार मूत्र और लीद करता हो, मार खाने पर भी अभीष्टदिशा में नहीं जाता हो, अकारण ही भयभीत रहता हो और आँसू गिराता हो, तो ऐसा अश्व स्वामी के लिए अकल्याणकारक होता है।।१४।।

यस्तुरगोऽश्वौ मुहुर्मुहुः प्रतिक्षणं मूत्रं शकृत् पुरीषं च करोति। ताड्यमानोऽपि कषादिभिर्नानुलोमयायी अनुलोमामभीष्टां दिशं न गमनशीलः। अकार्यभीतः, अकार्यादनिमित्ताद् भीतः। महिषसूकारदिर्भिर्विना भयमाशङ्कते। अश्रुविलोचनोऽ-श्रुपरिपूर्णनयनः। स भर्तुः पत्युः शिवं श्रेयो नाभिधत्ते न ददाति।।१४।।

जो अश्व क्षण-प्रतिक्षण मूत्र और पुरीष (लीद) करता है। कोड़े आदि से प्रताड़ित होकर भी अभीष्ट दिशा में नहीं जाता हो, बिना किसी कारण के ही भयग्रस्त हो अर्थात् भैंस, सूअर आदि के बिना ही भय से आशंकित हो, आँसू से भरा हुआ नेत्र हो, ऐसा घोड़ा अपने पालक स्वामी के लिए कल्याणकारक नहीं होता है।।१४।।

उक्तमिदं हयचेष्टितमत ऊर्ध्वं दन्तिनां प्रवक्ष्यामि।

तेषां तु दन्तकल्पनभङ्गम्लानादिचेष्टाभिः।।१५।।

इस प्रकार हयचेष्टित का विचार किया गया। इसके पश्चात् हाथियों के लक्षणों को कहा जाएगा। हाथियों के दन्त-भंग तथा मलिनादि चेष्टाओं को कहा जाएगा।।१५।।

इदं हयानामश्वानां चेष्टितं कथितम्, अतोऽस्मादूर्ध्वमनन्तरं दन्तिनां गजानां सम्प्रवक्ष्यामि कथयिष्यामि। तेषां तु दन्तकल्पनेन दन्तभङ्गेनास्फोटनेन दन्तानां म्लानत्वेन वैकल्येन चेष्टया चेष्टितेन। आदिग्रहणादन्यैः पार्थिवोपकरणादिभिः फलानि भवन्ति।।१५।।

।।इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ शाकुनेऽश्वेङ्गितं नाम द्विनवतितमोऽध्यायः।।९२।।

इस प्रकार यहाँ पर अश्वों की चेष्टाएँ कही गयी हैं, इसके अनन्तर हाथियों की चेष्टाओं को कहूँगा। हाथियों के दन्त-भंग तथा उनकी विकलता और चेष्टा के द्वारा तथा राजाओं के अन्य उपरणों से जो फल होते हैं, उनको कहूँगा।।१५।।

।।श्रीभट्टोत्पल विरचित संहिता विवृति में शाकुनान्तर्गत अश्वेङ्गित नामक बानबेंवे

अध्याय की हिन्दी व्याख्या पूर्ण हुई।।९२।।

❋ ❋ ❋

।।अथ त्रिनवतितमोऽध्यायः।।

हस्तिचेष्टिताध्यायः

अथ हस्तिचेष्टिं[1] व्याख्यायते।

तत्रादावेव दन्तकल्पनविधानमाह—

दन्तस्य मूलपरिधिं द्विरायतं प्रोह्य कल्पयेच्छेषम्।
अधिकमनूपचाराणां न्यूनं गिरिचारिणां किञ्चित्।।१।।

हस्तिचेष्टिताध्याय ९३ की व्याख्या की जाती है।

दाँतों के निर्माण की व्यवस्था बतलाते हैं—

दन्तमूल की परिधि से द्विगुणित लम्बाई का त्यागकर शेषभाग को फल हेतु दाँतों की परिकल्पना करनी चाहिए। अनूपचर अर्थात् जलीय प्रदेशों के हाथियों का कुछ अधिक और पर्वतचारी हाथियों का इससे कुछ न्यूनभाग ग्रहण करना चाहिए।।१।।

मूले परिधिर्मूलपरिधिः। परिधिः पारिमण्डल्यम्। दन्तस्य रदस्य मूले यः परिधिः परिणाहस्तं द्विरायतं द्वौ वारौ द्विगुणमायतं दीर्घं प्रोह्य त्यक्त्वा शेषं कल्पयेत् छिन्द्यात्। एतदुक्तं भवति—दन्तमूलात् पारिमाण्डल्येन सूत्रेण मित्वा तत् सूत्रं द्विगुणं कृत्वा यद्भवति तावत् प्रमाणं दन्तमूलाद् दैर्घ्यं त्यक्त्वा शेषं कल्पयेत्। अधिकमनूपचराणामिति। अनूपो बहूदको देशः। अनूपचराणां हस्तिनां दन्तमूलपरिधिं द्विरायताधिकं प्रोह्य शेषं कल्पयेत्। गिरिचराणां पर्वते सदैव ये चरन्ति तेषां न्यूनं किञ्चिद् दन्तमूलपरिधिं द्विरायतं प्रोह्य शेषं कल्पयेत्। उक्तं च—

दन्तमूलपरिणाहदीर्घतां द्विः प्रमुच्य परतोऽपि कल्पयेत् ।।इति।।१।।

दन्तमूल की परिधि को मूलपरिधि कहते हैं। परिधि का तात्पर्य परिमण्डल अर्थात् वृत्ताकृति है। दन्त के मूल में परिधि की जो चौड़ाई हो, उसकी द्विगुणित लम्बाई के समतुल्य भाग को छोड़कर शेषभाग को कल्पित करे, अर्थात् छेदन करें। इसका तात्पर्य यह है कि दन्तमूल की गोलाई के बराबर जितना सूत्र हो, उसको दुगुना कर, उसके तुल्य दन्तमूल से लम्बा भाग छोड़कर शेषभाग का छेदन करें। अनूप अर्थात् जलाधिक्य प्रदेश। अनूपचर हाथियों के दन्तमूल-परिधि से द्विगुणित से अधिक भाग

---

१. अयमध्यायस्तथैव यथा शय्यासनलक्षणे गजदन्तलक्षणम्। ७८ अध्यायस्य।

छोड़कर शेषभाग को कल्पित (छेदन) करें। गिरिचरों अर्थात् जो सदैव पर्वत पर विचरण करते हैं, उनका इससे कुछ न्यून भाग का त्याग करके अवशिष्ट भाग को काटें। जैसाकि कहा गया है–

दन्तमूल के परिमाण से द्विगुणित दैर्घ्य को छोड़कर, उसके ऊर्ध्वभाग का छेदन करना चाहिए॥१॥

अथ परिकल्पितस्य दन्तस्य लक्षणमाह–

[1]श्रीवत्सवर्धमानच्छत्रध्वजचामरानुरूपेषु ।

छेदे दृष्टेष्वारोग्यविजयधनवृद्धिसौख्यानि।।२।।

अब परिकल्पित दाँत का लक्षण बतलाते हैं–

श्रीवत्स, वर्धमान, छत्र, ध्वज, चामर के सदृश चिह्न यदि दाँत का छेदन करने पर दखाई दें; तो आरोग्य, विजय, धनवृद्धि तथा सौख्य की प्राप्ति होती है॥२॥

श्रीवत्सो वर्धमानः। एतौ चिह्नविशेषौ। छत्रमातपत्रम्। ध्वजः प्रसिद्धः। चामरं वालव्यजनम्। एषामनुरूपेण सदृशेषु चिह्नेषु छेदे दृष्टेषु अवलोकितेष्वारोग्यमरोगित्वं विजयो धनवृद्धिः सौख्यमेतानि भवन्ति।।२।।

श्रीवत्स, वर्धमान; ये दोनों चिह्न-विशेष, छत्र अर्थात् आतपत्र, ध्वज, चामर अर्थात् चँवर; इनके अनुरूप अर्थात् सदृश चिह्न, यदि दाँतों को छेदित करने पर परिलक्षित हों, तो आरोग्य अर्थात् निरोगिता, विजय, धनवृद्धि तथा सुख की प्राप्ति होती है॥२॥

अन्यदप्याह–

प्रहरणसदृशेष जयो नन्द्यावर्ते प्रनष्टदेशाप्तिः।

लोष्टे तु लब्धपूर्वस्य भवति देशस्य सम्प्राप्तिः।।३।।

और भी कहते हैं–

प्रहरण (शस्त्र) के समान छिद्र होने पर विजय होती है तथा नन्द्यावर्त के समान छिद्र होने पर खोया हुआ राज्य पुनः प्राप्त होता है। लोष्ट (ढेला) के सदृश चिह्न दाँत का छेदन करने पर दिखायी दे, तो पूर्वलब्ध देश की प्राप्ति होती है॥३॥

प्रहरणं खड्गादि। प्रहरणसदृशेषु तदाकारेषु छेदे दृष्टेषु जयो भवति। नन्द्यावर्तश्चिह्नविशेषः। नद्यावर्तसदृशच्छेदे दृष्टे प्रनष्टस्यापहृतस्य देशस्याप्तिर्लाभो भवति। लोष्टे लोष्टसदृशे तु मृत्खण्डाकृतौ लब्धपूर्वस्य देशस्य सम्प्राप्तिर्भवति। पूर्वं लब्धो लब्धपूर्वः। नाममात्रेण लब्धो न हस्तीभूतस्तस्य सम्प्राप्तिर्लाभो भवति।।३।।

---

१. अस्य ग्रन्थस्य ७८ अध्यायस्य २१ श्लोके श्रीवत्स-स्थाने श्रीवृक्ष इति पाठान्तरम्।

प्रहरण अर्थात् तलवार आदि के सदृश आकृति, दाँत का छेदन करने पर दिखायी पड़े, तब जय होती है। नन्द्यावर्त नामक एक प्रकार का चिह्न-विशेष है, तदनुरूप चिह्न छिन्नभाग में दिखायी पड़े, तब प्रनष्ट अर्थात् अपहृत देश का लाभ होता है। लोष्ट अर्थात् मृत्खण्ड की आकृति प्रतीत हो, तब लब्धपूर्व अर्थात् पूर्व में जो प्राप्त हो अर्थात् जो नाममात्र का किञ्चित् भाग हस्तगत हुआ हो और पूर्णतः प्राप्त न हुआ हो, ऐसे देश की प्राप्ति होती है॥३॥

अन्यदप्याह—

स्त्रीरूपेऽश्वविनाशो भृङ्गारेऽभ्युत्थिते सुतोत्पत्तिः।
कुम्भेन निधिप्राप्तिर्यात्राविघ्नश्च दण्डेन॥४॥

और भी कहते हैं—

स्त्री की आकृति होने पर अश्वहानि होती है। भृङ्ग की आकृति होने पर पुत्रप्राप्ति तथा कुम्भाकृति से धनलाभ और दण्डाकृति से यात्रा में व्यवधान आता है॥४॥

स्त्रीरूपे योषिदाकृतौ छेदे दृष्टेऽश्वानां तुरगाणां विनाशः क्षयो भवति।, भृङ्गारो वार्धानी। भृङ्गाराकृतावभ्युत्थिते उत्पन्ने सुतस्य पुत्रस्योत्पत्तिः सम्भवो भवति। कुम्भेन घटसदृशेन निधिप्राप्तिर्निधिलाभो भवति। दण्डेन दण्डाकारेण यात्राविघ्नो गमननिषेधो भवति॥४॥

योषित अर्थात् नारी की आकृति यदि छेदित-दन्त में प्रतीत हो, तो अश्वों का क्षय होता है। भृङ्गार की आकृति उत्पन्न होने पर पुत्रोत्पत्ति की सम्भावना होती है। कुम्भ अर्थात् घड़े के समान आकृति से सम्पत्ति का लाभ होता है। दण्ड के सदृश आकार हो, तो यात्रा में विघ्न अर्थात् यात्रा का निषेध होता है॥४॥

अन्यदप्याह—

कृकलासकपिभुजङ्गेष्वसुभिक्षव्याधयो रिपुवशित्वम्।
गृध्रोलूकध्वांक्षश्येनाकारेषु जनमरकः॥५॥

और भी कहते हैं—

कृकलास (गिरगिट), वानर और सर्प; इनकी आकृति दन्तछिद्र पर दिखायी पड़े, तब अकाल, रोग तथा शत्रु की अधीनता प्राप्त होती है। गिद्ध, उल्लू, कौवा और बाज की आकृति से जनविनाश होता है॥५॥

कृकलासः प्राणिविशेषः। कपिर्वानरः। भुजङ्गः सर्पः। एतेषु छेदे दृष्टेषु

असुभिक्षं व्याधयः पीडा रिपुवशित्वं शत्रूणां विधेयत्वमिति। गृध्रः, उलूकः। एतौ प्रसिद्धौ पक्षिणौ। ध्वांक्षः काकः। श्येनो वाजिकः। एषामाकारेषु सदृशेषु छेदे दृष्टेषु जनमरको जनानां मरको भवति।।५।।

कृकलास एक प्राणी विशेष है, कपि अर्थात् वानर, अर्थात् साँप; इनकी आकृति यदि दन्तछिद्र में दिखायी पड़े तब असुभिक्ष अर्थात् अकाल, व्याधि और शत्रु की अधीनता होती है। गिद्ध और उलूकः; ये दोनों प्रसिद्ध पक्षी हैं, ध्वाङ्क्ष अर्थात् कौवा, श्येन अर्थात् बाज; इनकी आकृति छेदित दाँत में हो, तब जनता का मरण होता है।।५।।

अन्यदप्याह–

पाशेऽथवा कबन्धे नृपमृत्युर्जनविपत् स्रुते रक्ते।
कृष्णे श्यावे रूक्षे दुर्गन्धे चाशुभं भवति।।६।।

और भी कहते हैं–

सर्पाकार तथा कबन्ध (धड़) की आकृति दिखलायी पड़े, तो राजा की मृत्यु होती है। यदि रक्तस्राव होने लगे तब जनता पर विपत्ति आती है। कृष्ण, मलिन और विवर्ण हो, तथा दुर्गन्ध हो, तब अशुभ होता है।।६।।

पाशः सर्पाकारः। कबन्धो विच्छिन्नशिराः पुरुषः। तत्सदृशे छेदे दृष्टे नृपमृत्युर्नृपस्य राज्ञो मृत्युर्मरणं भवति। रक्ते शोणिते स्रुते जनानां विपदापदो भवन्ति। कृष्णे कृष्णवर्णे। श्यावे मलिने। रूक्षे अस्निग्धे। दुर्गन्धे दुष्टगन्धे। छेदे दृष्टे अशुभमनिष्टं भवति। उक्तं च–

श्यावपूतिमलरक्तदर्शनं सर्पसत्त्वसदृशं च पापदम् ।।इति।।६।।

पाश अर्थात् सर्पाकार कबन्ध अर्थात् कटे हुए सिरवाला मानव; इनके समान दन्त का छिन्नप्रदेश दिखायी पड़े तब राजा का मरण होता है। रक्त अर्थात् शोणित के स्रवित होने पर आपदाएँ आती हैं। कृष्णवर्ण, श्याव अर्थात् मलिन वर्ण, रूक्ष अर्थात् विकृतवर्ण तथा दूषित-गन्ध छेदित भाग में उत्पन्न हो, तब अशुभ अर्थात् अनिष्ट होता है। जैसा कि कहा गया है–

श्याव, दुर्गन्धि, मल एवं रक्त तथा सर्प के सदृश आकृति होने पर पाप (अशुभ) फल होता है।।६।।

अथ शुभच्छेदलक्षणमाह–

शुक्लः समः सुगन्धिः स्निग्धश्च शुभावहो भवेच्छेदः।

गलनम्लानफलानि च दन्तस्य समानि भङ्गेन।।७।।

शुभछिद्र का लक्षण कहते हैं–

शुक्लवर्ण का 'समतल' सुगन्धियुक्त और चिकना छिद्र शुभकारक होता है। गलन और म्लानता का फल दन्तभङ्ग के समान ही समझना चाहिए।।७।।

शुक्लः। समः सर्वभागेषु तुल्यः। सुगन्धिः शोभनगन्धिः। स्निग्धः सस्नेहः। एवंविधश्छेदः शुभावहः शुभं करोति। उक्तं च–

पार्थिवोपकरणोपमं यदा चिह्नमुद्वहति कल्पिते रदे।

श्रीजयार्थबलवृद्धयस्तदा स्निग्धशुक्लरुचिराश्च शोभनाः।।

गलनम्लानफलानीति। गलनं स्थानस्यैव विशरणं स्रावो वा। म्लानं म्लानता वैवर्ण्यम्। एतेषां यानि फलानि तानि दन्तस्य भङ्गेन स्फोटनेन समानि। यादृशं दन्तभङ्गफलं वक्ष्यमाणं तादृशमपि गलनम्लानफलम्।।७।।

श्वेत, सम अर्थात् सभी भागों में बराबर, सुगन्धित अर्थात् मधुर गन्ध, स्निग्ध अर्थात् चिकनाहट युक्त; इस प्रकार का छिद्र शुभ करने वाला होता है। जैसाकि कहा गया है–

गजदन्त को काटते समय राजा के उपकरणओं के (छत्र, ध्वज, चामर इत्यादि) चिह्न यदि उत्पन्न हों, तब श्री, विजय, अर्थ और बल की वृद्धि होती है। स्निग्ध, शुक्ल तथा रुचिरवर्ण शुभ कहे गये हैं।

गलन अर्थात् दन्तस्थान का झड़ना अथवा स्रवित होना, म्लानता अर्थात् वैवर्ण्यता; इनके फल दन्तभङ्ग के समान ही होते हैं। आगे दन्तभङ्ग के जो फल कहे जायेंगे, उसके सदृश ही गलन और म्लानता का भी फल होता है।।७।।

अन्यच्छुभाशुभमाह–

मूलमध्यदशनाग्रसंस्थिता

देवदैत्यमनुजाः क्रमात् ततः।

स्फीतमध्यपरिपेलवं फलं

शीघ्रमध्यचिरकालसम्भवम्।।८।।

अन्य शुभाशुभ फलों को कहते हैं–

दाँत के मूलभाग, मध्यभाग तथा अन्तिमभाग में क्रमशः देव, दैत्य एवं मनुष्य का स्थान होता है। इनका फल क्रमशः अत्यधिक, मध्यम और अल्प कहा जाता है। इसी क्रम से फल प्राप्ति का काल भी क्रमशः शीघ्र, मध्यम तथा विलम्ब से प्राप्त होता है॥८॥

यथाक्रमं गजस्य दन्तमूले दन्तमध्ये दन्ताग्रे च देवदैत्यमनुजाः क्रमात् स्थिताः। तद्यथा–दन्तमूले देवा व्यवस्थिताः। दन्तमध्ये दैत्याः। दन्ताग्रे मनुजा देवविशेषाः। ततस्तस्माद् भागत्रयात् स्फीतमध्यपरिपेलवं फलं भवति। तत्र मूले वक्ष्यमाणं फलं स्फीतं परिपुष्टं भवति। मध्ये मध्यमं नात्यल्पं नातिबहु। प्रान्ते परिपेलवं स्वल्पम्। तथा शीघ्रमध्यचिरकालसम्भवम्। मूले वक्ष्यमाणं फलं शीघ्रकालेन सप्ताहमध्ये सम्भवति। मध्ये मध्यमेन कालेन मासान्तः। प्रान्ते चिरकालेन मासान्ते सम्भवतीत्यागमविधिः॥८॥

हाथी के दाँत के क्रमानुसार उसके मूल, मध्य एवं अन्त में देव, दैत्य और मनुष्य अवस्थित रहते हैं। यथा–दाँत के मूलभाग में देवस्थान, मध्य में दैत्यस्थान एवं अन्त्य में मनुष्यस्थान होता है। मनुष्य भी यहाँ पर देव-विशेष ही कल्पित है। इन तीनों भागों से फल की कल्पना की जाती है। मूलभाग में फल स्फीत अर्थात् परिपुष्ट (पूर्ण) होता है। मध्यभाग में मध्यमफल अर्थात् न बहुत कम और न बहुत अधिक तथा अन्त्यभाग में परिपेलव अर्थात् स्वल्पफल होता है। इसी प्रकार आगे कहे जाने वाले इनके फल मूलभाग में शीघ्र अर्थात् सप्ताह के मध्य में सम्भव होते हैं। मध्यभाग में मध्यकाल अर्थात् एक मास का समय और प्रान्तभाग में चिरकाल अर्थात् मासोत्तर का समय सम्पादित है, यह परम्परागत शास्त्र का विधान है॥८॥

अत्रैव पुनरपि विशेषमाह–

दन्तभङ्गफलमत्र दक्षिणे भूपदेशबलविद्रवप्रदम्।
वामतः सुतपुरोहितेभयान् हन्ति साटविकदारनायकान्॥९॥

यहाँ पर पुनः विशेषरूप से कहते हैं–

यहाँ पर दाहिने भाग में दन्तभङ्ग का फल तीनों भागों का क्रमशः राजा, राज्य और सेना के लिए उपद्रवकारी होता है। वाम-दन्त के भङ्ग होने पर तीनों भागों में क्रमशः राजकुमार, राजपुरोहित और हाथियों का विनाश होता है। इसी प्रकार वामदन्त में सैन्य रानी और प्रधान नायक का नाश होता है॥९॥

अत्रास्मिन् भागत्रये दन्तभङ्गफलम्। दक्षिणे मूलाद् भग्ने भूपस्य राज्ञो विद्रवप्रदं विद्रवं पलायनभयं ददाति। मध्याद् भग्ने देशश्य जनपदस्य विद्रवप्रदम्। प्रान्तभग्ने बलस्य सेनाया विद्रवप्रदम्। वामतः सुतपुरोहितेभयानिति। वामतो वामे रदे मूलाद्भग्ने सुतं राजपुत्रं हन्ति। मध्याद्भग्ने पुरोहितमाचार्यं हन्ति। अग्रे इभयान् साधनपतीन् हन्ति। तथा साटविकदारनायकान् क्रमेण। वामदन्ते मूलाद्भग्ने साटविकं बलं हन्ति। मध्याद्भग्ने दाराः कलत्रम्। अग्राद्भग्ने नायकान् प्रधानपुरुषान् हन्ति। गलनम्लानफलान्येवमेव ज्ञातव्यानि।।९।।

यहाँ पर तीन भाग में दन्तभङ्ग का फल बतलाते हैं। दन्तमूल से दाहिने भाग के भंग होने पर राजा को पलायन का भय प्रदान करता है। मध्यभाग में भंग होने पर देश अर्थात् जनपद का विप्लव होता है। प्रान्तभाग अर्थात् अग्रभाग में भङ्ग होने पर बल अर्थात् सेना का पलायन करता है। बायें भाग से भङ्ग हो, तो पुत्र, पुरोहित तथा हाथियों को भय प्राप्त होता है। वामदन्त में मूलभाग के भङ्ग होने पर पुरोहित अर्थात् आचार्य का विनाश होता है। अग्रभाग में इभ अर्थात् हाथियों (समृद्धों) का हनन होता है। इसी प्रकार क्रमशः वामदन्त के मूलभाग के भङ्ग होने पर साटविक अर्थात् सैन्यबल का विनाश तथा मध्यभाग के भङ्ग होने पर स्त्री-हानि और अग्रभाग के भङ्ग होने पर नायक अर्थात् प्रधानपुरुष की हानि होती है। गलन तथा म्लानता का फल भी इन भागों का इसके अनुसार ही जानना चाहिए।।९।।

पुनरप्यत्र विशेषफलमाह–

आदिशेदुभयभङ्गदर्शनात् पार्थिवस्य सकलं कुलक्षयम्।
सौम्यलग्नतिथिभादिभिः शुभं वर्धतेऽशुभमतोऽन्यथा वदेत् ।।१०।।

यहाँ पर विशेष-फल कहते हैं–

दोनों दाँतों के भङ्ग होने पर राजा के सम्पूर्ण कुल का क्षय कहना चाहिए। शुभ लग्न अर्थात् शुभ तिथि, नक्षत्रादि हों, तब शुभफल की वृद्धि होती है। इसके विपरीत अशुभफल कहना चाहिए।।१०।।

उभयोर्दन्तयोर्द्वयोर्भङ्गदर्शनात्। भङ्गः स्फोटनं यदि दृश्यते तथा पार्थिवस्य राज्ञः सकलं निःशेषं कुलक्षयं वंशविनाशमादिशेद् वदेत्। निःशेषं नृपकुलं विनश्यति। गलनम्लानफलान्येवमेव। सौम्यलग्नतिथिभादिभिः शुभं वर्धते। सौम्यस्य शुभग्रहस्य लग्नेन सौम्यग्रहाणां लग्नानि वृषमिथुनकर्कटकन्यातुलधन्विमीनाः। येषां शुक्रबुधाक्षीणेन्दुजीवा अधिपतयः। एवं सौम्यलग्नेन सौम्य-तिथिना रिक्तावर्जितः सौम्यस्तिथिः। नन्दाभद्राविजयापूर्णाः सौम्यास्तिथयः। सौम्यं भं नक्षत्रं दारुणोग्रवर्जम्। आदिग्रहणात् सौम्यदर्शनेन लग्नस्य सौम्यसंस्थित्या वा सन्नामदर्शनादिना पूर्णं शुभं

चिह्नं शुभेनोत्पन्नं वर्धते वृद्धिं याति। अशुभमतोऽन्यथा वदेत्। अतोऽस्मादुक्तादन्यथा पापलग्नेन पापसंस्थित्या पापदर्शनेन सदोषतिथिना नक्षत्रेण चाधिकमशुभं पापचिह्नं वर्धते वृद्धिं याति। व्यामिश्रेण व्यामिश्रम्। अशुभेन लग्नादिना वाऽशुभं चिह्नं शुभेन वा शुभं यत्र तत्र व्यामिश्रं वा फलमूह्यमिति।।१०।।

दोनों दाँतों के भङ्ग अर्थात् खण्डित अथवा विदीर्ण होने का फल राजा के सम्पूर्ण कुल का क्षय अर्थात् वंशविनाश बतलावें। भावार्थ यह है कि नि:शेष राजकुल का विनाश होता है। गलन तथा म्लानता का फल भी इसी प्रकार होता है। शुभलग्न, तिथि, नक्षत्रादि से शुभता की वृद्धि होती है। शुभग्रह के लग्न अर्थात् वृष, मिथुन, कर्क, कन्या, तुला, मीन; जिनके शुक्र, बुध, पूर्णचन्द्र और गुरु अधिपति हैं। इस प्रकार शुभलग्न एवं शुभतिथियों से जिनमें रिक्तातिथि न हो। नन्दा, भद्रा, विजया और पूर्णा; ये शुभ तिथियाँ हैं। शुभनक्षत्र अर्थात् दारुण-संज्ञक तथा उग्रसंज्ञक नक्षत्र न हों। आदि पद के ग्रहण से शुभग्रह के दर्शन से शुभलग्न की स्थिति होने पर अथवा शुभनाम के दर्शनादि के द्वारा पूर्ण शुभ-चिह्न के उत्पन्न होने पर शुभफल की वृद्धि होती है। इसके विपरीत होने पर अशुभ कहना चाहिए। इस कथन का अभिप्राय यह है कि पापलग्न हो, पापग्रह स्थित हो, पापग्रह से दृष्ट हो तथा दोषयुक्त तिथि और नक्षत्र हो तब अत्यधिक अशुभ एवं पापचिह्न की वृद्धि होती है। मिश्रित योगों से मिश्रितफल प्राप्त होते हैं। अशुभ लग्नादि के द्वारा अशुभफल तथा शुभलग्नादि से शुभफल मिश्रित-योग से मिश्रित फल की परिकल्पना करें।।१०।।

अधुना दन्तभङ्गस्य विशेषफलमाह–

क्षीरमृष्टफलपुष्पादपेष्वापगातटविघट्टितेन वा।
वाममध्यरदभङ्गखण्डने शत्रुनाशकृदतोऽन्यथा परम्।।११।।

दन्तभङ्ग का विशेष फल कहते हैं–

दुधारू वृक्ष, मीठा फल-फूल वाले वृक्ष को तोड़ते समय अथवा नदी के तट को विघटित करते हुए यदि हाथी के बाँये दाँत का मध्यभाग खण्डित हो जाये, तो शत्रु का विनाश होता है। इसके विपरीत अनिष्टादि फल होते हैं।।११।।

अत्र वामस्यापसव्यस्य रदस्य मध्याद्भङ्गः स्फोटनं खण्डनं भेदनं वा यदि क्षीरवृक्षस्यार्कादेर्घट्टितेन चालनेन भवति। मृष्टफलपादपस्य मधुरफलवृक्षस्य वा चालनेन भवति। पुष्पपादपस्य कुसुमवृक्षस्य वा चालनेनोत्पद्यते, तदा

शत्रुनाशकृच्छत्रुनाशं करोति। आपगातटविघट्टितेन वा आपो गच्छन्ति यासु ता आपगा नद्यस्तासां तटविघट्टितेन तीरचालनेन चोत्पद्यते; तथापि शत्रुनाशं करोति। अतोऽन्यथा परम्, अतोऽस्मादुक्तप्रकाराद् अन्यथा दुष्टवृक्षादिघट्टितेन वामस्य दन्तस्य मूले वाग्रे यो भङ्गः खण्डनं वा तदा शत्रुवृद्धिकृदित्यर्थः। दक्षिणस्य मूलमध्याग्रेष्वपि भङ्गदर्शनाच्छत्रुवृद्धिकृदिति।।११।।

वाम अर्थात् अपसव्य दाँत के मध्य भाग के खण्डन अथवा भेदन हो और वह मदार आदि दुधारू वृक्ष के घर्षण से (उपाटने या तोड़ने से) हो, अथवा मधुर फल वाले वृक्ष के आघात से अथवा फूलदार वृक्ष को तोड़ने से हो तब शत्रु का विनाशकर्ता होता है। जल के मार्ग को आपगा अर्थात् नदी कहते हैं। इस नदी के तट को तोड़ते समय दन्त-भङ्ग हो जाये, तो शत्रु का नाश होता है। इस कथन के विपरीत निषिद्ध वृक्षों को तोड़ने से बाँयें दाँत के मूलभाग में अथवा अग्रभाग में खण्डन हो, तो शत्रु की वृद्धि होती है। दाहिने दाँत के मूलभाग अथवा अग्रभाग में भी टूटन दिखाई पड़े तब शत्रु की वृद्धि होती है।।११।।

अधुना गजेङ्गितमाह—

स्खलितगतिरकस्मात् त्रस्तकर्णोऽतिदीनः
श्वसिति मृदु सुदीर्घं न्यस्तहस्तः पृथिव्याम्।
द्रुतमुकुलितदृष्टिः स्वप्नशीलो विलोमो
भयकृदहितभक्षी नैकशोऽसृक्शकृत्कृत्।।१२।।

हाथी की चेष्टाओं को कहते हैं-

अकस्मात् गतिभङ्ग हो जाये, कान फड़फड़ाने लगे, अत्यन्त दीन (दु:खी) हो जाये, भूमि पर हाथ रखकर (सूँड़) कोमल लम्बी श्वास ले, तत्क्षण अधखुले नेत्रों से अधिक सोता रहे, विपरीत गतिशील हो; इस प्रकार का हाथी भयकारी होता है। अहितकारी पदार्थों का भक्षण करने वाला तथा अनेक बार रक्तसहित मल-त्याग करने वाला, हाथी भी भयप्रदायक होता है।।१२।।

स्खलितगतिरकस्मादिति। अकस्माद्विना निमित्तं स्खलितगतिः, स्खलिता गतिर्यस्य सः। अकस्मात् त्रस्तकर्णो वित्रस्तश्रोत्रः। अतिदीनोऽतीव दैन्यं गतः। श्वसिति मृदु सुदीर्घमिति। पृथिव्यां भूमौ न्यस्तहस्तो विन्यस्तकरो मृदु कृत्वा सुदीर्घं चिरकालं श्वसिति श्वासं विमुञ्चति। द्रुतमुकुलितदृष्टिः, द्रुता चकिता

मुकुलिताऽर्द्धोन्मीलिता वा दृष्टिश्चक्षुषी यस्य सः। स्वप्नशीलो बहुकालं स्वपिति। विलोमो विपरीतगतिः। यत्र प्रेर्यते तत्र न याति। एवंविधो भय-कृद्भयं करोति। तताहितभक्षी, अहितमनिष्टं भक्षयति। अपथ्याशी। नैकशोऽसृक्शकृत्कृत्। नैकशो बहून् वारानसृग्रक्तं शकृत् पुरीषं करोति, तदाऽपि भयकृत्।।१२।।

अकस्मात् अर्थात् बिना किसी कारण के गति में स्खलन हो जाये, अकस्मात् ही कर्ण-विकार उत्पन्न हो, अतीव दैन्य अवस्था को प्राप्त हो, पृथ्वी पर अपना हाथ अर्थात् सूँड़ रखकर उसे मुलायम बनाते हुए अधिक समय तक श्वास छोड़ता रहे, चञ्चल और अधखुले नेत्र हों, जो अधिक समय तक शयन करे, विपरीत गति का अर्थात् जिस दिशा में प्रेरित किया जाये उधर न चले; तो इस प्रकार का हाथी भय उत्पन्न करता है। अहित अर्थात् अनिष्ट वस्तु का (अपथ्य) भक्षण करने वाला, अनेक बार जो रक्त और मल का त्याग करता हो; तब भी वह भयकारी होता है।।१२।।

अधुना शुभचेष्टितमाह—

वल्मीकस्थाणुगुल्मक्षुपतरुमथनस्वेच्छया हृष्टदृष्टि-
र्यायाद्यात्रानुलोमं त्वरितपदगतिर्वक्त्रमुन्नाम्य चोच्चैः।
कक्ष्यासन्नाहकाले जनयति च मुहुः शीकरं बृंहितं वा
तत्काले वा मदाप्तिर्जयकृदथ रदं वेष्टयन् दक्षिणं च।।१३।।

शुभ-चेष्टाओं को कहते हैं-

वल्मीक, शुष्क वृक्ष, गुल्म (लघु पादप), घास, वृक्ष; इन वस्तुओं को स्वेच्छा से रौंदता हुआ, प्रसन्न नेत्रों वाला, यात्रा की दिशा में शीघ्र गति से अपने मुख को ऊपर ऊठाये हुए यात्रा करे तो शुभ होता है। हौदा कसते समय (पीठ पर आसन बाँधते समय) बार-बार सूँड़ से शीतल जल छोड़े अथवा बादल के समान ध्वनि करे अथवा उस समय मदग्रस्त हो जाये और दाहिने दाँत को वेष्टित करे तब जयकारक होता है।।१३।।

वल्मीकस्थाणुगुल्मेति। एवंविधो गजो जयकृत्, राज्ञो जयं करोति। यदि वल्मीककृतं मृत्स्तूपं मथ्नाति। स्थाणुर्निःशेषशाखाच्छिन्नो वृक्षः शुष्कवृक्षो वा। गुल्म एकमूलः शाखासमूहः। क्षुपं शष्पम्। तरुर्वृक्षः। एतेषामन्यतमं यदि स्वेच्छया आत्मेच्छया मथ्नाति। तथा हृष्टदृष्टिः, हृष्टा दृष्टिर्यस्य सः। यायाद्यात्रानुलोममिति। त्वरितपदगतिः शीघ्रगामी वक्त्रं मुखमुच्चैरुन्नाम्योत्क्षिप्य यात्रानुलोमं यात्रादिशं यायाद् गच्छेत्। तथा कक्ष्यासन्नाहकाले मध्यबन्धनप्रतिवेलायां जनयत्युपादयति

मुहुर्मुहुः पुनः पुनः शीकरं वक्त्रोदककणान् मुञ्चति। बृंहितं घनगर्जितं वा करोति। तत्काले वा मदाप्तिर्मदप्रादुर्भावः। तथा रदं दन्तं दक्षिणं वेष्टयन् करेणालम्बयन् इति।।१३।।

इस प्रकार का हाथी विजय कारक होता है, यदि वह वल्मीक कीड़े द्वारा निर्मित मिट्टी के स्तूप को रौंदता है। स्थाणु अर्थात् शाखा रहित वृक्ष अथवा शुष्क-वृक्ष, गुल्म अर्थात् एक ही मूल में अनेक शाखायें हो, क्षुप अर्थात् घास, वृक्ष; इनमें से किसी को भी यदि वह स्वेच्छा से रौंदता है तथा प्रसन्न दृष्टि वाला हो, यात्रा की दिशा में शीघ्र गमन कर, मुख को ऊँचा उठाकर अभीष्ट दिशा में गमन करे तथा मध्यभाग के बन्धन के समय बार-बार शीकर अर्थात् मुख के जल कणों को, छोड़ता रहे अथवा मेघ के समान गर्जन करे अथवा उसी समय मद उत्पन्न हो जाये तथा दाहिने दाँत को लपेटे तब जयप्रदायक होता है।।१३।।

अन्यदपि चेष्टितमाह–

प्रवेशनं वारिणि वारणस्य
ग्राहेण नाशाय भवेन्नृपस्य।
ग्राहं गृहोत्वोत्तरणं नृपस्य
तोयात् स्थलं वृद्धिकरं नृभर्तुः।।१४।।

अन्य चेष्टाओं को कहते हैं–

ग्राह (घड़ीयाल) द्वारा यदि हाथी, जल के भीतर ले जाया जाये तब राजा का विनाश होता है। यदि ग्राह को पकड़कर हाथी भूमि पर ला दे, तब राजा के लिए वृद्धिकारक होता है।।१४।।

वारणस्य गजस्य ग्राहेण जलप्राणिना वारिणि जलमध्ये प्रवेशनं नृपस्य राज्ञो नाशाय भवेत् स्यात्। तथा द्विपस्य हस्तिनो जलप्राणिनं नीत्वाऽऽक्रम्य तोयाद् जलात् स्थले उत्तरणं नृभर्तू राज्ञो वृद्धिकरं भवतीति।।१४।।

।।इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ हस्तिचेष्टितं नाम त्रिनवतितमोऽध्यायः।।९३।।

ग्राह (घड़ियाल) जो कि एक जल प्राणी है, उसके द्वारा हाथी जल के मध्यभाग में प्रविष्ट करा दिया जाये तो वह राजा के लिए विनाशकारक होता है। हाथी यदि उस जल-प्राणी ग्राह के ऊपर आक्रमण कर उसको जल के भीतर से खींच कर भूमि पर कर दे तब राजा के लिए वह वृद्धिकारक होता है।।१४।।

।।श्री भट्टोत्पल विरचित संहिताविवृति में शाकुन के अन्तर्गत हस्तिचेष्टित नामक तिरानबेवें अध्याय की हिन्दी व्याख्या पूर्ण हुई।।९३।।

❈ ❈ ❈

।।अथ चतुर्नवतितमोऽध्यायः।।

वायसविरुताध्यायः

अथ वायसविरुतं व्याख्यायते।

तत्रादावेव प्रविभागप्रदर्शनार्थमाह—

प्राच्यानां दक्षिणतः शुभदाः काकाः करायिका वामाः।
विपरीतमन्यदेशेष्ववधिर्लोकप्रसिद्ध्यैव ।।१।।

वायसविरुताध्याय ९४ की व्याख्या की जाती है।

इनके विभागों को प्रदर्शित करते हैं–

पूर्वदिशा के काक यदि दक्षिणभाग में स्थित हों, तब शुभदायक होते हैं। करायिका वामभाग में शुभ होती है। इसके विपरीत अन्य दिशा में अशुभफल होता है। इन शकुनों की कालावधि लोकपरम्परानुसार जाननी चाहिए।।१।।

प्राच्यां पूर्वस्यां दिशि भवाः प्राच्याः। तेषां प्राच्यानां दक्षिणतो दक्षिणभागे काका वायसाः शुभदाः। करायिकाः कूटपूर्यः। वामा वामभागस्थास्तेषामेव शुभदाः। अन्यदेशेषु प्राग्देशवर्जितेषु विपरीतं विपर्यस्तम्। काको वामः करायिका दक्षिणेति देशे प्रविभागमाह—अवधिर्लोकप्रसिद्ध्यैव, अवधिः परिच्छित्तिः सा च लोकप्रसिद्ध्यैव लोकप्रसिद्ध्या लोकतो विज्ञेया। यथा इमे जनाः प्राच्याः, इमे दक्षिणाः, इमे पश्चिमाः, इमे उत्तरा इति। आचार्येणापि कूर्मप्रविभागे प्रदर्शिता इति।।१।।

प्राच्य अर्थात् पूर्वदिशा में उत्पन्न पदार्थ को प्राच्य कहते हैं। इस प्राच्यभाग वाले के दक्षिणभाग में वायस अर्थात् कौवे शुभदायक होते हैं। करायिका अर्थात् कूटपूरी वामभाग में स्थित होने पर शुभदायिका होती है। अन्य दिशाओं में अर्थात् उक्त पूर्वादि दिशाओं के विपरीत दिशा में स्थित होने पर जैसाकि कौवे वामभाग में तथा करायिकाएँ दक्षिणभाग में विपरीत (शुभ फल देती हैं। अवधि अर्थात् परिणाम काल वह लोक प्रसिद्धि है, अर्थात् लोक में प्रचलित परम्परा के अनुसार समझना चाहिए। देशों के विभाग भी लोकानुसार जानना चाहिए। जैसा कि ये लोग पूर्वदिशा के हैं, ये लोग पश्चिमदिशा के होते हैं, ये लोग दक्षिणदिशा के हैं तथा ये लोग उत्तरदिशा के हैं; ये सभी विषय लोक से ज्ञात होते हैं। आचार्य ने कूर्माध्याय के अन्तर्गत देशों

के विभाग को प्रदर्शित किया है॥१॥

अथ चेष्टितमाह–

वैशाखे निरुपहते वृक्षे नीडः सुभिक्षशिवदाता।

निन्दितकण्टकिशुष्केष्वसुभिक्षभयानि तद्देशे।।२।।

अब चेष्टाओं को कहते हैं–

वैशाख मास में उत्तम वृक्ष के ऊपर घोंसला होने पर सुभिक्ष तथा कल्याण होता है। निन्दित, कँटीले और सूखे वृक्ष पर घोंसला हो तब अकाल तथा उस देश में भय उत्पन्न होता है॥२॥

वैशाखेमासे निरुपहते निरुपद्रवे वृक्षे तरौ नीड आलयः सुभिक्ष-शिवदाता भवति। सुभिक्षं श्रेयश्च ददाति। निन्दिते कुत्सिते। कण्टकिनि सकण्टके। शुष्के नीरसे वृक्षे। यस्मिन् देशे एतेषु नीडं करोति। तद्देशे असुभिक्षभयानि भवन्ति।।२।।

वैशाखमास में निरुपहत अर्थात् उपद्रवरहित, श्रेष्ठ वृक्ष पर, नीड अर्थात् घोंसला, सुकाल और कल्याणदाता होता है। निन्दित अर्थात् कुत्सित वृक्षों पर जो काँटेदार और नीरस हों, उस पर घोंसला होने से उस स्थान पर अकाल तथा भय उत्पन्न होता है॥२॥

अथ नीडवशेन फलमाह–

नीडे प्राक्शाखायां शरदि भवेत् प्रथमवृष्टिरपरस्याम्।

याम्योत्तरयोर्मध्यात् प्रधानवृष्टिस्तरोरुपरि।।३।।

शिखिदिशि मण्डलवृष्टिर्नैर्ऋत्यां शारदस्य निष्पत्तिः।

परिशेषयोः सुभिक्षं मूषकसम्पच्च वायव्ये।।४।।

नीड के अनुसार फल कहते हैं–

वृक्ष की पूर्वशाखा पर नीड हो तब शरदृतु में प्रथम वृष्टि होती है। पश्चिम दिशा की शाखा पर नीड के होने पर वर्षा ऋतु में वृष्टि होती है। दक्षिणोत्तर दिशा की मध्य शाखा पर नीड होने पर मध्यकाल में वर्षा होती है। वृक्ष के ऊपर नीड के होने से पर्याप्त वर्षा होती है। अग्निकोण की दिशा में नीड होने पर मण्डल वृष्टि तथा नैर्ऋत्य में नीड होने पर शरत्कालीन फसल अच्छी होती है। शेष दिशा अर्थात् ईशान तथा वायव्य में नीड होने पर सुभिक्ष होता है। वायव्यकोण में नीड होने से चूहों की उत्पत्ति अधिक होती है॥३-४॥

नीडे प्राक्शाखायामिति। नीडे आलये तरौ वृक्षे प्राक्शाखायां पूर्वस्यां दिशि

शाखायां कृते शरदि शरत्काले। आश्वयुजकार्तिकयोर्वृष्टिर्वर्षणं भवेत्। अपरस्यां पश्चिमायां दिशि स्थिते नीडे प्रथमवृष्टिर्वर्षासु श्रावणभाद्रपदयोर्वृष्टिर्भवति। याम्योत्तरयोर्दक्षिणसौम्ययोर्दिशि स्थिते नीडे मध्याद् भाद्रपदाश्वयुजयोर्वृष्टिर्भवति। तरोर्वृक्ष-स्योपरि प्रधानशाखायां दिशि स्थिते नीडे प्रधाना प्रधाना श्रेष्ठा चतुर्ष्वपि मासेषु श्रावणादिषु वृष्टिर्भवति।।३।।

नीड अर्थात् पक्षियों का आश्रय, यह यदि वृक्ष की पूर्वदिशा की शाखा पर हो तब शरद्काल में अर्थात् आश्विन और कार्तिक इन दोनों मासों में वर्षा होती है। याम्योत्तर अर्थात् दक्षिण और उत्तरदिशा में नीड अर्थात् घोसला होने पर मध्य अर्थात् भाद्रपद और आश्विन मासों में वर्षा होती है। अपर अर्थात् पश्चिमदिशा में स्थित नीड से वर्षा ऋतु में प्रथमवृष्टि अर्थात् श्रावण और भाद्रपद मासों में वर्षा होती है। वृक्ष के ऊपर मुख्यशाखा में ऊर्ध्वदिशा की ओर नीड हो, तब उत्तम वर्षा अर्थात् श्रावणादि चारों मासों में वर्षा होती है॥३॥

शिखिदिशीति। शिखिदिशि आग्नेयदिशि स्थिते नीडे मण्डलवृष्टिर्भवति। क्वचिद्वृष्टिः क्वचिदवृष्टिः। नैर्ऋत्यां दिशि स्थिते नीडे शारदस्य सस्यस्य निष्पत्तिर्भवति। परिशेषयोर्वायव्यैशान्योः स्थिते नीडे सुभिक्षं भवति वायव्ये कोणे मूषकानां सम्पद् बाहुल्यं भवति।।४।।

शिखि अर्थात् आग्नेयदिशा में स्थित नीड से मण्डल-वृष्टि होती है, अर्थात् कहीं पर वृष्टि और कहीं पर अनावृष्टि होती है। नैर्ऋत्यदिशा में नीड के होने पर शरद्कालीन सस्यों की निष्पत्ति होती है। शेष दिशा वायव्य एवं ईशानदिशा में नीड के होने पर सुभिक्ष होता है। वायव्यदिशा में नीड होने पर मूषकों का आगमन अधिक होता है॥४॥

अथान्यच्चेष्टितमाह–

शरदर्भगुल्मवल्लीधान्यप्रासादगेहनिम्नेषु।
शून्यो भवति स देशश्चौरानावृष्टिरोगार्तः।।५।।

अन्य चेष्टाओं को कहते हैं–

सरपत, कुश, गुल्म, वल्ली, धान्य, देवालय, गृह तथा गड्ढे में यदि कौवे का घोंसला हो, तो वह देश जनशून्य हो जाता है और चोर, अनावृष्टि तथा रोगों द्वारा कष्ट मिलता है॥५॥

शरः प्रसिद्धः। दर्भः प्रसिद्ध एवं। गुल्म एकमूलः शाखासमूहः। वल्ली प्रसिद्धा। धान्य प्रसिद्धम्। प्रासादो देवप्रासादः। गेहं वेश्म। निम्नं श्वभ्रम्। एतेषु

स्थानेषु यत्र काकस्य नीडो भवति स देशः शून्यो भवति। स देशश्चौरानावृष्टिरोगार्तः, चौरैस्तस्करैरनावृष्ट्या अवर्षणेन रोगैर्गदैश्चार्तः पीड़ितो भवति। उक्तं च यात्रायम्–

शस्तो नीडस्तु वैशाखे पादपे निरुपद्रवे।

देशोत्थानं तु वल्मीकचैत्यधान्यगृहादिषु।।इति।।५।।

शर अर्थात् प्रसिद्ध सरपत है। दर्भ को कुश कहते हैं। एक मूल वाला सघन शाखाओं से युक्त गुल्म होता है। वल्ली अर्थात् लता, धान्य (धान), प्रासाद अर्थात् देवालय, गेह अर्थात् घर, निम्न अर्थात् गर्त (गड्ढा); इन स्थानों में यदि कौवे का नीड (घोंसला) होता है, तो वह देश शून्य हो जाता है। वह देश चोरों अर्थात् तस्करों, अवर्षण और रोगों के द्वारा पीड़ित होता है। जैसाकि यात्रा-प्रकरण में कहा गया है–

शान्तस्थान में स्थित वृक्ष के ऊपर, वैशाखमास में निर्मित घोंसला, प्रशस्त होता है। वल्मीक, मन्दिर, धान्य और गृहों पर निर्मित नीड से देश का उत्थान होता है।।५।।

अन्यच्चेष्टितमाह–

द्वित्रिचतुः शावत्वं सुभिक्षदं पञ्चभिर्नृपान्यत्वम्।

अण्डावकिरणमेकाण्डताप्रसूतिश्च न शिवाय।।६।।

अन्य चेष्टाओं को कहते हैं–

दो, तीन अथवा चार बच्चों के होने पर सुभिक्ष होता है। पाँच बच्चों के होने से राजा का परिवर्तन हो जाता है। अण्डे का नष्ट होना तथा एक अण्डे का उत्सर्जन और एक ही प्रसव होना कल्याणकारक नहीं होता है।।६।।

शावः शिशुः। अपत्यमित्यर्थः। द्वित्रिचतुः शावत्वं द्वयोस्त्रयाणां चतुर्णां वा शावकानां भावो द्वित्रिचतुः शावत्वम्। तच्च सुभिक्षदम्। पञ्चभिः शावैर्नृपान्यत्वमन्यस्य राज्यं करोति। द्वितीयो राजा भवतीत्यर्थः। अण्डावकिरणमण्डविक्षेपः। एकाण्डता एकाण्डभावः। अप्रसूतिश्च प्रसवाभावः। एते सर्व एव न शिवाय न श्रेयसे भवन्ति।।६।।

शावक अर्थात् शिशु (चूजा); जब दो, तीन अथवा चार शावकों का जन्म हो, तब सुभिक्ष होता है। पाँच चूजों के उत्पन्न होने से राजा का परिवर्तन हो जाता है। अर्थात् वर्तमान राजा के स्थान पर कोई दूसरा राजा हो जाता है। अण्डों का अवकिरण

अर्थात् अण्डों का पतन (नष्ट होना), अथवा एक अण्डे का होना तथा प्रसव न होना; ये सभी श्रेयस्कर नहीं होते हैं।।६।।

अथैतेषामेव विशेषमाह–

चौरकवर्णैश्चौराश्चित्रैर्मृत्युः सितैस्तु बह्निभयम्।
विकलैर्दुर्भिक्षभयं काकानां निर्दिशेच्छिशुभिः।।७।।

इनकी विशेषताओं को कहते हैं–

चौरक के वर्ण का काक हो, तो चोरों से भय होता है। विचित्र वर्ण से मृत्यु और श्वेतवर्ण से अग्नि का भय उपस्थित होता है। विकृत अङ्गों वाला कौआ अकाल का भय उपस्थित करता है। शिशु-काक भी अकाल का भय करता है।।७।।

चौरकं गन्धद्रव्यम्। तद्वर्णैः शिशुभिश्चौरास्तस्करा भवन्ति। चित्रैश्चित्रवर्णैर्नानाकारैर्मृत्युर्भवति। सितैः शुक्लैस्तु वह्निभयमग्निभयम्। विकलैर्दुर्भिक्षभयम्। विकलैरङ्गहीनैः काकानां ध्वांक्षाणां शिशुभिर्बालैर्दुर्भिक्षभयं निर्दिशेद् वदेत्। उक्तं च–

काकानां स्रवणे द्वित्रिचतुः शावाः शुभावहाः।
चोरचित्रकश्वेताश्च वर्णाश्चौराग्निमृत्युदाः।।
अण्डावकिरणैर्ध्वांक्ष्या दुर्भिक्षमरकावुभौ।
शावानां विकलत्वे वा निःशावत्वे कृतौ तथा।।इति।।७।।

चौरक एक सुगनिधत द्रव्य है। इसके समान वर्ण वाले शिशुकाक से चोरों अर्थात् तस्करों का भय होता है। चित्रवर्ण अर्थात् अनेक प्रकार के वर्णों से मृत्यु का भय होता है। श्वेतवर्ण से अग्नि का भय तथा अङ्गवैकल्य से दुर्भिक्ष का भय होता है। विकलता अर्थात् विकलाङ्गता से प्रभावित कौवे के द्वारा दुर्भिक्ष का भय कहना चाहिए। जैसा कि कहा गया है–

कौवे का दो, तीन अथवा चार प्रसव शुभकारक होता है। चोर-वर्ण, चित्रवर्ण और श्वेतवर्ण से क्रमशः चोर, अग्नि और मृत्यु की प्राप्ति होती है। कौवे के अण्डे का नष्ट-भ्रष्ट होना दुर्भिक्ष और मृत्यु को देता है। काक-शिशु की विकलाङ्गता अथवा प्रसवहीनता से भी यही फल प्राप्त होता है।।७।।

विशेष व्याख्या–चोर अथवा चोरक नामक सुगन्धित पौधा हरितवर्ण का होता है। सुश्रुत, कल्पस्थान तथा राजनिर्घण्टु में यह वरुण, कुण्ठ, सर्वगन्धा और ससप्रला नाम से वर्णित है।

अन्यदप्याह–

अनिमित्तसंहतैर्ग्राममध्यगैः क्षुद्भयं प्रविरुवद्भिः।
रोधश्चक्राकारैरभिघातो वर्गवर्गस्थैः।।८।।

और भी कहते हैं–

यदि अकारण ही गाँव के बीच में कौवों का झुण्ड हो जाये, और काँव-काँव करने लगे, तो भुखमरी होती है। वृत्ताकार में कौवे बैठे हों, तो उस नगर का अवरोध होता है। पृथक्-पृथक् अनेक झुण्डों में कौवों के बैठने से उस स्थान पर आक्रमण होता है।।८।।

अनिमित्तमकारणं संहतैः समेतैर्ग्राममध्यगैर्ग्राममध्यस्थितैर्वायसैः प्रविरुवद्भिर्वाशितैः क्षुद्भयं दुर्भिक्षभयं भवति। चक्राकारैश्चक्रवत्यारिमण्डल्येन स्थितै रोधः पुररोधो भवति। वर्गवर्गस्थैरकारणसमेतैर्बहुभिः समूहैः स्थितैरभिघात उपद्रवो भवति। उक्तं च–

अकार्यसंहतैर्भेदो रोधश्चक्राकृतिस्थितैः।
वर्गगैश्चाभिघातः स्याद् रिपुवृद्धिश्च निर्भयैः।।इति।।८।।

किसी निमित्त अर्थात् कारण के बिना ही यदि समूहबद्ध कौवें गाँव के बीच में स्थित होकर कर्कश ध्वनि करें, तो क्षुधा का भय अर्थात् दुर्भिक्ष होता है। चक्राकार अर्थात् परिमण्डल (वृत्ताकार) में स्थित कौवों से पुर का अवरोध होता है। अकारण ही समवेत होकर अनेक समूहों में कौवें बैठे हों, तब अभिघात अर्थात् उपद्रव (आक्रमण) होता है। जैसाकि कहा गया है–

अकारण समूहबद्ध होने से परस्पर-विभेद तथा गोलाकार में बैठने से पुरावरोध एवं विभिन्न झुण्डों में बैठने से ग्राम पर आक्रमण और निर्भय होने पर शत्रु की वृद्धि होती है।।८।।

अन्यदप्याह–

अभयाश्च तुण्डपक्षश्चरणविघातैर्जनानभिभवन्तः।
कुर्वन्ति शत्रुवृद्धिं निशि विचरन्तो जनविनाशम्।।९।।

और भी कहते हैं–

निर्भीक होकर कौवें, यदि चोंच, पंख और पञ्जों के आघात से लोगों को पीड़ित करते हैं, तो शत्रु की वृद्धि होती है। तथा रात्रिकाल में यदि कौवें उड़ते हों, तब जनता का विनाश होता है।।९।।

अभया भयरहिताः। तुण्डैश्चञ्चवग्रैः। पक्षैरङ्गरुहैः। चरणविघातैः पादप्रहारैः। जनान् लोकानभिभवन्त पराभवन्त शत्रुवृद्धिं रिपुवृद्धिं कुर्वन्ति। निशि रात्रौ विचरन्तो जनानां लोकानां विनाशं कुर्वन्ति।।९।।

अभय अर्थात् भयरहित होकर तुण्ड अर्थात् चञ्चु के अग्रभाग से, पक्ष अर्थात् पंखों से तथा चरण अर्थात् पञ्जों के प्रहार से लोगों को पराभूत करें, अर्थात् उत्पीड़ित करें, तब शत्रु की वृद्धि होती है। रात्रि में कौवें विचरण करें, तब लोगों का विनाश होता है॥९॥

अन्यदप्याह–

सव्येन खे भ्रमद्भिः स्वभयं विपरीतमण्डलैश्च परात्।
अत्याकुलं भ्रमद्भिर्वातोद्भ्रामो भवति काकैः॥१०॥

और भी कहते हैं–

सव्यक्रम से आकाश में घूमते हुये कौवों के द्वारा स्वजनों से भय होता है। इसके विपरीत अपसव्यक्रम से घूमते रहे, तो शत्रुपक्ष से भय होता है। अत्यन्त व्याकुल होकर यदि कौवें घूमते हों, तब वायुचक्र से विनाश होता है॥१०॥

सव्येन प्रादक्षिण्येन खे आकाशे भ्रमद्भिः काकैर्वायसैः पूर्वदक्षिणपश्चिमोत्तरा इत्यनेन क्रमेण भ्रमद्भिः स्वेभ्य आत्मीयेभ्यो भयं भवति। विपरीतमण्डलैः पूर्वोत्तरपश्चिमदक्षिणा इत्यनेन क्रमेण भ्रमद्भिः पराच्छत्रोर्भयं भवति। अत्याकुलं सोद्यमं भ्रमद्भिः काकैर्वातोद्भ्रामो भवत्यनवस्थितिरित्यर्थः। उक्तं च–

पुरसैन्योपरि व्योम्नि व्याकुलैरनिलाद्भयम्।
सव्यमण्डलगैः स्वोत्थमपसव्यैः पराद्भयम्॥इति॥१०॥

सव्य अर्थात् प्रदक्षिणाक्रम से आकाश में घूमते हुए कौवों के द्वारा अर्थात् पूर्व, दक्षिण, पश्चिम और उत्तरदिशा के क्रम से घूमते हुये कौवों के द्वारा आत्मीयजनों से भय होता है। विपरीत क्रम अर्थात् पूर्व, उत्तर पश्चिम और दक्षिण दिशा (अपसव्य) के क्रम से घूमते हुए कौवों के द्वारा शत्रु से भय होता है। अत्यन्त व्याकुल अर्थात् व्यथित होकर भ्रमण करने वाले कौवों से वातचक्र का भय अर्थात् अव्यवस्था उत्पन्न होती है। जैसा कि कहा गया है–

नगर और सेना के ऊपर व्याकुल होकर घूमते हुए कौवों से अग्नि का भय होता है। सव्यक्रम से चक्कर लगावें तो स्वपक्ष से तथा अपसव्यक्रम से भ्रमण करें, तब पर-(शत्रु) पक्ष से भय होता है॥१०॥

अन्यदप्याह–

ऊर्ध्वमुखाश्चलपक्षाः पथि भयदाः क्षुद्भयाय धान्यमुषः।
सेनाङ्गस्था युद्धं परिमोषं चान्यभृतपक्षाः॥११॥

और भी कहते हैं–

ऊपर मुख किए हुए चञ्चल पंखों वाले कौवें मार्ग में भय उत्पन्न करते हैं। अन्नों को चुराकर उड़ने वाले कौवें भुखमरी को सूचित करते हैं। सैन्य-सामग्री पर कौवों के बैठने से युद्ध का भय तथा कोयल के समान काले कौवों से चोरी का भय होता है।।११।।

ऊर्ध्वामुखा ऊर्ध्ववदनाः। चलपक्षाः चलिताङ्गरुहाः। पथि भयदाः, अध्वनि भयं ददति। धान्यमुषो धान्यं चोरयन्तः क्षुद्भयाय दुर्भिक्षाय भवन्ति। सेनाङ्गानि पर्याणखलीनप्रभृतीनि तेषु स्थिता युद्धं संग्रामं सूचयन्ति। अन्यभृतः कोकिलः। अन्यभृतस्येव पक्षा येषामतिकृष्णपक्षास्ते परिमोषं चौरभयं कुर्वन्ति। उक्तं च–

युद्धं सेनाङ्गसंस्थेषु मोषकृत् स्वविलेखने।
चरन्निशि विनाशाय दुर्भिक्षं चान्नमोषकृत्।।इति।।११।।

ऊर्ध्वमुख तथा चञ्चल पंखों वाले कौवे मार्ग में भय प्रदान करते हैं। धान्यमुष अर्थात् धान को चुराने वाले कौवे दुर्भिक्ष का कारण होते हैं। सेना के अङ्ग अर्थात् लगाम, रथादि पर स्थित कौवों से युद्ध होने की सम्भावना होती है। अन्यभृत अर्थात् कोयल के समान जिनके अत्यन्त काले पंख हों, ऐसे कौवों से चोर का भय होता है। जैसा कि कहा गया है–

सेना के उपकरणों पर कौवों के स्थित होने से युद्ध तथा अपनी चोंच से भूमिं पर रेखांकन करे तो चोर का भय तथा रात्रि में उसके विचरण करने से विनाश तथा अन्नों के चुराये जाने पर दुर्भिक्ष होता है।।११।।

अन्यदप्याह–

भस्मास्थिकेशपत्राणि विन्यसन् पतिवधाय शय्यायाम्।
मणिकुसुमाद्यवहनने सुतस्य जन्माप्यथाङ्गनायाश्च।।१२।।

और भी कहते हैं–

भस्म, अस्थि, केश और पत्तों को कौवा शय्या पर रखें, तो स्वामी का वध होता है। मणि, पुष्प इत्यादि को शय्या पर बिखेरने वाला कौवा पुत्र का जन्म सूचित करता है। तथा अन्य पदार्थों को शय्या पर रखे, तो कन्या सन्तति का जन्म होता है।।१२।।

शय्यायामास्तरणे। भस्म। अस्थि। केशा मूर्धजाः। पत्रं पर्णम्। एतानि विन्यसन् विक्षपन् पतिवधाय भवन्ति। शय्यायाः यः पतिः स्वामी तस्य। उक्तं च–

तृणभस्मास्थिकेशाश्च शयने स्वामिमृत्युदाः।

मणिकुसुमाद्यवहनन इति। मणिना रत्नेन। कुसुमेन पुष्पेण। आदिग्रहणात् फलेन। यदि शय्यायामवहननं ताडनं करोति, तदा सुतस्य पुत्रस्य जन्म भवति। अन्यथाऽनेन प्रकारेण मणिकुसुमानि विर्जयित्वा तृणकाष्ठादिनाऽवहननं करोति तदाङ्गनायाः स्त्रिया जन्म भवति।।१२।।

भस्म, अस्थि (हड्डी), केश, पत्र अर्थात् पत्ते; इनको फेंकने वाला कौआ पति के वध का सूचक होता है। यहाँ पर उस शय्या के स्वामी के लिए यह फल समझना चाहिए। जैसा कि गया है–

तृण, भस्म, अस्थि और केशों को शय्या पर कौवा फेंकता है, तब स्वामी के लिए मृत्युदायक होता है।

मणि अर्थात् रत्न, कुसुम अर्थात् पुष्प, "आदि" पद से फल का भी ग्रहण करना चाहिए। इनसे यदि शय्या पर अवहनन अर्थात् ताडन करता है, तब पुत्र का जन्म होता है। अन्यथा मणि, कुसुमादि को छोड़कर तृण और काष्ठादि के द्वारा अवहनन (ताडन) करता है, तब कन्या-सन्तति का जन्म होता है।।१२।।

अन्यदप्याह–

पूर्णाननेऽर्थलाभः सिकताधान्यार्द्रमृतकुसुमपूर्वैः।
भयदो जनसंवासाद्यदि भाण्डान्यपनयेत् काकः।।१३।।

और भी कहते हैं–

कौवा यदि बालू, धान्य (अन्न), गीली मिट्टी अथवा पुष्प को चोंच में भरकर ले जा रहा हो, तब धनलाभ होता है। यदि कौवा जन-निवास से किसी पात्र को लेकर उड़े, तब भयदायक होता है।।१३।।

सिकता वालुका। धान्यं प्रसिद्धम्। आर्द्रमृत् सरसा मृत्तिका। कुसुमं पुष्पम्। पूर्वग्रहणात् फलं शाद्वलं च। एतैः पूर्णानने परिपूरितवदने काकेऽर्थलाभो भवति। तथा काको जनसंवासाद् जननिकटाद्यदि भाण्डान्यपनयेदपनयति तदा भयदो भयं ददाति।।१३।।

सिकता अर्थात् बालू, धान्य अर्थात् प्रसिद्ध अन्न, सरसमिट्टी और पुष्प तथा फल अपनी चोंच में भरा हुआ हो, तो अर्थ-लाभ होता है। यदि कौवा व्यक्ति के निकट से पात्रों को ले जाये, तब भयप्रदान करता है।।१३।।

अन्यदप्याह–

वाहनशस्त्रोपानच्छत्रच्छायाङ्गकुट्टने मरणम्।
तत्पूजायां पूजा विष्ठाकरणेऽन्नसम्प्राप्तिः।।१४।।

और भी कहते हैं–

यदि कौवा वाहन, शस्त्र, जूता, छाता और शरीर पर चोंच से प्रहार करें, तब मरण होता है। इन वस्तुओं की विधि-पूर्वक पूजा की जानी चाहिए। कौवा इन वस्तुओं पर विष्ठा करे, तब अन्न की प्राप्ति होती है॥१४॥

वाहनं यानम्। शस्त्रं खड्गादि। उपानत् प्रसिद्धा। छत्रच्छाया आतपत्रच्छाया। अङ्गं शरीरम्। एषां कुट्टने ताडने मरणं भवति। तत्पूजायां तेषामेव वाहनादीनां पूजायां पुष्पादिपूजनेन पूजा भवति। एषामेव विष्ठाकरणे पुरीषकरणे अन्नसम्प्राप्तिर्भोजनलाभो भवति। उक्तं च–

उपानच्छस्त्रयानाङ्गच्छत्रच्छायावकुट्टने।
मृत्युं तत्स्वामिनो ब्रूयात् पूजा स्यात् तत्प्रपूजने।।इति।।१४।।

वाहन अर्थात् यान, तलवार आदि शस्त्र, उपानत् अर्थात् जूता, आतपत्र अर्थात् छाता, शरीर के अङ्ग, इनके कुट्टन अर्थात् इन पर प्रहार से मरण होता है। इन वाहनादिकों का पुष्पादि से पूजन करने पर इनकी पूजा हो जाती है। इनके ऊपर कौवा के विष्ठा करने से अन्न की प्राप्ति अर्थात् भोजन की प्राप्ति होती है। जैसा कि कहा गया है–

जूता, छाता, वाहन और शरीरावयव तथा शस्त्रों पर कौवे द्वारा प्रहार किये जाने से उसके स्वामी की मृत्यु होती है। इनका पूजन करने से ये सभी पूजित हो जाते हैं॥१४॥

अन्यदप्याह–

यद्द्रव्यमुपनयेत् तस्य लब्धिरपहरति चेत् प्रणाशः स्यात्।
पीतद्रव्यैः कनकं वस्त्रं कार्पासिकैः सितै रूप्यम्।।१५।।

और भी कहते हैं–

कौआ जिस वस्तु को लेकर आता है, उस वस्तु का लाभ तथा जिस वस्तु को उठाकर ले जाता है, उस वस्तु की हानि होती है। पीले रंग की वस्तु से तथा स्वर्ण, कपास रुई आदि से वस्त्र और श्वेतवस्तु से चाँदी का लाभ समझें॥१५॥

काको यद्द्रव्यमुपनयेत् समीपे आनयेत् तस्य द्रव्यस्य लब्धिर्भवति। चेद्यदि यद्द्रव्यमपहरति तदा तद्द्रव्यस्य प्रणाशो नाशो भवति। पीतद्रव्यैः कनकं सुवर्णं लभ्यते, अपहृते तदेव नश्यति। एवं सर्वत्र। कार्पासिकैर्वस्त्रमम्बरम्। सितैः

श्वेतवर्णे रूप्यम्। उक्तं च–

हरेदुपनयेद् वापि यद्द्रव्यं वायसोऽग्रतः।

तन्नाशलब्ध्यौ[1] विज्ञेयौ हेम पीते विनिर्दिशेत्।।इति।।१५।।

कौआ जिस पदार्थ को समीप में लाये उस पदार्थ की प्राप्ति होती है। वह जिस पदार्थ का अपहरण कर ले जाता है, उस पदार्थ का "प्रणाश" अर्थात् विनाश होता है। पीलेवर्ण के पदार्थ से सुवर्ण मिलता है। हरण करे तो वही पदार्थ (सुवर्ण) नष्ट हो जाता है। यही क्रम अन्य सभी पदार्थों के लिए भी समझना चाहिए। कपास सम्बन्धी पदार्थ से वस्त्र तथा श्वेत वर्ण के पदार्थ से रूप्य अर्थात् चाँदी जानना चाहिए। जैसा कि कहा गया है–

व्यक्ति के आगे से कौआ जिस वस्तु का हरण करे अथवा लाकर रखे, उस वस्तु का क्रमानुसार विनाश अथवा लाभ समझें। पीली वस्तु से स्वर्ण का ग्रहण करना चाहिए।।१५।।

व्यक्ति के आगे से कौआ जिस वस्तु का हरण करे अथवा लाकर रखे, उस वस्तु का क्रमानुसार विनाश अथवा लाभ समझें। पीली वस्तु से स्वर्ण का ग्रहण करना चाहिए।।१५।।

अन्यदप्याह–

सक्षीरार्जुनवञ्जुलकूलद्वयपुलिनगा रुवन्तश्च।

प्रावृषि वृष्टिं दुर्दिनमनृतौ स्नाताश्च पांशुजलैः।।१६।।

दूध वाले वृक्ष, बेंत-वृक्ष, अशोक-वृक्ष, नदी के दोनों तटों और द्वीप पर बैठकर शब्द करता हुआ कौआ वर्षाऋतु में वृष्टि का सूचक है। वर्षाऋतु से भिन्न काल में यह अनावृष्टि का कारक है। इसी प्रकार वर्षाऋतु में धूलि अथवा जल में स्नान करे तो वर्षा होती है। अन्यथा भिन्न ऋतु में दुर्दिन आने का लक्षण होता है।।१६।।

सह क्षीरेण वर्तते यो वृक्षः स सक्षीरः, अर्जुनः। वञ्जुलः, एतौ वृक्षविशेषौ। एतेषु तथा कूलद्वयपुलिनगा नद्याः कूलद्वये यौ पुलिनौ तयोर्गताः। रुवन्तश्च वाशमानाः। प्रावृषि वर्षासु वृष्टिं कुर्वन्ति। अनृतावन्यस्मिन् ऋतौ वर्षावर्जिते दुर्दिनं दुष्टं दिनं कुर्वन्ति। तथा पांसुभिर्जलैश्चाद्भिः स्नाताः प्रावृषि वृष्टिं कुर्वन्ति। अन्यस्मिन् ऋतौ दुर्दिनमेवेति।।१६।।

दूध (क्षीर) सहित वृक्ष को सक्षीर कहते कहते हैं। अर्जुन और बेंत (वञ्जुल) वृक्ष

---

१. तन्नाशलब्धी विज्ञेये इति गः पु. पाठः।

प्रसिद्ध हैं। इन वृक्षों पर तथा नदी के दोनों तट पर पुलिन अर्थात् बालू का स्थल हो, उन पर शब्द करता हुआ वर्षाऋतु में वर्षा का कारण होता है। वर्षा से भिन्न ऋतु में दुर्दिन अर्थात् कष्टकारी समय लाता है। पांशु अर्थात् धूलि और जल से स्नान करता हुआ वर्षाऋतु में वर्षा कराता है और अन्य ऋतुओं में दुर्दिन ही लाता है॥१६॥

विशेष व्याख्या–

(१) वञ्जुल का अर्थ नदी अथवा तालाब के समीप होने वाला बेंत है जिसकी छड़ी तथा कुर्सी आदि बनती है। इसका अंग्रेजी नाम Willow विलो है। भाव-प्रकाशनिघण्टु में कहा गया है–

"वेतसो नम्रक: प्रोक्तो वानीरो वञ्जुलस्तथा।
अभ्रपुष्पश्च विदुलो रथ: शीतश्च कीर्तित:॥"

(२) पुलिन शब्द का अर्थ जल से उभर कर जो भू-भाग नदी में दृश्य होता है, जिसको द्वीप अथवा टापू कहा जाता है, यही है। अमरकोश ११०.९ में कहा गया है–"तोयोत्थितं तत्पुलिनम्"। त्रिकाण्डशेष में "पुलिनं द्वीपमुच्यते।" अर्थात् पुलिन का अर्थ द्वीप है।

(३) पांशु शब्द का अर्थ धूल होता है। अमरकोश २.८.९८ में कहा गया है– "रेणुर्द्वयो: स्त्रियां धूलि: पांशुर्ना न द्वयो रज:।" इस प्रकार रेणु, धूलि, पांशु और रज शब्द पर्यायवाची हैं। पांशु और पांसु दोनों समानार्थक होते हैं।

अन्यदप्याह–

दारुणनादस्तरुकोटरोपगो वायसो महाभयदः।
सलिलमवलोक्य विरुवन् वृष्टिकरोऽब्दानुरावी च॥१७॥

और भी कहते हैं–

वृक्ष के भीतर खोखले भाग (कोटर) में बैठकर यदि कौआ कठोर शब्द करे तो अत्यधिक भय देता है। जल को देखकर शब्द करे तो वर्षा होती है और मेघ के आने पर बोलने लगे तब भी वर्षा का आगमन होता है॥१७॥

वायसः काकस्तरुकोटरे वृक्षगर्भे स्थितः। कीदृशः? दारुणनादो दारुणः क्रूरो नादः शब्दो यस्य स महाभयदो महद्भयं ददाति। सलिलं जल-मवलोक्य दृष्ट्वा विरुवन् क्रोशन् वृष्टिकरः। अब्दस्य मेघस्यानुरावी पश्चाद्रौति तदा वृष्टिकर एव॥१७॥

वायस अर्थात् कौआ वृक्ष के गर्भ (कोटर) में स्थित होकर शब्द करे। कैसा

शब्द? दारुण अर्थात् क्रूर (कर्कश) शब्द करे, तब वह महान भय देता है। जल को देखकर बोलता हुआ वह वर्षा का कारक होता है। अब्द अर्थात् बादल का अनुरावी अर्थात् मेघ-गर्जना के तत्काल बाद शब्द करने वाला कौवा भी वर्षाकारक होता है।।१७।।

अन्यदप्याह—

दीप्तोद्विग्नो विटपे विकुट्टयन् वह्निकृद्विधुतपक्षः।
रक्तद्रव्यं दग्धं तृणकाष्ठं वा गृहे विदधत्।।१८।।

और भी कहते हैं—

वृक्ष पर दीप्त तथा उद्विग्न और पंख फड़फड़ता हुआ अपने शरीर को नोचता हो, तब अग्निदाह होता है। अथवा लालवस्तु और जले हुए तृण और लकड़ी को घर में रखता है, तब भी अग्निदाह ही होता है।।१८।।

विटपे लतावितानेदीप्तोद्विग्नो दीप्तः सूर्याभिमुख उद्विग्नो दुःखितो विकुट्टयन् चञ्च्या भिन्दम्। विधुतपक्षः चलत्पक्षः। वह्निकृदग्निभयं करोति। गृहे वेश्मनि रक्तद्रव्यं रक्तवर्णद्रव्यं दग्धं तृणं काष्टं वा विदधत् कुर्वद्वह्नि-कृदेव।।१८।।

उक्त च—

रक्तद्रव्यं प्रदग्धं च धान्यं गेहेऽग्निदः स्मृतः।इति।।१८।।

विटप अर्थात् लतावितान पर दीप्त अर्थात् सूर्य के सम्मुख और उद्विग्न अर्थात् दुःखित होकर विकुट्ट अर्थात् चोंच मारता हुआ, विधुतपक्ष अर्थात् पंख फड़फड़ाता है, तब वह अग्निदाह का कारक होता है। घर में लालवर्ण का पदार्थ तथा जलता हुआ तिनका अथवा लकड़ी लाकर रखता है, तो अग्निदाह ही करता है। जैसा कि कहा गया है—

लाल रंग की वस्तु और जलते हुए अन्नकण को लेकर घर में आने पर अग्निदाह का फल कहा गया है।।१८।।

अथ दिक्फलमाह—

ऐन्द्र्यादिदिगवलोकी सूर्याभिमुखो रुवन् गृहे गृहिणः।
राजभयचोरबन्धनकलहाः स्युः पशुभयं चेति।।१९।।

अब दिशाओं के फल कहते हैं—

सूर्याभिमुख होकर पूर्वादिदिशाओं में शब्द करने पर गृहपति को क्रमशः

राजकीय-भय, चोर-भय, बन्धन तथा विवाद और पशुभय होता है॥१९॥

ऐन्द्र्यादिदिगवलोकीति। ऐन्द्र्यादीनां पूर्वादीनां दिशामवलोकयति तच्छीलः। सूर्याभिमुखोऽर्कसम्मुखो गृहे वेश्मनि स्थितो रुवन् शब्दं कुर्वन् गृहिणो गृहस्वामिनो राजभयादीन् दोषान् करोति। ऐन्द्रीं दिशं दीप्तमवलोकयन् निरीक्षयन् गृहे स्थितो विरौति तदा गृहिणो राजभयं करोति। एवमाग्नेय्यां दक्षिणस्यां चौरभयम्। एवं नैर्ऋत्यां पश्चिमायां बन्धनभयं भवति। एवमेव वायव्यामुत्तरस्यां कलहः, पशूनां चतुष्पदानां भयं च। एवमेवैशान्यामिति च। अथवा विदिक्षु सर्वासु पशुभयमिति।।१९।।

ऐन्द्री आदि अर्थात् पूर्वादिदिशाओं को देखता हुआ, सूर्य के सम्मुख होकर घर पर बैठा हुआ कौआ यदि शब्द कर रहा हो, तब गृह-स्वामी को राजभय आदि दोषों का आनयन करता है। दीप्त पूर्वदिशा को देखता हुआ भवन पर स्थित हो, तब गृहपति को राजभय करता है। इसी प्रकार अग्निकोण एवं दक्षिणदिशा में चोरी का भय, नैर्ऋत्यकोण और पश्चिमदिशा में बन्धन (कारागार) का भय और वायुकोण और उत्तरदिशा में कलह का तथा पशुभय होता है। इसी प्रकार ईशानकोण का भी फल (राजभय) समझना चाहिए। अथवा सभी कोणों में पशु भय ही समझें॥१९॥

एवं दीप्तासु दिग्विदिक्षु फलमभिधायाधुना शान्तामाह—

शान्तामैन्द्रीमवलोकयन् रुयाद्राजपुरुषमित्राप्तिः।
भवति च सुवर्णलब्धिः शाल्यन्नगुडाशनाप्तिश्च।।२०।।

दीप्तदिशा-फल के अनन्तर शान्तादिशा का फल—

यदि कौआ शान्ता पूर्वदिशा की ओर देखता हुआ शब्द करे, तब राजपुरुष और मित्र से मिलन होता है। साथ ही स्वर्ण-प्राप्ति, धान्य और मधुर (गुड़) पदार्थ का भोजन मिलता है॥२०॥

शान्तामैन्द्रीं पूर्वां दिशमवलोकयन्नीक्षन् रुयाच्छब्दं करोति तदा राजपुरुषस्य प्राप्तिर्मित्रप्राप्तिश्च भवति। अथवा राजपुरुष एवं मित्रं तस्य प्राप्तिरागमः। तथा सुवर्णस्य काञ्चनस्य लब्धिर्लाभः। शाल्यन्नस्य शालिभक्तस्य गुडाशनस्य गुड-संयुक्तस्य च भोजनस्याप्तिः प्राप्तिर्भवति।।२०।।

शान्ता ऐन्द्री अर्थात् पूर्वदिशा को अवलोकित कर शब्द करे, तब राजपुरुष से मिलन और मित्र से भी मिलन होता है। साथ ही सुवर्ण की प्राप्ति, शाल्यन्न अर्थात् चावल का भात और गुड़ का भोजन मिलता है॥२०॥

अन्यदप्याह—

आग्नेय्यामनलाजीविकयुवतिप्रवरधातुलाभश्च।
याम्ये माषकुलूत्थाभोज्यं गान्धर्विकैर्योगः।।२१।।

और भी कहते हैं–

शान्त अग्निकोण में शब्द होने पर अग्निजीवी, युवती, श्रेष्ठजन और धातु का लाभ होता है। दक्षिणदिशा में उड़द, कुलथी आदि निन्द्य भोज्यपदार्थ की प्राप्ति तथा नृत्य-गीत की मण्डली से मिलन होता है॥२१॥

आग्नेय्यां शान्तां दिशमवलोकयन् यदा रौति तदाऽनलजीविकोऽग्न्युपजीविकः सुवर्णकारादिकः। युवती स्त्री। प्रवरः प्रकृष्टः। धातुः सुवर्णादिकः। एतेषां लाभश्च भवति। याम्ये दक्षिणस्यां दिशि शान्तामवलोकयन् माषकुलूत्थाभोज्यं भवति। गान्धर्विकैर्गेयप्रवीणैश्च सह योगः संयोगो भवति।।२१।।

अग्निकोण की शान्त-दिशा को देखता हुआ यदि काक शब्द करता है, तब स्वर्णकार आदि अग्निजीवी, युवतीस्त्री, प्रमुखव्यक्ति, स्वर्णादि धातु का लाभ होता है। शान्त दक्षिणदिशा को देखता हुआ शब्द करे, तब उड़द, कुलथी आदि अभोज्य पदार्थ मिलता है और गान्धर्विक अर्थात् संगीत विशेषज्ञों के साथ मिलन होता है॥२१॥

अन्यदप्याह—

नैर्ऋत्यां दूताश्वोपकरणदधितैलपललभोज्याप्तिः।
वारुण्यां मांससुरासवधान्यसमुद्ररत्नाप्तिः।।२२।।

और भी कहते हैं–

नैर्ऋत्यकोण में कौआ शब्द करे तब दूत, अश्व के उपकरण, दही, तेल, तिल और भोज्य पदार्थ की प्राप्ति होती है। पश्चिमदिशा में शब्द होने पर माँस, मद्य, आसव, धान्य और समुद्र के रत्नों का लाभ होता है॥२२॥

नैर्ऋत्यां दिशि स्थितः काकः। शान्ता च या दिशा तामवलोकयन् रुयात् तदा दूतस्य। अश्वस्य तुरगस्य। उपकरणानामुपकरणभाण्डानाम्। उपयुज्यते तत् तदुपकरणम्। अश्वोपयोगिभाण्डानाम्। दधि दुग्धविकारः। तैलं तिलतैलम्। पललमर्धपीडितास्तिलाः। भोज्यमशनम्। एषां प्राप्तिर्लाभो भवति। वारुण्यां पश्चिमायां शान्तमवलोकयन् रुयात्। मांसमामिषम्। सुरा वारुणी, आसवं पानम्। अथवा सुरैरासवम्। धान्यं शालयः। समुद्ररत्नानां समुद्रजातानां रत्नानां प्राप्तिर्भवति।।२२।।

नैर्ऋत्य दिशा में स्थित काक जो शान्तदिशा हो, उसको देखता हुआ शब्द करे, तब उपकरण का अर्थात् तत्संबंधी साधन (पात्रों) का अर्थात् अश्वोपयोगी पात्रों का, दही अर्थात् दूध का विकार, तेल अर्थात् तिल का तेल, पलल अर्थात् आधा कूटा हुआ तिल, भोज्य अर्थात् भोजन, इन सभी का लाभ होता है। उपयोग में आने वाली वस्तु को उपकरण कहा जाता है। वरुण अर्थात् पश्चिमदिशा में जो कि शान्त हो, उसको देखता हुआ शब्द करे, तब मांस अर्थात् आमिष, सुरा अर्थात् वारुणी (मद्य), आसव अर्थात् पेय पदार्थ अथवा देवों द्वारा पान किया जाने वाला पेय, धान्य अर्थात् धान के चावल और समुद्र में उत्पन्न होने वाले रत्नों का लाभ होता है॥२२॥

अन्यदप्याह—

मारुत्यां शस्त्रायुधसरोजवल्लीफलाशनाप्तिश्च।
सौम्यायां परमान्नाशनं तुरङ्गाम्बरप्राप्तिः।।२३।।

और भी कहते हैं—

वायव्यकोण में शस्त्र, अस्त्र, कमल, वल्ली (लता) में लगने वाले फल और भोजन की प्राप्ति होती है। उत्तरदिशा में परमान्न अर्थात् खीर का भोजन, घोड़ा और वस्त्र की प्राप्ति होती है॥२३॥

मारुत्यां वायव्यां शान्तामवलोकयन् ब्रूयात्। शस्त्रं लोहम्। आयुधं खड्गादि। सरोजं पद्मम्। वल्लीफलानि कूष्माण्डादीनि। अशनं भोजनम्। एतेषामाप्तिः प्राप्तिर्भवति। सौम्यायामुत्तरस्यां परमान्नाशनं परमान्नं पायसं तदेवाशनम्। तुरङ्गोऽश्वः। अम्बरं वस्त्रम्। एतेषां च प्राप्तिर्भवति।।२३।।

शान्त वायव्यकोण को देखता हुआ कौआ बोलता है, तब अस्त्र अर्थात् लौहास्त्र, आयुध अर्थात् खड्ग आदि, सरोज (कमल-पुष्प), वल्ली-फल अर्थात् कुम्हड़ा, कद्दू आदि, भोजन, इन सभी की प्राप्ति होती है। सौम्य अर्थात् उत्तरदिशा में परमान्न अर्थात् खीर का अशन (भोजन), तुरङ्ग अर्थात् घोड़ा और अम्बर अर्थात् वस्त्र की प्राप्ति होती है॥२३॥

अन्यदप्याह—

ऐशान्यां सम्प्राप्तिर्घृतपूर्णानां भवेदनडुहश्च।
एवं फलं गृहपतेर्गृहपृष्ठसमाश्रिते भवति।।२४।।

और भी कहते हैं—

ईशानकोण में कौआ के शब्द होने से घृतपूर्ण पदार्थ और बैल की प्राप्ति होती है। घर की छत पर बैठा शब्द करे तब भी गृहस्वामी को यही फल होता है॥२४॥

ऐशान्यां दिशि शान्तायां ब्रूयात् घृतपूर्णानां भक्ष्यविशेषणामनडुहो वृषभस्य च सम्प्राप्तिर्लाभो भवेत् स्यात्। एवमनेन प्रकारेण गृहस्य वेश्मनः पृष्ठे समाश्रिते काके गृहपतेर्गृहस्वामिनः फलं भवति॥२४॥

ईशानदिशा शान्त हो और कौआ इसी दिशा में बोले तब घृतपक्व विशिष्ट भोजन तथा अनडुह अर्थात् बैल लाभ होता है। इसी प्रकार से घर के पृष्ठ (छत) पर कौए के स्थित होने पर भी गृहस्वामी को फल मिलता है॥२४॥

गमने कर्णसमश्चेत् क्षेमाय न कार्यसिद्धये भवति।
अभिमुखमुपैति यातुर्विरुवन् विनिवर्तयेद्यात्राम्॥२५॥

यात्रा-काल में कान के समीप कौआ बोले तो शुभकारक है, परन्तु कार्य की सिद्धि नहीं होती है। यदि वह बोलता हुआ ठीक सामने आ जाये, तो यात्रा को स्थगित कर देना चाहिए॥२५॥

चेच्छब्दो यद्यर्थे। गमने यात्रायां यदि कर्णसमो भवति काकः, कर्णप्रदेशे यातुर्गच्छति, तदा क्षेमाय भवति। न कार्यसिद्धये क्षेमं करोति न कार्यसिद्धिं करोति। यदर्थं यात्रा तत्कार्यसिद्धिं न करोति। यातुरभिमुखं संमुखं विरुवन् शब्दं कुर्वन्नुपेत्यागच्छति तदा यात्रा निवर्तयेद्यात्राविघ्नं करोति। उक्तं च—

यातुः कर्णसमो ध्वांक्षः क्षेमे नार्थप्रसाधकः। इति॥२५॥

यहाँ पर "चेत्" शब्द "यदि" शब्द का वाचक है। यात्रा में यदि कौआ कान के समीप आ जाता है अर्थात् यात्री के कान के पास आ जाये, तब वह कल्याणकारी होता है। इससे कल्याण (सुख) तो होता है, परन्तु कार्य-सिद्धि नहीं होती है। अर्थात् जिस उद्देश्य से यात्रा है, उसकी पूर्ति नहीं होती है। यात्री के सम्मुख यदि शब्द करता हुआ आता है, तब यात्रा का निवर्तन अर्थात् यात्रा में विघ्न उपस्थित होता है। कहा भी गया है—

कौआ यदि यात्री के कान के समीप आवे तो वह कल्याण करता है लेकिन अभीष्टकार्य को सिद्ध नहीं करता है॥२५॥

अन्यदप्याह—

वामे वाशित्वादौ दक्षिणपार्श्वेऽनुवाशते यातुः।
अर्थापहारकारी तद्विपरीतोऽर्थसिद्धिकरः॥२६॥

और भी कहते हैं—

कौआ यदि सर्वप्रथम बाँएभाग में शब्द करने के पश्चात् दक्षिणभाग में शब्द करे तो यात्री के धन का अपहरण होता है। विपरीत क्रम से शब्द करने पर कार्य और अर्थ की सफलता होती है॥२६॥

यातुः प्रथममादौ वामभागे वाशित्वा रुतं कृत्वा ततो यदि दक्षिणपार्श्वे वाशते तदाऽर्थस्य धनस्यापहारकारी भवति। तद्विपरीतः पूर्वोक्ताद्विपर्यस्तो दक्षिणपार्श्वे वाशित्वा वामे वाशते तदाऽर्थसिद्धिं करोति।।२६।।

यात्री के पहले वाम-भाग में वाशित अर्थात् शब्द कर फिर दक्षिण-भाग में शब्द करता है तब अर्थ, अर्थात् धन का अपहरण होता है। उक्त क्रम से विपरीत अर्थात् पहले दक्षिणभाग में बोलने के पश्चात् वाम-भाग में आकर बोले तो धन-लाभ कराता है॥२६॥

अन्यदप्याह—

यदि वाम एव विरुवन् मुहुर्मुहुर्यायिनोऽनुलोमगतिः।
अर्थस्य भवति सिद्ध्यै प्राच्यानां दक्षिणश्चैवम्।।२७।।

और भी कहते हैं-

यदि वाम-भाग में ही यात्रा की दिशा में उड़ता हुआ बार-बार बोले तो अर्थसिद्धि करता है। पूर्व और दक्षिण दिशा में भी इसी प्रकार से अर्थ की सिद्धि होती है॥२७॥

यदि वाम एव वामभागे यायिनोऽनुलोमगतिर्यातुः पश्चाद्गमनशीलः स मुहुर्मुहुः पुनःपुनर्विरुयाद् वाशते तदाऽर्थस्य सिद्ध्यै सिद्ध्ये भवति। एवमनेन प्रकारेण प्राच्यानां दक्षिणः काकोऽपीष्यते। तेनैतदुक्तं भवति—दक्षिणे मुहुर्मुहुर्वाशते यायिनोऽनुलोमगतिस्तदेष्यत इति।।२७।।

यदि वाम-भाग में यात्री के अनुलोम अर्थात् पीछे-पीछे आवे और बार-बार शब्द करे तब अर्थ के लिए सिद्धि कारक होता है। इसी प्रकार से पूर्व और दक्षिण के लिए भी कौआ शुभ होता है। इसका अभिप्राय यह है कि यात्री के दक्षिणभाग में उसके यात्रा की दिशा में उड़ता आता है, तब भी वह शुभ होता है॥२७॥

अन्यदप्याह—

वामः प्रतिलोमगतिर्विरुवन् गमनस्य विघ्नकृद्भवति।
तत्रस्थस्यैव फलं कथयति तद्वाञ्छितं गमने।।२८।।

और भी कहते हैं-

यात्री के वामभाग में प्रतिलोमगति अर्थात् सम्मुखदिशा से अपने सम्मुख आकर

शब्द करता है तब यात्रा में विघ्न-कारक होता है। यात्रा में वांछित फल को वहीं पर प्राप्त होना कहता है।।२८।।

वामे यातुर्वामभागस्थः प्रतिलोमगतिर्यायिनोऽभिमुखमागच्छति स च विरुवन् क्रोशन्। गमनस्य यात्राया विघ्नकृद् भवति। गमने यात्रायां यद्वाञ्छितमभिलषितं फलं तत्रस्थस्यैव यातुर्निश्चलस्य कथयति वक्ति।।२८।।

यात्री के वामभाग में स्थित प्रतिलोम-गति अर्थात् उसके सम्मुख शब्द करता हुआ आता है, तब यात्रा में विघ्न करता है। यात्रा में जो अभीष्ट फल होता है, उसको उसी स्थान पर (आगे गये बिना) प्राप्त होना प्रकट करता है।।२८।।

अन्यदप्याह—

दक्षिणविरुतं कृत्वा वामे विरुयाद्यथेप्सितावाप्तिः।

प्रतिवाश्य पुरो यायाद् द्रुतमत्यर्थागमो भवति।।२९।।

और भी कहते हैं—

दक्षिणभाग में बोलने के बाद पुनः वामभाग में बोलता है, तब अभीष्ट फल की प्राप्ति होती है। यदि बोलता हुआ आगे की ओर तेजी से उड़ता है, तब अत्यधिक धन-लाभ शीघ्र ही होता है।।२९।।

दक्षिणे यातुर्दक्षिणभागे विरुतं कृत्वा वामे वामभागे विरुयाद्यदि वाशते, तदा यथेप्सितस्य यथाभिलषितस्यार्थस्यावाप्तिर्लाभो भवति। उक्तं च—

वामपार्श्वस्थिताद्याति दक्षिणाद्वापि वामगः। इति।

प्रतिवाश्य शब्दं कृत्वा पुरोऽग्रतो द्रुतं त्वरितं यायाद् याति तदाग्रत एव यातुरत्यर्थस्य महाधनस्यागमो लाभो भवति।।२९।।

यात्री के दक्षिण-भाग में शब्द कर पुनः वामभाग में शब्द करे तब यथेष्ट अभिलषित धन का लाभ होता है। कहा गया है—

"वामभाग से दक्षिण अथवा दक्षिणभाग से वाम-भाग में आता है तो अभीष्ट लाभ होता है।"

प्रतिवाश अर्थात् शब्द कर आगे की ओर तीव्रता से जाता है तब आगे चलकर यात्री को प्रचुर-धन की प्राप्ति होती है।।२९।।

अन्यदप्याह—

प्रतिवाश्य पृष्ठतो दक्षिणेन यायाद् द्रुतं क्षतजकारी।

एकचरणोऽर्कमीक्षन् विरुवंश्च पुरो रुधिरहेतुः।।३०।।

और भी कहते हैं–

यात्री के पीछे से शब्द करता हुआ दक्षिणभाग से होकर तीव्रता से उड़कर चला जाय तो रक्तपात होता है। एक पैर से सूर्य को देखता हुआ शब्द करे तब रक्तपात करता है॥३०॥

पृष्ठतः पश्चात् प्रतिवाश्य दक्षिणेन पार्श्वेन द्रुतं त्वरितं यायाद् गच्छेत् तदा क्षतजकारी क्षतजं रक्त करोति। एकचरण एकपादः, एकेनैव पादेन स्थितोऽर्कमादित्यमीक्षन् पश्यन् विरुवन् शब्दं कुर्वन् पुरोऽग्रतो रुधिरस्य रक्तस्रावस्य हेतुः कारणम्॥३०॥

पीछे से शब्द कर दक्षिण भाग से शीघ्रता से जाये, तब क्षतज अर्थात् रक्तपात करता है। एक ही पैर पर खड़ा होकर सूर्य को देखता हुआ तथा शब्द करता हुआ आगे की यात्रा में रक्त-स्राव का कारण होता है॥३०॥

अन्यदप्याह–

दृष्ट्वार्कमेकपादस्तुण्डेन लिखेद्यदा स्वपिच्छानि।
पुरतो जनस्य महतो वधमभिधत्ते तदा बलिभुक्॥३१॥

और भी कहते हैं–

एक ही पैर पर खड़ा होकर सूर्य को देखता हुआ अपनी चोंच से पंखों को कुरेदे, तब आगे यात्रामार्ग पर किसी महान् की हत्या को वह कौआ सूचित करता है॥३१॥

अर्कमादित्यं दृष्ट्वा अवलोक्य एकपाद एकेनैव पादेन स्थितस्तुण्डेन चञ्च्वा स्वपिच्छान्यात्मीयान्यङ्गरुहाणि यदा बलिभुक् काको लिखेत्, तदा पुरतो महतः प्रधानस्य जनस्य वधं मृत्युमभिधत्ते ददाति॥३१॥

आदित्य अर्थात् सूर्य को देखकर एक ही चरण से स्थित, तुण्ड अर्थात् चोंच से अपने ही पंखों को यदि कौआ कुरेदता हो, तब आगे किसी महान् व्यक्ति की मृत्यु को देता है॥३१॥

अन्यदप्याह–

सस्योपेते क्षेत्रे विरुवति शान्ते ससस्यभूलब्धिः।
आकुलचेष्टो विरुवन् सीमान्ते क्लेशकृद्यातुः॥३२॥

और भी कहते हैं–

हरे-भरे शान्त भू-क्षेत्र पर शब्द करता है, तब फसल सहित भूमि का लाभ

होता है। व्याकुल होकर चेष्टा कर शब्द करे तब सीमान्त में क्लेशकारक होता है।।३२।।

सस्योपेते सस्यसंयुक्ते क्षेत्रे शान्ते काके विरुवति ससस्याया सस्यसंयुक्ताया भुवो भुमेर्लब्धिर्लाभो भवति। सीमान्ते ग्रामसीमान्ते स्थितस्तत्र चाकुलचेष्टः सोद्यमो विरुवन् यातुः क्लेशकृद्भवति।।३२।।

सस्य से संयुक्त खेत में शान्त होकर शब्द करे, तब सस्य-युक्त भूमि का लाभ होता है। सीमान्त अर्थात् गाँव की सीमा के बाहर स्थित होकर व्याकुल चित्त हो शब्द करे, तब यात्री के लिए क्लेशकारक होता है।।३२।।

अन्यदप्याह–

सुस्निग्धपत्रपल्लवकुसुमफलानम्रसुरभिमधुरेषु।
सक्षीराव्रणसंस्थितमनोज्ञवृक्षेषु चार्थसिद्धिकरः।।३३।।

और भी कहते हैं–

चिकने पत्ते, पल्लव, पुष्प, फल, विनत, सुगन्धित, मधुर, दूध वाले, छिद्र रहित और सुन्दर वृक्षों पर स्थित कौआ सिद्धि प्रदान करता है।।३३।।

सुस्निग्धेष्वभक्तेष्वक्षोटादिषु। सुस्निग्धपत्रेषु सुस्निग्धपल्लवेषु च। पत्राणि सामान्यवाचकानि। पल्लवान्यभिनवपत्राणि। कुसुमैः पुष्पैः फलैश्चानम्रेषु विनतेषु। सुरभिषु सुगन्धिषु मधुरेषु सक्षीरेष्वर्कादिषु। अव्रणेषु अच्छिद्रेषु। मनोज्ञेषु चित्ताह्लादकेषु वृक्षेषु स्थितोऽर्थसिद्धिकरोऽर्थानां सिद्धिं साधन करोति।।३३।।

सुस्निग्ध अर्थात् जिसके पत्रादि कटे-फटे न हों, ऐसे चिकने पत्ते और पल्लव हों। पत्रसामान्य अर्थात् सभी पत्ते तथा नूतन पत्तों को पल्लव कहते हैं। कुसुम (पुष्प) और फलों से झुके हों, सुरभि अर्थात् सुगन्धित, मधुर और दूध वाले मदार आदि, व्रण अर्थात् छेद-रहित, मनोज्ञ अर्थात् चित्ताकर्षक, इन वृक्षों पर स्थित काक अर्थ की सिद्धि अर्थात् धनागम का साधन लाता है।।३३।।

अन्यदप्याह–

निष्पन्नसस्यशाद्वलभवनप्रासादहर्म्यहरितेषु।
धन्योच्छ्रमयङ्गल्येषु चैव विरुवन् धनागमदः।।३४।।

और भी कहते हैं–

पकी हुई फसल, दूर्वा, भवन, महल, घर की, छत, हराप्रदेश, शुभस्थान, उन्नतस्थान और मांगलिक (ध्वजादि) स्थानों पर बैठकर शब्द करने वाला काक

धनागम प्रदायक होता है॥३४॥

निष्पन्नसस्येति। निष्पन्नानि सञ्जातानि सुपर्वाणि वा सस्यानि यत्र। शाद्वलैर्दूर्वाभिर्युक्ते भवने गृहे। प्रासादे देवप्रासादे गृहे वा। हर्म्ये गृहपृष्ठे हरिते हरितवर्णे स्थाने, अथवा हरितं विद्यते यत्र एतेषु स्थानेषु तथा धन्ये शुभे शुभ-स्थाने। उच्छ्रये उच्छ्रिते। मङ्गलये प्रशस्ते देशे। एतेषु स्थानेषु काको विरुवन् धनागमदो धनस्य वित्तस्यागमं प्राप्तिं ददाति।।३४।।

निष्पन्न अर्थात् सुसम्पन्न अथवा सुन्दर पर्वों (गाँठों) वाले सस्य (फसल), शाद्वल अर्थात् दूर्वा से युक्त गृह, प्रासाद अर्थात् देवमन्दिर अथवा भवन, हर्म्य अर्थात् गृह-पृष्ठ (छत), हरे रंग का स्थान, अथवा जिस स्थान पर हरा रंग हो, धन्य अर्थात् शुभस्थान पर उच्छ्रय अर्थात् उन्नत (ऊँचा) स्थान, मांगल्य अर्थात् श्रेष्ठ (पवित्र) स्थान, इन स्थानों पर कौआ शब्द करता हुआ धनागम अर्थात् धनलाभ कराता है॥३४॥

गोपुच्छस्थे वल्मीकगेऽथवा दर्शनं भुजङ्गस्य।
सद्यो ज्वरो महिषगे विरुवति गुल्मे फलं स्वल्पम्।।३५।।

गाय की पूँछ पर अथवा बाँबी पर बैठता है, तब सर्प का दर्शन होता है। भैंस के ऊपर बैठने पर शीघ्र ही ज्वर होता है। गुल्म (छोटे-पौधे) पर बैठकर शब्द करे तब अल्प फल मिलता है॥३५॥

गोपुच्छस्थे गोलाङ्गूलस्थिते काकेऽथवा वाल्मीकगे वल्मीककृतमृत्स्तूपगे। भुजङ्गस्य सर्पस्य दर्शनं भवति। महिषगे काके विरुवति सद्यस्तस्मिन्नेवाहनि ज्वर उत्पद्यते। गुल्म एकमूलः शाखासमूहः, तस्मिन् स्थिते काके विरुवति स्वल्पमत्यल्पं शुभाशुभं फलं ज्ञेयमिति।।३५।।

जब कौआ गाय की पूँछ पर अथवा वल्मीक अर्थात् दीमकों द्वारा निर्मित मिट्टी के ढूह पर बैठकर शब्द करे तब भुजंग अर्थात् सर्प का दर्शन होता है। भैंस पर बैठकर कौए के शब्द करने पर सद्यः अर्थात् उसी दिन ज्वर उत्पन्न होता है। गुल्म अर्थात् जिसके एक ही मूल में अनेक शाखायें होती हैं, उस पर स्थित होकर कौआ शब्द करें, तब बहुत थोड़ा शुभाशुभ फल होता है॥३५॥

अन्यदप्याह—

कार्यस्य व्याघातस्तृणकूटे वामगेऽम्बुसंस्थे वा।
ऊर्ध्वाऽग्निप्लुष्टेऽशनिहते च काके वधो भवति।।३६।।

और भी कहते हैं—

वाम-भाग में तृण-समूह अथवा जल में स्थित हो, तब कार्य की हानि होती है। अग्नि-दग्ध अथवा विद्युत्पात वाले वृक्ष के ऊपर बैठकर कौआ शब्द करे, तब वध (मरण) होता है॥३६॥

वामे वामभागस्थिते काके तत्र च तृणकूटे तृणराशौ स्थिते विरुवति क्रोशति कार्यस्य व्याघातो विनाशो भवति। वामभागे गतेऽम्बुसंस्थे जलस्थे च रुवति कार्यस्य व्याघात एव। ऊर्ध्वाग्निप्लुष्टे ऊर्ध्वभागेऽग्निना दग्धे वृक्षे च स्थिते विरुवति काके वधो भवति॥३६॥

वाम-भाग में कौआ स्थित होता हुआ तृणराशि (तृणकूट) पर बैठकर बोले, तब कार्य का विघात अर्थात् विनाश होता है। वाम-भाग गत कौआ जल पर स्थित होकर बोले तब भी कार्य का नाश होता है। ऊर्ध्व भाग अग्नि-दग्ध हो, इस प्रकार के वृक्ष पर बैठकर बोले, तब वध होता है॥३६॥

अन्यदप्याह–

कण्टकिमिश्रे सौम्ये सिद्धिः कार्यस्य भवति कलहश्च।

कण्टकिनि भवति कलहो वल्लीपरिवेष्टिते बन्धः॥३७॥

और भी कहते हैं–

काँटेदार तथा सौम्य (शुभ) से मिश्रित वृक्ष पर बैठकर शब्द करे तब कार्य की सिद्धि और कलह दोनों होते हैं। केवल काँटेदार वृक्ष से कलह और वल्ली से परिवेष्टित वृक्ष के द्वारा बन्धन होता है॥३७॥

सौम्ये सौम्यवृक्षे सक्षीरे सफले कण्टकिमिश्रे सकण्टके वृक्षे स्थिते काके कार्यस्य सिद्धिर्भवति तत्र च कलहो भवति। तथा काके कण्टकिनि स्थिते कलहो भवति नार्थसिद्धिः। वल्लीभिः परिवेष्टिते वृक्षे बन्धो बन्धनं भवति॥३७॥

सौम्य-वृक्ष अर्थात् दूध और फल वाले वृक्ष अथवा कण्टक-वृक्षों पर बैठा हो, उन पर स्थित काक के द्वारा कार्य की सिद्धि होती है और वहाँ कलह भी होता है। कौआ कण्टकी वृक्ष पर हो, तब विवाद ही होता है, अर्थ की सिद्धि नहीं होती है। लताओं से परिवेष्टित वृक्ष पर बैठा हो, तब बन्धन (कारागार) होता है॥३७॥

अन्यदप्याह–

छिन्नाग्रेऽङ्गच्छेदः कलहः शुष्कद्रुमस्थिते ध्वांक्षे।

पुरतश्च पृष्ठतो वा गोमयसंस्थे धनप्राप्तिः॥३८॥

और भी कहते हैं–

जिसका शीर्षभाग छिन्न (टूटा या कटा) हो, ऐसे वृक्ष पर बैठा हो, तब अंग-भंग होता है। सूखे वृक्ष पर बैठे तो कलह होता है। सम्मुख अथवा पीछे स्थित गोबर पर बैठा हो तब धन-लाभ होता है॥३८॥

छिन्नं कल्पितमग्रं प्रान्तं यस्मिन् वृक्षे तत्रस्थे काकेऽङ्गच्छेदो भवति। तथा ध्वांक्षे काके शुष्कद्रुमसंस्थिते नीरसवृक्षस्थिते कलहो भवति। पुरतोऽग्रतः पृष्ठतः पश्चाद्वा गोमयसंस्थे धनप्राप्तिर्वित्तलाभो भवति।।३८।।

छिन्न अर्थात् कल्पित (टूटा हुआ) अग्र-भाग हो जिस वृक्ष का, उस पर कौए के स्थित होने पर अंगच्छेद होता है। ध्वाँक्ष अर्थात् कौआ के सूखे पेड़ पर स्थित अर्थात् नीरस पेड़ पर होने से कलह होता है। पुरोभाग अर्थात् सामने अथवा पृष्ठभाग अर्थात् पीछे की ओर गोमय (गोबर) पर बैठा हो, तब धन अर्थात् वित्त का लाभ होता है॥३८॥

विशेष व्याख्या—कल्पित शब्द "कृप्+णिच्+क्त" से बना है। अमरकोश में यह प्रयोग नहीं है। "क्लृप् + ल्युट्" से इसका अर्थ संस्कार, छँटाई करना, काटना आदि होता है। द्रष्टव्य, आप्टे का संस्कृत, हिन्दी कोश।

अन्यदप्याह—

मृतपुरुषाङ्गावयवस्थितोऽभिविरुवन् करोति मृत्युभयम्।
भञ्जन्नस्थि च चञ्च्वा यदि विरुवत्यस्थिभङ्गाय।।३९।।

और भी कहते हैं–

किसी शव के अंग पर बैठकर यदि कौआ शब्द करे, तब मृत्यु का भय होता है। हड्डी के टुकड़े को मुख में लेकर शब्द करे, तब अस्थि-भंग होता है॥३९॥

मृतपुरुषाङ्गं मृतकशरीरावयवमन्यद्बाह्वादिकम्। तत्र च स्थितः। शवशरीरे तदवयवस्थितोऽभितः सम्मुखो यातुर्विरुवंश्च मृत्युभयं करोति। अस्थि चञ्च्वा भञ्जन् विदारयन् यदि विरुवति वाशते, तदा यातुरस्थिभङ्गाय भवति।।३९।।

मृतक शरीर के अवयव (अंग) बाहु आदि पर स्थित अर्थात् शव के शरीर के अंगों पर बैठकर बोलता हुआ यात्री के सामने पड़े, तो वह मरण का भय करता है। हड्डी को चोंच से तोड़ता हुआ शब्द करे, तब यात्री के अस्थिभंग का कारण होता है॥३९॥

अन्यदप्याह—

रज्ज्वस्थिकाष्ठकण्टकिनिःसारशिरोरुहानने रुवति।
भुजगगददंष्ट्रितस्करशास्त्राग्निभयान्यनुक्रमशः।।४०।।

और भी कहते हैं–

रस्सी, हड्डी, लकड़ी, काँटा, सारहीन वस्तु और केश मुख में रखकर शब्द करे, तब क्रमशः सर्प, रोग, दाँतवाले जीव, चोर, शस्त्र और अग्नि का भय होता है॥४०॥

रज्जुः प्रसिद्धा। अस्थि काष्ठं कण्टकिः प्रसिद्धः। निःसारा असाराः। शिरोरुहाः केशाः। काके रज्ज्वाद्यानने मुखे गृहीत्वा रुवति सत्यनुक्रमशो यथाक्रमं भुजङ्गादीनां भयानि भवन्ति। तद्यथा–रज्जुमुखे काके विरुवति भुजगस्य सर्पस्य संबंन्धि भयं भवति। अस्थिमुखे गदो रोगः। काष्ठमुखे दंष्ट्रिभयम्। दंष्ट्रिणो वराहादयः, तेभ्यो भयं भवति। कण्टकिमुखे तस्करभयम्। निःसारमुखे शस्त्रभयम्। शिरोरुहमुखे काकेऽग्निभयं भवति। उक्तं च–

काष्ठरज्ज्वस्थिनिः सारकेशकण्टकिभृद्रुवन्।
व्यालाहिव्याधिशस्त्राग्नितस्करेभ्यो भयङ्करः॥इति॥४०॥

रज्जु नाम से प्रसिद्ध रस्सी, अस्थि (हड्डी), कण्टकारी अर्थात् कँटीला, निःसार अर्थात् जिसके भीतर सार (ठोस) न हो (खोखला), शिरोरुह अर्थात् केश; इन पदार्थों को अर्थात् रज्जु आदि पदार्थ को यदि कौआ मुख में लेकर शब्द करता है, तब क्रमशः सर्पादि का भय उत्पन्न होता है। जैसा कि-रस्सी को मुख में लेकर यदि कौआ शब्द करे, तब सर्प से सम्बन्धित भय होता है। हड्डी को मुख में लेने से गद अर्थात् रोग-भय, लकड़ी मुख में हो, तब दंतुल जन्तुओं से भय अर्थात् शूकर आदि से भय, कँटीली वस्तु के मुख में होने से चोर-भय, खोखली वस्तु से शस्त्र-भय और केश को मुख में रखे, तब वह कौआ अग्नि का भय करता है। कहा भी गया है–"काष्ठ, रज्जु, अस्थि, निःसार, केश और कँटीली वस्तु को लेकर कौआ शब्द करे, तब क्रमशः शृंगाल, सर्प, रोग, शस्त्र, अग्नि और चोरों से भय करता है' ॥४०॥

अन्यदप्याह–

सितकुसुमाशुचिमांसाननेऽर्थसिद्धिर्यथेप्सिता यातुः।
पक्षौ धुन्वन्नूर्ध्वानने च विघ्नं मुहुः क्वणति॥४१॥

और भी कहते हैं–

सफेद फूल, अपवित्र वस्तु, माँस को मुख में लेकर कौआ शब्द करे, तो यात्री का मनोरथ सिद्ध होता है। कौआ ऊपर की ओर मुख कर पंखों को फड़फड़ाते हुए शब्द करे, तब शीघ्र ही विघ्न उपस्थित होता है॥४१॥

सितकुसुमं श्वेतपुष्पम्। अशुचि अमेध्यम्। मांसमामिषम्। एतान्यानने मुखे गृहीत्वा यदि क्वणति विरुवति, तदा यातुर्यथेप्सिता यथाभिलषिताऽर्थसिद्धिर्भवति।

पक्षावङ्गरुहौ धुवन् कम्पयंस्तथाभूते काके ऊर्ध्वमुखे च क्वणति मुहुः शीघ्रमेव यात्राविघ्नं करोति।।४१।।

सित-कुसुम अर्थात् श्वेतपुष्प, अशुचि अर्थात् अपवित्र (अमेध्य) वस्तु और माँस (आमिष); इनको मुख में लेकर यदि शब्द करता है, तब यात्रा करने वाले के मनोभिलषित अर्थ की सिद्धि होती है। दोनों पंखों को फड़फड़ाता हुआ (कँपाता हुआ) ऊपर मुखकर शब्द करे, तब अतिशीघ्र ही यात्रा में विघ्न करता है।।४१।।

अन्यदप्याह–

यदि शृङ्खलां वरत्रां वल्लीं वाऽऽदाय वाशते बन्धः।
पाषाणस्थे च भयं क्लिष्टापूर्वाध्विकयुतिश्च।।४२।।

और भी कहते हैं–

यदि कौआ जंजीर, चमड़े की रस्सी अथवा लता लेकर शब्द करता है, तब बन्धन होता है। पत्थर पर बैठा तो भय तथा कोई प्रथम बार नया व्यथित-यात्री मार्ग में मिलता है।।४२।।

यदि शृङ्खलां लोहमयीं वरत्रां चर्ममयीं रज्जुं वल्लीं वाऽऽदाय गृहीत्वा वाशते विरौति, तदा यातुर्बन्धो भवति। पाषाणस्थेऽश्मनि स्थिते काके भयं भवति। क्लिष्टेन क्लेशसंयुक्तेन अपूर्वेण यो न कदापि निर्दिष्टस्तेनाध्विकेन पान्थेन युतिः संयोगो भवति।।४२।।

यदि लोहे की जंजीर, वस्त्र अर्थात् चमड़े की रस्सी अथवा लता को लेकर बोलता है, तब यात्री को बन्धन मिलता है। पाषाण अर्थात् अश्म (पत्थर) पर कौआ स्थित हो तब भय होता है, तथा कष्ट से पीड़ित अपूर्व अर्थात् जो कभी भी न देखा गया हो, इस प्रकार के आध्विक अर्थात् पथिक से मिलन होता है।।४२।।

अन्यदप्याह–

अन्योऽन्यभक्षसंक्रामितानने तुष्टिरुत्तमा भवति।
विज्ञेयः स्त्रीलाभो दम्पत्योर्विरुवतोर्युगपत्।।४३।।

और भी कहते हैं–

कौवे यदि परस्पर एक दूसरे के मुख में भक्ष्य-पदार्थ खिला रहे हों, तब यात्री को पूर्ण सन्तुष्टि मिलती है। यदि काक-दम्पती (काक-काकी) एक साथ शब्द करते हों, तब स्त्री का लाभ समझना चाहिए।।४३।।

अन्योऽन्यं परस्परं भक्षसंक्रामितानने काके भक्षक्षिप्तमुखे यातुरुत्तमा प्रधाना तुष्टिर्भवति। दम्पतयोर्जायापत्योर्युगपत् तुल्यकालं कृत्वा विरुवतोः क्रोशतोः स्त्री-

लाभो योषित्प्राप्तिर्विज्ञेयो विज्ञातव्यः।।४३।।

यदि अन्योन्य अर्थात् परस्पर कौवे एक दूसरे के मुख में भक्ष्य-वस्तु डालते हैं, तब यात्री को उत्तम अर्थात् पर्याप्त संतुष्टि मिलती है। दम्पत्ति अर्थात् पति-पत्नी एक साथ शब्द करते हों, तब स्त्री का लाभ होता है।।४३।।

अन्यदप्याह–

प्रमदाशिरउपगतपूर्णकुम्भसंस्थेऽङ्गनार्थसम्प्राप्तिः।
घटकुट्टने सुतविपद् घटोपहदनेऽन्नसम्प्राप्तिः।।४४।।

और भी कहते हैं–

शिर पर घड़ा चलती हुई स्त्री के घड़े के ऊपर कौआ बैठे तब स्त्री और धन का लाभ होता है। घड़े पर प्रहार करे तब पुत्र पर विपत्ति और घड़े पर विष्टा कर दे, तब अन्न की प्राप्ति होती है।।४४।।

प्रमदा स्त्री, तस्याः शिरउपगतो मूर्ध्नि स्थितो यः पूर्णकुम्भस्तत्रस्थे काकेऽङ्गनार्थसम्प्राप्तिः। स्त्रीलाभोऽर्थप्राप्तिश्च भवति। घटकुट्टने कुम्भताडने सुतविपत् पुत्रमरणं भवति। घटोपहदने कुम्भपुरीषकरणेऽन्नसम्प्राप्तिर्भोजनलाभो भवति।।४४।।

प्रमदा अर्थात् स्त्री के शिर पर जो पूर्णकुम्भ स्थित हो, उस पर कौवे के बैठने से धन की सम्प्राप्ति होती है। स्त्री और धन इन दोनों का लाभ होता है। घट के कुट्टन अर्थात् उस पर प्रहार करने पर पुत्र का मरण होता है। घट के उपहदन अर्थात् घड़े पर पुरीष (विष्टा) करे, तब अन्न अर्थात् भोजन का लाभ होता है।।४४।।

अन्यदप्याह–

स्कन्धावारादीनां निवेशसमये रुवंश्चलत्पक्षः।
सूचयतेऽन्यत्स्थानं निश्चलपक्षस्तु भयमात्रम्।।४५।।

और भी कहते हैं–

कौआ यात्रा-काल में विश्राम-गृह में प्रवेश के समय पंखों को हिलाता हुआ शब्द करता है, तब अन्य स्थान पर निवास करने की सूचना देता है। यदि पंख निश्चल रखे तो मात्र भय को संसूचित करता है।।४५।।

यात्रायां गतो राजा यत्र निवसति स स्कन्धावारः। स्कन्धावारादीनाम्। आदिग्रहणात् प्रवासिनामन्येषामपि जनानां निवेशसमये निवेशनकाले। निवेशनमावासकादीनां रचनम्। तस्मिंश्चलत्पक्षः चलिताङ्गरुहः काको रुवन् शब्दं कुर्वन्। अन्यद् द्वितीयं स्थानं सूचयते कथयति। यथाऽन्यत्र भवद्भिर्वस्तव्यम्।

निश्चलपक्षस्तु रुवन् भयमात्रं सूचयते नान्यत् स्थानम्। तथा च पराशरः–

सेनानिविष्टः सार्थे वा वासो हृष्टो न वाशते।

तस्य देशप्रयातस्य भयमत्रोपजायते।।इति।।४५।।

यात्रा में गया हुआ राजा जिस स्थान पर निवास करता है, उस स्थान को स्कन्धावार कहा जाता है। 'आदि' शब्द से यात्री के साथ ही अन्य लोगों के भी किसी स्थान में प्रवेशसमय अथवा निवेश अर्थात् निवासस्थान के निर्माण-काल में कौआ पंखों को फड़फड़ाता हुआ शब्द करता है, तब वह किसी अन्य दूसरे स्थान में रहने वाले को संसूचित करता है। अभिप्राय यह है कि "यात्री को अन्यत्र अर्थात् दूसरे स्थान पर रहना चाहिए।" निश्चल पक्ष कर शब्द करे तब भयमात्र की सूचना देता है, स्थानपरिवर्तन का नहीं। जैसा कि पराशर ने कहा है–

सेना में अथवा रथियों में प्रवेश कर यदि कौआ चंचल होकर नहीं बोलता है, तब उस देश (स्थान) की यात्रा करने वाले को भय मात्र उत्पन्न होता है।।४५।।

अन्यदप्याह–

प्रविशद्भिः सैन्यादीन् सगृध्रकङ्कैर्विनामिषं ध्वांक्षैः।

अविरुद्धैस्तैः प्रीतिर्द्विषतां युद्धं विरुद्धैश्च।।४६।।

और भी कहते हैं–

कौवे यदि गिद्ध और कंक पक्षियों के साथ बिना मांस लिये सैन्यादि स्थानों में परस्पर झगड़े बिना प्रवेश करें, तब शत्रु-पक्ष से समन्वय होता है। इन पक्षियों में परस्पर कलह हो, तब शत्रुपक्ष से युद्ध होता है।।४६।।

ध्वांक्षैः काकैः। सगृध्रकङ्कैः गृध्रकङ्कसहितैः। विनामिषं मांसं विना। सैन्यादीन् सैन्यपुरग्रामान् प्रविशद्भिस्तैश्च परस्परमविरुद्धैर्विरोधमकुर्वद्भिर्द्विषता शत्रुणा सह प्रीतिर्भवति। तैश्च विरुद्धैः सकलहैर्द्विषता सह युद्धं संग्रामो भवति।।४६।।

कौवे यदि गिद्ध और कंक पक्षियों के साथ बिना मांस के सैन्यादि में अर्थात् सेना की छावनी, नगर अथवा ग्राम में प्रवेश करते हैं तथा परस्पर कलह नहीं करते हैं, तब शत्रुओं के साथ प्रीति होती है। इन पक्षियों के परस्पर कलह किये जाने से शत्रु के साथ युद्ध अर्थात् संग्राम होता है।।४६।।

विशेष व्याख्या–

कङ्क = अमरकोश में नहीं है। यह बक पक्षी 'बगुला' के लिए काव्यों में प्रयुक्त है। 'कह्व' शब्द का पर्याय है। त्रिकाण्डकोष में कहा गया है–

दीर्घजंघो निशैडः स्याद् वकोटः शुक्लवायसः।

कङ्केरुर्दारुबलिभुक् शिखीचन्द्रविहंगमः।।

अन्यदप्याह—

बन्धः सूकरसंस्थे पङ्काक्ते सूकरे द्विकेऽर्थाप्तिः।

क्षेमं खरोष्ट्रसंस्थे केचित् प्राहुर्वधं तु खरे।।४७।।

और भी कहते हैं—

यदि कौआ सूअर पर स्थित हो, तो बन्धन होता है। यदि वह कीचड़ से लिप्त सूअर पर बैठा हो, तब धन का लाभ होता है। गर्दभ अथवा ऊँट पर बैठे तब शुभ होता है। कुछ आचार्य गर्दभ पर बैठने से वध (मरण) कहते हैं।।४७।।

सूकरसंस्थे द्विके काके बन्धो बन्धनं भवति। पङ्काक्ते पङ्केन कर्दमेन लिप्ते सूकरे स्थितेऽर्थाप्तिरर्थलाभो भवति। खरगते गर्दभस्थे। उष्ट्रगते करभस्थे काके क्षेमं भवति। केचित् तु मुनयः खरसंस्थे वधं मरणं प्राहुः कथयन्ति। उक्तं च—

वधबन्धकरः क्रोशन् खरसूकरपृष्ठगः।

पङ्कदिग्धशरीरस्य वराहस्योपरिस्थितः।।

वायसः शस्यते यातुस्तूष्णीभूतो रुवन्नपि।।इति।।४७।।

कौवे को सूअर के ऊपर बैठने पर बन्ध अर्थात् बन्धन (कारागर आदि) होता है। पङ्क अर्थात् कीचड़ से सूअर लिप्त हो, तब अर्थ अर्थात् धन का लाभ होता है। खर अर्थात् गदहा और उष्ट्र अर्थात् ऊँट पर कौवे के बैठने पर क्षेम (कल्याण) होता है। कुछ मुनिगण गदहे पर बैठने से वध अर्थात् मरण कहते हैं। कहा भी गया है—

गदहे और सूअर के पीठ पर बैठकर कौवे के बोलने से वध और बन्धन होता है। कीचड़ से भरे हुए शरीर वाले सूअर पर बैठा हुआ कौआ यदि शब्द करे अथवा मौन हो तब भी दोनों स्थितियों में शुभदायक होता है।।४७।।

विशेष व्याख्या—

"द्विक-शब्द" अमरकोश में नहीं है। यहा 'द्विक' शब्द कौआ (काक) के अर्थ में विवृतिकार द्वारा ग्रहण किया गया है, जो कि मूलार्थ से सुसंगत है।

अन्यदप्याह—

वाहनलाभोऽश्वगते विरुवत्यनुयायिनि क्षतजपातः।

अन्येऽप्यनुव्रजन्तो यातारं काकवद्विहगाः।।४८।।

और भी कहते हैं–

अश्व के ऊपर बैठे हुए कौवे से अश्व का लाभ होता है। अश्व के पीछे-पीछे शब्द करता हुआ चले, तब रक्तपात होता है। अन्य पक्षी भी यदि उसी प्रकार बैठें या अनुगमन करें तो, कौवे के समान ही फल होता है।।४८।।

अश्वगते तुरगस्थे काके विरुवति वाहनानामश्वादीनां लाभो भवति। अनुयायिनि पश्चाद् गम्यमाने काके विरुवति यातुः क्षतजपातो रक्तस्य पातः पतनं भवति। अन्येऽपरे येऽत्रानुक्ता विहगाः पक्षिणस्ते यातारमनुव्रजन्तः पश्चाद् गच्छन्तः काकवद्वायसवज्ज्ञेया ज्ञातव्याः। यथा काकस्य फलं पूर्वमुक्तं तथा तेषामपीति। तथा च काश्यपः–

उलूककङ्कप्लवगा गृध्रश्येनादयश्च ये।
मांसाशिनश्च विहगास्तुल्या वायसचेष्टितैः।।इति।।४८।।

जब अश्व अर्थात् तुरग (घोड़ा) पर बैठा हुआ काक शब्द करे, तब अश्वादि वाहनों का लाभ होता है। यदि वह अनुगमन करे अर्थात् पृष्ठानुयायी हो और शब्द करे, तब यात्रा करने वाले का रक्तपात होता है। अन्य पक्षी, जिनका यहाँ पर उल्लेख नहीं है, वे यदि यात्री का अनुगमन करें, तब कौवे के समान फल करते हैं। जैसा फल कौवे का कहा गया है उसी प्रकार इन अन्य पक्षियों का भी जानना चाहिए। जैसा कि आचार्य काश्यप ने कहा है–

"उल्लू, कङ्क, जलचरी, गिद्ध और बाज आदि जो मांस-भक्षी पक्षी हैं, इनका फल भी कौवे की चेष्टा के समान ही होता है"।।४८।।

अथ विशेषमाह–

द्वात्रिंशत्प्रविभक्ते दिक्चक्रे यद्यथा समुद्दिष्टम्।
तत्तत् तथा विधेयं गुणदोषफलं यियासूनाम्।।४९।।

कुछ और विशेष कहते हैं–

दिक्चक्र ३२ भागों में विभक्त होता है, उसमें जिस प्रकार से फल का विचार किया गया है, यात्रियों के लिए भी उसी प्रकार से शुभाशुभ फलों का विचार करना चाहिए।।४९।।

दिक्चक्रे दिङ्मण्डले द्वात्रिंशद्भागप्रविभक्ते यद्यत्फलं यथा येन प्रकारेण समुद्दिष्टं कथितं तत्तत् फलं तथा तेनैव प्रकारेण यियासूनां जिगमिषूणां गुणदोषफलं

विधेयं वक्तव्यम्। यथा—प्राच्यां शान्तायां वा शुभचेष्टं पूजाफलं महद्वक्ति। अशुभचेष्टायां मध्यस्थं तस्यामेव दीप्तायां क्रूरचेष्टो नृपाद्भदयम्, एवमन्यास्वपि विज्ञेयम्।।४९।।

दिक्चक्र अर्थात् दिङ्मण्डल चक्र में जो कि ३२ भागों (कोष्ठकों) में विभक्त है, उसमें जो भी फल जिस प्रकार से कथित हैं, उसी प्रकार से यियासु अर्थात् यात्रा की इच्छा रखने वाले व्यक्तियों के लिए भी शुभाशुभ फल कहना चाहिए। जैसा कि-शान्ता पूरबदिशा में अथवा शुभचेष्टा में पूजा का फल श्रेष्ठ कहा गया है। अशुभ चेष्टा में मध्यफल और उसी में दीप्त तथा क्रूर चेष्टा होने पर राजभय होता है। उसी प्रकार से अन्य दिशाओं में भी जानना चाहिए॥४९॥

अथ रुतलक्षणफलमाह—

का इति काकस्य रुतं स्वनिलयसंस्थस्य निष्फलं प्रोक्तम्।
कव इति चात्मप्रीत्यै केति रुते स्निग्धमित्राप्तिः।।५०।।

करेति कलहं कुरुकुरु च हर्षमथ कटकटेति दधिभक्तम्।
केके विरुतं कुकु वा धनलाभं यायिनः प्राह।।५१।।

अब बोलने की ध्वनि का फल कहते हैं–

कौआ अपने घोंसले में 'का' की ध्वनि करे तब उसकी ध्वनि निष्फल होती है। 'कव' ध्वनि आत्म-प्रक्रिया के लिए तथा 'क' ध्वनि प्रिय-मित्र की प्राप्तिकारक होती है॥५०॥

'कर' ध्वनि से कलह, ''कुरु-कुरु' से प्रसन्नता और 'कट-कट' से दही-भात का लाभ होता है। 'के-के' अथवा 'कु-कु' की ध्वनि से यात्रा-कर्ता को धन का लाभ होता है॥५१॥

का इति काकस्य रुतमिति। काकस्य वायसस्य स्वनिलयसंस्थस्य आत्मीयनीडस्थितस्य का-इति यद्रुतं तन्निष्फलं प्रोक्तं कथितम्। तस्य च शुभाशुभं फलं न किञ्चिदित्यर्थः। कव इति रुतं चात्मप्रीत्यै स्वप्रीतये भवति। क-इति रुते स्निग्धस्य वल्लभस्य मित्रस्य सुहृद आप्तिः प्राप्तिर्भवति।।५०।।

का, ध्वनि का अर्थ काक की बोली (रुत) है। कौआ (वायस) यदि अपे निलय अर्थात् घोंसले (नीड) में स्थित होकर 'का' शब्द करे तो, वह निष्फल कहा गया है। अभिप्राय यह है कि उस बोली का कुछ भी शुभाशुभ फल नहीं होता है। 'कव' शब्द आत्म-सन्तुष्टि के लिए होता है। 'क' शब्द से स्निग्ध अर्थात् प्रिय मित्र की प्राप्ति

(आप्ति) होती है।।५०।।

कर-इति रुते कलहः कलिर्भवति। कुरुकुरु च रुते हर्षं भवति। अथशब्दश्चार्थे। कटकटेति रुते दधिभक्तं भोजनं भवति। केके-इति विरुते कुकु-इति विरुते वा यायिनो गच्छतो धनलाभं वित्तप्राप्तिं प्राह कथयति।।५१।।

'कर' ध्वनि से कलह (कलि) होता है। 'कुरु-कुरु' की ध्वनि होने पर प्रसन्नता होती है। 'अथ' शब्द च-(और) का बोधक है। 'कट-कट' की ध्वनि पर दही और भात का भोजन मिलता है। के-के तथा कु-कु की ध्वनि से यात्रा-कर्ता को धन (वित्त) की प्राप्ति कही गयी है।।५१।।

अन्यदप्याह–

खरेखरे पथिकागममाह कखाखेति यायिनो मृत्युम्।
गमनप्रतिषेधिकसा कखला सद्योऽभिवर्षाय।।५२।।

और भी कहते हैं–

'खरे-खरे' की ध्वनि से पथिक का आगमन और 'कखा खा' से यात्री की मृत्यु कही जाती है। 'आ' की ध्वनि से यात्रा का निषेध और और 'कखला' से तत्काल वर्षा की सूचना होती है।।५२।।

खरेखरे इति रुते पथिकस्य पान्थस्यागमो भवति इत्याह कथयति वायसः। कखाखेति–रुते यायिनो मृत्युं मरणमाह। आ–इति रुतं गमनप्रतिषेधिकं गमनविघ्नं करोति। कखला इति रुतं सद्योऽभिवर्षाय सद्यस्तस्मिन्नेवाहनि वर्षतीत्यर्थः।।५२।।

खरे-खरे की ध्वनि पर पथिक के आगमन को कौआ संसूचित करता है। कखाखा की ध्वनि से कौआ यात्री की मृत्यु का संदेश देता है। 'आ' ध्वनि होने पर यात्रा में विघ्न उपस्थित होता है। कखला ध्वनि सद्यः अर्थात् उसी दिन वर्षा कराती है।।५२।।

अन्यदप्याह–

काकेति विघातः काकटीति चाहारदूषणं प्राह।
[१]प्रीत्यास्पदं कवककवेति बन्धमेवं कगाकुरिति।।५३।।

और भी कहते हैं–

'काक' शब्द से आघात तथा 'काकटी' शब्द से दूषित आहार मिलता है।

---

१. प्रीत्या स्वदम्पती कवकव इति पाठान्तरम्।

'कव-कव' की ध्वनि से प्रेम का व्यवहार तथा 'कगाकु' की ध्वनि हो, तब बन्धन होता है।।५३।।

काक-इति विरुते विघातो विनाशो भवति। काकटीति विरुते आहारस्य भोजनस्य दूषणं सदोषत्वं विषादिकेन प्राह कथयेति। कवकव इति रुते प्रीत्यास्पदम्, प्रीत्याः स्नेहस्य आस्पदं स्थानं प्रीत्यास्पदम्। केनचित् सह प्रीतिर्भवति। अन्ये प्रीत्या स्वदम्पती कवकवेति पठन्ति। यथा स्वदम्पती भार्यापती कवकवेति प्रीत्या स्नेहेन कवकवेति रुतं कुर्वतः। एतन्न शोभनम्। यस्माद् गर्गः–

रुते कवकवेति स्यात् प्रस्थिते वायसस्य तु।
अपूर्वप्रीतये तच्च धनलाभाय निर्दिशेत्।।

एवं कगाकु इति रुते बन्धो बन्धनं भवति।।इति।।५३।।

'काक' शब्द के बोलने से विघात अर्थात् विनाश होता है। काकटी शब्द होने पर आहार अर्थात् भोजन में विष आदि का दूषण अर्थात् प्रदूषण होता है। कव-कव की ध्वनि करे तब प्रीत्यास्पद अर्थात् स्नेह का आस्पद अर्थात् स्नेह का स्थान मिलता है। तात्पर्य यह है कि किसी के साथ प्रेम होता है। अन्य आचार्य कव-कव से दम्पत्ती का परस्पर प्रेम कहते हैं। जैसा कि स्वयं पति-पत्नी कव-कव शब्द से प्रस्पर प्रेम को प्रकट करते हैं। परञ्च यह कथन समीचीन नहीं है। क्योंकि गर्गाचार्य ने इस प्रकार कहा है–

यात्रा काल में कौवे के कव-कव शब्द को अपूर्व प्रेम और धन-लाभ के लिए समझना चाहिए। इसी प्रकार कगाकु शब्द से बन्धन होता है।।५३।।

अन्यदप्याह–

करगौ विरुते वर्षं गुडवत् त्रासाय वडिति वस्त्राप्तिः।
कलयेति च संयोगः शूद्रस्य ब्राह्मणैः साकम्।।५४।।

और भी कहते हैं–

कौआ यदि करगौ शब्द करे तब वर्षा, गुड शब्द करे तो भय और वड् शब्द करे तब वस्त्र-लाभ होता है। कलय शब्द होने पर शूद्र का ब्राह्मण के साथ मिलन होता है।।५४।।

करगौ इति रुते वृष्टिर्वर्षणं भवति। गुड इति त्रासाय भयाय भवति। वड् इति रुते वस्त्रप्राप्तिरम्बरलाभः। कलय इति च रुते शूद्रस्य शूद्रजातेर्ब्राह्मणैः साकं सह संयोगो भवति।।५३।।

'करगौ' की बोली निकले तब वृष्टि अर्थात् वर्षा होती है। 'गुड' शब्द हो तो

भयकारक होता है। 'वड्' शब्द होने पर वस्त्र (अम्बर) प्राप्त होते हैं। 'कलय' शब्द होने पर शूद्रजाति का ब्राह्मणों के साथ संयोग होता है।।५४।।

अन्यदप्याह—

कडिति फलाप्तिः फलदा-
हिदर्शनं टड्डिति प्रहाराः स्युः।
स्त्रीलाभः स्त्रीति रुते
गडिति गवां पुडिति पुष्पाणाम्।।५५।।

और भी कहते हैं–

'कड्' शब्द होने पर फल-लाभ तथा शुभ-फलदायक साँप का दर्शन होता है। टड् शब्द से आघात होते हैं। 'स्त्री' शब्द से स्त्री का लाभ, 'गुड्' शब्द से गो-लाभ और पुड् शब्द से पुष्पों का लाभ होता है।।५५।।

कडिति रुते फलाप्तिरभीष्टफलप्राप्तिर्भवति। अथवा फलाप्तिः फल-लाभः। तथा फलदाहिदर्शनं फलप्रदस्याहेः शुभफलप्रदस्य सर्पस्य दर्शनमवलोकनं भवति। अथवा फलाप्तिर्भवति सदाप्तिः। फलप्रदा ततोऽपि विशिष्टतरं फलं लभ्यते। तथाऽहिदर्शनं भवति। टिड्डिति रुते प्रहारा घाताः स्युर्भवेयुः। स्त्री-इति रुते स्त्रीलाभो भवति। गडिति रुते गवां लाभः। पुडिति रुते पुष्पाणां लाभः।।५५।।

कड् शब्द से फलाप्ति अर्थात् मनोभिलषित फल प्राप्त होता है, अथवा फलों का लाभ होता है और फलद अर्थात् शुभ-फल देने वाले सर्प का दर्शन होता है, अथवा फल अर्थात् शुभ की प्राप्ति होती है। फलदा अर्थात् सामान्य फल से भी अधिक विशिष्ट-फल प्राप्त होता है। इस प्रकार के फलदायक सर्प का शुभ-दर्शन होता है। टड् शब्द से प्रहार अर्थात् आघात होते हैं। स्त्री-शब्द से स्त्री का लाभ होता है। गड् शब्द से गायों का लाभ और पुड् शब्द से पुष्पों का लाभ होता है।।५५।।

अन्यदप्याह—

युद्धाय टाकुटाक्विति गुहु वह्निभयं कटेकटे कलहः।
टाकुलि चिण्टिचि केकेकेति पुरं चेति दोषाय।।५६।।

और भी कहते हैं–

कौवे का "टाकुटाक्विति" शब्द युद्धकारक होता है। गुहु शब्द से अग्नि का भय और कटे-कटे शब्द से कलह होता है। टाकुलि, केकेकेति शब्द और चिण्टिचि शब्द पुर के लिए दोषकारक होते हैं।।५६।।

टाकुटाक्विति रुतं युद्धाय संग्रामाय भवति। गुहु-इति रुते वह्निभयमग्निभयं भवति। कटेकटे-इति रुत कलहः। टाकुलि चिण्टिचि केकेकेति पुरं चेति इत्येवं रुतं दोषाय भवति।।५६।।

टाकुटाक्विति शब्द युद्ध अर्थात् संग्राम के लिए होता है, गुहु शब्द से वह्नि अर्थात् अग्नि का भय होता है। कटे-कटे की ध्वनि से कलह (झगड़ा) होता है। टाकुलि, चिण्टिचि, केकेकेति, पुर और चेति शब्द दोषकारक होते हैं।।५६।।

अन्यद् विशेषमाह–

काकद्वयस्यापि सामनमेतत्
फलं यदुक्तं रुतचेष्टिताद्यैः।
पतत्रिणोऽन्येऽपि यथैव काको
वन्याः श्ववच्चोपरिदंष्ट्रिणो ये।।५७।।

और विशेष कहते हैं–

इस प्रकार एक कौवे के शब्द अथवा चेष्टा करने पर जो भी फल कहा गया है, दो कौवे का भी उसी के समान फल होता है। अन्य पक्षियों के फल भी कौवे के समान जानना चाहिए। लम्बे दाँत वाले जंगली पशुओं का फल भी श्वान के समान ही होता है।।५७।।

रुतचेष्टिताद्यैः, रुतेन चेष्टितेनाऽऽसनाद्युपवेशनेन चैकस्य काकस्य यत् फलमुक्तं तत्काकद्वयस्य। अपिशब्दात् त्रयस्य चतुष्कस्य च समानं वाच्यम्। अन्ये येऽत्रानुक्ताः पतत्रिणः पक्षिणस्तेऽपि तेन प्रकारेण ज्ञेयाः वन्या वने भवाः प्राणिनो ये नोक्ता ते श्वावत्सारमेयवत्। ये चोपरिदंष्ट्रिणः सूकरादयस्ते श्वाच्छुनो यत्फलमुक्तं तत् तेषामपि। तथा च पराशरः–

शकुना पुंसनामानो वायसेन प्रकीर्तिताः।
तथैव स्त्रीसनामानः पिपील्याः परिकीर्तिताः।।इति।।५७।।

रुत अर्थात् ध्वनि और चेष्टा अर्थात् भोजन और उपवेशन, इसका फल एक कौवे का जो होता है वही फल दो कौवे का भी कहा गया है। 'अपि' शब्द से तीन और चार आदि संख्या में भी समान फल ही कहना चाहिए, जिनका यहाँ पर उल्लेख नहीं किया गया है, उन पक्षियों का फल उसी प्रकार से समझना चाहिए। वन्य अर्थात् वन में उत्पन्न जिन प्राणियों का उल्लेख यहाँ पर नहीं किया गया है उन सभी का फल श्वान अर्थात् सारमेय (कुत्ता) के समान होता है। जिनके दाँत ऊपर निकले होते हैं ऐसे सुअर आदि जंगली पशुओं के फल कुत्ते के फल के समान होते हैं। जैसा कि पराशर ने कहा है–

पुरुषवाचक जो भी पक्षी हैं उनको कौवे के समान फलप्रदायक कहा गया है, इसी प्रकार स्त्रीवाचक जो भी जीव हैं उनका फल चीटीं के समान समझना चाहिए।।५७।।

अथान्येषु प्राणिषु चेष्टितमाह–

स्थलसलिलचराणां व्यत्ययो मेघकाले
प्रचुरसलिलवृष्ट्यै शेषकाले भयाय।
मधु भवननिलीनं तत्करोत्याशु शून्यं
मरणमपि च नीला मक्षिका मूर्ध्नि लीना।।५८।।

अन्य प्राणियों की चेष्टायों को कहते हैं–

वर्षा काल में स्थलचारी-प्राणी तथा जलचरजीव अपनी प्रकृति के विपरीत आचरण करें, तब वर्षा अत्यधिक होती है। इससे भिन्न काल में इनका विपरीत आचरण भयकारक होता है। भवन में मधुमक्खी के वास से भवन जन-शून्य हो जाता है। यदि नील-वर्ण की मक्खी सिर पर बैठे तो, मरण भी सम्भावित है।।५८।।

मेघकाले वर्षासमये स्थलसलिलचराणां व्यत्ययो विपरीतः। स्थळचरा अजादयो जलचारिणः। जलचरा मत्स्यादयः स्थलचारिणो यदा भवन्ति, तदा ते प्रचुरसलिलवृष्ट्यै प्रभूतवृष्टये भवन्ति। शेषकाले वर्षातोऽन्यस्मिन् समये स्थल-सलिलचराणां व्यत्ययो भयाय भवति। मधुशब्देन मधुकर्च्यो मक्षिका उच्यन्ते। मधु भवने स्वयमेव निलीनं संश्लिष्टं तदेव भवनमाशु क्षिप्रं शून्यं निर्जनं करोति। नीला नीलवर्णा मक्षिका मूर्ध्नि शिरसि जन्तोर्लीना श्लिष्टा मरणं मृत्युमपि करोति।।५८।।

मेघ-काल अर्थात् वर्षा-ऋतु में स्थल एवं जलचर का यदि विपरीत स्वभाव हो, अर्थात् बकरे आदि स्थलचारी यदि जल में विचरण करें तथा मछली आदि जलचर जीव, स्थलभाग में आयें, तब ये प्रचुर सलिल अर्थात् पर्याप्त वृष्टि के कारण होते हैं। शेषकाल अर्थात् वर्षा से भिन्नकाल में स्थल एवं जल-चरों के विपरीत आचरण भयप्रद होते हैं। मधु यदि घर (मधुमक्खी का छत्ता) में स्वयं ही आकर सन्निविष्ट हो जाये, तब वह घर शीघ्र ही शून्य अर्थात् निर्जन हो जाता है। नीले रंग की मक्खी सिर पर चिपक जाये तब, मृत्यु भी कर देती है।।५८।।

पिपीलिकाचेष्टितमाह–

विनिक्षिपन्त्यः सलिलेऽण्डकानि

पिपीलिका वृष्टिनिरोधमाहुः।

तरुं स्थलं वापि नयन्ति निम्नाद्

यदा तदा ताः कथयन्ति वृष्टिम्।।५९।।

चींटी की चेष्टा बतलाते हैं-

चींटी यदि अपने अण्डों को जल में ले जाती हो तब वर्षा रुक जाती है। यदि अण्डे सहित नीचे से ऊपर की भूमि पर अथवा पेड़ों पर चढ़तीं हो तब, वे वर्षा होने की सूचना देती है।।५९।।

पिपीलिकाः सलिले जले अण्डकानि विनिक्षिपन्त्यो वृष्टिनिरोधं वृष्ट्यभावमाहुः कथयन्ति। निम्नात् तलात् तरुं वृक्षस्थलमुच्चस्थानं वापि यदि नयन्ति, तदा वृष्टिं वर्षणं कथयन्ति वदन्ति ताः पिपीलिकाः।।५९।।

जब चीटियां जल में अपने अण्डों को रखने लगे तब वृष्टि का निरोध अर्थात् अभाव व्यक्त करती हैं। नीचे के तल से वृक्ष पर अथवा किसी ऊँचे स्थान पर अण्डों को ले जाती हैं, तब वे चीटियाँ वर्षा होने की सूचना देती हैं।५९।।

अथ शकुननिश्चयमाह–

कार्यं तु मूलशकुनेऽन्तरजे तदह्नि

विन्द्यात् फलं नियतमेवमिमे विचिन्त्याः।

प्रारम्भयानसमयेषु तथा प्रवेशे

ग्राह्यं क्षुतं न शुभदं क्वचिदप्युशन्ति।।६०।।

शकुन का निश्चय बतलाते हैं–

मूल आरम्भिक शकुन में यात्रा करनी चाहिए। तत्पश्चात् यात्रा के मध्य होने वाले शकुन का फल उसी दिन मिल जाता है। इस प्रकरण में विवेचित सभी शकुनों के निर्धारित फल अवश्य मिलते हैं। यात्रा के आरम्भ तथा नवीनप्रवेश के समय शकुन का विचार करना चाहिये। छींकना सभी कार्यों में अशुभ होता है। इसको कभी भी ग्रहण नहीं करना चहिए।।६०।।

मूलशकुनः प्रथमशकुनः। तस्मिन् कार्य यात्राकार्यं विन्द्याज्जानीयात्। तस्मिन् शुभे यात्रासिद्धिः, अशुभेरसिद्धिरिति। अन्तरजे तदह्नीति। यातुर्मूलशकुनात् परतो यात्रापरिसमाप्तिं यावत् तदन्तरे मध्ये योऽन्यः शकुनः शुभाशुभो भवति तदन्तरजे तस्मिन्नन्तरजे मध्यजाते तस्य यत् फलं तदह्नि तस्मिन्नेव दिने विन्द्यात्। इमेऽस्मिन्नध्याये शकुना उक्तास्ते नियतं सर्वकालं विचिन्त्याश्चिन्तनीयाः। प्रारम्भे सर्वकर्मणां यानसमये

यात्राकाले तथा प्रवेशे गृहप्रवेशादौ। एतेषु कार्येषु सर्वेषु शकुनाश्चिन्तनीयाः। तथा क्षुतं नासाशब्दः सर्वथाग्राह्यम्। क्षुतं श्रुत्वा न किञ्चित् कार्यमित्यर्थः। यतः क्वचिदपि न शुभदमुशन्ति कथयन्ति। सर्वत्राशुभं क्षुतमिति।।६०।।

मूल-शकुन अर्थात् सर्वप्रथम होने वाले शकुन, इसमें यात्रा-कर्म का विचार करना चाहिए। शुभशकुन में यात्रा की सिद्धि और अशुभ में असिद्धि समझें। यात्री के मूल (प्रथम) शकुन से आरम्भ कर यात्रा की समाप्ति काल के मध्य जो दूसरे शुभाशुभ शकुन होते हैं, उनके जो शुभाशुभ फल हैं, वे उसी दिन हो जाते हैं, यह समझना चाहिए। इस अध्याय में जो शकुन कहे गये हैं, उनका विचार सभी समयों में किया जाना चाहिए। सभी प्रकार के कार्यों के आरम्भ में, यात्रा के समय तथा गृह-प्रवेश आदि प्रवेश के समय; इन सभी कार्यों में शकुन का विचार करना चाहिए। क्षुत अर्थात् नासिका का शब्द (छींक) सदा अग्राह्य है, अर्थात् छींक होने पर कुछ भी न करें। छीक को कहीं भी शुभ नहीं कहा गया है। अर्थात् छींक सभी जगहों पर अशुभ होती है।।६०।।

विशेष व्याख्या–

'क्षुत' शब्द का अर्थ छींकना है। अमरकोश २/६/५२ में कहा गया है–"स्त्री क्षुत् क्षुतं क्षवः पुंसि" अर्थात् क्षुत्, क्षुत और क्षवः; ये तीन शब्दा छिक्का (छींक) के पर्यायवाची हैं।

एतेषामेव शकुनानां प्रशंसार्थमाह–

शुभं दशापाकमविघ्नसिद्धिं
मूलाभिरक्षामथवा सहायान्।
दुष्टस्य संसिद्धिमनामयत्वं
वदन्ति ते मानयितुर्नृपस्य।।६१।।

शकुनों की प्रशंसा में कहते हैं–

शुभ-शकुनों के परिणामस्वरूप कार्य की निर्विघ्न सिद्धि होती है। मूल (मुख्य) पुरुष की रक्षा अथवा सहयोगियों की रक्षा होती है। दुष्टव्यक्ति (शत्रुपक्ष) अनुकूल सिद्ध हो जाता है तथा नैरुज्य प्राप्त होता है। ये फल शकुनों का सम्मान करने वाले राजा को प्राप्त होते हैं।।६१।।

ते शकुना नृपस्य राज्ञो मानयितुं पूजयितुस्तेषां मानयति पूजयति। तस्य

शकुनं वदन्ति कथयन्ति। शुभं शोभनं मूलस्थानम्, तत्राभिरक्षामाभिमुख्येन पालनम्। अथवा पथि गच्छतु सहायान् सार्थकान्। दुष्टस्य दुःसाध्यस्य शत्रोः संसिद्धिं सुखेनाक्लेशेन साधनम्। अनामयत्वं नीरोगत्वमेतत्सर्वं शुभसूचनाद् वदन्ति कथयन्ति।।६१।।

सभी शकुन सम्मान अर्थात् पूजा करने वाले राजा का सम्मान अर्थात् पूजन करते हैं। अर्थात् उसको ही वे शकुन संसूचित करते हैं। शुभशकुन के फल द्वारा अविघ्न अर्थात् रहित होकर कार्यों में सफलता मिलती है। मूल अर्थात् मूलस्थान की अभिरक्षा अर्थात् प्रमुखतया सुरक्षा होती है। अथवा मार्ग में साथ चलने वाले सहकर्मियों की सुरक्षा होती है। दुष्ट अर्थात् दुर्घर्ष शत्रु की, संसिद्ध शत्रु की, संसिद्धि अर्थात् सुखपूर्वक साधनता होती है। अनामय अर्थात् निरोगिता; ये सभी फल शुभ-शकुनों से कहे जाते हैं।।६१।।

अथानिष्टशकुनविरुते दृष्टे यत्कर्तव्यं तदाह—

क्रोशादूर्ध्वं शकुनविरुतं निष्फलं प्राहुरेके
तत्रानिष्टे प्रथमशकुने मानयेत् पञ्च षट् च।
प्राणायामान्नृपतिरशुभे षोडशैव द्वितीये
प्रत्यागच्छेत् स्वभवनमतो यद्यनिष्टस्तृतीयः।।६२।।

अशुभ-शकुन के श्रवण अथवा दर्शन के कर्तव्य—

एक कोश से अधिर दूरी पर होने वाले शकुन-शब्द को कुछ आचार्य निष्फल मानते हैं। अशुभ प्रथमशगुन के अवसर पर ११ बार प्राणायाम करें। दूसरी बार अशुभ शकुन उपस्थित हो तब, १६ बार प्राणायाम करें। यदि तीसरी बार अशुभ-शकुन हो तब, अवश्य ही अपने घर को वापस आ जायें।।६२।।

एके आचार्याः काश्यपादयः क्रोशादूर्ध्वं क्रोशादनन्तरं यच्छकुनविरुतं तन्निष्फलं प्राहुरुक्तवन्तः। तथा च काश्यपः—

क्रोशादनन्तरं यत् स्याच्छुभं वा यदि वाऽशुभम्।
निष्फलं तच्च विज्ञेयं शकुनानां विचेष्टितम्।।

एवं क्रोशं यावच्छ्रूयमाणं सफलम्, क्रोशादनन्तरं निष्फलमिति। एतदाचार्यस्य नाभिप्रेतम्। तत्रानिष्टे प्रथमशकुन इति। तत्र तस्मिन् यात्राकाले प्रथम-शकुनेऽनिष्टे अशुभे सति नृपती राजा विहितमना निर्मलचित्तः पञ्च षट् च एकादश प्राणायामान् मानयेत् पूजयेत् कुर्यादित्यर्थः।

अथ प्राणायामलक्षणमाह—

सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह।

त्रिः पठेदायतप्राणः प्राणायामः स उच्यते।।

व्याहृतयः सप्त भवन्ति। ॐ भूः। ॐ भुवः। ॐ स्वः। ॐ महः। ॐ जनः। ॐतपः। ॐसत्यम्। प्रणवः ॐकारः। शिरः आपो ज्योती रसोमृतम्। गायत्री प्रसिद्धा चतुर्विंशत्यक्षरा। आयतप्राणः परित्यक्तश्वासः। त्रिः त्रीन् वारान् पठेत्। अशुभे षोडशैव द्वितीये, द्वितीये शकुने अशुभे षोडश प्राणायामान् मानयेत् पूजयेत्, ततो व्रजेत्। अथ यदि तृतीयः शकुनोऽनिष्टोऽशुभस्तदा स्वभवनमात्मीयगृहं प्रत्यागच्छेत् प्रतीपमागच्छेदिति।।६२।।

।।इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ शाकुने वायसविरुतं नाम चतुर्नवतितमोऽध्यायः।।९४।।

काश्यपादि एकाधिक आचार्यगण एक कोश की दूरी से अधिक अर्थात् कोश भ की दूरी के पश्चात् जो शकुन के शब्द हों, उनको निष्फल बतलाते हैं। जैसा कि आचार्य काश्यप ने कहा है–

"एक कोश से अधिक दूरी पर जो भी शुभाशुभ-प्रदायक शकुनों की चेष्टायें होती हैं, उनको निष्फल समझना चाहिए"।

इस प्रकार से कोश भर तक सुने जाने वाले शकुन सफल तथा कोश भर के पश्चात् शकुन निष्फल होते हैं। यह आचार्य का अभिमत नहीं है। यात्रा-काल में प्रथमशकुन के अनिष्ट अर्थात् अशुभ होने पर राजा निर्मल मन से पाँच और छः अर्थात् ग्यारह प्राणायामों को करे अर्थात् मानित करे।

प्राणायाम के लक्षण कहते हैं–

"व्याहृति के साथ प्रणव का उच्चारण करते हुए शीर्ष सहित गायत्रीमन्त्र का तीन बार दीर्घश्वाँस के साथ उच्चारण करने को प्राणायाम कहा जाता है।"

सात व्याहृतियाँ हैं। १. ॐ भूः, २. भुवः, ३. ॐ स्वः, ४. ॐ महः, ५. ॐ जनः, ६. ॐ तपः, ७. ॐ सत्यम्। ॐकार को प्रणव कहते हैं। "आपो ज्योती रसोमृतम्"–यह गायत्री का शिर है। २४ अक्षरों वाला गायत्री मन्त्र सुप्रसिद्ध है। आयत-प्राण अर्थात् श्वाँसों को छोड़ना। इसको तीन बार पढ़े। दूसरी बार अशुभ शकुन हो, तब १६ प्राणायामों को करे, तत्पश्चात् यात्रा करे। यदि तीसरा अशुभ अर्थात् अनिष्टसूचक शकुन हो, तब अपने घर को वापस आ जाये अर्थात् उल्टे अपने घर को वापस चल पड़े।।६२।।

।।श्रीभट्टोत्पल विरचित संहिता विवृति में शाकुनान्तर्गत वायसविरुत नामक अध्याय चौरानबें की हिन्दी व्याख्या पूर्ण हुई।।९४।।

❋ ❋ ❋

।।अथ पञ्चनवतितमोऽध्यायः।।

शाकुनोत्तराध्यायः

अथ शाकुनोत्तरं व्याख्यायते।

दिग्देशचेष्टास्वरवासरर्क्षमुहूर्तहोराकरणोदयांशान्।

चरस्थिरोन्मिश्रबलाबलं च बुद्ध्वा फलानि प्रवदेद्रुतज्ञः।।१।।

शाकुनोत्तर नामक अध्याय ९४ की व्याख्या की जाती है।

दिशा, स्थान, कार्यव्यापार, ध्वनि, दिन, नक्षत्र, मुहूर्त, होरा, करण, लग्न, नवांश तथा चर, स्थिर और मिश्रसंज्ञक राशियों के बलाबल को देखकर ही शकुन-शास्त्र का ज्ञाता शुभाशुभ फलों का आदेश करे।।१।।

दिक् पूर्वाद्याङ्गारिताद्या च। देशः स्थानं शुभमशुभं वा। चेष्टा विहरणं व्यापारः। स्वरः शब्दो दीप्तः शान्तश्च। वासरो दिनम्। ग्रहचारतः शुभमशुभं च। ऋक्षं नक्षत्रं ध्रुवमृदुदारुणक्षिप्रोग्रचरसाधारणम्। मुहूर्तः शिवादिकः। होरा राश्यर्धम्, कालहोराश्च। शुभग्रहस्य सम्बन्धिन्योऽशुभस्य वा। करणं ववादिकरणं शुभमशुभं वा। उदयो लग्नम्। अंशो भागस्तेन द्रेष्काणनवांशद्वादशांशत्रिंशद्भागात्मकः। तथा चरा मेषकर्कटतुलामकराः। स्थिरा वृषसिंहवृश्चिककुम्भाः। उन्मिश्रा द्विस्वभावाः, ते च मिथुनकन्याधन्विमीनाः। एषां शकुनानां राशीनां च बलाबलं बुद्ध्वा रुतज्ञः शकुनरुतज्ञः फलानि प्रवदेद् ब्रूयादित्यर्थः।।१।।

पूर्वादि (अंगारितादि) दिशाएँ, देश अर्थात् शुभाशुभ स्थान, आङ्गिक चेष्टायें अर्थात् उनका कार्य-व्यापार, दीप्त अथवा शान्तस्वर (शब्द), रविवार आदि दिन, ग्रहगोचर के अनुसार शुभ अथवा अशुभ ग्रह, ध्रुव-मृदु-दारुण-क्षिप्र-चर-उग्र और साधारण संज्ञकनक्षत्र, शिवादिक मुहूर्त, होरा अर्थात् १५ अंशात्मक राशियों का अर्धभाग (सूर्य-चन्द्र का होरा) और काल होरा, शुभ अथवा अशुभ के सूचक, बव आदि, शुभ अथवा अशुभ करण, उदय अर्थात् तात्कालिक लग्न, अंश अर्थात् षड्वर्ग-द्रेष्काण, नवांश, द्वादशांश त्रिंशांश आदि, चर अर्थात् १/४/७/१० राशियाँ तथा स्थिर अर्थात् २.५.८.११ राशियाँ एवं द्विस्वभाव अर्थात् ३.६.९.१२ राशियाँ, इन शकुनों और राशियों के बलाबल को जानकर शकुन-शब्दों का ज्ञाता विद्वान् शुभाशुभ फलों को कहे।।१।।

अथ तद्भेदप्रदर्शनार्थमाह–

द्विविधं कथयन्ति संस्थिताना-

मागामिस्थिरसंज्ञितं च कार्यम्।

नृपदूतचरान्यदेशजाता-

न्यभिघातः स्वजनादि चागमाख्यम् ।।२।।

शकुन के भेदों को कहते हैं–

प्राप्त (उपस्थित) शकुनों का तथा आगामी (भविष्य) और स्थिर (वर्तमान) संज्ञक-काल से, दो प्रकार का भेद करना चाहिए। राजा, गुप्तचर, परदेश से सम्बन्धित उपद्रवों और स्वजनों के आगमन का ज्ञान इनसे करना चाहिए।।२।।

शकुनसंस्थितानमेकदेशसंस्थानां पुंसां द्विविधं द्विप्रकारं कार्यं प्रवदन्ति कथयन्ति। कीदृशम्? आगामि स्थिरसंज्ञितं च। आगाम्येष्यत्। स्थिरं च वर्तमानमतीतं वा। तथान्यानि कार्याणि नृपदूतचारान्यदेशजातानि। नृपो राजा, दूतो गमागमिकः, चरः प्रसिद्धो गूढपुरुषः। अन्यदेशः परदेशः। एभ्यो जातान्युत्पन्नानि कथयन्ति। तथाभिघात उपद्रवः। स्वजनानां बन्धुसुहृदां चागम आगमनं तस्य चागतस्याख्यां नाम कथयन्ति।।२।।

शकुन के लिए उपस्थित व्यक्ति के दो प्रकार के कार्य कहे जाते हैं। कौन से कार्य? आगामी और स्थिरसंज्ञक। आगामी अर्थात् भविष्यकालिक और स्थिर अर्थात् वर्तमान अथवा भूतकालिक। नृप-दूत चरादि कार्यों का भी विचार करें। राजा, दूत अर्थात् सन्देशवाहक, चर अर्थात् गुप्त सूचना देने वाला, अन्यदेश अर्थात् परकीय देश (राज्य) इन सभी से होने वाले उपद्रवों का विचार। स्वजनों अर्थात् बन्धुओं और मित्रों के आगमन को भी इसके अन्तर्गत ग्रहण किया जाता है।।२।।

अथ स्थिरचराणां ज्ञानमाह–

उद्बद्धसंग्रहणभोजनचौरवह्नि–

वर्षोत्सवात्मजवधाः कलहो भयं च।

वर्गः स्थिरोऽयमुदयेन्दुयुते स्थिरर्क्षे

विद्यात् स्थिरं चरगृहे च चरं यदुक्तम् ।।३।।

स्थिर एवं चर का ज्ञान बतलाते हैं–

उद्बद्धता (जड़ता), संग्रह, भोजन चोर, अग्नि, वर्षा, उत्सव, संतान, वध, कलह और भय; ये सभी स्थिर वर्ग के अन्तर्गत आते हैं। स्थिर लग्न यदि चन्द्र युक्त हो तथा स्थिर राशि हो; तो निश्चित ही यह स्थिर अर्थात् अद्यतन वर्तमान अथवा पूर्वभूत का विषय है। यदि चर राशि और शकुन हो तो चर अर्थात् भविष्यकाल का विषय कहा जाता है।।३।।

उद्बद्धं संलग्नं तत्रैव संस्थितं गमागमवर्जितम्। संग्रहणं संयोगः केनचित् सह। भोजनमशनम्। चौरास्तस्कराः वह्निरग्निः। वर्षो वर्षणम्। उत्सवो विवाहादिः। आत्मजः पुत्रः। वधो मरणम्। एते। तथा कलहो डमरम्। भयं भीतिश्च। अयं वर्गः स्थिरः। चेच्छब्दोऽत्र लुप्तो द्रष्टव्यः। एष वर्गो यदि स्थिर-स्थानेषूत्पन्नः स्थिरस्थानस्थितेन शकुनेन सूचितस्तदा चरसंज्ञः। एदतुक्तं भवति-प्रागुक्तेन चेष्टितन वक्ष्यमाणेनैव यद्येतानि कार्याणि शकुनेन सूचितानि, तदैतानि वृत्तान्युत वैतानि एष्याणीत्येतदर्थमुक्तम्। उदयेन्दुयुते स्थिरर्क्ष इति। यद्येष वर्गः स्थिरो भवति तथोदयलग्ने स्थिरराशिर्भवति। इन्दुयुतं चन्द्रसंयुक्तं स्थिरर्क्षं स्थिरराशिर्भवति, तदैव तत्स्थितं वर्तमानं तस्मिन्नेवाहनि भवति, भूतं वेति विन्द्याज्जानीयात्। चरगृहे लग्ने चरराशाविन्दुसंयुक्ते चरस्थानस्थे च शकुने यदुक्तमुद्बन्धादि तत्सर्वमेव चरं विन्द्यात् पुरस्ताद्भविष्यतीति।।३।।

उद्बद्ध अर्थात् संलग्न–जो कि आवागमन से रहित सुस्थिर हो, संग्रहण अर्थात् किसी के साथ संलग्न, भोजन, चोर (तस्कर), अग्नि, वर्षा, विवाहादि उत्सव कर्म, पुत्र, वध (हत्या)-अथवा मरण, कलह (विवाद) और भय; ये सभी विषय स्थिर-वर्ग के होते हैं। 'चेत्' अर्थात् "यदि" शब्द का प्रयोग इस पद में लुप्त है। स्थिर स्थान में स्थित शकुन के द्वारा ये विषय चरस्थानीय कहे जाते हैं। इसका तात्पर्यार्थ यह है कि पूर्वोक्त तथा आगे कहे जाने वाले शकुनों के द्वारा सूचित होने पर ये सभी विषय 'एष्य' अर्थात् भविष्य में होते हैं। ये सभी वर्ग स्थिर होते हैं, यदि स्थिरराशि का स्थिरलग्न हो। चन्द्रमा स्थिर राशि का हो; तब ये विषय वर्तमानकाल में उसी दिन फलित होते हैं, अथवा कुछ काल पहले भूतकाल में घटित हो चुके होते हैं, यह समझना चाहिए। चरराशि का लग्न हो और चरराशि का चन्द्रमा हो तथा चरस्थानीय शकुन हो; तब पूर्वोक्त बन्धादि सभी विषय चर अर्थात् भविष्य में घटित होने वाले होते हैं।।३।।

अथ स्थिरचरयोर्लक्षणमाह–

स्थिरप्रदेशोपलमन्दिरेषु सुरालये भूजलसन्निधौ च।
स्थिराणि कार्याणि चराणि यानि चलप्रदेशादिषु चागमाय।।४।।

स्थिर एवं चर का लक्षण कहते हैं–

स्थिर प्रदेश-पथरीला स्थान, मन्दिर (गृह), देवालय, भूमि एवं जल के समीप के स्थान होते हैं और इनका स्थिरकाल अर्थात् भूतकाल होता है। चल प्रदेशों में उत्पन्न शकुन, चर अर्थात् भविष्यत्काल में होते हैं।।४।।

स्थिरप्रदेशः स्थिरस्थानम्। निश्चलम्। उपलोऽश्म। मन्दिरं गृहम्। एतेषु

स्थानेषु। सुरालये देवगृहे। भूजलसन्निधौ भूमौ तथा जलसन्निधौ तत्समीपे। एतेषु स्थानेषु शकुनेषु स्थिराणि कार्याणि शुभाशुभानि भवन्ति। ये शकुनाश्चल-प्रदेशादिषु चलेषु स्थिरेषु प्राणिष्वादिग्रहणाच्चलेषु तृणकाष्ठादिषु यानि चराणि, ते आगमायागामिने पक्षावसानानि पुनः पुरस्ताद्भविष्यन्ति।।४।।

स्थिर-प्रदेश अर्थात् गतिहीन स्थान, उपल अर्थात् पत्थर, मन्दिर अर्थात् गृह, सुरालय अर्थात् देवमन्दिर, भूमि एवं जल का समीपवर्ती स्थान; इन स्थानों पर शकुन के होने पर स्थिर कार्यों के शुभाशुभ फल होते हैं। जो शकुन चल प्रदेशों में (आदि शब्द से चल प्राणियों में) होते हैं, वे चर अर्थात् आगामी काल (पक्षान्त) में होते हैं।।४।।

अथ वर्षज्ञानमाह–

आप्योदयर्क्षक्षणदिग्जलेषु
पक्षावसानेषु च ये प्रदीप्ताः।
सर्वेऽपि ते वृष्टिकरा रुवन्तः
शान्तोऽपि वृष्टिं कुरुतेऽम्बुचारी।।५।।

वर्षा का ज्ञान कहते हैं–

जलराशि का लग्न, जलीय-नक्षत्र, जल-मुहूर्त जल की दिशा, जलीय-स्थान, पक्षों के अन्त (१५-३० तिथि) तथा प्रदीप्त शकुन; ये सभी वर्षाकारक होते हैं। जलचारी शकुन ध्वनि करते हों अथवा शान्त हों, तब भी इन योगों से वर्षा होती है।।५।।

आप्योदयाः कर्कटमकरमीनाः। आप्यमृक्षं पूर्वाषाढा शतभिषक् च। आप्यं मुहूर्तं जलसंज्ञं वारुणं च। आप्या दिग्वारुणी यत्र जलं सन्निहितं तज्जलस्थानम्। एतेष्वाप्योदयर्क्षक्षणदिग्जलेषु ये स्थिता उत्पाताः शकुनास्तथा पक्षावसाने अमावस्यायां पौर्णमास्यां वाऽन्ते ये स्थितास्ते च दीप्ता देवदीप्ताः क्रियादीप्ताश्च भूता रुवन्तः क्रोशन्तः सर्वे निशेषा अपि वृष्टिकरा वृष्टिं वर्षणं कुर्वन्ति। अम्बुचारी यः शकुनो जलचरः शान्तोऽप्याप्यादिषु स्थितो वृष्टिं कुरुते।।५।।

जल-लग्न अर्थात् कर्क, मकर और मीन राशियाँ, जलीय-नक्षत्र अर्थात् पूर्वाषाढ़ और शतभिषा नक्षत्र, जलीय मुहूर्त अर्थात् जलसंज्ञक वारुण मुहूर्त, जलीय-दिशा अर्थात् पश्चिम (वारुणी) दिशा, जहाँ पर जल स्थित हो, वे जल स्थान–इन सभी जल-लग्नादि में स्थित दीप्त अर्थात् देवदीप्त और क्रियादीप्त तथा क्रोशमान अर्थात् रोने की ध्वनि करने वाले; ये सभी योग्यवर्षा के कारक होते हैं। जो जलचारी शकुन हैं, वे शान्त रहने पर भी जल-लग्नादि होने पर वर्षा करते हैं।।५।।

अथाग्नेयभयदोषज्ञानमाह–

आग्नेयदिग्लग्नमुहूर्त्तदेशे-
ष्वर्कप्रदीप्तोऽग्निभयाय रौति।
विष्ट्यां यमर्क्षोदयकण्टकेषु
निष्पत्रवल्लीषु च दोषकृत् स्यात्।।६।।

अग्निभयकारक दुर्योगों को कहते हैं-

अग्नि-दिशा (आग्नेयकोण), अग्निलग्न, अग्नि-मुहूर्त, अग्नि-स्थान; इनमें सूर्य से प्रदीप्त शकुन रुदन करता हो, तब अग्नि-भय का कारण होता है। विष्टि अर्थात् भद्राकरण में, यमराशि के लग्न में, कँटीले वृक्षों में, पत्रविहीन वृक्षों और लताओं में शकुन होने पर अग्निदोष उत्पन्न होता है।।६।।

आग्नेयी दिक् पूर्वदक्षिणा। आग्नेयलग्नाः क्रूरराशयः। यथा मेषसिंह-वृश्चिकमकरकुम्भाः। आग्नेयो मुहूर्तोऽग्निनामा। आग्नेयमपि नक्षत्रं कृत्तिकाः। आग्नेयो देशो यत्राग्निरस्ति। एतेषु स्थानेष्वर्कप्रदीप्तः शकुनो विरौति क्रोशति यदि तदाग्निभयाय भवति। विष्ट्यामिति। विष्ट्यां करणे। यमः सौरः। तस्यर्क्षे मकरकुम्भौ। तयोरुदये। तथा कण्टकेषु कण्टकिवृक्षेषु। तथा ष्पित्रासु पत्र-रहितासु वल्लीषु स्थितोऽर्कप्रदीप्तो दोषकृद्दोषं करोति।।६।।

आग्नेयी अर्थात् पूर्व-याम्य दिशा कोण (अग्निकोण) की दिशा, आग्नेय लग्न अर्थात् मेष-सिंह-वृश्चिक-मकर और कुम्भ (ये क्रूरराशियाँ), अग्निसंज्ञक मुहूर्त अर्थात् अग्निमुहूर्त, आग्नेयनक्षत्र अर्थात् कृत्तिकानक्षत्र, जहाँ पर अग्नि विद्यमान हो, वह अग्नि-प्रदेश; इन स्थानों पर सूर्य-प्रदीप्त शकुन शब्द करता हो, तो वह अग्नि-भय का कारक होता है। विष्टि (भद्रा) करण, यम अर्थात् शनि की राशियाँ मकर और कुम्भ; ये उदयलग्न में हों तथा काँटे वाले वृक्षों और बिना पत्ते वाली लताओं पर सूर्यदीप्त शकुन हो, तो वह दोषकारक होता है।।६।।

अथ कलहज्ञानमाह-

ग्राम्यः प्रदीप्तः स्वरचेष्टिताभ्या-
मुग्रो रुवन् कण्टकिनि स्थितश्च।
भौमर्क्षलग्ने यदि नैर्ऋतीं च
स्थितोऽभितश्चेत् कलहाय दृष्टः।।७।।

कलहसूचक शकुन को कहते हैं-

ग्राम्य-शकुन अपने शब्द एवं चेष्टाओं से प्रदीप्त होकर तीव्र ध्वनि करता हुआ कँटीले वृक्ष पर नैर्ऋत्य दिशा (दक्षिण-पश्चिम कोण) में स्थित हो और भौम का लग्न

(१,८) हो, तब वह कलहकारक होता है, ऐसा दखा गया है।।७।।

ग्रामे भवो ग्राम्यः शकुनः, स च स्वरचेष्टिताभ्यां प्रदीप्तः। स्वरेण शब्देन चेष्टया वा प्रदीप्तः। उग्रस्तीव्रो रुवन् क्रोशन्। कण्टकिनि सकण्टके वृक्षे स्थितः। भौमर्क्षे मेषवृश्चिकौ तयोरन्यतमे लग्ने। स च शकुनो यदि नैर्ऋतीं च स्थितो भवति, नैर्ऋत्यां दिशि समवस्थितः। अभितः सम्मुख उभयतश्चेद्यदि वामदक्षिणपार्श्वयोस्तदा स दृष्टोऽवलोकितः कलहाय भवति, कलहं करोति।।७।।

गाँव में उत्पन्न होने वाला ग्राम-शकुन, वह स्वर से अर्थात् अपने शब्दों से तथा चेष्टाओं से प्रदीप्त (उद्दीप्त) होकर काँटा युक्त वृक्ष पर स्थित होकर मंगल के लग्न अर्थात् मेष अथवा वृश्चिक में से किसी भी एक लग्न के उदित होने पर, नैऋत्यकोण की दिशा में स्थित होकर सम्मुख तथा बाएँ और दाहिने देखता हुआ स्थित रहे, तब वह कलह कराता है।।७।।

अथ संग्रहणमाह—

लग्नेऽथवेन्दोर्भृगुभांशसंस्थे
विदिक्स्थितोऽधोवदनश्च रौति।
दीप्तः स चेत् संग्रहणं करोति
१योन्या तया या विदिशि प्रदिष्टा।।८।।

संयोगकारक शकुन बतलाते हैं—

कर्कलग्न हो और शुक्र का नवमांश (तुला) हो तथा शकुन कोण-दिशा में नीचे मुख कर स्थित होता हुआ शब्द करे और दीप्त हो, तब वह स्त्री-संयोग कराता है। "अन्या" अर्थात् परकीया स्त्री से, उस कोण में जो रहती हो, उससे संयोग कराता है।।८।।

अथवा इन्दोर्लग्ने कर्कटे तस्मिंश्च भृगुभांशसंस्थे। भृगोः शुक्रस्य भांशो नवांशको भृगुभांशः। कर्कटस्य तुलनवांशक इत्यर्थः। तस्मिल्लग्नस्थे शकुनो विदिक्स्थितो विदिशमवस्थितः। तत्र चाधोवदनोऽधोमुखश्च विरौति शब्दं करोति। स चेद्यदि दीप्तः स्थानदीप्तः शब्ददीप्तश्च, तदा संग्रहणं संयोगं करोति, कया? स्त्रिया सह। योन्या तया वा विदिशि प्रदिष्टा तस्यां विदिशि यस्या योनिरुत्पत्तिः प्रदिष्टोक्ताः स्त्रीणां विकल्पे बृहती कुमारीत्यादि। तया सह संग्रहणं करोति। केषाञ्चित् पाठः योऽन्योऽनुयायाद्दिशि सम्प्रदिष्टः। तस्यां दिशि अनुपश्चात् सम्प्रदिष्टः सम्यक्प्रेषितो योऽन्योऽपरो यायाद् गच्छेत् तेन सह संयोग इति।।८।।

---

१. योऽन्योऽनुयायाद् दिशि सम्प्रदिष्ट इति पाठान्तरम्।

अथवा दूसरा योग कहते हैं। चन्द्रमा का लग्न अर्थात् कर्क लग्न हो, शुक्र का नवांश अर्थात् तुला का नवांश हो। इस प्रकार का लग्न हो और शकुन विदिशा (कोणदिशा) में स्थित हो तथा नीचे मुखकर शब्द करता हो, एवं वह दीप्त अर्थात् स्थान-दीप्त और शब्द-दीप्त हो, तब संयोग कराता है। किसके साथ? स्त्री के साथ संयोग कराता है। उस कोण की दिशा में जिस प्रकार की योनि की उत्पत्ति पूर्व में कही गई है उस प्रकार की स्त्री से संयोग कराता है। स्त्री के विकल्प में "बृहती कुमारी" का संयोग समझना चाहिए। इसके पाठान्तर का अर्थ करते हुए कहा जाता है कि, जो अनु अर्थात् पश्चात् प्रेषित हो, जो कोई दूसरा व्यक्ति बाद में आवे-उसके साथ संयोग (मिलाप) कराता है।।८।।

विशेष व्याख्या–

'बृहती' शब्द कण्टकारी (भटकटैया) के लिए अमरकोश (२.४.९३) में वर्णित है। शाश्वतकोशकार में क्षुद्रास्त्री का व्यवहार माना है। मेदिनी कोश में क्षुद्रा, नटी और वेश्या अर्थ में यह शब्द ग्राह्य है।

पुनरप्याह–

पुंराशिलग्ने विषमे तिथौ च
दिक्स्थः प्रदीप्तः शकुनो नराख्यः।
वाच्यं तदा संग्रहणं नराणां
मिश्रे भवेत् पण्डकसम्प्रयोगः।।९।।

और भी कहते हैं–

पुरुषसंज्ञक लग्न एवं विषम संख्यक तिथियों में तथा पूर्वादि प्रमुख चार दिशाओं में यदि पुरुषशकुन प्रदीप्त हो, तब पुरुष का संयोग कहना चाहिए। लग्न, तिथि आदि के मिश्रित योग में पण्डक अर्थात् नपुंसक के साथ संयोग कहना चाहिए।।९।।

पुंराशयो मेषादयः षड् विषमा मेषमिथुनसिंहतुलाधन्विकुम्भाः विषमास्तिथयः संख्यया प्रतिपत् तृतीया पञ्चमी सप्तमी नवमी एकादशी त्रयोदशी पञ्चदशी चेति। नराख्यः पुरुषाख्यः शकुनो दिक्स्थितो दिशि पूर्वस्यां दक्षिणस्यां पश्चिमायामुत्तरस्यां वा स्थितः प्रदीप्तश्च यदि भवति तदा नराणां पुरुषाणां वा संग्रहणं संयोगो वाच्यं वक्तव्यम्। मिश्रे भवेत् पण्डकसम्प्रयोगः, पुंराश्यादिषु वर्गे मिश्रे स्थिते पुरुषराशिवर्गे लग्ने समायां तिथौ व्यत्यये वा। विदिक्स्थितः पुरुषः शकुनो विदिक्स्थितः स्त्रीसंज्ञो वा तदा पण्डकसम्प्रयोगो नपुंसकेन सह समायोगो भवति।।९।।

पुरुषराशि अर्थात् छः विषम १,३,५,७,९,११ राशियाँ, विषम तिथि अर्थात् १,३,५,७,९,११,१३,१५ तिथियाँ, नर अर्थात् पुरुष-वाचक शकुन, मुख्य दिशा में स्थित अर्थात् पूर्वदिशा, दक्षिणदिशा, पश्चिमदिशा अथवा उत्तरदिशा में स्थित और प्रदीप्त हो, तब पुरुषों का संयोग कहना चाहिए। पुरुष राश्यादि में मिश्रित हो अर्थात् पुरुषराशि का लग्न और समतिथि हो, अथवा इसके विपरीत हो, विदिक् अर्थात् कोणस्थ दिशाओं में पुरुषशकुन अथवा कोणदिशा में स्त्रीसंज्ञक शकुन हो तब नपुंसक के साथ संयोग होता है।।९।।

विशेष व्याख्या–

पण्डक–इसका अर्थ नपुंसक है। अमरकोश (२.९.३९) में कहा गया है– तृतीया प्रकृतिः शण्ढः क्लीबः पण्डो नपुंसकम्।

पुनरप्याह–

एवं रवेः क्षेत्रनवांशलग्ने
लग्ने स्थिते वा स्वयमेव सूर्ये।
दीप्तोऽभिधत्ते शकुनो विरौति
पुंसः प्रधानस्य हि कारणं तत्।।१०।।

पुनः कहते हैं–

इस प्रकार के योग में रवि-राशि सिंह का लग्न अथवा सिंह का नवमांश हो, अथवा सूर्य स्वयं ही लग्नस्थ हो और दीप्तशकुन शब्द करता हो, तब प्रधानपुरुष का आगमन होता है।।१०।।

पुंराशिवर्ग इति सर्वमनुवर्तते। एवमनेन प्रकारेण रवेरादित्यस्य क्षेत्रनवांशलग्ने। रविक्षेत्रं सिंह एव। तात्कालिकगते रविक्षेत्रे सिंहेऽथवान्यस्मिन् राशौ लग्नगते तत्काले सिंहनवांशके। अथवा स्वयमेव सूर्ये रवौ तात्कालिके लग्ने स्थिते दीप्तः शकुनो विरौति क्रोशते। तदा प्रधानस्य मनुष्यस्य तत्कारणमागमनमभिधत्ते करोति।।१०।।

पुरुषराशि एवं पुरुषवर्ग का यहाँ पर सर्वत्र अन्वय करना चाहिए। इस प्रकार से रवि का क्षेत्र सिंह तात्कालिक लग्न हो, अथवा किसी भी दूसरे लग्न में सिंह का नवमांश चल रहा हो, अथवा सूर्य तात्कालिक लग्न में स्थित हो और दीप्त शकुन ध्वनि करे तब इस योग के कारण प्रधानव्यक्ति का आगमन होता है।।१०।।

अथ प्रकारान्तरेण कर्मणां विधानमाह–

प्रारम्भमाणेषु च सर्वकार्येष्वर्कान्विताद्भाद्गणयेद्विलग्नम्।
सम्पद्विपञ्चेति यथा क्रमेण सम्पद्विपच्चेति तथैव वाच्या।।११।।

प्रकारान्तर से कार्यों का फल विधान कहते हैं–

सूर्यस्थ लग्न (राशि) से, प्रारम्भ किये गये सभी प्रकार के कार्यों के आरम्भ-लग्न तक, गणना करें। सूर्य राशि सम्पत् तथा तत्पश्चात् विपत् इस क्रम से गणना कर कार्य के सम्पत् अथवा विपत् का आदेश करें।।११।।

सर्वकार्येषु सर्वकर्मसु प्रारम्भमाणेषु क्रियमाणेषु अर्कान्विताद् भात्, अर्क आदित्यस्तेनान्वितं युक्तं यद्भं राशिस्तस्मादारभ्य विलग्नराशिं यावद् गणयेदिति सम्पद्विपच्चेति। यस्मिन् राशावर्कः स्थितः स सम्पत्, ततो द्वितीयो विपत्संज्ञः, ततस्तृतीयः सम्पत्संज्ञः। एवं क्रमेण गणयेद्यावल्लग्नराशिम्। येन लग्नप्रारम्भस्तथा तेनैव प्रकारेण कर्मणां सम्पद्विपच्चेति वाच्या। एवं कार्याणां सम्पत्तिर्विपत्तिश्च विज्ञातव्या।।११।।

सभी प्रकार के क्रियमाण कार्यों के प्रारम्भ होने पर सूर्याधिष्ठित राशि से प्रारम्भ कर कार्यारम्भ लग्न तक सम्पत्-विपत् की गणना करें। तात्पर्य यह है कि जिस राशि में सूर्य स्थित हो वह सम्पत् उससे दूसरी राशि विपत्, तीसरी राशि सम्पत् पुनः चौथी राशि विपत् इत्यादि क्रम से लग्नराशि तक गणना करें। जिस लग्न में कार्यारम्भ हो उसके सम्पत् अथवा विपत् क्रम के होने पर, उस कार्य का परिणाम सम्पत् युक्त अथवा विपत् युक्त कहना चाहिए। कार्यों की सम्पत्ति अथवा विपत्ति का ज्ञान इस प्रकार किया जाना चाहिए।।११।।

विशेष व्याख्या–

।।स्पष्टार्थ चक्र।।

सूर्यराशि से	१	२	३	४	५	६
फल	सम्पत्	विपत्	सम्पत्	विपत्	सम्पत्	विपत्
सूर्यराशि से	७	८	९	१०	११	१२
फल	सम्पत्	विपत्	सम्पत्	विपत्	सम्पत्	विपत्

सूर्यराशि से कार्यारम्भ लग्नराशि तक गणना कर एकादि जो भी संख्या आवे उसका फल इस चक्र से ज्ञात करें।

अथागतस्याकृतिज्ञानमाह—

काणेनाक्ष्णा दक्षिणेनैति सूर्ये
चन्द्रे लग्नाद् द्वादशे चेतरेण।
लग्नस्थेऽर्के पापदृष्टेऽन्ध एव
कुब्जः स्वर्क्षे श्रोत्रहीनो जडो वा।।१२।।
क्रूरः षष्ठे क्रूरदृष्टो विलग्नाद्
यस्मिन् राशौ तद् गृहाङ्गे व्रणोऽस्य।
एवं प्रोक्तं यन्मया जन्मकाले
चिह्नं रूपं तत्तदस्मिन् विचिन्त्यम्।।१३।।

आगन्तुक की आकृति का ज्ञान बतलाते हैं–

यदि लग्न से बारहवें भाव में सूर्य हो तो दाहिने नेत्र के काने व्यक्ति से संयोग होता है, तथा लग्न से द्वादश स्थान में चन्द्रमा के होने पर पर बाएँ नेत्र से काने व्यक्ति से संयोग होता है। लग्नगत सूर्य पापग्रह से दृष्ट हो, तो अन्धे से संयोग होता है। सूर्य स्वगृही लग्न में हो तब कुबड़े, अन्धे अथवा मूर्ख से संयोग होता है॥१२॥

लग्न से छठे भाव में पापग्रह यदि क्रूरग्रह से दृष्ट हो, तब जिस राशि में छठा भाव हो उस राशि के अङ्ग पर वर्ण का चिह्न कहना चाहिए। कालनर का अंग विभाग कर जन्मकालिक व्रणादि का जो विचार किया जाता है, वही विचार यहाँ पर भी अंगों के लक्षणों हेतु करना चाहिए॥१३॥

काणेनाक्ष्णा दक्षिणेनेति। येन सह संयोगो ज्ञातः स च कीदृगिति। यदि तात्कालिकाल्लग्नात् सूर्य आदित्यो द्वादशे स्थाने स्थितः, स पुरुषो दक्षिणेनाक्ष्णा काण एवाऽऽगच्छति। चन्द्रे लग्नाद् द्वादशे स्थाने स्थिते चेतरेण वामेनाक्ष्णा काण एवेति। अर्थादिवार्कचन्द्रयोर्द्वयोरपि द्वादशयोरन्ध् एव। लग्नस्थेऽर्के प्राग्लग्नस्थिते सूर्ये पापाभ्यां भौमसौराभ्यामीक्षितेऽन्ध एव नेत्रहीनः। स्वर्क्षे सिंहलग्नगते तत्रस्थे चार्के कुब्जः श्रोत्रहीनो वधिरो जडो वा मूर्खः प्रभवति।।१२।।

जिसके साथ संयोग होना है, वह किस प्रकार का होगा यह विचार करते हैं। यदि तात्कालिकलग्न से सूर्य द्वादशस्थान में स्थित हो, तो वह पुरुष दक्षिणनेत्र से काना होता है। चन्द्रमा यदि लग्न से द्वादश स्थान में हो तो वह वाम-नेत्र से काना

होता है। यदि द्वादशस्थान में सूर्य और चन्द्रमा दोनों हों, तब अंधा होता है–यह भी तात्पर्यार्थ हैं।, लग्नस्थित सूर्य पापग्रहों अर्थात् मंगल और शनि से दृष्ट हो, तो वह नेत्रहीन होता है। तात्कालिक सिंहलग्न में सूर्य हो, तब वह संयोगी व्यक्ति कुबड़ा, बहरा अथवा जड़ अर्थात् मूर्ख होता है॥१२॥

क्रूरः षष्ठ इति। विलग्नात् स्पष्टलग्नात् षष्ठस्थाने क्रूरः पापग्रहः आदित्याङ्गारकशनैश्चारणामन्यतमो भवति। स च क्रूरदृष्टः पापावलोकितो यदि भवति, तदा तद्गृहाङ्गे। स च षष्ठस्थानस्थो राशिः कालपुरुषस्य यस्मिन् ''कालाङ्गानि वराङ्गम्'' [१]इत्यादिना ग्रन्थेनोक्तः। तस्मिन्नङ्गे तस्य व्रणो वक्तव्यः। एवमनेन प्रकारेण जन्मकाले जातकसमये यदुक्तं कथितं चिह्नं लक्ष्म रूपमाकारं तत्सर्वमस्मिन् प्रकरणे चिन्त्यं चिन्तनीयम्। यथा–''त्रिकोणगे ज्ञे विबलैस्तथापरैर्मुखाङ्घ्रिहस्तैर्द्विगुणैस्तदा भवेत्''[२]। यथा–

सौम्यर्क्षांशे[३] रविजरुधिरौ चेत् सदन्तोऽत्र जातः
कुब्जः स्वर्क्षे शशिनि तनुगे मन्दमाहेयदृष्टे।
पङ्गुर्मीने यमशशिकुजैर्वीक्षिते लग्नसंस्थे
सन्धौ पापे शशिनि च जडः स्यान्न चेत् सौम्यदृष्टिः॥
सौरशशाङ्कदिवाकरदृष्टे वामनको मकरान्त्यविलग्ने।
धीनवमोदयगैश्च दृकाणैः पापयुतैरभुजाङ्घ्रिशिराः स्यात्॥
रविशशियुते सिंहे लग्ने कुजार्किनिरीक्षिते
नयनरहितः सौम्यासौम्यैः सबुद्बुद्लोचनः।
व्ययगृहगतश्चन्द्रो वामं हिनस्त्यपरं रवि-
रशुभगदिता योगा याप्या भवन्ति शुभेक्षिताः।
एवमादि। तथानिष्टयोगाध्यायोक्तं सर्वं चिन्तनीयमिति॥१३॥

स्पष्टलग्न से षष्ठभाव में क्रूरग्रह अर्थात् रवि, भौम और शनि में से कोई भी ग्रह हो और वह पापग्रह से देखा जाता हो, तब वह षष्ठ भागवत राशि काल-पुरुष के जिस अंग का प्रतिनिधित्व करती है, उस अंग पर उस व्यक्ति को व्रणादि चिह्न होते हैं। इस प्रकार से जातक के जन्मकालिक कालपुरुष के अंगों के अनुसार जिन

---

१. बृहज्जातके १ अध्यायस्य ४ श्लोकः।

२. बृहज्जातके ४ अध्यायस्य १७ श्लोकः।

३. बृहज्जातके ४ अध्यायस्य १८-२० श्लोकाः।

चिन्हादिकों का कथन है, उन सभी का इस प्रकरण में विचार करना चाहिए। जैसा कि "त्रिकोण में बुध स्थित हो तथा अन्य ग्रह निर्बल हों, तब मुख, हस्तादि पर द्विगुणित व्रण का होना कहा गया है।" जैसा कि–

यदि बुध की राशि और बुध के नवमांश में शनि और मंगल हों तब जातक दाँतों सहित पैदा होता है। चन्द्रमा अपनी राशि कर्क का लग्नस्थ हो तथा शनि और मंगल से देखा जाता हो, तब जातक कुबड़ा होता है। मीन लग्न हो और शनि, चन्द्र तथा मंगल से वह दृष्ट हो, तब जातक लंगड़ा होता है। लग्न की सन्धि में पापग्रह तथा चन्द्रमा हो तथा शुभग्रह की दृष्टि उस पर न हो, तब जातक जड़ (मूर्ख) होता है।

मकर अथवा मीन लग्न हो तथा वह शनि, चन्द्र और रवि से दृष्ट हो, तब जातक वामन (छोटा कद वाला) होता है। लग्न से पञ्चम अथवा नवम द्रेष्काण पापयुक्त हो, तब जातक बाँह और कन्धे तथा शिराओं से रहित होता है। सिंहलग्न हो तथा वह रवि-चन्द्र से युक्त हो और वह मंगल तथा शनि से दृष्ट हो, तब वह जातक नेत्रहीन (अन्धा) होता है। शुभाशुभ मिश्रित ग्रहों से दृष्ट होने पर जातक बुद्-बुद् नेत्रों वाला अर्थात् आँख भीचने वाला होता है। व्ययभाव में स्थित चन्द्रमा वामनेत्र का विनाशक तथा व्ययस्थ सूर्य दक्षिण-नेत्र का का विनाशक होता है। ये अशुभ योग शुभग्रहों की दृष्टि होने पर अल्पफल देते हैं, अथवा इनका अशुभफल नहीं होता है।

इस प्रकार के अन्य फल भी जो कि अनिष्टाध्याय में कहे गये हैं, उन सबका विचार करना चाहिए।।१३।।

विशेष व्याख्या–

कालपुरुषाङ्ग विचार 'जातक पारिजात' ग्रन्थ के अनुसार मेषादि राशियों के क्रम से निम्नवत् है–१. शिर, २. मुखभाग, ३ वक्ष, बाहु, ४. हृदय, ४. उदर, कुक्षि, ६. कटि, ७. वस्ति, ८. लिङ्ग, ९. उरू, १०. जानु, ११. जंघा, १२. चरण।

❄ ❄ ❄

यवनेश्वरकृत अक्षरकोश

(अथाऽऽगतस्याख्याज्ञानमचार्यः करोति। तच्चाल्पबहुलं स्वल्पग्रंथं मृदुबुद्धीनाम-गम्यतोऽस्माभिस्तदेव बोधियात्रायां [1]यवनेश्वरकृतश्चाक्षरकोशो व्याख्यायते।

आगन्तुक के विषयवस्तु के ज्ञान को अब आचार्य कहते हैं। यह ज्ञान लघुग्रन्थ अर्थात् संक्षिप्तरूप में मन्दबुद्धि के छात्रों द्वारा बोधगम्य नहीं है। इसको हम 'बोधियात्रा' में यवनेश्वर कृत अक्षरकोश के विषय का यहाँ पर व्याख्या करते हैं।

तत्रादावेव प्रयोजनप्रदर्शनार्थमाह—

अतः परं लोकनिरूपितानि
द्रव्येषु नानाक्षरसंग्रहाणि।
इष्टप्रणीतानि विभाजितानि
नामानि केन्द्रक्रमशः प्रवक्ष्ये।।१।।

प्रारम्भ में इसका प्रयोजन कहते हैं—

एतपश्चात् लोक में निरूपित द्रव्यों के निमित्त विविध वर्णों के संग्रह को, जो कि श्रेष्ठ विद्वानों द्वारा कहा गया तथा विभक्त किया गया है, उसे केन्द्रादि के क्रम से कह रहा हूँ।।१।।

अतोऽस्मात् प्रश्नज्ञानात् परमनन्तरं लोकनिरूपितानि लोकैर्जनैर्निरूपितानि सर्वलोकप्रसिद्धानि द्रव्येषु धातुमूलजीवेषु नानाक्षरेभ्योऽनेकप्रकारवर्णेभ्यः संग्रहो येषां तानि। संग्रह एकीकरणम्। इष्टप्रणीतानि, इष्टैराप्तैर्नारायणार्कवसिष्ठपराशरमयप्रभृतिभिः प्रणीतानि निर्मितानि। विभाजितानि विभागीकृतानि नामानि संज्ञारूपाण्यभिधानानि केन्द्रक्रमशश्चतुष्टयपरिपाट्या प्रवक्ष्ये कथयिष्ये।।१।।

इस प्रश्नज्ञान के अनन्तर लोकप्रसिद्ध धातु, मूल और जीव; इन तीन द्रव्यों से विविध वर्णों द्वारा संग्रह अर्थात् एकीकरण को कहता हूँ। यह इष्ट प्रणीत अर्थात् आप्त पुरुषों—नारायण, सूर्य, वशिष्ठ, पाराशर और मय आदि के द्वारा, निर्मित है। यह विविध क्रमों में विभक्त और विविध संज्ञाओं से निर्दिष्ट तथा केन्द्रादि चतुष्टय (१,४,७,१०) की परम्परानुसार है, जिसको यहाँ कहा जायेगा।।१।।

---

१. यवनेश्वरकृत इति घ. पु. पाठः।

तत्र क्रमज्ञानमाह–

लग्नाम्बुसंस्थास्तनभःस्थितेषु
क्षेत्रेषु ये लग्नगता गृहांशाः।
तेभ्योऽक्षराण्यात्मगृहाश्रयाणि
विन्द्याद् ग्रहाणां स्वगणक्रमेण।।२।।

क्रमज्ञान को बतलाते हैं–

उदयलग्न, चतुर्थ, सप्तम और दशम स्थान में स्थित राशियों के गृहांश अर्थात् मेषादि राशियों के नवमांश, जो तात्कालिक लग्नादि में प्राप्त हों, उन राशियों के अंशों में अक्षरों को स्वभवन के अनुसार निर्धारित किया जाता है। सूर्यादि ग्रहों के आत्मगृह अर्थात् स्वराशि को पूर्वपरम्परा के अनुसार ही जानना चाहिए।।२।।

लग्नसंस्थो विलग्नस्थः। अम्बुसंस्थश्चतुर्थस्थानस्थः। अस्तस्थितः सप्तमस्थः। नभःस्थितो दशमस्थः। एतेषु च क्षेत्रेषु राशिषु ये लग्नगता गृहांशाः। गृहाणां राशीनां मेषादीनां येषां नवभागा लग्नगताः प्राग्लग्नादिष्वाश्रितास्तेभ्यो गृहांशेभ्योऽक्षराणि वर्णा आत्मगृहाश्रयाणि–आत्मगृहं स्वभवनमाश्रयः स्थानं येषां तानि विन्द्याद् जानीयात्, ग्रहाणां रव्यादीनां स्वगणक्रमे स्ववर्गपरिपाट्या।।२।।

लग्न अर्थात् तात्कालिक उदयलग्न, अम्बु अर्थात् चतुर्थ भाव, अस्त अर्थात् सप्तम, नभ अर्थात् दशम स्थान–इन स्थानों में स्थित, अर्थात् इनकी राशियों में स्थित मेषादि राशियों के नवमांश ज्ञात करें। लग्नादि में प्राप्त जो राशियों के नवमांश हों, तदनुसार ही अक्षरों अर्थात् वर्णों को आत्मगृह अर्थात् स्वभवन (अपनी राशि) के अनुसार ज्ञात करें। सूर्यादि ग्रहों के गण को अर्थात् स्वभवन (अपनी राशि) के अनुसार ज्ञात करें। सूर्यादि ग्रहों के गण को अर्थात् उनके अपने वर्ण को परम्परानुसार ही समझें।।२।।

अथ ग्रहाणां वर्गानाह–

कवर्गपूर्वान् कुजशुक्रचान्द्रि-
जीवार्कजानां प्रवदन्ति वर्गान्।
यकारपूर्वाः शशिनो निरुक्ता
वर्णास्त्वकारप्रभवा रवेः स्युः।।३।।

ग्रहों के वर्ण को कहते हैं–

कवर्गादिकों में क्रमशः भौम, शुक्र, बुध, गुरु और शनि के वर्ण कहे जाते हैं। यकारादि वर्ण चन्द्रमा के और अकारादि वर्ण रवि के होते हैं।।३।।

कवर्गपूर्वान् कवर्गाद्यान् वर्गान् यथाक्रमेण कुजादीनां ग्रहाणां परिपाट्या प्रवदन्ति मुनयः। तद्यथा—कवर्गः कुजस्य भौमस्य। चवर्गः शुक्रस्य। टवर्गश्चान्द्रेर्बुधस्य। तवर्गो जीवस्य गुरोः। पवर्गोऽर्कजस्य सौरस्य। यकारपूर्वा यकाराद्यष्टौ वर्णाः शशिनश्चन्द्रस्य निरुक्ताः कथिताः। अकारः प्रभव आद्यो येषां वर्णानामक्षराणां ते अकारप्रभवा रवेरर्कस्य स्युर्भवेयु. तद्यथा—अ आ इ ई उ ऊ ए ऐ ओ औ अं अः रवेः। क ख ग घ ङ भौमस्य। च छ ज झ ञ शुक्रस्य। ट ठ ड ढ ण बुधस्य। त थ द ध न गुरोः। प फ ब भ म सौरस्य। य र ल व श ष स ह चन्द्रस्य।।३।।

कवर्गादि वर्गों को क्रमशः भौमादि ग्रहों के लिए परम्परानुसार मुनियों ने निर्देश किया है। जैसा कि कवर्ग मंगल का, च वर्ग शुक्र का, टवर्ग चान्द्रि अर्थात् बुध का तवर्ग गुरु का, प वर्ग शनि का, यवर्ग अर्थात् यकारादि आठ वर्ण चन्द्रमा के और अवर्ग अर्थात् अ आदि स्वरवर्ण सूर्य के कहे गये हैं। यथा—अ, आ, इ, ई, उ, ऊ, ए, ऐ, ओ, औ, अं, अः ये सूर्य के वर्ण हैं। भौम का वर्ग—क, ख, ग, घ, ङ। शुक्र का—च, छ, ज, ञ, बुध का—ट, ठ, ड, ढ, ण, गुरु का-त, थ, द, ध, न, शनि का—प, फ, ब, भ, म और चन्द्रमा का—य, र, ल, व, श, ष, स, ह, वर्ग होता है।।३।।

अथ राशिवशेन द्रेष्काणवशेन च नामाक्षरसंख्याज्ञानमाह—

द्रेष्काणवृद्ध्या प्रवदन्ति नाम
त्रिपञ्चसप्ताक्षरमोजराशौ।
युग्मे तु विन्द्याद् द्विचतुष्कषट्कं
नामाक्षराणि ग्रहदृष्टिवृद्ध्या।।४।।

राशि और द्रेष्काण के अनुसार नामाक्षर संख्या कहते हैं—

द्रेष्काण की वृद्धि (प्रथम-द्वितीयादि) के अनुसार विषम-राशि में क्रमशः तीन, पाँच और सात अक्षरों के नाम होते हैं। समराशि के द्रेष्काण में क्रमशः दो, चार और छः अक्षरों के नाम को जानें। ग्रहों की दृष्टि के अनुसार इन नामाक्षरों में वृद्धि होती है।।४।।

द्रेष्काणो राशित्रिभागः। तस्य वृद्ध्या वर्धनेनौजराशौ विषमर्क्षे त्रिपञ्चसप्ताक्षरं नाम। प्रथमे त्र्यक्षरम्, द्वितीये पञ्चाक्षरम्, तृतीये सप्ताक्षरमिति। युग्मे समराशौ लग्नगते प्रथमे द्रेष्काणे द्व्यक्षरं नाम विन्द्याज्जानीयात्। द्वितीये चतुष्कं चतुरक्षरम्। तृतीये षट्कं षडक्षरम्। तानि च नामक्षराणि नामवर्णा ग्रहदृष्टिवृद्ध्या। यतः केन्द्रस्थराशिभिरक्षराण्यानीयन्ते। केन्द्रचतुष्टयस्य प्रस्तुतत्वात् किल योग्यद्वयेनाक्षिप्तमिदं शास्त्रम्। तत्रैकः स्थितियोगः, द्वितीयो दृष्टियोगः। स्थितियोगं परिहृत्य

दृष्टियोगेनानीयन्ते। दृष्टियोगे तु बलाबलविचारः। उक्तं च–

[१]त्रिदशत्रिकोणचतुरस्रसप्तमान्यवलोकयन्ति। चरणाभिवृद्धितः।

रविजामरेज्यरुधिराः परे च ये क्रमशो भवन्ति किल वीक्षणेऽधिकाः।।इति।।

एवं ग्रहदर्शनवृद्ध्या नामाक्षराण्यानीयन्ते।।४।।

द्रेष्काण किसी राशि का तृतीय भाग होता है। इसके वृद्धि क्रम से विषमराशि में तीन, पाँच और सात अक्षरों के नाम होते हैं। प्रथम द्रेष्काणभाग में तीन अक्षर, द्वितीय में पाँच अक्षर और तृतीय द्रेष्काणभाग में सात अक्षर होते हैं। युग्म अर्थात् समराशि में लग्न हो, तब प्रथम द्रेष्काण में दो अक्षरों का नाम, द्वितीय द्रेष्काण में चार अक्षर और तृतीय द्रेष्काण में छः अक्षर का नाम जाने। ये नामाक्षर अर्थात् नाम के वर्ण ग्रहों की दृष्टि से वर्धित होते हैं; क्योंकि केन्द्रगत राशियों से अक्षरों का आनयन होता है। केन्द्रचतुष्टय के अनुसार प्रस्तुत यह शास्त्र दो योगों के आधार पर आश्रित है। पहला स्थिति योग और दूसरा दृष्टियोग है। स्थिति-योग को छोड़कर दृष्टियोण का आनयन करते हैं। दृष्टियोग का बलाबल विचार करते हुए कहा गया है–

३-१०, ९-५, ४-८, और ७ की एकादि चरण के वृद्धि क्रम से ग्रहों की दृष्टि होती है। शनि, गुरु और मंगल क्रमशः विशेष वृद्धि से इन भावों को देखते हैं। अन्य ग्रह एकाधिक चरणों से वृद्धि पूर्वक देखते हैं।

इस प्रकार ग्रहों की दृष्टि-वृद्धि के अनुसार नामाक्षरों का आनयन किया जाता है।।४।।

अथ नवांशकवशेन नामाक्षरसङ्ख्याज्ञानमाह–

वर्गोत्तमे द्व्यक्षरकं चरांशे
स्थिरर्क्षभागे चतुरक्षरं तत्।
ओजेषु चैभ्यो विषमाक्षराणि
स्युर्द्विस्वभावेषु तु राशिवच्च।।५।।

नवमांश के अनुसार नामाक्षर संख्या को कहते हैं–

समराशि में चर अंश का वर्गोत्तम हो, तब दो अक्षर का नाम होता है। यदि समराशि में वर्गोत्तम स्थिरांश का हो, तब चार अक्षरों का नाम होता है। विषमराशि के वर्गोत्तम में विषमाक्षर वाले नाम होते हैं। द्विस्वभाव राशि के वर्गोत्तम में राशि के अनुसार ही नामाक्षर की संख्या होती है।।५।।

[२]''वर्गोत्तमाश्चरगृहादिषु पूर्वमध्यपर्यन्तगाः'' इति। वर्गोत्तमाख्या नवांशका

---

१. बृहज्जातके २ अध्यायस्य १३ श्लोकः।

२. बृहज्जातके १ अध्यायस्य १४ श्लोकः।

उक्ताः। अग्रत ओजशब्दकरणादिह समराशावेव ज्ञायते। समराशौ कर्कटो मकरे वा यदा वर्गोत्तमश्चरांशो भवति, तदा द्व्यक्षरं नाम। स्थिरर्क्षभागे स्थिरराशौ वृषसिंहवृश्चिक-कुम्भानामन्यतमे यदा स्थिरांशो वर्गोत्तमो भवति, तदा चतुरक्षरं नाम। ओजेषु विषमराशिषु मेषे तुले वा एभ्यो वर्गोत्तमांशकेभ्यो विषमा क्षराणि स्युर्भवेयुः। एतदुक्तं भवति-यदा विषमराशौ वर्गोत्तमश्चरांशो भवति, तदा विषमाक्षराणि त्रीणि नाम्नि भवेयुः अथ तस्मिन्नेव वर्गोत्तमः स्थिरांशो भवति, तदा विषमाणि पञ्चाक्षराणि नाम्नि भवेयुः। द्विस्वभावेषु राशिवच्च, द्विस्वभावेषु द्विमूर्तिषु लग्नेषु राशिवद्राशितुल्यं स्यात्। एतदुक्तं भवति—द्विस्वभावेषु मिथुनधनुषोरन्यतरे यदि विषमांशको वर्गोत्तमो भवति, तदा त्र्यक्षरं नामेति। अथ द्विस्वभावेषु समो वर्गोत्तमांशो भवति कन्यामीनयोरन्यतरस्तदा चतुरक्षरं नाम षडक्षरं नामवा। यत उक्तम्—

त्रपञ्चसप्ताक्षरमोजराशौ युग्मे तु विन्द्याद् द्विचतुष्कषट्कम्। इति।

वर्गोत्तमांशो यस्मिन् द्रेषकाणभागे स्थितस्तद्वशाद् वाच्यमिति।।५।।

"चरादि गृहों (राशियों) में वर्गोत्तम प्रथम-मध्य-अन्त्य के क्रम से होते हैं"- इस प्रकार बृहज्जातक (२.१३) में कहा गया है। वहाँ पर वर्गोत्तम नवांश का वर्णन है। 'ओज' अर्थात् विषमराशि का कथन श्लोक में आगे आया है, अतः उसके पूर्वपद में समराशि का अध्याहार ज्ञात होता है। समराशि अर्थात् कर्क अथवा मकर में वर्गोत्तम चरराशि का होने पर दो अक्षरों का नाम होता है। स्थिराशि अर्थात् वृष, सिंह, वृश्चिक और कुम्भ राशियों में से किसी भी एक राशि में जब स्थिर अंश का वर्गोत्तम होता है तब चार अक्षरों का नाम होगा। विषमराशि अर्थात् मेष और तुला में से किसी में भी वर्गोत्तमांश हो, तब विषमाक्षर के नाम होते हैं। इस कथन का अभिप्राय यह है कि जब विषमराशि और वर्गोत्तम चरांश का हो तब विषमाक्षर अर्थात् तीन अक्षरों के नाम होते हैं। इसी वर्गोत्तम में स्थिर अंश होते हैं तब विषमाक्षर अर्थात् पाँच अक्षरों के नाम रहेंगे। द्विस्वभाव लग्न में राशि के अनुसार ही नामाक्षर होते हैं। इसका अभिप्राय यह है कि द्विस्वभाव राशियों मिथुन और धनुष में से किसी में भी यदि विषम अंश का वर्गोत्तम होता है, तब तीन अक्षरों का अथवा साथ अक्षरों का नाम होगा। द्विस्वभाव राशि में समराशि का वर्गोत्तम होने पर अर्थात् कन्या और मीन राशि में से किसी राशि का वर्गोत्तम होने पर, चार अक्षरों अथवा छः अक्षरों का नाम रहेगा। जैसा कि कहा गया है-

विषमराशि में ३,५,७ अक्षरों के नाम और समराशि में २,४,६ अक्षरों के नाम को जानना चाहिए।

वर्गोत्तमांश, द्रेष्काण के जिस अंश में हो, तदनुसार ही नामाक्षरों का कथन करें।।५।।

❋ ❋ ❋

अत्रैव विशेषमाह–

द्विमूर्तिसंज्ञे तु वदेद् द्विनाम
सौम्येक्षिते द्विप्रकृतौ च राशौ।
यावान् गणः स्वोदयगोंऽशकानां
तावान् ग्रहः संग्रहकेऽक्षराणाम्।।६।।

यहाँ पर विशेष विचार करते हैं–

द्विस्वभाव संज्ञक राशि होने पर दो नाम कहना चाहिये। यदि यह द्विस्वभाव राशि, बुध ग्रह से दृष्ट हो तब निश्चित ही दो नाम होते हैं। तात्कालिक लग्न के जितने नवमांश बीत चुके हों, उतने ही वर्णों के नाम होते है।।६।।

द्विमूर्तिसंज्ञे द्विस्वभावे राशौ द्विनाम वदेद् ब्रूयात्। द्वे नामनी यस्य। तथा द्विप्रकृतौ द्विस्वभावराशौ सौम्येक्षिते बुधसन्दृष्टे, चशब्दाद् द्विनाम वदेत्। यत्परिमाणस्य यावान् अंशकानां नवभागानां गणः समूहः स्वोदयगः प्रश्नसमयेऽतिक्रान्त-स्तावानेव गणः समूहोऽक्षराणां वर्णानां संग्रहके नाम्नि भवति।।६।।

द्विमूर्तिसंज्ञक अर्थात् द्विस्वभाव राशि होने पर दो नाम कहना चाहिये। अर्थात् उसके दो नाम होते हैं। द्विप्रकृति अर्थात् द्विस्वभावराशि बुध ग्रह से (सौम्येच्छित) दृष्ट होने पर भी दो नाम ही जानना चाहिये। प्रश्नकालिक लग्न के नवमांश के जितने भाग व्यतीत हो चुके हों, उसी भाग (खण्ड) तुल्य अक्षरों अर्थात् वर्णों से निर्मित नाम होता है।।६।।

अथ संयोगाक्षरमाह–

संयोगमादौ बहुलेषु विन्द्यात्
कूटेषु संयोगपरं वदन्ति।
स्वोच्चांशके द्विष्कृतमृक्षयोगाद्
गुर्वक्षरं त वनांशके स्यात्।।७।।

संयुक्त अक्षरों को बतलाते हैं–

विषम राशियों में प्रारम्भ का अक्षर संयुक्त समझें। समराशियों में संयुक्त अक्षर अन्त में होते हैं। लग्न के उच्चांश होने पर राशियों के अनुसार द्वित्व अक्षर होते हैं। लग्न के नवमांश के आधार पर दीर्घाक्षर को जानें।।७।।

बहुलेष्वोजेषु विषमराशिषु नाम्नामादौ प्रथममेव संयोगं संयोगाक्षरं विन्द्याज्जानीयात्। वर्णद्वयसंयोगः संश्लेषः। हलोऽनन्तराः संयोग इति केचित्। बहुभेदाः केचित्। द्विष्कृताः केचिद् गुरवः। केचित् संयोगान्तवद् द्विष्कृताः यथा–यप्पा, वल्ला, यस्सा लस्सा। गुरवो द्वाभ्यां प्राकाराभ्यां भवन्ति। वर्गाक्षरैः स्वतनुना। प्रथमप्रथमैः। तृतीयतृतीयैः। पञ्चमपञ्चमैः।

प्रथमप्रथमैर्यथा–कक्कः, दत्तः, कुट्टः। तृतीयतृतीयैर्यथा–लल्लः, गग्गः, दद्दः, जज्जः। पञ्चमपञ्चमैः–शङ्कः, नण्णः, धम्मः। परतनुना प्रथमद्वितीयैस्तृतीय चतुर्थैश्च। प्रथमद्वितीयैर्यथा–सुक्खः, इच्छः, डित्थः। तृतीयचतुर्थैर्यथा–वाग्घः। दाड्ढः, शुद्धः। एते गुरवः। अन्येषां यथा परतनुना। पञ्चमप्रथमैः पञ्चमद्वितीयैः पञ्चमतृतीयैः पञ्चमचमतुर्थैश्च। एते संयोगा एव। पञ्चमप्रथमैर्यथा–पङ्कः। पञ्चमतृतीयैः पञ्चमचतुथैश्च। एते संयोगा एव। पञ्चमप्रथमैर्यथा–ङ्कः। पञ्चमद्वितीयैर्यथापशङ्खः। पञ्चमतृतीयैर्यथा–शृङ्गम्। पञ्चमप्रथमैः पञ्चमद्वितीयैः पञ्चमतृतीयैः पञ्चमचतुथैश्च। एते संयोगा एव। पञ्चमप्रथमैर्यथा–पङ्कः। पञ्चमद्वितीयैर्यथा–शङ्खः। पञ्चमतृतीयैर्यथा–शृङ्गम्। पञ्चमचतुर्थैर्यथा–सङ्घः। केचिदन्यथा कथयन्ति, यथा–स्वतनुना संयोगास्तेऽपि द्विष्कृता उच्यन्ते। यथा–धम्मः, दत्तः, कक्कः। प्रथमद्वितीयैस्तृतीयचतुर्थैश्च संयोगः। संयोगसंज्ञास्ते गुरव उच्यन्ते। अन्ये ये संज्ञास्ते संयोगा एव न भवन्ति, यथा–धर्मः, वत्सः। आदिसंयोगो यथा–श्रीधरः, क्षीरः, स्मर इति। एवं संयोगमादौ बहुलेषु विन्द्यादिति। कूटेषु संयोगपरं वदन्ति। कूटेषु समराशिषु संयोगपरम्। संयोगः परो यस्मिस्तत्संयोगपरं वदन्ति कथयन्ति तन्नारायणादयः। द्व्यक्षरे नाम्नि यथा–पद्मम्, धर्मः, वत्स इत्येवमादयः। चतुरक्षरे नाम्नि यथा–वसुदत्तः, वसुगुप्त इत्येवमादयः। स्वोच्चांशके द्विष्कृतमिति। स्वश्चासावुच्चांशः स्वोच्चांशः।

अजवृषभमृगाङ्गनाकुलीरा झषवणिजौ च दिवाकरादितुङ्गाः।
दशशिखिमनुयुक्तिथीन्द्रियांशैस्त्रिनवकविंशतिभिश्च तेऽस्तनीचाः।।[1]इति।

तस्मिन् स्वोच्चांशके द्विष्कृतमक्षरं नाम्नि भवति। द्वौ वारौ कृतौ द्विष्कृतौ। कथम्? ऋक्षयोगाद्राशियोगाद्धेतः। अक्षरदाता ग्रहः स्वोच्चांशकस्थो द्विष्कृतमक्षरं करोति। एतदुक्तं भवति–पृच्छालग्ने यदौजराशिस्तदौजाक्षरं द्विष्कृतं भवति, यथा–दरदः दामोदरः। अथ युग्मराशिस्तदा युग्माक्षरं द्विष्कृतं भवति, यथा–देवदेवः। धराधरः। द्व्यक्षरे यथा–कप्पः, यप्पः, वल्ल इत्येवमादयः। गुर्वक्षरं तद्भवनांशके स्यात्। गुर्वक्षरं यस्मिन् नाम्नि तद्गुर्वक्षरम्। तदित्यनेन लग्नं परामृश्यते। तस्य भवनस्यांशकः। तस्मिन्नक्षरे सति गुर्वक्षरं स्याद्भवेत्। अत्र ऋक्षयोगादिभिर्वर्तते। ओजराशौ ओजाक्षरमेव गुर्वक्षरं भवति–कपित्थः, अश्वत्थः। युग्मराशौ युग्माक्षरमेव, यथा–सुक्खः, घग्घः, शुद्धः। चतुरक्षरे शुद्धौदन इत्येवमादयः।।७।।

बहुत से ओज अर्थात् विषम राशियों के होने पर नाम के आदि (प्रथम) में संयुक्त अक्षर को जानना चाहिए। दो वर्णों के संयोग को संश्लेष कहा जाता है। कुछ आचार्य हलन्त वर्ण के अनन्तर आने वाले वर्ण को सम्मिलित रूप में संयुक्त अक्षर कहते हैं। कुछ आचार्य इसके अनेक भेद बतलाते हैं। कतिपय आचार्य द्वित्व को ही संयुक्त कहते हैं। कुछ लोग संयोगान्त के सदृश द्वित्व का विधान करते हैं। जैसा कि–

१. बृहज्जातके १ अध्यायस्य १३ श्लोकः।

यप्पा, वल्ला, यस्सा, लस्सा। गुरु अक्षर दो प्रकार के होते हैं। वर्गाक्षर स्ववर्ण युक्त होते हैं प्रथम वर्ण प्रथम के सदृश, तृतीय वर्ण तृतीय के सदृश तथा पञ्चम वर्ण पञ्चम के सदृश रहते हैं। जैसाकि प्रथम वर्ण प्रथम के सदृश होने पर–कक्क दत्त, कुट्ट। तृतीय वर्ण तृतीय वर्ण के साथ होने का उदाहरण–लल्ल गग्ग, दद्द, जज्ज। पञ्चमवर्ण का पञ्चमवर्ण के साथ होने का उदाहरण–शङ्ङ, नण्ण, धम्म। अन्य वर्णों के साथ प्रथम, द्वितीय, तृतीय एवं चतुर्थ वर्णों के साथ द्वितीयवर्ण का संयोग इस प्रकार है–खुक्ख, इच्छ, डित्थ। तृतीय वर्ण का चतुर्थ वर्ण के साथ संयोग का उदाहरण–वाग्घ, दाड्ढ, शुद्ध। ये गुरु वर्ण हैं। अन्य वर्णों से संयुक्त वर्णों का विचार किया जा रहा है। पञ्चम से प्रथम का, पंचम से द्वितीय का, पंचम से तृतीय का तथा पंचम से चतुर्थ का। ये सभी संयुक्त वर्ण हैं। जैसाकि–पञ्चम से प्रथम के संयोग का उदाहरण 'पङ्क' है। पंचम से द्वितीय वर्ण का उदाहरण जैसा कि 'शङ्ख' है। पंचम वर्ण से तृतीयवर्ण का संयोग, जैसाकि–'शृङ्ग'। पंचम वर्ण का चतुर्थ वर्ण के साथ संयोग, जैसा कि–'सङ्घ' है। कुछ विद्वान् इससे भिन्न प्रकार भी कहते हैं। जैसा कि स्ववर्ण से संयुक्त वर्णों को द्वित्व कहते हैं। जैसाकि धम्म, दत्त, कक्क। प्रथम, द्वितीय, तृतीय और चतुर्थ वर्णों के साथ संयोग होता है। संयोग-संज्ञक उन वर्णों को गुरु वर्ण कहते हैं। अन्य वर्णों से कथित वर्णों का संयोग ही नहीं होता है। जैसाकि–धर्म, वत्स। आदि वर्णों का भी संयोग होता है। जैसाकि–श्रीधर, क्षीर, स्मर आदि। इस प्रकार विषम वर्णों का प्रारम्भिक संयोग समझना चाहिये। कूट अर्थात् समराशि में पश्चात् संयोग होता है। नारायण आदि आचार्यों ने परवर्णों में संयोग का अभिकथन किया है। नाम में दो अक्षरों का संयोग इस प्रकार होता है। जैसा कि–पद्म, धर्म, वत्स इत्यादि। चार अक्षरों के नाम में वसुदत्त, वसुगुप्त इत्यादि होते हैं। अपने उच्चांश के द्वित्व को कहते हैं। अपने उच्चांश को स्वोच्चांश कहा जाता है।

जैसा कि बृहज्जातक अध्याय १, श्लोक, सं. १३ में कहा गया है–

मेष, वृष, मकर, कन्या, कर्क मीन और तुला, ये राशियाँ क्रमशः सूर्यादि ग्रहों की उच्चराशियाँ हैं। इनका १०, ३, २८, १५, ५, २७ तथा २० अंश परमोच्चांश होता है। इनसे सप्तम राशियों को नीच राशियाँ जानना चाहिये।

इस उच्चांश की स्थिति होने पर नामाक्षर में द्वित्व होता है। दो बार समागत अक्षरों को द्विष्कृत अर्थात् द्वित्व कहते हैं। यह किस प्रकार से ज्ञात होता है। ऋक्ष अर्थात् राशियों के योग से। अक्षर प्रदाता ग्रह यदि अपने उच्चांश में स्थित होता है, तब द्वित्व अक्षर करता है। इसका अभिप्राय यह है कि यदि प्रश्न लग्न में विषम राशि हो तब विषमाक्षर का द्वित्व होता है। जैसाकि दरद, दामोदर। यदि समराशि हो तब युग्माक्षर का द्वित्व होगा। जैसाकि देवदेव, धराधर। दो अक्षरों में यथा-कप्प, यप्प,

वल्ल इत्यादि। गुरु अक्षरों का विचार लग्नांश से किया जाता है। जिस नाम में गुरु अक्षर हो, उसको गुर्वक्षर (दीर्घाक्षर) कहते हैं। 'तद्' शब्द से लग्न को जानना चाहिये। उस नवांश से सम्बद्ध अक्षरों में गुरु अक्षर होता है। यहाँ पर भी राशियों का योग देखना चाहिये। विषम राशि में विषमाक्षर ही गुरु अक्षर होता है। जैसाकि–कपित्थ, अश्वत्थ। युग्मराशि में सम अक्षर का द्वित्व समझना चाहिये जैसाकि–सुक्ख, घग्घ, शुद्ध। चार अक्षर में शुद्धोदन आदि उदाहरण हैं॥७॥

अन्यदपि विशेषमाह–

मात्रादियुक् स्याद् ग्रहयुक्त्रिकोणे
द्रेष्काणपर्यायवदक्षरेषु।
नभोबलेषूर्ध्वमधोऽम्बुजेषु
ज्ञेयो विसर्गस्तु बलान्वितेषु॥८॥

अन्य भी विशेष कहते हैं–

प्रश्न लग्न से त्रिकोण भाव यदि ग्रह युक्त हो, तब मात्रा का संयोग, आदि वर्ण में रहता है। द्रेष्काण के अनुसार अक्षरों का संयोजन रहता है। दशमभाव के बली होने पर ऊर्ध्वमात्रा और चतुर्थभाव के बली होने पर अधोमात्रा तथा सप्तमभाव के बली होने पर विसर्ग का संयोग होता है॥८॥

पृच्छालग्नस्य मेषादेस्त्रिकोणे नवमे पञ्चमे वा स्थाने ग्रहैरादित्यादिभिर्युग्योगो यथा भवति तथा मात्रादियुक् स्यात्। नाम्नो मात्राभिरादौ प्रथमं युग्योगः स्याद्भवेत्। यथा–शिवः। द्रेष्काणपर्यायवदक्षरेष्विति। द्रेष्काणानां पर्यायो द्रेष्काणपर्यायः। प्रसिद्धोच्चारणम्। स यथा भवति तद्वदक्षरेषु मात्रादियोगो भवति। युग्मद्रेष्काणेषु युग्माक्षरेषु मात्रादियोगो भवति। ओजाक्षरेषु यथा–श्रीधरः। युग्मेषु यथा–ईश्वरः। नभोबलेषूर्ध्वमिति। नभसि दशमे स्थाने राशयो ये बलिनस्ते नभोबलिनः। तथा चोक्तम्–

मनुष्यरूपा बलिनो विलग्नाश्चतुष्पदाश्चाक्षरमध्यसंस्थाः।
जलोद्भवाख्या बलिनो जलस्थाः कीटोऽस्तगो, व्योमतले द्विमूर्ताः॥

अथ–

[1]कण्टककेन्द्रचतुष्टयसंज्ञाः सप्तमलग्नचतुर्थखभानाम्।
तेषु यथा विहितेषु बलाढ्याः कीटनराम्बुचराः पशवश्च॥इति।

तेषु नभोबलेषूर्ध्वमात्राक्षरमुशन्ति कथयन्ति। यथा–श्रीवत्सः, वासुदेवः, वैश्रवणः, शौण्डः। अधोऽम्बुजेष्विति। अम्बुजेषु चतुर्थस्थानेषु बलवत्सु अधोमात्राक्षरं भवति। यथा–सुहिरण्यः, शूरवर्मा। ज्ञेयो विसर्गोऽस्तबलान्वितेष्विति। अस्तबलान्वितेषु सप्तमे

---

१. बृहज्जातके १ अध्यायस्य १७ श्लोकः।

स्थाने बलवति विसर्गो विसर्जनीयो ज्ञेयो ज्ञातव्य:।।८।।

मेषादि प्रश्नलग्न के त्रिकोण अर्थात् नवम और पञ्चम स्थान में सूर्यादि ग्रहों के स्थित होने पर मात्रादि का योग होता है। नाम के प्रथम वर्ण में मात्रा का योग होता है। जैसा कि–शिव। द्रेष्काणों के पर्याय का तात्पर्य प्रसिद्ध उच्चारण है। वह जैसा होता है, उसी प्रकार अक्षरों में मात्रा का योग होता है। युग्म द्रेष्काण होने पर युग्माक्षरों में मात्रा का योग होता है। जैसा कि ईश्वर। ओजाक्षर का उदाहरण है–श्रीधर। नभ अर्थात् दशम स्थान में जो राशि बली हो उसके नभोबली कहते हैं। जैसा कि कहा गया है–

मनुष्य के स्वरूपानुसार बल का विचार किया जाता है। इनमें लग्न, चतुर्थ, सप्तम और दशम; ये चार भाव होते हैं। जल (चतुर्थ) में स्थित राशियाँ जलोद्भव हैं और सप्तम में कीट संज्ञक राशियाँ होती हैं। जलोद्भव में द्विस्वभाव राशियाँ बली होती हैं।

जैसाकि बृहज्जातक (१/१०) में कहा गया है–

लग्न, चतुर्थ, सप्तम और दशम भावों की संज्ञा कण्टक, केन्द्र और चतुष्टय होती है। इनमें क्रमशः नृराशि, जलराशि, कीटराशि और पशुराशियाँ बली होती हैं।

इनमें दशम भाव के बली होने पर ऊर्ध्वमात्रा युक्त अक्षर का ग्रहण किया जाता है। जैसाकि–श्रीवत्स, वासुदेव, वैश्रवण, शौण्ड। अम्बुज अर्थात् चतुर्थभाव के बली होने पर नामाक्षर में अधोमात्रा होती है। जैसा कि–सुहिरण्य, शूरवर्मा। अस्त बलयुक्त अर्थात् सप्तम भाव के बली होने पर नामाक्षर में विसर्ग का योग समझना चाहिए।।८।।

अन्यदप्याह–

शीर्षोदयेषूर्ध्वमुशन्ति मात्रा-
मधश्च पृष्ठोदयशब्दितेषु।
तीर्यक् च विन्द्यादुभयोदये तां
दीर्घेषु दीर्घामितरेषु चान्याम्।।९।।

और भी कहते हैं–

शीर्षोदय लग्न में ऊर्ध्व मात्रा होती है तथा पृष्ठोदय लग्न में अधोमात्रा होती है। उभयोदय लग्न में तिर्यक् मात्रा तथा दीर्घ लग्न में दीर्घमात्रा तथा इनसे भिन्न लग्न होने पर अन्य मात्राओं को जानना चाहिए।।९।।

शीर्षोदया मूर्धोदया:। तथा चोक्तम्–

शीर्षोदया मानुषसर्वरूपा: ससिंहकीटा यवनैर्निरुक्ता:।
मत्स्यद्वयं तूभयत: प्रवृत्तं पृष्ठेन शेषास्तु सदोदयन्ति।।

तथा च–

[१]गोजाश्विकर्किमिथुनाः समृगा निशाख्याः
पृष्ठोदया विमिथुनाः कथितास्त एव।
शीर्षोदया दिनबलाश्च भवन्ति शेषा
लग्नं समेत्युभयतः पृथुरोमयुग्मम् ।।इति।।

एवं शीर्षोदयेषु लग्नेषूर्ध्व मात्रामुशन्ति कथयन्ति। यथा–ओ औ। पृष्ठोदयशब्दिता ये राशयस्तेषु पृष्ठोदयसंज्ञितेष्वधो मात्रामुशन्ति कथयन्ति, यथा–उ ऊ। तिर्यक् चेति। उभयोदयो मीनस्तस्मिन् तां मात्रां तिर्यक् च विन्द्याद् जानीयात्। ए ऐ। यथा–देवदेव, ऐन्द्र इत्यादि। दीर्घेषु दीर्घामिति। दीर्घेष्वायतेषु राशिषु। तां मात्रां दीर्घं विन्द्यात्। यथा–आ ई ऊ ए ऐ ओ औ। इतरेष्वन्येषु मध्यह्रस्वेष्वतोऽन्यां परिशिष्टां ह्रस्वामिति। यथा–अ इ उ। अत्र दीर्घाः सिंहकन्यातुलवृश्चिकाः। मध्या मिथुनकर्किधन्विमकराः। ह्रस्वा मेषवृषकुम्भमीनाः। तथा चोक्तम्–

आद्यन्तराश्योरुदयप्रमाणं द्वौ द्वौ मुहूर्तौ नियतं प्रदिष्टम्।
क्रमोत्क्रमाभ्यामतिपञ्चमं स्याच्चक्रार्द्धयोर्विद्ध्युदयप्रमाणम्।।
एवं प्रमाणानि गृहाणि बुद्ध्या ह्रस्वानि मध्यानि तथायतानि।
चक्राङ्गभेदैः सदृशीकृतानि मार्गप्रमाणान्यपि कल्पयन्ति।।इति।।

तथा च–

[२]पूर्वार्धे विषयादयः कृतगुणा मानं प्रतीपं च तत्। इति।।९।।

शीर्षोदय अर्थात् मूर्धोदय है। जैसा कि कहा गया है–

शीर्षोदयराशि मनुष्य के स्वरूपवाली होती हैं, जिनमें सिंह और कर्क भी सम्मिलित हैं। यह यवनाचार्यों ने कहा है। मीन राशि को उभयोदय कहा जाता है। शेष सभी राशियाँ पृष्ठोदय होती हैं।

इसी को बृहज्जातक १/१० में कहा गया है–

वृष, मेष, धनु, कर्क, मिथुन, मकर; इनको रात्रिबली कहा जाता है। इनमें से मिथुन को छोड़कर सभी पृष्ठोदय और दिन में बली होती हैं। मीन को उभयोदय तथा उभय बली कहा जाता है। शेष राशियाँ सिंह, कन्या, तुला, वृश्चिक, कुम्भ; ये दिनबली और शीर्षोदय हैं। मिथुन रात्रिबली है।

इस प्रकार शीर्षोदय लग्न में ऊर्ध्वमात्रा होती है। जैसा कि ओ, औ। पृष्ठोदय संज्ञक राशियों में अधोमात्रा कही गयी है। जैसा कि उ तथा ऊ। उभयोदय मीन राशि है। इसमें तिर्यक् मात्रा जाननी चाहिये। जैसाकि ए, ऐ, तथा देवदेव, ऐन्द्र इत्यादि।

---

१. बृहज्जातके १ अध्यायस्य १० श्लोकः।

२. बृहज्जातके १ अध्यास्य १९ श्लोकः।

दीर्घ राशियों में अर्थात् आयत राशियों में दीर्घ मात्रा समझनी चाहिये। जैसा कि–आ, ई, ऊ, ए, ऐ, ओ, औ। इससे भिन्न अन्य मध्य ह्रस्वों में अन्य परिशेष में ह्रस्व मात्रा होती है। जैसाकि अ, इ, उ। इनमें सिंह, कन्या, तुला और वृश्चिक; ये दीर्घ हैं। मिथुन, कर्क, धनु और मकर; इनको मध्य राशि कहते हैं। मेष, वृष, कुम्भ और मीन ह्रस्व राशियाँ हैं।

जैसाकि कहा गया है–

राशियों के प्रारम्भ से अन्त तक दो मुहूर्त का काल नियत किया गया है। क्रम तथा उत्क्रम विधि से पंचम पर्यन्त छः राशियों का उदयमान जानना चाहिए। इस प्रकार राशियों के मान को जानकर ह्रस्व, मध्य और आयत (दीर्घ) का विचार किया जाता है। एक चक्र अर्थात् बारह राशियों के विभेद से इनके मार्गों के प्रमाण की कल्पना करें।

जैसा कि बृहज्जातक १/१९ में कहा गया है–

राशिचक्र के पूर्वार्धभाग में जिनविषयों का विचार किया जाता है, उनमें चतुर्थ से दशमपर्यन्त दो भाग होते हैं।

अत्रैव विशेषमाह–

प्राग्लग्नतोयास्तनभःस्थितेषु
भेष्वंशकेभ्योऽक्षरसंग्रहः स्यात्।
क्रूरोऽक्षरं हन्ति चतुष्टयस्थो
दृष्ट्यापि मात्रां च त्रिकोणगो वा।।१०।।

यहाँ पर कुछ विशेष कहते हैं–

प्रथम लग्न, चतुर्थ, सप्तम और दशम में स्थित राशियों के नवमांश के अनुसार अक्षरों का संकलन होता है। केन्द्र में स्थित पापग्रहों से अक्षर की हानि होती है। त्रिकोण में स्थित अथवा त्रिकोण पर दृष्टि होने से भी मात्रा की हानि होती है।।१०।।

प्राग्लग्नं विलग्नम्। तोयसंज्ञश्चतुर्थः। अस्तः सप्तमः। नभः संज्ञो दशमः। एतेषु स्थानेषु स्थिता राशयः। भशब्देन राशय उच्यन्ते। तेषु भेषु तथाभूतेष्वेव येंऽशका नवभागास्तेभ्योऽक्षरसंग्रहो वर्णसमुच्चयो नाम्नि स्यात्। क्रूरोऽक्षरमिति। क्रूरः पापो ग्रहश्चतुष्टयस्थः केन्द्रस्थोऽक्षरं वर्णं हन्त्यपहरति। स एव क्रूरस्त्रिकोणगो दृष्ट्या दर्शनेनापि मात्रां हन्ति। नवपञ्चमे त्रिकोण इति। अपिशब्दः समुच्चये। वाशब्दो विकल्पे।।१०।।

प्राग्लग्न अर्थात् प्रथमलग्न, तोय अर्थात् चतुर्थलग्न, अस्त अर्थात् सप्तमलग्न, नभ अर्थात् दशमलग्न; इन स्थानों में स्थित राशियों में जो नवमांश प्राप्त हों उनके द्वारा अक्षर संग्रह अर्थात् नाम के वर्णों का विचार करना चाहिए। यहाँ पर मूल श्लोक

में कथित 'भ' शब्द से राशियों का उल्लेख है। यदि पापग्रह चारों केन्द्र स्थानों में रहते हैं तो वर्ण की हानि होती है। ये ही पापग्रह त्रिकोणस्थान में स्थित होकर अथवा दृष्टिपात कर मात्रा का हरण करते हैं। नवम और पञ्चम स्थान को त्रिकोण कहा जाता है। यहाँ पर 'अपि' शब्द समुच्च तथा 'वा' शब्द विकल्प के अर्थ में प्रयुक्त है॥१०॥

अन्यद्विशेषमाह–

शुभग्रहस्तूर्जितवीर्यभागी
स्थानांशतुल्याक्षरदः स चोक्तः।
पश्यन् स्थितः केन्द्रत्रिकोणयोर्वा
स्वोच्चेऽपि वर्णद्वयमात्मभागे॥११॥

और भी विशेष कहते हैं–

शुभग्रह के द्वार ऊर्जा और बल का लाभ होता है। स्वस्थान में स्थित राशि के नवमांश तुल्य अक्षरों का अभिधान किया जाता है। केन्द्र अथवा त्रिकोण में स्थित अथवा देखता हुआ अथवा अपनी उच्चराशि में स्थित शुभग्रह दो अक्षर देता है॥११॥

शुभग्रहः सौम्यः। तुशब्दः समुच्चये। स चोर्जितमतीव वीर्यं भजति तच्छीलः। ऊर्जितवीर्यभागी। स च स्थानांशतुल्याक्षरदः। यस्मिन् स्थाने यावत्संख्यांशे नवभागे स्थितस्तत्तुल्याक्षराणि ददाति। एवं तत्तुल्याक्षरद उक्तः कथितः। पश्यन् स्थित इति। अथवा स एव शुभग्रह ऊर्जितवीर्यभागी केन्द्रेषु त्रिकोणयोर्नवपञ्चमयोर्वा स्थितः पश्यन्नवलोकयन्। स्वोच्चे आत्मीयोच्चराशौ वा स्थितः पश्यन्नात्मभागे स्वे नवांशके स्थितः पश्यन् वर्णद्वयमक्षरद्वयमपि ददाति। अपिशब्दो विकल्पार्थः॥११॥

सौम्य अर्थात् शुभग्रह ओजस्वित और वीर्यवान होता है। वह अपने स्थान के नवमांशतुल्य अक्षर को देता है। जिस स्थान में अर्थात् राशि में स्थित हो, उसके नवमांशतुल्य अक्षर देता है। इस प्रकार वह नवमांशतुल्य अक्षरों का दाता कहा गया है। अथवा वही शुभग्रह ऊर्जित वीर्यभागी होकर अथवा उसको देखता हुआ अथवा अपनी उच्चराशि में स्थित होकर अथवा स्वनवांश में स्थित, दृष्ट दो वर्णों को अर्थात् दो अक्षरों को प्रदान करता है। यहाँ पर 'अपि' शब्द विकल्पार्थ का वाचक है॥११॥

अन्यद्विशेषमाह–

क्षेत्रेश्वरे क्षीणबलेंऽशके च
मात्राक्षरं नाशमुपैति तज्जम्।
असम्भवेऽप्युद्भवमेति तस्मिन्
वर्गाद्यमुच्चांशयुजीशदृष्टे॥१२॥

और भी विशेष कहते हैं–

यदि लग्नेश निर्बल होकर हीन नवांश में हो, तो वह मात्रा और अक्षर की हानि करता है। यदि वही लग्न स्वामी और नवांश निर्बलता में असम्भव (बल हीन का असम्भव अर्थात् बली) हो और उच्च स्थित नवांश स्वामी से देखा जाता हो तो मात्राक्षर की उत्पत्ति होती है।।१२।।

क्षेत्रेश्वरे लग्नस्वामिनि क्षीणबले परिक्षीणवीर्ये क्षीणांशके क्षीणनवभागे तज्जं मात्राक्षरं नाशमुपैति। मात्रा चाक्षरं च तन्मात्राक्षरम्। तस्माज्जातम् उत्पन्नं तज्जम्। नाशमुपैति क्षयं प्राप्नोति। असम्भवेऽपीति। तस्मिन्नेव क्षीणेश्वरे क्षीणबलांशके चासम्भवे तस्य मात्राक्षरस्य नाश उद्भवमेत्युद्भवति लभते। किं वर्गाद्यं वर्गप्रथमम्, तस्मिन्। कीदृशे? उच्चांशयुजि उच्चस्थे तथेशदृष्टे स्वामिनावलोकिते।।१२।।

क्षेत्रेश्वर अर्थात् लग्नेश के क्षीणबल होने पर क्षीणांश अर्थात् क्षीण नवमांश होने पर, उससे उत्पन्न मात्रा और अक्षर का विनाश करता है। मात्रा और अक्षर के योग को मात्राक्षर कहा गया है। उससे उत्पन्न को 'तज्ज' कहा गया है। यहाँ पर नाश शब्द का अर्थ क्षय (न्यूनता) समझना चाहिये। इस प्रकार से निर्बल ग्रह और उसका क्षीण नवांश के असम्भव (बली) होने पर उसके मात्राक्षर का नाश उत्पन्न होता है। इसका तात्पर्य यह है कि वर्गाद्य अर्थात् वर्ग का प्रथम अक्षर का उद्भव होता है। यदि उच्चनवमांश हो और वह अपने स्वामी से देखा जाता हो।।१२।।

अनिश्चयीकरणमाह–

केन्द्रे यथास्थानबलप्रकर्षं
क्षेत्रस्य तत्क्षेत्रपतेश्च बुद्ध्वा
कार्योऽक्षराणामनुपूर्वयोगो
मात्रादिसंयोगविकल्पना च ।।१३।।

अनिश्चय का विचार करते हैं–

केन्द्रे में स्थित राशियों के स्थान तथा उनका बल एवं राशीश को ज्ञात करे। तदनुसार अक्षरों का संयोजन और उसमें मात्रा का विचार करे।।१३।।

केन्द्र लग्नचतुर्थसप्तमदशमानामन्यतमे। क्षेत्रस्य राशेः। तत्क्षेत्रपतेश्च तत्स्वामिनः। यथास्थानबलप्रकर्षम्, स्थानं च बलं च स्थानबले तयोः प्रकर्षं उत्कृष्टता। स्थानबलेन प्रथमो लभ्यते, दृष्टिबलेन द्वितीयादयः। एवं बुद्ध्वा ततोऽक्षराणां वर्णानामनुपूर्वयोगः। अनुपूर्वेण अनुक्रमेण योगः संयोगः कार्यः कर्तव्यः। तथा मात्रादिसंयोगविकल्पना च कार्या। मात्रा आदिर्यस्य स मात्रादिसंयोगस्तस्य विकल्पना संयोगविकल्पना आदिसंयोगोऽन्तसंयोगश्च। एतदुक्तं भवति–अधोमात्रा ऊर्ध्वमात्रास्तिर्यङ्मात्राश्च संयोगविकल्पनया कार्याः।।१३।।

केन्द्र अर्थात् १,४,७,१० स्थान, क्षेत्र अर्थात् राशि, क्षेत्रपति अर्थात् उनके स्वामी ग्रह के स्थान और बल अर्थात् उनकी श्रेष्ठता का विचार करते हुये दृष्टि का विचार करे। स्थानबल से प्रथम तथा दृष्टिबल से द्वितीय आदि वर्णों का विचार होता है। इस प्रकार से समझकर वर्णों का आनुपूर्विक संयोजन करे। तथा मात्राओं के संयोग की भी कल्पना करनी चाहिये। मात्रादि संयोग की विकल्पना अर्थात् संयोजन की कल्पना अर्थात् आदि में जो संयोग हो और अन्त में जो संयोग हो। इसका अभिप्राय यह है कि अधोमात्रा, ऊर्ध्वमात्रा और तिर्यक्मात्रा के संयोजन की परिकल्पना करें।।१३।।

अथांशकक्रमेण राशीनामक्षराण्याह–

तत्रादिराश्यादिचतुर्विलग्न-
माद्यंशकादिक्रमपर्ययेण
ग्रहांशकेभ्यः स्वगणाक्षराणा-
मन्वर्थने प्राप्तिरियं विधार्या।।१४।।

अंशक्रमानुसार राशियों के अक्षरों को कहते हैं–

आदि राशि (मेष) से चार केन्द्रस्थ राशियों के नवमांश, क्रमानुसार ग्रहों के अंशों के आधार पर अपने वर्ग के अक्षरों का ज्ञान प्राप्त करने का विचार करे।।१४।।

तत्र तस्मिन्नामानयने। आदिराश्यादि। आदिराशिर्मेषस्तदादि तत्प्रथमं यच्चतुर्विलग्नं मेषकर्कितुलामकराख्यं तस्याद्यंशकादिक्रमपर्ययेण, प्रथमनवांशकपरिपाट्या ग्रहांशकेभ्यो नवग्रहभागेभ्यः स्वगणाक्षराणां स्ववर्गकथितवर्णानाम्,[1]"कवर्गपूर्वान् कुजशुक्रचान्द्रिजीवार्कजानाम्" इत्यनेन विहितानामन्वर्थने प्राप्तिर्निष्पत्तिरियं विधार्या कर्तव्या।।१४।।

अब नाम ज्ञात करने का प्रकार बतलाते हैं आदि राशि अर्थात् मेष राशि; इससे आरम्भ कर जो चार केन्द्रस्थ लग्न १, ४, ७, १० होंगे। उनके प्रथम अंश के क्रम से ग्रहांश अर्थात् नवग्रहों के अंशानुसार स्ववर्ग के कथित वर्णों का विचार करे। जैसाकि इसी अध्याय के तृतीय श्लोक में कहा गया है–कवर्गादि अक्षरों का भौम, शुक्र, बुध, गुरु और शनि से विचार किया गया है। इसके अनुसार ही नामाक्षरों को जानने का प्रयत्न करें।।१४।।

अथादिराश्यादिक्रमेण वर्णानाह–

मेषे ककारो हिबुके यकार-
स्तुले चकारो मकरे पकारः।
मेषे छकारो हिबुकेऽप्यकार-
स्तुले खकारो मकरे फकारः।।१५।।

---

१. अस्यैवाध्यायस्य ३ श्लोकः।

अब राशियों के क्रम से वर्णों को कहते हैं–

मेष राशि के प्रथम नवांश में ककार, चतुर्थ में यकार, सप्तम तुला में चकार, दशम नवांश मकर में पकार, इसी क्रम में मेष में छकार, कर्क में यकार, तुला में खकार और मकर में फकार होता है।।१५।।

मेषे लग्ने केन्द्रस्था मेषकर्कितुलमकरा भवन्ति। एत एव स्वांशेनोदयं कुर्वन्ति। तत्र मेषस्य प्रथमो नवांशो मेष एव तस्य स्वामी भौमः। मेषस्य प्रथमनवांशकत्वाद्भौमवर्गात् प्रथममक्षरं ककारमापतति। हिबुके चतुर्थे कर्कटकस्तस्य स्वामी चन्द्रः, तस्यापि प्रथमनावांशकोदयत्वाच्चन्द्राद्यवर्गात् प्रथमं वर्गाक्षरं यकारमापतति। सप्तमस्थाने तुलो भवति। तस्य स्वामी शुक्रः। तत्प्रथमनवमांशत्वाच्छौक्रवर्गात् प्रथममक्षरं चकारमापतति। दशमस्थाने मकरो भवति। तस्य स्वामी शनैश्चरः तत्प्रथमनवांशकोदयत्वाच्छनैश्चरात् पवर्गात् प्रथममक्षरं पकारमापतति। अत एवोक्तम्–

मेषे ककारो हिबुके यकारस्तुले चकारो मकेर पकारः।

एवं द्वितीयादिष्वंशकेषु स्वामिविहतवर्गक्रमगणनयांशकतुल्यं वर्णं ग्राह्यम्। मृदुबुद्धिप्रबोधनायास्माभिः किञ्चित् क्रियते। तत्र मेषद्वितीयनवांशकस्य शुक्रोऽधिपतिस्तद्वर्गाद् द्वितीयमक्षरं छकारमापतति। कर्कटकद्वितीयस्य सूर्योऽधिपतिस्तद्वर्गात् प्रथममक्षरमकारमापतति। तुलद्वितीयस्य भौमोऽधिपतिस्तद्वर्गाद् द्वितीयमक्षरं खकारमापतति। मकरद्वितीयनवांशकस्य सौरोऽधिपतिस्तदीयवर्गाद् द्वितीयमक्षरं फकारमापतति। अत एवोक्तम्–

मेषे छकारो हिबुकेऽप्यकारस्तुले खकारो मकरे फकारः।।इति।।१५।।

यदि मेषलग्न हो तब केन्द्र में मेष, कर्क, तुला और मकर राशियाँ स्थित होती हैं। इसलिए ये अपने अंश से आरम्भ होती हैं। मेष का प्रथम नवांश मेष ही होता है और उसका अधिपति भौम होता है। मेष के प्रथम नवांश होने के कारण भौम के वर्ग से प्रथम अक्षर ककार आता है। चतुर्थ भाव में कर्क रहता है। जिसका स्वामी चन्द्रमा, इसके भी प्रथम नवांश का उदय होने के कारण चन्द्रमा का आद्य वर्ग का प्रथम अक्षर यकार प्राप्त होता है। सप्तमस्थान में तुला राशि होती है। इसका स्वामी शुक्र होता है। इसका प्रथम नवमांश शुक्र के वर्ग का प्रथम अक्षर चकार होता है। दशमस्थान में मकर होता है। जिसका स्वामी शनि है। इसके प्रथम नवांश का आरम्भ मकर से होता है और उसके स्वामी शनि के पवर्ग का प्रथम अक्षर पकार होता है। इसीलिए कहा गया है–

मेष में ककार, कर्क में यकार, तुला में चकार तथा मकर में पकार होता है।

इसी प्रकार द्वितीय आदि नवमांशों में होता है। उनके स्वामी ग्रहों के निर्धारित वर्ग के क्रमानुसार गणना करने पर अंश तुल्य वर्ण का ग्रहण करना चाहिए। कोमल

बुद्धि वाले को समझने हेतु मेरे द्वारा और स्पष्ट किया जा रहा है। यहाँ पर मेष का दूसरे नवमांश का स्वामी शुक्र है। उसके वर्ग से दूसरा वर्ण छकार आता है। कर्क राशि के द्वितीय नवमांश का स्वामी सूर्य होता है। उसके वर्ग का प्रथम अक्षर यकार प्राप्त होता है। तुला के द्वितीय नवमांश का स्वामी मंगल है। उसके वर्ग का द्वितीय अक्षर खकार होता है। मकर राशि के द्वितीय नवांश का अधिपति शनि है। जिसके वर्ग का द्वितीय अक्षर फकार होता है। इसलिए कहा गया है–

मेष में छकार, कर्क में यकार, तुला में खकार तथा मकर में फकार होता है॥१५॥

अन्वेष्यवप्याह–

मेषे टकारो हिबुके ठकार-
स्तुले तकारो मकरे थकारः।
मेषे तु रेफो हिबुके जकार-
स्तुले बकारो मकरे गकारः॥१६॥

अन्य वर्णों में भी कहते हैं–

मेष में टकार, कर्क में ठकार, तुला में तकार, मकर में थकार होता है। पुनः मेष में रकार, कर्क में जकार, तुला में बकार और मकर में गकार होता है॥१६॥

मेषे तृतीयनवांशकस्य बुधोऽधिपतिस्तदीयवर्गात् प्रथममक्षरं टकारमापतति। कर्कटतृतीयनवांशकस्य बुध एवाधिपतिस्तदीयवर्गाद् द्वितीयमक्षरं ठकारमापतति। तुलतृतीयनवांशकस्य जीवोऽधिपतिस्तदीयवर्गात् प्रथममक्षरं तकारमापतति। मकर-तृतीयनवांशकस्य जीवोऽधिपतिस्तदीयवर्गाद् द्वितीयमक्षरं थकारमापतति। अत एवोक्तम्–

मेषे टकारो हिबुके ठकारस्तुले तकारो मकरे थकारः।

मेषस्य चतुर्थनवांशकाधिपतिश्चन्द्रस्तदीयवर्गाद् द्वितीयमक्षरं रेफमापतति। कर्कटतुर्थनवांशकाधिपतिः शुक्रस्तदीयवर्गात् तृतीयमक्षरं जकारमापतति। तुलस्य चतुर्थनवांशकाधिपतिः सौरस्तदीयवर्गात् तृतीयमक्षरं बकारमापतति। मकरस्य चतुर्थनवांशाधिपतिर्भौमस्तदीयवर्गात् तृतीयमक्षरं गकारमापतति। अत एवोक्तम्–

मेषे तु रेफो हिबुके जकारस्तुले बकारो मकरे गकारः॥इति॥१६॥

मेष के तृतीय नवमांश का स्वामी बुध होता है। उसके वर्ग का प्रथम अक्षर टकार आता है। कर्क के तृतीय नवमांश का स्वामी बुध है। इसके वर्ग का द्वितीय अक्षर ठकार होता है। तुला के तृतीय नवमांश का स्वामी गुरु होता है। इसके वर्ग का प्रथम अक्षर तकार प्राप्त होता है। मकर के तृतीय नवांश का अधिपति गुरु होता है। इसके वर्ग का द्वितीय अक्षर थकार होता है। इसीलिए कहा गया है–

मेष में टकार, कर्क में ठकार, तुला में तकार और मकर में थकार होता है।

मेष के चतुर्थ नवांश का स्वामी चन्द्रमा है। उसके वर्ग का द्वितीय अक्षर रकार होता है। कर्क के चतुर्थ नवांश का स्वामी शुक्र है और उसके वर्ग का तृतीय अक्षर जकार है। तुला के चतुर्थ नवांश का स्वामी शनि है। जिसके वर्ग का तीसरा अक्षर बकार होता है। मकर के चतुर्थ नवमांश का स्वामी मंगल है। और उसके वर्ग का तीसरा अक्षर गकार प्राप्त होता है। इसलिए कहा गया है–

मेष में रकार, कर्क में जकार, तुला में बकार तथा मकर में गकार होता है॥१६॥

अन्वेष्यप्याह–

आकारमाद्येऽम्बुगते घकार-
मस्ते भकारं मकरे झकारम्।
लग्ने डकारं हिबुके दकार-
मस्ते धकारं मकरे ढकारम्।।१७।।

अन्य नवांशो का भी कहते हैं–

मेष में आकार कर्क में घकार, तुला में भकार और मकर में झकार होता है। पुनः लग्न (मेष) में डकार, कर्क में दकार अस्त (तुला) में धकार और मकर में ढकार होता है॥१७॥

मेषे पञ्चमनवांशकस्याधिपतिः सूर्यस्तदीयवर्गाद् द्वितीयमक्षरमाकारमापतति। कर्कटे पञ्चमनवांशकाधिपतिर्भौमस्तदीयवर्गाच्चतुर्थमक्षरं घकारमापतति। तुले पञ्चमनवांशकस्य सौरोऽधिपतिस्तद्वर्गाच्चतुर्थमक्षरं भकारमापतति। मकरे पञ्चमनवांशकस्य शुक्रोऽधिपतिस्तदीयवर्गाच्चतुर्थमक्षरं झकारमापतति। अत एवोक्तम्–

आकारमाद्येऽम्बुगते घकारमस्ते भकारं मकरे झकारम्।

मेषे षष्ठनवांशकस्य बुधोऽधिपतिस्तदीयवर्गात् तृतीयवर्गात् तृतीयमक्षरं डकारमापतति। कर्कटके षष्ठनवांशाधिपतिर्जीवस्तदीयवर्गात् तृतीयमक्षरं दकारमापतति। तुले षष्ठनवांशाधिपतिर्जीव एव तदीयवर्गाच्चतुर्थमक्षरं धकारमापतति। मकरे षष्ठनवांशाधिपतिर्बुधस्तदीवर्गाच्चतुर्थमक्षरं ढकारमापतति। अतएवोक्तम्–

लग्ने डकारं हिबुके दकारमस्ते धकारं मकरे ढकारम् ॥इति १७॥

मेष के पञ्चम नवांश का स्वामी सूर्य होता है, जिसके वर्ग का द्वितीय अक्षर आकार होता है। कर्क के पञ्चम नवांश का स्वामी मंगल है। इसके वर्ग का चतुर्थ अक्षर घकार होता है। तुला के पञ्चम नवांश का स्वामी शनि है और उसके वर्ग का चतुर्थ अक्षर भकार प्राप्त होता है। मकर के पञ्चम नवमांश का स्वामी शुक्र है और उसके

वर्ग का चतुर्थ अक्षर झकार होता है। इसलिए कहा गया है–

मेष में आकार, कर्क में धकार, तुला में भकार तथा मकर में झकार होता है।

मेष के षष्ठ नवांश का स्वामी बुध है और उसके वर्ग का तृतीय अक्षर डकार होता है। कर्क के षष्ठ नवमांश का स्वामी ग्रह गुरु होता है। इसके वर्ग का तृतीय अक्षर दकार होता है। तुला के षष्ठ नवमांश का स्वामी गुरु होता है और उसके वर्ग का चतुर्थ अक्षर धकार होता है। मकर के षष्ठ नवमांश का स्वामी बुध है। उसके वर्ग का चतुर्थ अक्षर ठकार होता है। इसीलिए कहा गया है–

लग्न में डकार, कर्क में दकार, तुला में धकार और मकर में ठकार होता है॥१७॥

अन्येष्वप्याह–

लग्ने ञकारो हिबुके मकार-
स्तुले ङकारो मकरे लकारः।
लग्ने ककारो हिबुके पकार-
स्तुले चकारो मकरे इकारः॥१८॥

अन्य अंशों में भी कहते हैं–

लग्न (मेष) में ञकार, हिबुक (कर्क) में मकार, तुला में ङकार और मकर में लकार होता है। पुनः लग्न में ककार, कर्क में पकार, तुला में चकार तथा मकर में इकार होता है॥१८॥

मेषस्य सप्तनवांशकाधिपतिः शुक्रस्तदीयवर्गात् पञ्चममक्षरं ञकारमापतति। कर्कटस्य सप्तनवांशकाधिपतिः सौरस्तदीयवर्गात् पञ्चममक्षरं मकारमापतति। तुलस्य सप्तन-वांशकाधिपतिभौमस्तदीयवर्गात् पञ्चममक्षरं ङकार-मापतति। मकरस्य सप्तनवांशकाधि-पतिश्चन्द्रस्तद्वर्गात् तृतीयमक्षरं लकारमापतति। अत एवोक्तम्–

लग्ने ञकारो हिबुके मकारस्तुले ङकारो मकरे लकारः।

मेषस्याष्टमनवांशकाधिपतिभौमस्तद्वर्गात् प्रथममक्षरं ककारमापतति। कर्कटस्याष्ट-मनवांशकाधिपतिः सौरस्तद्वर्गात् प्रथममक्षरं पकारमापतति। तुलस्याष्टमनवांशकाधिपतिः शुक्रस्तद्वर्गात् प्रथममक्षरं चकारमापतति। मकरस्याष्टमनवांशकाधिपतिः सूर्यस्तद्वर्गात् तृतीयमक्षरमिकारमापतति। अत एवोक्तम्–

लग्ने ककारो हिबुके पकारः। इत्यादि॥१८॥

मेष के सातवें नवांश का स्वामी शुक्र होता है, तथा उसके वर्ग का पञ्चम अक्षर ञकार होता है। कर्क के सातवें नवांश का स्वामी शनि है। इसके वर्ग का पाँचवाँ अक्षर मकार होता है। तुला के सातवें नवांश का स्वामी भौम है। उसके वर्ग का पञ्चम अक्षर

ङकार होता है। मकर के सातवें नवांश का स्वामी चन्द्रमा है। उसके वर्ग का तृतीय अक्षर लकार होता है। इसीलिए कहा गया है–

लग्न में ञकार, चतुर्थ में मकार, तुला में ङकार तथा मकर में लकार होता है।

मेष के आठवें नवांश का अधिपति मंगल होता है। उसके वर्ग का प्रथम अक्षर ककार होता है। कर्क के आठवें नवांश का स्वामी शनि है। उसके वर्ग का प्रथम अक्षर पकार होता है। तुला के आठवें नवांश का स्वामी शुक्र होता है। उसके वर्ग का प्रथम अक्षर चकार होता है। मकर के आठवें नवांश का अधिपति सूर्य होता है तथा उसके वर्ग का तृतीय अक्षर इकार होता है। इसीलिए कहा गया है–

लग्न में ककार, चतुर्थ में पकार इत्यादि ॥१८॥

अन्येष्वप्याह–

लग्ने नकारो हिबुके तकार-
स्तुले णकारो मकरे टकारः।
इत्येतदुक्तं चरसंज्ञकस्य वक्ष्ये
स्थिराख्यस्य चतुष्टयस्य।।१९।।

और अंशों में भी कहते हैं–

लग्न अर्थात् मेष लग्न के नवम नवमांश का वर्ण नकार, कर्क का तकार, तुला का णकार और मकर का टकार होता है। चरसंज्ञक (१, ४, ७, १०) राशियों का वर्णाक्षर विचार कहा गया है। स्थिरसंज्ञक राशियों (२,५,८,११) का विचार आगे किया जायेगा।।१९।।

मेषस्य नवमनवांशकाधिपतिर्जीवस्तदीयवर्गात् पञ्चममक्षरं नकारमापतति। कर्कटस्य नवमनवांशाधिपतिर्जीवस्तदीयवर्गात् प्रथममक्षरं तकारमापतति। तुलस्य नवमनवांशकाधिपतिर्बुधस्तदीयवर्गात् पञ्चममक्षरं णकारमापतति। मकरस्य नवमनवांशकाधिपतिर्बुधस्तद्वर्गात् प्रथममक्षरं टकारमापतति। अत एवोक्तम्–

लग्ने नकारो हिबुके तकारस्तुले णकारो मकरे टकारः। इत्यादि

इत्येतदुक्तमिति। इत्यनेन प्रकारेणैतदुक्तम्। तच्चरसंज्ञकस्य चतुष्टस्य। स्थिरसंज्ञकस्य वृषसिंहवृश्चिककुम्भाख्यस्येदानीं वक्ष्ये कथयिष्ये।।१९।।

मेष के नवम नवमांश का स्वामी गुरु होता है। उसके वर्ग का पञ्चम अक्षर नकार होता है। कर्क के नौवें नवमांश का स्वामी गुरु होता है। उसके वर्ग का प्रथम अक्षर तकार होता है। तुला के नौवें नवमांश का अधिपति बुध होता है। उसके वर्ग का पञ्चम अक्षर णकार होता है। मकर के नवम नवमांश का स्वामी बुध होता है। उसके वर्ग का प्रथम अक्षर टकार होता है। इसीलिए कहा गया है–

लग्न में नकार, कर्क में तकार, तुला में णकार तथा मकर में टकार होता है। इत्यादि।

इस प्रकार से उपर्युक्त कथन है, जो चर संज्ञक चार राशियों से सम्बन्धित है। स्थिरसंज्ञक वृष, सिंह, वृश्चिक और कुम्भ राशियों का अभिकथन आगे किया जायेगा।।१९।।

अधुना तदेवाह–

वृषे फकारो हिबुके खकारः कीटे वकारो नृघटे छकारः।
आद्यांशकेभ्यो मतिमान् विदध्यादनुक्रमेण स्थिरसंज्ञकेषु।।२०।।

अब स्थिरराशियों के अंशों को कहते हैं–

वृषराशि के प्रथम नवांश में फकार, चतुर्थ सिंह राशि का खकार, वृश्चिक, राशि का वकार और कुम्भराशि का छकार वर्ण होता है। इसी प्रकार प्रथम नवमांश के अगले नवमांश का वर्णविचार विद्वद् वर्ग क्रमानुसार ज्ञात करे।।२०।।

स्थिरसंज्ञा वृषसिंहवृश्चिककुम्भाः। ते च यथासङ्ख्यं मकरमेषकर्कटतुलेभ्य उदयं यान्ति। वृषस्य प्रथमनवांशको मकरस्तत्स्वामी सौरस्तदीयद्वितीयमक्षरं फकारमापतति। सिंहस्य प्रथममनवांशको मेषस्तत्स्वामी भौमस्तदीयाद्वर्गाद् द्वितीयमक्षरं खकारमापतति। वृश्चिकस्य प्रथमनावांशकः कर्कः तस्य स्वामी चन्द्रस्तदीयाद्य वर्गाच्चतुर्थमक्षरं वकारमापतति। कुम्भस्य प्रथमनवांशकस्तुलस्त्स्वामी शुक्रस्तदीयवर्गाद् द्वितीयमक्षरं छकारमापतति। अत एवोक्तम्–

वृषे फकारो हिबुके खकारः कीटे वकारो नृघटे छकारः।

एवं स्थिरसंज्ञकेषु स्थिरराशिषु मतिमान् पण्डित आद्यांशकेषु प्रथमनवांशकेष्वनुक्रमेण परिपाट्या विदध्यात् कारयेत्।।२०।।

वृष-सिंह-वृश्चिक और कुम्भराशियाँ स्थिरसंज्ञक है। इनमें क्रमशः मकर, मेष, कर्क और तुला राशियाँ प्रथम नवमांश में उदित होती हैं। वृषभ राशि का प्रथम नवमांश मकर है। जिसका स्वामी शनि होता है, इसका द्वितीय अक्षर फकार होता है। सिंह की प्रथम नवमांश राशि मेष है। इसका स्वामी मंगल होता है। इसके वर्ग का द्वितीय अक्षर खकार प्राप्त होता है। वृश्चिक का प्रथम नवमांश कर्क राशि है, जिसका स्वामी चन्द्रमा है, और इसके आद्य वर्ग का चतुर्थ अक्षर वकार होता है। कुम्भ के प्रथम नवमांश की राशि तुला है। जिसका स्वामी शुक्र है और उसके वर्ग का द्वितीय अक्षर छकार होता है। इसलिए कहा गया है–

वृष में फकार, कर्क में खकार, वृश्चिक में वकार और कुम्भ में छकार होता है।

इस प्रकार स्थिरसंज्ञक राशियों में बुद्धिमान् पण्डित आद्यांश अर्थात् प्रथम नवमांश के आधार पर क्रमानुसार वर्णज्ञान का विचार करें।।२०।।

अथान्येष्वाह–

लग्ने बकारो हिबुके जकार
ईकारमस्तेऽम्बरगे गकारः।
वृषे थकारो हिबुके टकारः
कीटे डकारो नृघटे दकारः।।२१।।

अन्य अंशों में भी कहते हैं–

वृष लग्न में वकार, सिंह में जकार, वृश्चिक में ईकार और कुम्भ में गकार होता है। वृष के तृतीय नवमांश में थकार, हिबुक (सिंह) में टकार, वृश्चिक में डकार तथा कुम्भ में दकार होता है।।२१।।

वृषद्वितीयनवांशकस्य सौरः स्वामी तदीयवर्गात् तृतीयमक्षरं बकारमापतति। सिंहद्वितीनवांशकस्य स्वामी शुक्रस्तदीयवर्गात् तृतीयमक्षरं जकारमापतति। वृश्चिकद्वितीयनवांशकस्य स्वामी सूर्यस्तदीयवर्गाच्चतुर्थमक्षरमीकारमापतति। कुम्भस्य द्वितीयनवांशकस्वामी भौमस्तदीयवर्गात् तृतीयमक्षरं गकाररमापतति। अत एवोक्तम्–

लग्ने बकारो हिबुके जकार ईकारमस्तेऽम्बरगे गकारः।

वृषतृतीयनवांशकस्वामी जीवस्तदीयवर्गाद् द्वितीयमक्षरं थकारमापतति। सिंहस्य तृतीयनवांशकस्वामी बुधस्तद्वर्गात् प्रथममक्षरं टकारमापतति। वृश्चिकस्य तृतीयनवांशकस्वामी बुधस्तदीयवर्गात् तृतीयमक्षरं डकारमापतति। कुम्भस्य तृतीयनवांशकस्वामी जीवस्तदीयवर्गात् तृतीयमक्षरं दकारमापतति। अत एवोक्तम्–

वृषे थकारो हिबुके टकारः कीटे डकारो नृघटे दकारः। इति।।२१।।

वृष के द्वितीय नवांश का स्वामी शनि होता है। उसके वर्ग का तृतीय अक्षर बकार होता है। सिंह के द्वितीय नवांश का स्वामी शुक्र है। उसके वर्ग का तीसरा अक्षर जकार होता है वृश्चिक के द्वितीय नवांश का स्वामी सूर्य है। उसके वर्ग का चतुर्थ अक्षर ईकार होता है। कुम्भ के द्वितीय नवांश का स्वामी भौम है। उसके वर्ग का तृतीय अक्षर गकार होता है। इसीलिए कहा गया है–

लग्न में बकार, सिंह में जकार, वृश्चिक में ईकार तथा कुम्भ में गकार होता है।

वृष के तृतीय नवांश का स्वामी गुरु होता है। उसके वर्ग का द्वितीय अक्षर थकार होता है। सिंह के तृतीय नवांश का स्वामी बुध है। उसके वर्ग का प्रथम अक्षर टकार होता है। वृश्चिक के तृतीय नवांश का स्वामी बुध है। उसके वर्ग का तीसरा अक्षर डकार होता है। कुम्भ के तृतीय नवांश का स्वामी गुरु होता है। उसके वर्ग का तृतीय अक्षर दकार होता है। इसलिए कहा गया है–

वृष में थकार, सिंह में टकार, वृश्चिक में डकार तथा कुम्भ में दकार होता है।।२१।।

अन्येष्वाह–

वृषे घकारो हिबुके शकारः
कीटे झकारो नृघटे भकारः।
लग्ने जकारो हिबुके उकारः
कीटे ङकारो नृघटे मकारः।।२२।।

अन्य अंशों में कहते हैं–

वृष लग्न के चतुर्थ नवमांश में घकार, हिबुक चतुर्थ अर्थात् सिंह में शकार, वृश्चिक में झकार तथा कुम्भ में भकार होता है। वृषराशि के पञ्चम नवमांश में जकार, सिंह में उकार, वृश्चिक में डकार और कुम्भ में मकार होता है।।२२।।

वृषस्य चतुर्थनवांशकाधिपो भौमस्तदीयवर्गाच्चतुर्थमक्षरं घकारमापतति। सिंहस्य चतुर्थनवांशकाधिपतिश्चन्द्रस्तदीयवर्गात् पञ्चममक्षरं शकारमापतति। वृश्चिकस्य चतुर्थनवांशकाधिपतिः शुक्रस्तदीयवर्गाच्चतुर्थमक्षरं झकारमापतति। कुम्भस्य चतुर्थन-वांशकाधिपतिः सौरस्तदीवर्गाच्चतुर्थमक्षरं भकारमापतति। अतएवोक्तम्–

वृषे घकारो हिबुके शकारः कीटे झकारो नृघटे भकारः।

वृषस्य पञ्चमनवांशकाधिपतिः शुक्रस्तदीयवर्गात् पञ्चममक्षरं जकारमापतति। सिंहस्य पञ्चमनवांशकाधिपतिः सूर्यस्तदीयवर्गात् पञ्चममक्षरमुकारमापतति। वृश्चिकस्य पञ्चमनवांशकाधिपतिर्भौमस्तदीयवर्गात् पञ्चममक्षरं ङकारमापतति। कुम्भस्य पञ्चमन-वांशकाधिपतिः सौरस्तदीयवर्गात् पञ्चममक्षरं मकारमापतति। अत एवोक्तम्–

लग्ने जकारो हिबुके उकारः कीटे ङकारो नृघटे मकारः ।।इति।।२२।।

वृष के चतुर्थ नवांश का स्वामी मंगल है। उसके वर्ग का चतुर्थ अक्षर धकार होता है। सिंह के चतुर्थ नवांश का अधिपति चन्द्रमा है। उसके वर्ग का पञ्चम वर्ण शकार होता है। वृश्चिक के चतुर्थ नवांश का स्वामी शुक्र होता है। उसके वर्ग का चतुर्थ अक्षर झकार होता है। कुम्भ के चतुर्थं नवांश का स्वामी शनि है। उसके वर्ग का चतुर्थ अक्षर भकार होता है। इसलिए कहा गया है–

वृष में घकार, सिंह में शकार, वृश्चिक में झकार तथा कुम्भ में भकार होता है।

वृष के पञ्चम नवांश का स्वामी शुक्र है। उसके वर्ग का पञ्चम अक्षर जकार होता है। सिंह के पञ्चम नवांश का स्वामी सूर्य होता है। उसके वर्ग का पञ्चम वर्ण उकार होता है। वृश्चिक के पञ्चम नवांश का स्वामी मंगल है। उसके वर्ग का पञ्चम अक्षर ङकार होता है। कुम्भ के पञ्चम नवांश का अधिपति शनि होता है। उसके वर्ग का पञ्चम अक्षर मकार होता है। इसलिए कहा गया है–

लग्न में जकार, सिंह में उकार, वृश्चिक में ङकार तथा कुम्भ में मकार होता

है।।२२।।

अन्येष्वप्याह–

लग्ने ढकारोऽथ जले णकार-
श्चास्ते धकारोऽम्बरगे नकारः।
वृषे षकारो हिबुके चकारः।
कीटे पकारो नृघटे ककारः।।२३।।

अन्य अंशों में कहा गया है–

वृष लग्न के छठे नवमांश में ढकार, सिंह (जल) में णकार, वृश्चिक में धकार तथा कुम्भ में नकार होता है। वृष के सप्तम नवमांश में षकार, सिंह में चकार, वृश्चिक में पकार और कुम्भ में ककार होता है।।२३।।

वृषस्य षष्ठनवांशकाधिपतिर्बुधस्तदीयवर्गाच्चतुर्थमक्षरं ढकारमापतति। सिंहस्य षष्ठनवांशाधिपतिर्बुधस्तदीयवर्गात् पञ्चममक्षरं णकारमापतति। वृश्चिकस्य षष्ठनवांशकाधिपतिर्जीवस्तदीयवर्गाच्चतुर्थमक्षरं धकारमापतति। कुम्भस्य षष्ठनवांशाधिपतिर्जीवस्तदीयवर्गात् पञ्चममक्षरं नकारमापतति। अत एवोक्तम्–

लग्ने ढकारोऽथ जले णकारश्चास्ते धकारोऽम्बरगे नकारः।

वृषस्य सप्तमनवांशकाधिपतिचन्द्रस्तदीयर्गात् षष्ठमक्षरं षकारमापतति। सिंहस्य सप्तनवांशकाधिपतिः शुक्रस्तदीय वर्गात्, प्रथममक्षरं चकारमापतति। वृश्चिकस्य सप्तमनवांशकाधिपतिः सौरस्तदीयवर्गात् प्रथममक्षरं पकारमापतति। कुम्भस्य सप्तमनवांशकाधिपतिर्भौमस्तदीयवर्गात् प्रथममक्षरं ककारमापतति। अत एवोक्तम्–

वृषे षकारो हिबुके चकारः कीटे पकारो नृघटे ककारः। इति।।२३।।

वृष के षष्ठ नवांश का स्वामी बुध होता है। उसके वर्ग का चतुर्थ वर्ण ढकार होता है। सिंह के षष्ठ नवांश का अधिपति बुध है। उसके वर्ग का पञ्चम अक्षर णकार होता है। वृश्चिक के षष्ठ नवांश का स्वामी बृहस्पति होता है। उसके वर्ग का चतुर्थ वर्ण धकार होता है। कुम्भ के षष्ठ नवांश का स्वामी गुरु है। उसके वर्ग का पञ्चम अक्षर नकार होता है। इसलिए कहा गया है–

वृष–लग्न में ढकार, सिंह में णकार, वृश्चिक में धकार तथा कुम्भ में नकार होता है।

वृष के सातवें नवांश का स्वामी चन्द्रमा है। उसके वर्ग का षष्ठ वर्ण षकार होता है। सिंह के सातवें नवांश का अधिपति शुक्र होता है। उसके वर्ग का प्रथम वर्ण चकार होता है। वृश्चिक के सातवें नवांश का स्वामी शनि होता है। उसके वर्ग का प्रथम वर्ण पकार होता है। कुम्भ के सातवें नवांश का अधिपति मंगल है। उसके वर्ग का प्रथम

अक्षर ककार होता है। इसलिए कहा गया है–

वृष में षकार, सिंह में चकार, वृश्चिक में पकार तथा कुम्भ में ककार होता है॥२३॥

अन्येष्वप्याह–

ऊकारमाहुर्वृषभे जले ख-
मस्ते फकारो नृघटे छकारः।
अन्त्ये वृषे टं तमुशन्ति सिंहे
थं सप्तगे ठं प्रवदन्ति कुम्भे॥२४॥

अन्य अंशों में कहा गया है–

वृष लग्न के अष्टम नवमांश में ऊकार, सिंह में खकार, वृश्चिक में फकार और कुम्भ में छकार होता है। वृष लग्न के अन्तिम नवमांश में टकार, सिंह में थकार, तथा कुम्भ में ठकार कहा गया है॥२४॥

वृषस्याष्टमनवांशकाधिपतिः सूर्यस्तदीयवर्गात् षष्ठमक्षरमूकारमापतति। सिंहस्याष्टमनवांशकाधपतिभौमस्तदीयवर्गाद् द्वितीयमक्षरं खकारमापतति। वृश्चिकस्याष्टमनवांशकाधिपतिः शनिस्तदीयवर्गाद् द्वितीयमक्षरं फकारमापतति। कुम्भस्याष्टमनवांशकाधिपतिः शुक्रस्तदीयवर्गाद् द्वितीयमक्षरं छकारमापतति। अत एवोक्तम्–

ऊकारमाहुर्वृषभे जले खमस्ते फकारो नृघटे छकारः।

वृषस्य नवमनवांशकाधिपतिर्बुधस्तदीयवर्गात् प्रथममक्षरं टकारमापतति। सिंहस्य नवमनवांशकाधिपतिर्जीवस्तदीयवर्गात् प्रथममक्षरं तकारमापतति। वृश्चिकस्य नवमनवांशकाधिपतिर्जीवस्तदीयवर्गाद् द्वितीयमक्षरं थकारमापतति। कुम्भस्य नवमनवांशकाधिपतिर्बुधस्तदीयवर्गाद् द्वितीयमक्षरं ठकारमापतति। अत एवोक्तम्–

अन्त्ये वृषे टं तमुशन्ति सिंहे थं सप्तगे ठं प्रवदन्ति कुम्भे। इति॥२४॥

वृष के आठवें नवांश का स्वामी सूर्य होता है। उसके वर्ग का षष्ठ वर्ण ऊकार होता है। सिंह के आठवें नवांश का स्वामी भौम है। उसके वर्ग का द्वितीय अक्षर खकार होता है। वृश्चिक के आठवें नवांश का अधिपति शनि है। उसके वर्ग का द्वितीय वर्ण फकार होता है। कुम्भ के आठवें नवांश का स्वामी शुक्र है उसके वर्ग का द्वितीय अक्षर छकार होता है। इसलिए कहा गया है–

वृष में ऊकार, सिंह में खकार, वृश्चिक में फकार तथा कुम्भ में छकार होता है।

वृष के नवमांश का अधिपति बुध होता है। उसके वर्ग का प्रथम अक्षर टकार होता है। सिंह के नवम नवमांश का स्वामी गुरु होता है। उसके वर्ग का प्रथम अक्षर तकार होता है। वृश्चिक के नवम नवांश का स्वामी गुरु है। उसके वर्ग का द्वितीय अक्षर

थकार होता है। कुम्भ के नवम नवमांश का स्वामी बुध है। उसके वर्ग का द्वितीय वर्ण ठकार होता है। इसलिए कहा गया है–

वृष में टकार, सिंह में तकार, वृश्चिक में थकार तथा कुम्भ में ठकार होता है॥२४॥

अथ द्विस्वभावेष्वाह–

द्विमूर्तिसंज्ञे मिथुने जकारः
षष्ठे बकारः प्रथमांशके स्यात्।
धनुर्धरेऽस्तोपगते गकारो
मीनद्वये चाम्बरगे सकारः।।२५।।

अब द्विस्वभाव लग्नो में कहते हैं–

द्विस्वभाव संज्ञक मिथुन लग्न के प्रथम नवांश में जकार, कन्या में बकार, धनु में गकार और मीन राशि में सकार होता है॥२५॥

द्विमूर्तिसंज्ञा मिथुनकन्याधन्विमीना। तुलमकरमेषकर्कटेभ्य उदयं यान्ति। मिथुनस्य प्रथमनवांशकस्तुलस्तस्य स्वामी शुक्रस्तदीयाच्चवर्गात् तृतीयमक्षरं जकारमापतति। कन्यायाः प्रथमनवांशको मकरस्तस्य स्वामी सौरस्तदीयात् पवर्गात् तृतीयमक्षरं बकारमापतति। धनुषः प्रथमनवांशको मेषस्तस्य स्वामी भौमस्तदीयवर्गात् तृतीयमक्षरं गकारमापतति। मीनस्य प्रथमनवांशकः कर्कटस्तस्य स्वामी चन्द्रस्तदीयवर्गात् सप्तममक्षरं सकारमापतति। अत एवोक्तम्–

द्विमूर्तिसंज्ञे मिथुने जकारः षष्ठे बकारः प्रथमांशके स्यात्।
धनुर्धरेऽस्तोपगते गकारो मीनद्वये चाम्बरगे सकारः।इति।।२५।।

मिथुन, कन्या, धनु और मीन राशियाँ द्विस्वभाव संज्ञक हैं। इनमें क्रमशः तुला, मकर, मेष और कर्क राशियाँ प्रथम नवांश में उदित होती हैं। मिथुन राशि का प्रथम नवांश तुला है जिसका स्वामी शुक्र होता है। उसके वर्ग का तृतीय अक्षर जकार होता है। कन्या का प्रथम नवांश मकर होता है, जिसका स्वामी शनि है। उसका वर्ग प वर्ग है, जिसका तृतीय अक्षर बकार होता है। धनु का प्रथम नवमांश मेष होता है, जिसका स्वामी भौम है। उसके वर्ग का तृतीय वर्ण गकार होता है। मीन का प्रथम नवांश कर्क होता है, जिसका स्वामी चन्द्रमा है। उसके वर्ग का सातवाँ अक्षर सकार होता है। इसलिए कहा गया है–

द्विस्वभावसंज्ञक मिथुन राशि में जकार और कन्या में बकार प्रथम नवमांश में होता है। उसके सप्तम में स्थित धनुराशि में गकार एवं दशमस्थ मीन रशि का सकार वर्ण होता है॥२५॥

अन्येष्वप्याह–

लग्ने घकारो हिबुके भकार-
श्चास्ते झकारोऽम्बरमध्यगे ई
लग्ने दकारो हिबुके धकार-
मस्ते डकारं विदुरम्बरे ढम्।।२६।।

अन्य अंशों में कहते हैं–

मिथुन लग्न के द्वितीय नवमांश में घकार एवं हिबुक अर्थात् उससे चतुर्थ कन्या राशि में भकार और सप्तम धनु राशि में झकार तथा दशमस्थ मीन राशि में ईकार होता है। पुनः मिथुन लग्न के तृतीय नवमांश में दकार, कन्या में धकार, धनु में डकार और मीन में ढकार होता है॥२६॥

मिथुनस्य द्वितीयनवांशस्वामी भौमस्तदीयवर्गाच्चतुर्थमक्षरं घकारमापतति। कन्याया द्वितीयनवांशकस्वामी सौरस्तदीयवर्गाच्चतुर्थमक्षरं भकारमापतति। धन्विनो द्वितीयनवांशकस्वामी शुक्रस्तदीयवर्गाच्चतुर्थमक्षरं झकारमापतति। मीनस्य द्वितीयनवांशकस्वामी सूर्यस्तदीयवर्गाच्चतुर्थमक्षरमीकारमापतति। अत एवोक्तम्–

लग्ने घकारो हिबुके भकारश्चास्ते झकारोऽम्बरमध्यगे ई।

मिथुनतृतीयनवांशकाधिपतिर्जीवस्तदीयवर्गात् तृतीयमक्षरं दकारमापतति। कन्यातृतीयनवांशकपतिर्जीवस्तदीयवर्गाच्चतुर्थमक्षरं धकारमापतति। धन्विन-स्तृतीयनवांशकाधिपतिर्बुधस्तदीयवर्गात् तृतीयमक्षरं डकारमापतति। मीनस्य तृतीयनवांशकाधिपतिर्बुधस्तदीयवर्गाच्चतुर्थमक्षरं ढकारमापतति। अत एवोक्तम्–

लग्ने दकारो हिबुके धकारमस्ते डकारं विदुरम्बरे ढम्। इति।।२६।।

मिथुन के द्वितीय नवांश का स्वामी मंगल होता है। उसके वर्ग का चतुर्थ अक्षर घकार होता है। कन्या का चतुर्थ वर्ण भकार होता है। धनु के द्वितीय नवांश का स्वामी शुक्र होता है। उसके वर्ग का चतुर्थ अक्षर झकार होता है। मीन के द्वितीय नवांश का स्वामी सूर्य है। उसके वर्ग का चतुर्थ वर्ण ईकार होता है। इसलिए कहा गया है–

लग्न में घकार, कन्या में भकार, धनु में झकार तथा मीन में ईकार होता है।

मिथुन के तृतीय नवमांश का स्वामी गुरु होता है। उसके वर्ग का तृतीय अक्षर दकार होता है। कन्या के तृतीय नवांश का स्वामी गुरु होता है। उसके वर्ग का चतुर्थ वर्ण धकार होता है। धनु के तृतीय नवमांश का स्वामी बुध है। उसके वर्ग का तृतीय अक्षर डकार होता है। मीन के तृतीय नवमांश का अधिपति बुध होता है। उसके वर्ग का चतुर्थ अक्षर ढकार होता है। इसलिए कहा गया है–

लग्न में दकार, कन्या में धकार, धनु में डकार तथा मीन में ढकार होता

है।।२६।।

अन्येष्वाह–

लग्ने मकारो हिबुके ङकार-
श्चास्ते हकारोऽम्बरगे ञकारः।
लग्ने पकारो जलगे चकार
ऐकारमस्तेऽम्बरगे ककारः।।२७।।

अन्य अंशों में कहते हैं–मिथुन लग्न के चतुर्थ नवमांश में मकार, कन्या में ङकार, सप्तमस्थ धनु में हकार और दशमस्थ मीन में ञकार होता है। पुनः मिथुन लग्न के पञ्चम नवमांश में पकार, कन्या में चकार, धनु में ऐकार और मीन में ककार होता है।।२७।।

मिथुनस्य चतुर्थनवांशकस्वामी सौरस्तदीयवर्गात् पञ्चममक्षरं मकारमापतति। कन्यायाश्चतुर्थनवाशंकस्वामी भौमस्तदीयवर्गात् पञ्चममक्षरं ङकारमापतति। धन्विनश्च-तुर्थनवांशकाधिपतिश्चन्द्रस्तदीयवर्गादष्टममक्षरं हकारमापतति। मीनस्य चतुर्थनवांशकाधिपतिः शुक्रस्तदीयवर्गात् पञ्चममक्षरं ञकारमापतति। अत एवोक्तम्–

लग्ने मकारो हिबुके ङकारश्चास्ते हकारोऽम्बरगे ञकारः।

मिथुनस्य पञ्चमनवांशकाधिपतिः सौरस्तदीयवर्गात् प्रथममक्षरं पकारमापतति। कन्यायाः पञ्चमनवांशकाधिपति; शुक्रस्तदीयवर्गात् प्रथममक्षरं चकारमापतति। धनुषः पञ्चमनवांशकाधिपतिः सूर्यस्तदीयवर्गादष्टममक्षरमैकारमापतति। मीनस्य पञ्चमनवांश-काधिपतिर्भौमस्तदीयवर्गात् प्रथममक्षरं ककारमापतति। अत एवोक्तम्–

लग्ने पकारो जलगे चकार ऐकारमस्तेऽम्बरगे ककारः। इति।।२७।।

मिथुन के चतुर्थ नवमांश का स्वामी शनि होता है। उसके वर्ग का पञ्चमाक्षर मकार होता है। कन्या के चतुर्थ नवांश का स्वामी भौम है। उसके वर्ग का पञ्चम अक्षर ङकार होता है। धनु राशि के चतुर्थ नवांश का अधिपति ग्रह चन्द्रमा है। उसके वर्ग का षष्ठ अक्षर हकार होता है। मीन के चतुर्थ नवांश का स्वामी शुक्र होता है। उसके वर्ग का पञ्चम अक्षर ञकार होता है। इसलिए कहा गया है–

लग्न में मकार, कन्या में ङकार, धनु में हकार तथा मीन में ञकार होता है।

मिथुन के पञ्चम नवांश का अधिपति शनि ग्रह होता है। उसके वर्ग का प्रथम अक्षर पकार होता है। कन्या राशि के पञ्चम नवांश का अधिपति शुक्र होता है। उसके वर्ग का प्रथम अक्षर चकार होता है। धनुराशि के पञ्चम नवांश का अधिपति सूर्य है। उसके वर्ग का अष्टम वर्ण ऐकार होता है। मीन के पञ्चम नवांश का स्वामी भौम है। उसके वर्ग का प्रथम वर्ण ककार होता है। इसलिए कहा गया है–

लग्न में पकार, कन्या में चकार, धनु में ऐकार तथा मीन में ककार होता है।।२७।।

अन्येष्वाह–

प्राग्लग्नगे नं जलगे णमाहु-
रस्तं गते टं नभसि स्थिते तम्।
प्राग्लग्नगे खं जलगे यमाहु-
रस्तं गते छं नभसि स्थिते फम्।।२८।।

अन्य नवमांशो को कहा जा रहा है–

मिथुन के षष्ठ नवमांश का पञ्चम अक्षर नकार, कन्या में णकार, धनु में टकार और मीन का तकार होता है। इसी प्रकार मिथुन के सप्तम नवमांश में खकार, कन्या में यकार, धनु में छकार और मीन में फकार होता है।।२८।।

मिथुनस्य षष्ठनवांशकाधिपतिर्जीवस्तदीयवर्गात् पञ्चममक्षरं नकारमापतति। कन्यायाः षष्ठनवांशकाधिपतिर्बुधस्तदीयवर्गात् पञ्चममक्षरं णकारमापतति। धन्विनः षष्ठनवांशकाधिपतिर्बुधस्तदीयवर्गात् प्रथममक्षरं टकारमापतति। मीनस्य षष्ठनवांशकाधिपतिर्जीवस्तदीयवर्गात् प्रथममक्षरं तकारमापतति। अत एवोक्तम्–

प्राग्लग्नगे नं जलगे णमाहुरस्तं गते टं नभसि स्थिते तम्।

मिथुनस्य सप्तमनवांशकाधिपतिर्भौमस्तदीयवर्गाद् द्वितीयमक्षरं खकारमापतति। कन्यायाः सप्तमनवांशकाधिपतिश्चन्द्रस्तदीयवर्गात् प्रथममक्षरं यकारमापतति। धन्विनः सप्तमनवांशकाधिपतिः शुक्रस्तदीयवर्गाद् द्वितीयमक्षरं छकारमापतति। मीनस्य सप्तमनवांशकाधिपतिः सौरस्तदीयवर्गाद् द्वितीयमक्षरं फकारमापतति। अत एवोक्तम्–

प्राग्लग्नगे खं जलगे यमाहुरस्तं गते छं नभसि स्थिते फम्। ।।२८।।

मिथुन के छठे नवांश का अधिपति गुरु होता है। उसके वर्ग का पञ्चम अक्षर नकार होता है। कन्या राशि के षष्ठ नवमांश का स्वामी बुध होता है। उसके वर्ग का पञ्चम अक्षर णकार होता है। धनु राशि के षष्ठ नवमांश का अधिपति बुध है। उसके वर्ग का प्रथम अक्षर टकार होता है। मीन के षष्ठ नवमांश का स्वामी गुरु होता है। उसके वर्ग का प्रथम वर्ण तकार होता है। इसलिए कहा गया है–

लग्न में नकार, कन्या में णकार, धनु में टकार तथा मीन में तकार होता है।

मिथुन के सप्तम नवमांश का स्वामी भौम होता है। उसके वर्ग का द्वितीय अक्षर खकार होता है। कन्या के सप्तम नवमांश का अधिपति चन्द्रमा होता है। उसके वर्ग का प्रथम अक्षर यकार होता है। धनु के सप्तम नवमांश का स्वामी शुक्र होता है। उसके वर्ग का द्वितीय वर्ण छकार होता है। मीन राशि के सप्तम नवमांश का अधिपति

शनि होता है। उसके वर्ग का द्वितीय वर्ण फकार होता है। इसलिए कहा गया है–

लग्न में खकार, कन्या में यकार, धनु में छकार तथा मीन में फकार होता है।।२८।।

अन्येष्वाह–

लग्ने जमोकारमथाम्बुसंस्थे गमस्तसंस्थे विदुरम्बरे बम्।
ठं लग्नगेऽन्त्ये हिबुकाश्रिते डं थमस्तगे दं नभसि स्थिते वै।।२९।।

अन्य अंशों में कहते हैं–

मिथुन लग्न के अष्टम नवमांश में जकार, कन्या में ओकार धनु में गकार तथा मीन में बकार होता है। इसी प्रकार मिथुन लग्न के अन्तिम नवांश में ठकार तथा उससे चतुर्थ कन्या में डकार, सप्तम धनु में थकार एवं दशम मीन में दकार होता है।।२९।।

मिथुनस्याष्टमनवांशकाधिपतिः शुक्रस्तदीयवर्गात् तृतीयमक्षरं जकारमापतति। कन्याया अष्टमनवांशकाधिपतिः सूर्यस्तदीयवर्गान्नवममक्षरमोकारमापतति। धन्विनोऽष्टमनवांशकाधिपति- भौमस्तदीयवर्गात् तृतीयमक्षरं गकारमापतति। मीनस्याष्टमनवांशकाधिपतिः सौरस्तदीयवर्गात् तृतीयमक्षरं बकारमापतति। अत एवोक्तम्–

लग्ने जमोकारमथाम्बुसंस्थे गमस्तसंस्थे विदुरम्बरे बम्।

मिथुनस्य नवमनवांशकाधिपतिर्बुधस्तदीयवर्गाद् द्वितीयमक्षरं ठकारमापतति। कन्याया नवमनवांशकाधिपतिर्बुधस्तदीयवर्गात् तृतीयमक्षरं डकारमापतति। धन्विनो नवमन- वांशकाधिपतिर्जीवस्तदीयवर्गाद् द्वितीयमक्षरं थखारमापतति। मीनस्य नवमनवांशकाधिपति- र्जीवस्तदीयवर्गात् तृतीयमक्षरं दकारमापतति। अत एवोक्तम्–

ठं लग्नगेऽन्त्ये हिबुकाश्रिते डं थमस्तगे दं नभसि स्थिते वै। इति।।२९।।

मिथुन के आठवें नवांश का स्वामी शुक्र होता है। उसके वर्ग का तृतीय अक्षर जकार होता है। कन्या राशि के आठवें नवांश का स्वामी सूर्य होता है। उसके वर्ग का नवम अक्षर ओकार होता है। धनुराशि का अष्टम नवमाशं का स्वामी सूर्य होता है। उसके वर्ग का तृतीय अक्षर गकार होता है। मीन राशि के अष्टम नवमांश का स्वामी शनि होता है। उसके वर्ग का तृतीय अक्षर बकार होता है। इसलिए कहा गया है–

लग्न में जकार, कन्या में ओकार, धनु में जकार तथा मीन में बकार होता है।

मिथुनराशि के नवम नवमांश का स्वामी बुध होता है। उसके वर्ग का द्वितीय अक्षर ठकार होता है। कन्या राशि के नवम नवमांश का स्वामी बुध होता है। उसके वर्ग का तृतीय अक्षर डकार होता है। धनु राशि के नवम नवमांश का स्वामी गुरु होता है। उसके वर्ग का द्वितीय अक्षर थकार होता है। मीन राशि के नवम नवमांश का स्वामी गुरु होता है। उसके वर्ग का तृतीय अक्षर दकार होता है। इसलिए कहा गया है–

मिथुन लग्न में ठकार, कन्या में डकार, धनु में थकार तथा मीन में दकार होता है॥२९॥

अत्र प्रविभागमाह–

एवं विकल्पोऽक्षरसंग्रहोऽयं
नाम्नां निरुद्दिष्टविधान उक्तः।
सर्वेषु लग्नेषु च केचिदेव-
मिच्छन्ति पूर्वोक्तविधानवत् तु॥३०॥

इन अंशों के विभाग बतलाते हैं–

इस प्रकार वर्णाक्षरों के संकलन हेतु संकल्पना की गयी है। जिसका नामाक्षर ज्ञात करने का विधान बतलाया गया है। कतिपय आचार्य पूर्वोक्त विधान के अनुसार ही मेषादि सभी लग्नों में विचार करना चाहते हैं॥३०॥

एवमनेनानन्तरोक्तेन प्रकारेण विकल्पो विकल्पना यस्याक्षरसंग्रहस्य वर्णसंघातस्य सोऽयं नाम्नामभिधानानां निर्विशेषेणोद्दिष्टमुक्तं विधानं विधिर्येन। उक्तः कथितः सर्वेष्वखिलेषु लग्नेषु मेषादिषु राशिषु केचिदाचार्या एवमनेन प्रकारेणेच्छन्ति वाञ्छन्ति। पूर्वोक्तविधानवत् तु। पूर्वोक्तेन प्रागुद्दिष्टेन विधानेन तुल्यं वर्तत इति पूर्वोक्तविधानवत्। मेषे ककार इत्यादिनेति॥३०॥

इस प्रकार उपर्युक्त विधि को विकल्पित कर जिन अक्षरों के संकलन का निर्देश किया गया है, नामाक्षरों के निर्णय हेतु यह विशिष्ट विधि अभिकथित है। सभी लग्नों में अर्थात् मेषादि राशियों में कतिपय आचार्य इसी विधि से विचार करना चाहते हैं। विधि वही है, जो इसके पूर्व कही गयी है। जैसाकि मेषलग्न में ककार इत्यादि का उल्लेख है॥३०॥

अत्रैव नामानयने प्रकारान्तरमाह–

केन्द्राणि वा केन्द्रगतांशकैः स्वैः
पृथक् पृथक् संगुणितानि कृत्वा।
त्रिकृद्विभक्तं विदुरक्षरं तत्
क्षेत्रेश्वरस्यांशपरिक्रमस्वम्॥३१।

यहाँ पर नाम ज्ञात करने के लिए प्रकारान्तर कहते हैं–

केन्द्र में स्थित चार राशियों तथा केन्द्रगत उन राशियों के अपने-अपने नवमांश के अनुसार पृथक्-पृथक् संकलित कर विचार किया जाता है। चर-स्थिर-द्विस्वभाव; इन तीन प्रकार की राशियों के अनुसार अक्षरों का विचार किया जाता है। जिनमें राशिपति तथा उसके नवमांशपति के आधार पर नामाक्षर निश्चित होते

हैं॥३१॥

मेषादयः पृच्छालग्ना द्वादश तेषां त्रयो भेदाश्चरस्थिरद्विस्वभावाख्याः। तत्र चरा मेषकर्कितुलमकराः। स्थिरा वृषसिंहवृश्चिककुम्भाः। द्विस्वभावा मिथुन कन्याधन्विमीनाः। मेषादिषु चतुर्षु मध्याद्यन्तमारभ्य पृच्छा भवति। तत आरभ्य चराणि चत्वारि केन्द्राणि भवन्ति राश्यादिष्विति।

अथ स्थिरेषु वृषादिषु चतुर्षु मध्याद्यन्तमारभ्य पृच्छा भवति। तत आरभ्य स्थिराणि चत्वारि केन्द्राणि भवन्ति।

अथ द्विस्वभावेषु मिथुनादिषु चतुर्ष्वपि मध्याद्यन्तमारभ्य पृच्छा भवति। तत एवारभ्य द्विस्वभावानि चत्वारि केन्द्राणि भवन्ति, नान्यानि। केन्द्राणि च लग्नचतुर्थसप्तमदशमानि। वाशब्दो भावान्तरोक्तविकल्पप्रदर्शनार्थः। मेषे ककार इत्येतच्चक्रं प्रागुक्तं प्रदर्शितम् ।

वा केन्द्रगतांशकैः स्वैरिति। केन्द्रेषु चतुर्षु ये गताः समवस्थिता अंशका नवभागास्तैरात्मीयैः पृथक् पृथक् प्रत्येकं संगुणितानि संहतानि कृत्वा विधाय। एतदुक्तं

मे	बृ	मि	क	सिं	क	तु	वृ	ध	म	कुं	मी
क	फ	ज	प	ख	ब	च	व	ग	प	छ	स
छ	ब	घ	अ	ज	भ	ख	ई	झ	फ	ग	ई
ट	थ	द	ठ	ट	ध	त	ड	ड	थ	द	ढ
र	घ	म	ज	श	ङ	ब	झ	ह	ग	भ	ञ
आ	ञ	प	घ	उ	च	भ	ङ	ऐ	झ	म	क
ड	ढ	न	द	ण	ण	ध	ध	ट	ढ	न	त
ञ	ष	ख	म	च	य	ङ	प	छ	ल	क	फ
क	ऊ	ज	प	ख	ओ	च	ठ	ग	इ	छ	ब
न	ट	ठ	त	त	ड	ण	थ	थ	ट	ठ	द

भवति—केन्द्रस्थितं राशिं मेषादिकं नवांशैर्नवभिर्विभज्य यद्‌भवति तावत्सङ्ख्यमङ्कं संस्थाप्योदित नवांशकैः स्वैर्गुणयेत्। ततस्तत्केन्द्रचतुष्टयं त्रिकृता त्रिकृत्या भक्तं कार्यम्। त्रयाणां कृद्वर्गस्त्रिकृद् नव इत्यर्थः। तया विभक्तं विभाजितम्। तदक्षरं वर्णं विदुर्जानते। यल्लब्धं तदक्षरम्। कस्य? क्षेत्रेश्वरस्य राश्यधिपतेः। अंशपरिक्रमेण नवांशपरिपाट्या स्वमात्मीयम्। अयमभिप्रायोऽत्र त्रैराशिकात्मकः। यदि नवभिर्नवभिर्नवाक्षराणि लभ्यन्ते तदेभिर्नवांशकैः कत्यक्षराणीति। चरेषु चतुर्ष्वपि केन्द्रेषु सर्वेषां भौमादीनां षणनवांशा भवन्ति। तैश्चैतावत एव संगुण्य षडक्षराणि भवन्ति। एष्वेव केन्द्रेषु सर्वेषां स्ववर्गाक्षराणि परिपाट्या भवन्ति। प्रथमनवांशके स्ववर्गे प्रथममक्षरं, द्वितीये द्वितीयं, तृतीये तृतीयमेतावता

चरकेन्द्रचतुष्टये। सप्तमे द्वितीयम्। अष्टमे तृतीयं। नवमे चतुर्थम्। दशमे पञ्चमम्। एकादशे पुनर्निवृत्य स्ववर्गात् प्रथमम्। द्वादशे द्वितीयम्। अर्कचन्द्रयोस्तु चतुर्थे चतुर्थं, पञ्चमे पञ्चमं, षष्ठे षष्ठम्। एतावता स्थिरे केन्द्रचतुष्टये समाप्ते द्विमूर्तिकेन्द्रचतुष्टये त्रयोदशे तृतीयं चतुर्दशे चतुर्थं पञ्चदशे पञ्चमम्। षोडशे पुनर्निवृत्य स्ववर्गात् प्रथमं सप्तदशे द्वितीयमष्टादशे तृतीयमिति। अर्कचन्द्रयोस्तु सप्तमे सप्तमम्। अष्टमे अष्टमम्। नवमे नवमम्। चन्द्रस्य पुनर्निवृत्य नवमं स्ववर्गवर्णेभ्यः प्रथममक्षरमिति।।३१।।

मेषादि प्रश्न लग्न बारह होते हैं। इनके चर, स्थिर और द्विस्वभावसंज्ञक तीन भेद माने गये हैं। १, ४, ७, १० लग्न को चर, २,५,८,११ को स्थिर तथा ३, ६, ९, १२ को द्विस्वभाव लग्न कहा जाता है। मेषादि चार लग्नों में मध्य, आदि और अन्त्य क्रम से प्रश्न होते हैं। उससे प्रारम्भकर चरराशि की चार राशियाँ केन्द्र में स्थित होती हैं।

इसी प्रकार वृषादि चार स्थिर राशियों में मध्य, आदि और अन्त्य का विचार किया जाता है। प्रथम से आरम्भ कर चार स्थिर राशियाँ केन्द्रगत रहती हैं।

मिथुनादि चार द्विस्वभाव राशियों में भी मध्य, आदि और अन्त्य का विचार किया जाता है। प्रथम से आरम्भ कर द्विस्वभाव की चार राशियाँ केन्द्रगत होती हैं। इनसे भिन्न कोई अन्य राशि नहीं होती है। लग्न, चतुर्थ, सप्तम और दशम को केन्द्र कहते हैं। यहाँ पर मूल में 'वा' शब्द भावान्तर कहने के लिए विचारार्थ उक्त है। जैसा कि मेष में ककारादि का चक्र पहले ही प्रदर्शित किया जा चुका है।

केन्द्र की चार राशियों में प्राप्त अंश अर्थात् नवमांश, उनके अनुसार पृथक्-पृथक् से संगुणित अर्थात् संकलन किया जाता है। इसका अभिप्राय यह है कि केन्द्र में स्थित मेषादि राशियों का नौ से विभाजित जो नवमांश भाग होता है, उस संख्या के तुल्य अंक को स्थापित कर उसमें उदित अपने नवमांश का गुणन किया जाता है। तत्पश्चात् केन्द्र चतुष्टय को त्रिगुणित करे। तीन का त्रिगुणित अर्थात् तीन का वर्ग नौ होता है। इसके द्वारा विभक्त अर्थात् विभाजित है, जो लब्धि होती है, तत्संख्यक वर्ण को जानना चाहिये। वह वर्ण क्षेत्रेश्वर अर्थात् राशीश का होता है। अंशों के अर्थात् नवमांश के क्रम से इनका अपना वर्ण होता है। यहाँ पर त्रैराशिक गणित से विचार करना चाहिये। यदि नौ-नौ अंशों में नौ अक्षर प्राप्त होते हैं, तब प्राप्त नवांशों में कितने अक्षर प्राप्त होंगे? चर लग्न के चारों केन्द्रों में भौमादि सभी ग्रहों के छः नवांश होते हैं। उनसे उतने ही छः अक्षर प्राप्त होते हैं, इन केन्द्रों में भौमादि सभी ग्रहों के जिन-जिन केन्द्रों में जितने नवमांश उपलब्ध होते हैं, उन सभी केन्द्रों में उनके वर्गाक्षर क्रमशः होते हैं। प्रथम नवमांश में अपने वर्ग का प्रथम अक्षर, द्वितीय नवमांश में द्वितीय अक्षर तथा तृतीय नवमांश में तृतीय अक्षर, चरराशिस्थ चारों केन्द्रों में प्राप्त

होते हैं, सप्तम में द्वितीय, अष्टम में तृतीय, नवम में चतुर्थ, दशम में पञ्चम तथा एकादश में पुनः प्रत्यावर्तित होकर अपने वर्ग का प्रथम अक्षर और द्वादश में द्वितीय अक्षर होता है। सूर्य और चन्द्रमा का चतुर्थ में चतुर्थ वर्ण, पञ्चम में पञ्चम तथा षष्ठ में षष्ठ वर्ण होता है। यह स्थिर लग्न के चारों केन्द्रों में कहा गया है। स्थिर राशि के समाप्त होने पर द्विस्वभाव के चारों केन्द्रों में तेरहवीं आवृत्ति में तृतीय, चतुर्दश में चतुर्थ और पन्द्रहें में पञ्चम होता है। सोलहवीं आवृत्ति में पुनः अपने वर्ग से प्रथम, सप्तदश में द्वितीय और अट्ठारहवें में तृतीय होता है। सूर्य-चन्द्रमा का सप्तमभाव में सप्तम राशि, अष्टम में आठवीं और नवम में नौवी राशि होती है। चन्द्रमा का पुनः पुनरावर्तित होकर नवम अपने वर्ग का प्रथमाक्षर होता है॥३१॥

संचिन्तितप्रार्थितनिर्गतेषु नष्टक्षतस्त्रीरतिभोजनेषु।
स्वप्नर्क्षचिन्तापुरुषादिवर्गेष्वेतेषु नामान्युपलक्षयेत॥३२॥

इनके प्रयोजन को प्रदर्शित करते हैं–

सञ्चित पदार्थ, प्रार्थितवस्तु, निर्गत (यात्रा) आदि प्रकरण, नष्ट वस्तु, आघात, स्त्री-भोग, भोजन, स्वप्न, नक्षत्र-विचार, चिन्ता और पुरुष-समूह के विचार हेतु पूर्वोक्त नवमांश के द्वारा नाम ज्ञात किया जाता है॥३२॥

संचिन्तितं मनसा पदार्थानां परिकल्पनम्। प्रार्थितं वाचोक्तम्। इदं सम्पद्यतामिति। निर्गतं निर्गमनम्। नष्टं दृष्टिविषयादपहृतं यद्वस्तु। क्षतं हिंसितम्। स्त्रीरतिरुत्तमादिस्त्रिया सह रमणम्। भोजनमाहारविशेषो मांसादि। एतेषु पदार्थेषु। तथा स्वप्नं सुप्तस्य स्वप्नावस्थायां नानाप्रकारवस्तुदर्शनम्। ऋक्षं नक्षत्रं तज्ज्ञानम्। चिन्ता मनसा परिकल्पनम्। पुरुषादिः, पुरुषो नर आदिर्येषाम्। आदिग्रहणात् स्त्रीनपुंसकयोर्ग्रहणम्। पुरुषादीनां वर्गेषु समूहेषु एतेषु नामान्यभिधानान्युपलक्षयेत विन्द्यात्। कथम्? यथासंख्यं केन्द्रचतुष्टयस्य प्रस्तुतत्वात्। अत्र यथासंख्यं प्रदर्श्यते। लग्नादारभ्य सञ्चिन्तितनामान्युपलक्षयेत्। चतुर्थादारभ्य प्रार्थितनामान्युपलक्षयेत्। सप्तमादारभ्य निर्गतनामान्युपलक्षयेत्। दशमादारभ्य नष्टनामा–न्युपलक्षयेत्। पुनर्निवृत्य लग्नादारभ्य क्षतनामान्युपलक्षयेत्। चतुर्थादारभ्य स्त्रीनामान्युपलक्षयेत्। सप्तमादारभ्य रतिनामान्युपलक्षयेत्। दशमादारभ्य भोजननामान्युपलक्षयेत्। पुनर्निवृत्य लग्नादारभ्य स्वप्ननामान्युपलक्षयेत्। चतुर्थादारभ्य ऋक्षनामान्युपलक्षयेत्। सप्तमादारभ्य चिन्तानामान्युपलक्षयेत्। दशमादारभ्य पुरुषादिनामान्युपलक्षयेदिति भद्रम्॥

रचिताक्षरकोशस्य टीका शिष्यहितावहा।
भट्टोत्पलेन सुस्पष्टा श्लोकैः खाङ्गाश्विसम्मितैः॥इति ॥३२॥

संचिन्तित अर्थात् मन में किन्हीं वस्तुओं की कल्पना करना, प्रार्थित अर्थात् वाणी से याचितवस्तु यथा–यह करना चाहिए। निर्गत अर्थात् यात्रा अथवा किसी वस्तु का चला जाना। नष्ट अर्थात् आँखों से ओझल हुई कोई वस्तु, क्षत अर्थात् हिंसा और

आघात, स्त्रीरति अर्थात् उत्तम स्त्री के साथ संभोग, भोजन अर्थात् मांसादि आहार विशेष; इन विषयों में विचार किया जाता है। तथा सुप्त अर्थात् निद्रावस्था में विविध प्रकार की वस्तुओं को देखना। ऋक्ष अर्थात् नक्षत्र विषयकज्ञान, चिन्ता अर्थात् मन की परिकल्पनाएँ, पुरुषादि अर्थात् पुरुष सहित स्त्री एवं नपुंसक वर्ग का समाहार, पुरुषादि के समूहों में इनके नामों को जाने। किस प्रकार से? यथाक्रम से केन्द्र के चारों स्थानों का विचार कर। इनको क्रमानुसार ज्ञात करने का विचार प्रस्तुत करते हैं। लग्न से आरम्भ कर सञ्चित नामों का विचार करें। चतुर्थ से आरम्भ कर प्रार्थित वस्तुओं के नाम को ज्ञात करें। सप्तम से आरम्भ कर निर्गत वस्तु का नाम ज्ञात करे। दशम से आरम्भ कर नष्ट वस्तु का नाम जाने। पुनः लग्न से आरम्भ कर आघातक का नाम ज्ञात करे। चतुर्थ से आरम्भकर स्त्री के नाम को ज्ञात करे। सप्तम से आरम्भ कर सम्भोग का ज्ञान करे। दशम से आरम्भ कर भोज्य पदार्थ के नाम का ज्ञान करे। पुनः लग्न से आरम्भ कर निद्रा को ज्ञात करे। चतुर्थ से आरम्भ कर नक्षत्र के नाम को समझे। सप्तम से आरम्भ कर चिन्ताओं को, दशम से आरम्भ कर पुरुषादि के नामों को ज्ञात कर ले। इस प्रकार सभी का कल्याण हो।

अक्षर कोश की विरचित यह टीका, शिष्यों के हितार्थ आचार्य भटोत्पल के द्वारा, सुस्पष्ट श्लोकों के माध्यम से ७६० शकाब्द में पूर्ण की गयी।।३२।।

एवमेव गतेऽक्षरकोशे आगतस्य नामानयनमाह–

द्व्यक्षरं चरगृहांशकोदये
नाम चास्य चतुरक्षरं स्थिरे।
नामयुग्ममपि च द्विमूर्तिषु
त्र्यक्षरं भवति चास्य पञ्चभिः।।१४।।

पूर्वोक्त अक्षरकोश में समागत नामों में कहते हैं–

चरलग्न और चर नवांश में आगन्तुक या प्रश्न कर्ता के दो अक्षर का नाम तथा स्थिर लग्न और स्थिर नवमांश में चार अक्षर का नाम होता है। द्विस्वभाव राशिके लग्न और नवमांश में दो नाम होते हैं। उनमें एक तीन अक्षर का और दूसरा पाँच अक्षर का होता है।।१४।।

यस्मिन् तस्मिन् राशौ लग्नगते चरगृहांशकोदये तत्कालं तस्य चरराश्यंशको लग्नगतो भवति, तदा तस्यागन्तुः प्रष्टुर्वा द्व्यक्षरं नाम। लग्ननवांशयोर्भेदे यो बलवांस्तद्वशान्नाम। एवं स्थिरलग्ने स्थिरनवांशकोदये च चतुरक्षरं नाम। द्विमूर्त्तिषु द्विस्वभावेषु लग्नगतेषु तन्नवांशकेषु चास्य नामयुग्मं नामद्वितयं भवति। तत्रैकं नाम त्र्यक्षरम्। द्वितीयं पञ्चभिरक्षरैर्भवति। एवं चरलग्ने चरांशके विज्ञेयम्।।१४।।

किसी भी राशि में चर नवमांश लग्न में हो अर्थात् चर नवमांश लग्नगत हो,

तब आगन्तुक अथवा प्रश्नकर्ता का नाम दो अक्षरों का होता है। लग्न और नवमांश में भेद होने पर उनमें से जो बली हो तदनुसार नाम होगा। इसी प्रकार स्थिर लग्न और स्थिर नवमांश प्राप्त हो, तब चार अक्षरों का नाम होता है। द्विस्वभाव लग्न एवं द्विस्वभाव नवमांश होने पर दो नाम होते हैं। उनमें से एक नाम तीन अक्षरों का तथा दूसरा नाम पाँच अक्षरों का होता है। इसी प्रकार चरलग्न और चरनवमांश का विचार करना चाहिए।।१४।।

अथ नामवर्णानयनमाह–

काद्यास्तु वर्गाः कुजशुक्रसौम्य–
जीवार्कजानां क्रमशः प्रदिष्टाः।
वर्णाष्टकं यादि च शीतरश्मे-
रवेरकारात् क्रमशः स्वराः स्युः।।१५।।
नामानि चाग्न्यम्बुकुमारविष्णु-
शक्रेन्द्रपत्नीचतुराननानाम्।
तुल्यानि सूर्यात् क्रमशो विचिन्त्य
द्वित्र्यादिवर्णैर्घटयेत् स्वबुद्ध्या।।१६।।

नामाक्षर ज्ञान के लिए कहते हैं–

'क' आदि वर्गों के क्रमशः मंगल, शुक्र, बुध, गुरु और शनि ग्रह स्वामी कहे गये हैं। यकार आदि आठ वर्ण चन्द्रमा के होते हैं। तथा अकारादि सभी स्वर वर्ण सूर्य के माने गये हैं।।१५।।

सूर्यादि ग्रहों के अनुसार नामाक्षरों तथा उनके पर्यायवाची शब्दों का विचार करना चाहिये। यथा-सूर्य के लिए अग्निवाचक शब्दों के पर्याय, चन्द्रमा के लिए जलवाचक शब्दों के पर्याय, मंगल के लिये कुमार अर्थात् का कार्तिकेय के पर्यायवाची नाम, बुध के लिये विष्णुवाचक पर्याय, गुरु के लिए इन्द्रवाचक और शुक्र के लिए इन्द्राणीवाचक तथा शनि के लिए चतुरानन (ब्रह्मा) के पर्यायवाची नामों का विचार करना चाहिए। सूर्यादि ग्रहों का क्रमशः विचार करते हुये दो, तीन आदि वर्णों का अपनी बुद्धि के अनुसार संकल्पना करें।।१६।।

काद्यास्तु इति। ककाराद्या वर्गाः कुजादीनां भौमादीनां क्रमशः परिपाट्या उक्ताः। तद्यथा–कवर्गः कुजस्य। चवर्गः शुक्रस्य। टवर्गः सौम्यस्य बुधस्य। तवर्गो जीवस्य गुरोः। पवर्गोऽर्कजस्य सौरस्य। यादि यकारादिवर्णाष्टकं शीतरश्मेश्चन्द्रस्य। रवेरादित्यस्याकारात् प्रभृति क्रमशो द्वादश स्वराः स्युर्भवेयुः। प्रयोजनम्–चतुर्षु लग्नादिषु केन्द्रेषु ये तत्कालं नवांशकाः समुद्गताः, तेषां येऽधिपतयो ग्रहास्तेषां ये वर्गा

उक्तास्तैर्वर्गैरंशकगणनया प्राग्वदक्षरकोशाभिहितं प्राग्वद्वर्णमुत्पाद्य तैर्वर्णैस्तस्य नामोत्पादनीयमिति। अत एव मेषे ककार इत्यादिकस्याक्षरचक्रस्य न्यासः प्रदर्शितः, किन्तु तत्रस्थो ग्रहो वर्गोत्तमस्व—राशिद्रेष्काणनवांशोच्चवक्रस्थितो भवति, तदायुर्दायगणनावद् द्वित्रिगुणत्वमक्षराणां कार्यम्। द्वित्रिगुणत्वे सकृद् त्रिगुणमिति च। वर्गोत्तमादिवर्जितोऽन्यतः स्थितः पापोऽक्षरं हन्ति। एवं स्वरान् व्यञ्जनानि च संगृह्य ततो नामरचना। लग्नकेन्द्रादारभ्याक्षरक्रमेणोर्ध्वा—धोभागयोजनां कृत्वा नामरचनायै लग्नकेन्द्रस्य तनुत्वात् प्राधान्यात् प्रथमं तद्वर्णं नाम्नि योजनां कृत्वा नामरचनायै लग्नकेन्द्रस्य तनुत्वात् प्राधान्यात् प्रथमं तद्वर्णं नाम्नि योजयेत्। ततश्चतुर्थोत्पन्नान्, ततः सप्तमजान्, ततो दशमजानिति। अथवाकेन्द्रांशक-स्वामिबलवशादिति। अन्ये एवमक्षरानयनं व्याचक्षते-यथाऽर्कस्य राशौ सार्धलिप्ताशते भुक्ते स्ववर्गादिकैकमक्षरं भवति। चन्द्रस्य पञ्चविंशत्यधिके शतद्वयभुक्ते एकैकमक्षरं स्ववर्गाद् भवति। अन्येषां लिप्ताशतद्वयेनैकैकमक्षरं भवति। द्वित्रिगुणत्वं नामानीति। आदित्ये लग्नपतावंशपतौ वाऽग्निपर्यायस्तस्य नाम लग्नांशकपयोर्वलाधिक्यात्। एवं चन्द्र अम्बुपर्यायः। कुजः कुमारपर्यायः। कुमारः कार्तिकेयः। बुधो विष्णुपर्यायः। बृहस्पतिः शक्रपर्यायः। शक्र इन्द्रः। शुक्र इन्द्रपत्नीपर्यायः। इन्द्रपत्नी शची। सौरश्चतुराननपर्यायः। चतुराननश्चतुर्मुखो ब्रह्मा। सूर्यादादित्यात् प्रभृत्येषां तुल्यानि सदृशानि नामानि क्रमशः परिपाट्या विचिन्त्य विचार्य द्वित्र्यादिवर्णैर्वर्णद्वयेन वर्णत्रयेण वर्णचतुष्टयेन वर्णपञ्चकेन वा स्वबुद्ध्यात्मीयया बुद्ध्या नाम घटयेदुत्पादयेत्। एतदुक्तं भवति-द्व्यक्षरादिकं नाम बहुभिवर्णैर्लब्धैः स्वबुद्ध्योत्तरमध्याधरक्रमेण विचार्याऽऽपादिकं नाम घटयेत्। बलिनो ग्रहस्याक्षरमुत्तरम्। मध्यबलस्य मध्यगतम्। बलहीनस्याधो योज्यम्। अनेन न्यायेन नामानयनं कार्यमिति।।१५-१६।।

ककारादि वर्ग भौमादि ग्रहों के लिए क्रमशः कहे गये हैं। यथा—मंगल का कवर्ग, शुक्र का चवर्ग बुध का टवर्ग, जीव अर्थात् गुरु का त वर्ग और शनि का पवर्ग, यादि अर्थात् य + आदि, यकारादि आठ वर्ण शीतरश्मि चन्द्रमा के होते हैं। सूर्य के अकारादि १२ स्वर क्रमशः होते हैं। अब इनकी उपयोगिता बताते हैं—लग्नादि चारों केन्द्र स्थानों में जो तात्कालिक नवमांश होते हैं, उनके जो नवमांशस्वामी ग्रह हैं। उनके लिए उपर्युक्त वर्गों से नवमांश गणनानुसार पूर्वकथित अक्षरकोश में निर्धारित पूर्ववत् वर्णो का संकलन करे। उन संकलित वर्णों के माध्यम से उसके नाम की संरचना करनी चाहिए। इसीलिए मेष में ककार इत्यादिक अक्षरचक्र का विन्यास प्रदर्शित किया गया है। परञ्च, वहाँ पर स्थित ग्रह वर्गोत्तम, स्वराशि, स्वद्रेष्काण, स्वनवांश, स्वोच्च और वक्री अवस्था में स्थित होता है। अतः आयुष्य गणना के सदृश अक्षरों को द्विगुणित और त्रिगुणित समझे। दो या तीन से गुणित करने पर एक

---

१. लघुजातके ७ अध्यायस्य २ श्लोकः।

बार ही त्रिगुणित कर लें। वर्गोत्तमादि से रहित ग्रह तथा विपरीत स्थिति में प्राप्त पापग्रह अक्षरों की हानि करता है। इस प्रकार से स्वरवर्णों और व्यञ्जनवर्णों को संकलित् कर नामाक्षरों की रचना करे। केन्द्रस्थित लग्न से आरम्भ कर अक्षरों के क्रम से ऊर्ध्वभाग और अधोभाग का संयोजन कर नाम रचना के निमित्त लग्नकेन्द्र के तनु अर्थात् प्रधान होने के कारण उसके वर्ण को ही नाम का प्रथमाक्षर बनाये। तत्पश्चात् चतुर्थ भाव से प्राप्त वर्ण, उसके बाद सप्तम भाव से प्राप्त अक्षर और इसके बाद दशमभाव से प्राप्त अक्षर समझे। अथवा नवमांशस्वामी के बलानुसार विचार करे। कतिपय विद्वान् नामाक्षरों के ज्ञान हेतु भिन्न प्रकार बतलाते हैं। यथा–सूर्य की राशि में २५० कला का भोग होने पर अपने वर्ग का १-१ अक्षर होता है। चन्द्रमा का २२५ कला भुक्त हो जाने पर १-१ अक्षर अपने वर्ग का प्राप्त होता है। अन्य ग्रहों के लिए दो कलाओं पर १-१ अक्षर प्राप्त होता है। नामाक्षरों में द्विगुणित एवं त्रिगुणित का विचार करते हैं। सूर्य के लग्नेश एवं नवमांशेश के अनुसार अग्नि के पर्यायवाची शब्दों के नाम, इसमें लग्न एवं नवमांश के बलाधिक्य के अनुसार विचार करें। इसीप्रकार चन्द्रमा से जलशब्द के पर्यायवाचक, मंगल से कुमार अर्थात् कार्तिकेय का पर्यायवाचक, बुध से विष्णु का पर्यायवाचक, बृहस्पति से शक्र अर्थात् इन्द्र का पर्यायवाचक, शुक्र से इन्द्र-पत्नी अर्थात् 'शची' का पर्यायवाचक और शनि से चतुरानन का पर्यायवाची शब्द लिखे। चतुरानन शब्द से चतुर्मुख ब्रह्मा का ग्रहण किया जाता है। सूर्य से (आदित्य) प्रभृति इन ग्रहों के सदृश नामों को क्रमानुसार विचार कर दो, तीन आदि वर्णों के अर्थात् २,३,४, ५ आदि वर्णों का नाम अपनी बुद्धि के अनुसार विरचित करे। इसका अभिप्राय यह है कि दो अक्षरों का नाम यदि वर्णों से उपलब्ध होता हो, तब स्वविवेक से आरम्भ, मध्य का आधार निर्धारित कर नाम की रचना करे। बली ग्रह का अक्षर अन्त में तथा मध्यबली का मध्य में और निर्बल ग्रह का द्योतक स्वर वर्ण अधोमात्रा के रूप में प्रयुक्त करे। इस प्रकार से नाम ज्ञात करने का कार्य करे॥१५-१६॥

अथ तेषामेवागतनाम्नां वयोज्ञानमाह–

वयांसि तेषां स्तनपानबाल्य-
व्रतस्थिता यौवनमध्यवृद्धाः।
अतीववृद्धा इति चन्द्रभौम-
ज्ञशुक्रजीवार्कशनैश्चराणाम्।।१७।।

प्राप्त नामवाले की अवस्था ज्ञात करने हेतु कहते हैं–

चन्द्रमा, मंगल, बुध, शुक्र, गुरु, सूर्य और शनि ग्रहों के अनुसार क्रमशः

शिशु, बाल्य, ब्रह्मचर्य, युवा, मध्य, वृद्ध, और अत्यधिक वृद्ध अवस्था उपलब्ध नामाक्षर वाले व्यक्ति की होती है॥१७॥

तेषां लब्धनाम्नां सर्वग्रहेभ्यश्चन्द्रे बलवत्यंशकपतौ लग्नपतौ वा स्तनपानं वयः। शिशुरित्यर्थः। एवं भौमे बाल्यं वर्षद्वयाद्वर्षषट्कं यावत्। बुधे व्रतस्थितो ब्रह्मचारी। आसप्तमात् षोडशवर्षः। शुक्रे यौवनोपेतस्त्रिंद्वर्षं यावत्। जीवे मध्यः पञ्चाशद्वर्षः। अर्के सूर्ये वृद्धोऽशीतिवर्षः। शनैश्चरेऽतीववृद्धः शतवार्षिक इति॥१७॥

इस प्रकार से प्राप्त नाम वाले का सभी ग्रहों में चन्द्रमा के बली होने पर चाहे वह नवमांशेश अथवा लग्नेश हो, तब उसकी अवस्था स्तनपान करने वाले शिशु की रहती है। इस प्रकार मंगल में बाल्यावस्था अर्थात् दो वर्ष से छः वर्ष के मध्य की अवस्था होती है। बुध में व्रत में स्थित ब्रह्मचारी के समान सातवर्ष से सोलह वर्ष के अन्तर्गत होती है। शुक्र में यौवनावस्था, तीस वर्ष पर्यन्त की होती है। गुरु में मध्यावस्था, पचास वर्ष की समझनी चाहिए। अर्क अर्थात् सूर्य में वृद्ध अर्थात् अस्सी वर्ष की अवस्था रहती है। शनि में अतिवृद्ध अर्थात् सौ वर्ष पर्यन्त की अवस्था समझे॥१७॥

वराहमिहिरचार्यरचिते शाकुनार्णवे।
अर्थिनामुत्पलश्चक्रेऽर्थाप्तये विवृतिप्लवम्॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ शाकुनोत्तरं नाम पञ्चनवतितमोऽध्यायः॥९५॥

वराहमिहिराचार्य विरचित शाकुनशास्त्र रूपी महासागर में उपलब्ध अर्थों को प्राप्त करने वाले जिज्ञासुओं के लिये आचार्य उत्पल द्वारा यह विवृति नाम की नौका प्रस्तुत की गयी है।

श्री भटोत्पल विरचित संहिताविवृति में शाकुनोत्तर नामक अध्याय पञ्चानवे पूर्ण हुआ॥९५॥

सम्पूर्ण शाकुनाध्याय समाप्त

□□

पाकाध्यायः

अथ पाकाध्यायो व्याख्यायते। अध्यायसङ्ख्या-९६

तत्रादावेव ग्रहाणां चारोक्तफलस्य पाककालज्ञानमाह–

पक्षाद्भानोः सोमस्य मासिकोऽङ्गारकस्य वक्त्रोक्तः।
आदर्शनाच्च पाको बुधस्य जीवस्य वर्षेण।।१।।
षड्भिः सितस्य मासैरब्देन शनेः सुरद्विषोऽब्दार्धात्।
वर्षात् सूर्यग्रहणे सद्यः स्यात् त्वाष्ट्रकीलकयोः।।२।।
त्रिभिरेव धूमकेतोर्मासैः श्वेतस्य सप्तरात्रान्ते।
सप्ताहात् परिवेषेन्द्रचापसन्ध्याभ्रसूचीनाम्।।३।।

पाकाध्याय नामक छियानवे अध्याय की व्याख्या।

आरम्भ में ग्रहचार के फलों के परिपाककाल को बतलाते हैं–

सूर्य का फल प्रत्येक पन्द्रह दिनों में, चन्द्रमा का एक मास में, भौम का वक्त्रोक्तानुसार (भौमचार प्रकरणोक्तानुसार), बुध का उदितकाल तक, बृहस्पति का एक वर्ष में, शुक्र, का छः मास में, शनि का एक वर्ष में, चन्द्रग्रहण में राहु का छः मास में, सूर्य ग्रहण का एक वर्ष में; त्वष्टा नामक ग्रह-तामस और कीलक का तत्काल, धूमकेतु का तीन मास में, श्वेतकेतु का सात रात में तथा सूर्य-चन्द्र के परिवेष, इन्द्रधनुष, सन्ध्या और अभ्रसूची का फल सात दिन में होता है।।१-३।।

पक्षाद् भानोरिति। भानोरादित्यस्य यत् फलमर्कचारोक्तं शुभमशुभं वा तत् पक्षात् पञ्चदशभिर्दिनैर्भवति। एवं सोमस्य मासिको मासप्रमाणमस्य मासिको मासेन भवति। अङ्गारकरस्य भौमस्य वक्त्रोक्तो वक्त्रे कथितः। यथा–[1]"तद्वक्त्रमुष्णमुदये पीडाकर-मग्निवार्तानाम्", "दूषयति रसानुदये"[2] "[3]व्यालं त्रयोदशर्क्षाच्चतुर्दशाद्वा विपच्यतेऽस्तमये", "[4]तत्कालं मुखरोगम्" इति, "तदनुवक्रे दस्युगणेभ्यः पीडाम्" इति। अन्यदपि नक्षत्राश्रितं यत्फलं तदेवमेव यस्मिन् वक्रे तन्नक्षत्रं पठ्यते। उदयर्क्षादनन्तरं तस्य नक्षत्रस्य तद्वक्रोक्तसमःपाककाल इति परिशेषनक्षत्राणां नक्षत्रपाककालमिति

---

१. द्रष्टव्योऽस्य ग्रन्थस्य –अ. ६/१–भौमचार
२. द्रष्टव्योऽस्य ग्रन्थस्य ,, ६/२ ,,
३. द्रष्टव्योऽस्य ग्रन्थस्य ,, ६/३ ,,
४. द्रष्टव्योऽस्य ग्रन्थस्य – ६/४ ,,
५. द्रष्टव्योऽस्य ग्रन्थस्य – ६/५ ,,

आगमविदः। बुधस्यादर्शनात् पाकः सूर्यमण्डलान्निर्गतो यावत्कालो दृश्यते तावानेव तस्य पाकः। जीवस्य बृहस्पतेर्वर्षेण पाकः।।१।।

रविचार में वर्णित सूर्यग्रहका शुभ अथवा अशुभफल पक्ष अर्थात् पन्द्रह दिनों में होता है। इसी प्रकार चन्द्रमा का मासिक अर्थात् एकमास के प्रमाण का होता है। अङ्गारक अर्थात् मंगल का वक्त्र विचार के प्रकरण में कहा जा चुका है। यथा-वक्त्र के उष्ण उदय होने पर 'अग्निजीवी लोग पीड़ित होते है।' 'उदयकाल में मंगल रसपदार्थों का विनाश करता है।' '१३ अथवा १४ नक्षत्र में अस्त के समय सर्पमुख होकर परिपाक करता है।' 'उसी समय मुखरोग होता हैं।' 'अनुवक्र होने पर तस्करों से पीड़ित करता है'। अन्य भी जो नक्षत्रादिक फल कहे गये हैं, उनको भी जिस नक्षत्र में वक्त्र होते हैं, उनको बतलाया गया है। उदयनक्षत्र के पश्चात् उस नक्षत्र का जो वक्रोक्त पाककाल कहा गया है, उसको समझे। शेष नक्षत्रों का नक्षत्रपाककाल भी शास्त्रकार इसी प्रकार समझते हैं। बुध के प्राय: अदृष्ट रहने के कारण वह सूर्यमण्डल (प्रभाव) से निकल कर जितने समय तक देखा जाता है, उतने ही काल में उसका फलपाक होता है। गुरु का फलपाक एकवर्ष में कहा गया है।।१।।

षड्भिः सितस्य मासैरिति। सितस्य शुक्रस्य स्वचारे यदुक्तं फलं [१]वीथिमण्डल-नक्षत्राश्रितं तस्य षड्भिर्मासैः पाकः। अब्देन वर्षेण शनेः सौरस्य। सुरद्विषो राहोश्चन्द्रस्य ग्रहणे अब्दार्धात् षड्भिर्मासैः पाकः। अब्देन वर्षेण शनेः सौरस्य। सुरद्विषो राहोश्चन्द्रस्य ग्रहणे अब्दार्धात् षड्भिर्मासैः पाकः। सूर्यग्रहणेऽर्कोपरागे वर्षात् फलम्। ''सतमस्कं[२] पर्व विनेति यस्त्वष्टा नाम'' ग्रह उक्तस्तस्य त्वष्टुस्तामसकीलकानां च सद्यस्तस्मिन्नेवाहनि पाकः स्याद् भवेत्।।२।।

शुक्र के चार में जो फल बतलाया गया है-'वीथिमण्डल नक्षत्रों पर आश्रित होता है। उसका फलपाक छ: महीनों में कहा गया है। शनि का फलपाक अब्द अर्थात् एक वर्ष में होता है। सुरद्विष अर्थात् राहु का चन्द्रग्रहण में अब्दार्ध अर्थात् छ: मास में फलपाक होता है। सूर्यग्रहण में एक वर्ष में फलपाक कहा जाता है। ग्रहण के बिना सतमस्क आदि त्वष्टा नामक जो ग्रह तामस, कीलक आदि कहे गये हैं, उनका तत्काल उसी दिन फलपाक हो जाता है।।२।।

त्रिभिरेवेति। धूमकेतोस्त्रिभिरेव मासैः फलं पच्यते। श्वेतस्य श्वेतकेतोश्च सप्तरात्रान्ते

---

१. द्रष्टव्यान्यस्य ग्रन्थस्य –अ. ९/८-३६ शुक्रचार

२. द्रष्टव्योऽस्य ग्रन्थस्य – ३/६ आदित्यचार

३. द्रष्टव्यान्यस्य ग्रन्थस्य – ९/८-३६ शुक्रचार

४. द्रष्टव्योऽस्य ग्रन्थस्य –३/६ आदित्यचार।

सप्तभिर्दिनैः। परिवेषः सूर्याचन्द्रमसोः। इन्द्रचापम्। सन्ध्याफलम्। अभ्रसूची। एषां सर्वेषां सप्ताहात् फलमिति।।३।।

धूमकेतु का तीन मास में फल का परिपाक हो जाता है। श्वेतकेतु का सात दिनों में होता है। सूर्य-चन्द्रमा का परिवेष (बिम्ब के परितः वृत्ताकार) इन्द्रधनुष, सन्ध्याकाल, मेघसूची; इन सभी का फलपाक एक सप्ताह में होता है॥३॥

अन्येष्वप्याह–

शीतोष्णविपर्यासः फलपुष्पमकालजं दिशां दाहः।
स्थिरचरयोरन्यत्वं प्रसूतिविकृतिश्च षण्मासात्।।४।।

अन्य पदार्थों का कहते हैं–

शीतकाल एवं ग्रीष्मकाल में परिवर्तन, ऋतु से भिन्न फल और पुष्प की उत्पत्ति, दिग्दाह, स्थिर और चर पदार्थों में वैपरीत्य होना, विकृत प्रसव आदि का फलपाक छः मास में होता है॥४॥

शीतोष्णविपर्यासः। उष्णकाले शीतता शीतकाले तूष्णता। अथवा स्वभावशीतगतस्य वस्तुन उष्णता, स्वभावोष्णस्य शीतता। फलं पुष्पं वा अकालजम् अनृतावुत्पन्नम्। दिशां दाहो दिग्दाहः। स्थिरचरयोरन्यत्वं विपर्ययः; स्थिरस्य वृक्षादेश्चरता, चतुष्पदादेरचलत्वम्। प्रसूतिविकृतिरतिप्रसवविकारश्च। षण्मासात् पच्यत इत्यर्थः।।४।।

शीतोष्ण की विपरीतता का अर्थ है कि जब ग्रीष्मकाल में शीतलता हो और शीतकाल में उष्णता हो। अथवा स्वाभाविक शीतल वस्तु में उष्णता आ जाये और स्वभाविक उष्ण पदार्थ में शीतलता हो जाये, तब विपरीत स्वभाव समझना चाहिये। फल-पुष्प अपने ऋतुकाल के विपरीत काल में उत्पन्न हों, दिशाओं में दाह अर्थात् दिग्दाह हो, स्थिर और चर पदार्थों में विपरीत काल में उत्पन्न हों, दिशाओं में दाह अर्थात् दिग्दाह हो, स्थिर और चर पदार्थों में विपरीत आचरण दृष्टिगत हो। यथा वृक्षादि स्थिर पदार्थों में गतिशीलता तथा चतुष्पद पशुओं में जड़ता दृष्टिगोचर हो, प्रसूति विकृति अर्थात् सामान्य से अधिक संख्या में एक साथ प्रसव होना; इन सभी का छः मास में फल परिपाक होता है॥४॥

अन्येष्वप्याह–

अक्रियमाणककरणं भूकम्पोऽनुत्सवो दुरिष्टं च।
शोषश्चाशोष्याणां स्रोतोऽन्यत्वं च वर्षार्धात्।।५।।

अन्य पदार्थों का विचार करते हैं–

बिना किये गये किसी कार्य का हो जाना, भूकम्प, उत्सवहीनता, दुष्टकर्म का होना, न सूखने योग्य का सूख जाना, जलधारा का विपरीत दिशा में प्रवाहित होना; इन सभी का फलपाक छः महीने में होता है॥५॥

अक्रियमाणकस्याप्राप्तचारस्य करणम्। अथवा यत्किञ्चित् कर्म कर्ता न करोति स्वयमेव कर्तुमायाति तदक्रियमाणकर्मकरणम्। अथवा यन्न कदाचित् कृतमकस्मात् क्रियते तदप्यक्रियमाणककरणम्। भूकम्पः क्षितिचलनम्। अनुत्सवः प्राप्तोत्सवस्याकरणम्। दुरिष्टं दुष्टमतीवाशोभनं यदरिष्टमनभिमतं वा यत्। अशोष्याणां सरः प्रभृतीनां शोषः। स्रोतसां नदनदीनामन्यत्वं प्रतीपगमनम्। ह्रदादीनामन्यत्वं शोषो जलाधिक्यं वा। वर्षार्धात् षण्मासात् पच्यते।।५।।

अक्रियमाण अर्थात् असम्पादित कार्य का होना। अथवा जिस कर्म को कर्ता किया ही न हो अपितु स्वयमेव होने लगे, भूकम्प अर्थात् भूचाल, अनुत्सव अर्थात् प्राप्त उत्सवकाल में विरति, दुरिष्ट अर्थात् दुष्ट तथा अत्यधिक अभद्र हो अथवा जो दुष्ट कर्म अपने मन से स्वीकृत न हो, अशोष्य अर्थात् नदी-तालाब आदि का सूख जाना, स्रोत अर्थात् नदी-नालों का विपरीत प्रवाहित होना, नदी-तालाबों का सूख जाना अथवा अत्यधिक जल से भर जाना; इन सभी का फलपाक छः मास में होता है।।५।।

अन्येष्वप्याह–

स्तम्भकुसूलार्चानां जल्पितरुदितप्रकम्पितस्वेदाः।
मासत्रयेण कलहेन्द्रचापनिर्घातपाकाश्च।।६।।

अन्य वस्तुओं में भी कहते हैं–

स्तम्भ (खम्भा), मिट्टी के पात्र, देव-प्रतिमा का बोलना-रोना-काँपना-पसीजना, कलह, इन्द्र धनुष और मेघ-निर्घात; इन सभी का फलपाक तीन मास में होता है।।६।।

स्तम्भः प्रसिद्धः। कुसूलं मृन्मयं यत्रान्नादिकं स्थाप्यते। अर्चा प्रतिमा। एतासां जल्पितं सम्भाषणं रुदितमश्रुविमोचनम्। प्रकम्पितं चलनम्। स्वेदो घर्मः। एते सर्वे मासत्रयेण पच्यन्ते। तथा कलहः। इन्द्रचापम्। निर्घातः। एतेषां च पाको मासत्रयेण परिपच्यते। इन्द्रचापस्य पूर्वं सप्ताहात्[१] फलमुक्तम्। सप्ताहाद्यदि न परिपच्यते तदा मासत्रयेणेति।।६।।

स्तम्भ अर्थात् खम्भा प्रसिद्ध वस्तु है। कुसूल अर्थात् मिट्टी के वे पात्र जिनमें अन्नादि रखे जाते हैं। अर्चा अर्थात् देव प्रतिमा; इन सभी का बोलना, रोना अर्थात् अश्रु बहाना, प्रकम्पित अर्थात् स्थान परिवर्तन करना, स्वेद अर्थात् घाम से पसीजना; इन सभी का तीन मास में फलपाक होता है। कलह, इन्द्रधनुष और निर्घात अर्थात् मेघों का परस्पर टकराना; इन सभी का फलपाक तीन महीने में होता है। इसके पूर्व इन्द्रधनुष का फलपाक सात दिनों में कहा गया है। परन्तु यहाँ पर तीन महीने में

---

१. द्रष्टव्योऽस्यैवाध्यायस्य ३ श्लोकः।

फलपाक का अभिप्राय यह है कि यदि सात दिनों में फलपाक न हो तब तीन महीने में समझना चाहिये॥६॥

अन्येष्वप्याह–

कीटाखुमक्षिकोरगबाहुल्यं मृगविहङ्गविरुतं च।
लोष्टस्य चाप्सु तरणं त्रिभिरेव विपच्यते मासैः।।७।।

अन्य वस्तुओं में भी कहते हैं–

कीड़े-मकोड़े, चूहा, मक्खी, और सर्पों की बहुलता, पशु-पक्षियों का निरन्तर ध्वनि करना और ठोस ढेले का जल पर तैरना; इन सभी का फलपाक तीन मास में होता है॥७॥

कीटः कृमिः। आखुर्मूषकः। मक्षिका प्रसिद्धा। उरगाः सर्पाः। एषां बाहुल्यं प्रभूतता। मृगाणां मृगजातीनाम्। विहङ्गानां पक्षिणां च विरुतम्। लोष्टस्य मृन्मयस्य चाप्सु जले तरणं मज्जनं त्रिभिरेव मासैर्विपच्यते।।७।।

कीट अर्थात् कीड़े, आखु अर्थात् चूहा, मक्खी जो सर्वविदित है। उरग अर्थात् सर्प इनकीं बहुलता हो तथा मृग अर्थात् पशु जाति, विहङ्ग अर्थात् पक्षियों की ध्वनि और मिट्टी के ढेले का जल के ऊपर संचरण; इन सभी का फलपाक तीन महीने में होता है॥७॥

अन्येष्वप्याह–

प्रसवः शुनामरण्ये वन्यानां ग्रामसम्प्रवेशश्च।
मधुनिलयतोरणेन्द्रध्वजाश्च वर्षात् समधिकाद्वा।।८।।

अन्य वस्तुओं में भी कहते हैं–

कुत्ते का वन में पैदा होना, जङ्गली प्राणियों का गाँव में प्रवेश करना, मधुमक्खियों का छत्ता, तोरण और इन्द्रध्वज; इन सभी का एक वर्ष में अथवा उससे अधिक समय में फलपाक होता है॥८॥

शुनां सारमेयाणामरण्ये निर्जने प्रसवः, वन्यानां सत्त्वानां ग्रामे सम्प्रवेशः। मधुनिलयो माक्षिकस्थानम्। तोरणं प्रसिद्धम्। इन्द्रध्वज इन्द्रयष्टिः। एते सर्व एव वर्षात् परिपच्यन्ते समधिकाद्वा।।८।।

कुत्ता (सारमेय) का अरण्य अर्थात् निर्जन प्रदेश में प्रसव होना। जङ्गली जानवरों का गाँव में प्रवेश करना, मधुमक्खी का छत्ता (मधु निलय), तोरण अर्थात् दरवाजे का अलङ्करण और इन्द्रध्वज; इन सभी का एक वर्ष में अथवा उससे भी अधिक काल में फलपाक होता है॥८॥

अन्येष्वप्याह–

गोमायुगृध्रसंघा दशाहिकाः सद्य एव तूर्यरवः।
आक्रुष्टं पक्षफलं वल्मीको विदरणं च भुवः।।९।।

अन्य भी विषयों में कहते हैं–

सियार तथा गिद्ध-समूह का फलपाक दस दिनों में होता है। तुरही की ध्वनि का फलपाक तत्काल होता है। शाप का फलपाक पन्द्रह दिनों में होता है तथा वल्मीक अर्थात् चींटियों के घर का स्वयमेव फूट जाने का फलपाक एक पक्ष में होता है।।९।।

गोमायुः शृगालः। गृध्रणां संघाः समूहाः। एते दशाहिका दशभिर्दिनैः पच्यन्ते। तूर्यरवः तूर्यशब्दः। अनाहतस्य स्वयमेव शब्दः। आहतस्य विस्वनत्वं वा सद्यस्तस्मिन्नेवाहनि पच्यते। आक्रुष्टं शपमानं पक्षफलं पक्षेण पच्यते। तथा वल्मीको गृहादुत्पन्नो भुवो भूमेर्विदरणं स्फोटनं च पक्षेण पच्यते।।९।।

गोमायु अर्थात् सियार, गिद्धों का समूह, इनका फलपाक दस दिनों में होता है। तूर्य अर्थात् तुरही का स्वर अर्थात् जो बिना बजाये ही स्वयं बजने लगे अथवा बजाने पर भी जो न बजे; इसका फलपाक तत्काल उसी दिन होता है। आक्रुष्ट अर्थात् शापित वचन, इसका फलपाक पन्द्रह दिनों का होता है तथा बल्मीक गृह अर्थात् चींटियों द्वारा निर्मित मिट्टी का ढूह; इनके टूटने-फूटने का फलपाक पन्द्रह दिनों में होता है।।९।।

अहुताशप्रज्वलनं घृततैलवसादिवर्षणं चापि।
सद्यः परिपच्यन्ते मासेऽध्यर्धे च जनवादः।।१०।।

आग के बिना ही किसी वस्तु का जल जाना और घी-तेल-चर्बी आदि की वर्षा का फलपाक तत्काल होता है। जनापवाद (जनश्रुति) का फलपाक डेढ़ मास में होता है।।१०।।

अहुताशप्रज्वलनमनग्निज्वलनम्। घृतवर्षणम्। तैलवर्षणम्। वसावर्षणम्। आदिग्रहणाद् मांसरक्तान्नपानपुष्पफलपर्णमृत्तिकापाषाणवर्षणं च। एते सर्वे सद्य एव तस्मिन्नहनि परिपच्यन्ते। जनवादो जनैरपवादोऽध्यर्धेन मासेन सार्धेन परिपच्यते।।१०।।

किसी वस्तु का अग्नि के बिना ही प्रज्ज्वलित होना, घी की वर्षा, तेल की वर्षा, वसा अर्थात् चर्बी की वर्षा होना। यहाँ पर आदि शब्द से मांस, रक्त, अन्नपान; पुष्प-फल-पत्ता-मिट्टी और पत्थर की वर्षा होना; इन सभी का तत्काल उसी दिन फलपाक होता है। जनवाद अर्थात् जनता में प्रचारित वार्ता का फलपाक, अर्ध सहित एक मास अर्थात् डेढ़ मास में होता है।।१०।।

अन्येष्वप्याह–

छत्रचितियूपहुतवहबीजानां सप्तभिर्भवति पक्षैः।
छत्रस्य तोरणस्य च केचिन्मासात् फलं प्राहुः।।११।।

अन्य वस्तुओं में भी कहते हैं–

छत्र (छाता), यज्ञवेदिका, याज्ञिक काष्ठ, अग्नि और बीजों में उत्पन्न विकार के फल का सात पक्ष में परिपाक होता है। कतिपय आचार्य छत्र और तोरण का एक मास में फलपाक कहते हैं।।११।।

छत्रमातपत्रम्। चितिर्यज्ञचितिः। यूपो याज्ञिकः। हुतवहोऽग्निः। बीजानि प्रसिद्धानि यान्युप्यन्ते। एतेषां सर्वेषां यद्वैकृतं तत् सप्तभिः पक्षैः सार्धैस्त्रिभिर्मासैः पच्यते। केचिन्मुनयश्च छत्रस्य तोरणस्य च मासात् फलं प्राहुरुक्तवन्तः। तथा च गर्गः–

चितियूपहुताशेषु फलं पक्षैस्तु सप्तभिः।
आतपत्रफलं मासात् तोरणस्यैवमस्त्विति।।इति।।११।।

छत्र अर्थात् छाता (आतपत्र), चिति अर्थात् यज्ञवेदिका, यूप अर्थात् यज्ञ कराने वाला याज्ञिक, हुतवह अर्थात् अग्नि और बीज; जिसको बोआ जाता है; इन सभी में जो विकृति उत्पन्न होती है। उनका साढ़े सात पक्ष अर्थात् साढ़े तीन मास में फल परिपाक होता है। कुछ मुनिगण छत्र और तोरण का एक मास में फलपाक कहते हैं। जैसा कि आचार्य गर्ग ने कहा है–

यज्ञवेदिका, याज्ञिक और अग्नि में उत्पन्न विकारों का सात पक्ष में फलपाक होता है, तथा छाता और तोरण के विकार का एक मास में फल मिलता है।।११।।

अन्येष्वप्याह–

अत्यन्तविरुद्धानां स्नेहः शब्दश्च वियति भूतानाम्।
मार्जारनकुलयोर्मूषकेण सङ्गश्च मासेन।।१२।।

अन्य वस्तुओं में भी कहते हैं–

परस्पर विरुद्ध प्राणियों में प्रेमभाव तथा आकाश में जीवों का शब्द होना, और बिल्ली तथा नेवले का चूहे के साथ वास करने का फलपाक एक मास में होता है।।१२।।

अत्यधिकविरुद्धानामतिशत्रूणां च प्राणिनां स्नेहः प्रीतिः परस्परम्। वियत्याकाशे भूतानां प्राणिनां शब्दः। मार्जारस्य विडालस्य। नकुलः प्रसिद्धस्तस्य च। मूषकेण सङ्गो युतिः। मासेन पच्यते।।१२।।

अतिविरुद्ध परस्पर शत्रुता का भाव रखने वाले जीवों में प्रीति उत्पन्न हो जाये। वियत् अर्थात् आकाश में जीवों के शब्द सुनाई पड़े और मार्जार अर्थात् विडाल

(बिलाव) और नकुल का चूहे के साथ संगति होने लगे, तब इन विकारों का फलपाक एक मास में होता है॥१२॥

अन्येष्वप्याह–

गन्धर्वपुरं मासाद्रसवैकृत्यं हिरण्यविकृतिश्च।
ध्वजवेश्मपांशुधूमाकुला दिशश्चापि मासफलाः।।१३।।

अन्य वस्तुओं में भी कहते हैं–

आकाश में गन्धर्व नगर का दृष्टिगोचर होना एक विकार है। जिसका फलपाक एक मास में होता है। रस पदार्थ में विकार, स्वर्ण में विकार, ध्वज-विकार, भवन-विकार और सभी दिशाओं में धूलि तथा धूयें का व्याप्त होना; इन सभी विकारों का एक मास में फलपाक होता है॥१३॥

गन्धर्वपुरं गन्धर्वनगरं मासात् पच्यते। रसादीनां मधुरादीनां वैकृत्यं विकारः। हिरण्यस्य सुवर्णादिकस्य च विकृतिर्विकारोऽन्यवर्णत्वम्। ध्वजस्य पताकाया भङ्गो वा वेश्मनो गृहस्य च विकारः। पांशुना रजसा धूमेन चाकुला व्याप्ता दिशः। सर्व एते मासफला मासेन पच्यन्ते।।१३।।

गन्धर्व गन्धर्वपुर अर्थात् आकाश में उत्पन्न गन्धर्वनगर का फलपाक एक मास में होता है। मधुर आदि रसों में विकार होना, हिरण्य अर्थात् सुवर्ण आदि वस्तुओं में विकार अर्थात् अन्य विकृत वर्ण का हो जाना, ध्वज अर्थात् पताका का खण्डित होना वेश्म अर्थात् गृह में उत्पन्न विकार, दिशाओं का पांशु अर्थात् धूलि और धूम (धूँआ) से परिव्याप्त हो जाना, इन सभी का फलपाक एक मास में होता है॥१३॥

अथाश्विन्यादीनां पाककालज्ञनमाह–

नवैकैकाष्टदशैकषट्त्रिकत्रिकसङ्ख्यमासपाकानि।
नक्षत्राण्यश्विनिपूर्वकाणि सद्यः फलाश्लेषा।।१४।।

अश्विनी आदि नक्षत्रों का फलपाक कहते हैं–

अश्विनी से पुष्य तक के आठ नक्षत्रों के योगतारा में उत्पात हो, तो क्रम से नौ, एक, आठ, दश, एक, छः, तीन और तीन मास में तथा आश्लेषा तत्काल फल देता है॥१४॥

नक्षत्राण्यश्विनिपूर्वकाणि। अश्विनी पूर्वं येषां तानि माससङ्ख्यपाकानि। तद्यथा– अश्विन्या योगताराया उपसर्गेण नवभिर्मासैः पाकः। एकेन मासेन भरण्याः। अष्टाभिः कृतिकायाः। दशभी रोहिण्याः, एकेन मासेन मृगशिरसः। षड्भिरार्द्रायाः। त्रिभिः पुनर्वसोः। त्रिभिरेवपुष्यस्य। आश्लेषा सद्यः फला। तस्मिन्नेवाहनि फलपाकं करोति।।१४।।

अश्विनी से आरम्भ कर क्रमशः नवादि मासों में फलपाक कहे गये हैं। यथा

अश्विनी नक्षत्र के योगतारा में विकार होने में नौ मास में फलपाक होता है। भरणी नक्षत्र का एक मास में, कृत्तिका नक्षत्र का आठ मास में, रोहिणी नक्षत्र का दस मास में, मृगशिरा नक्षत्र का एक मास में, आर्द्रा नक्षत्र का छः मास में, पुनर्वसु का तीन मास में, पुष्य का तीन मास में तथा आश्लेषा का सद्यः अर्थात् तत्काल फलपाक होता है।।१४।।

अथ मघादीनां नक्षत्राणां फलपाकमाह–

पित्र्यान्मासः षट् षट् त्रयोऽर्द्धमष्टौ च त्रिषडेकैकाः।

मासचतुष्केऽषाढे सद्यः पाकाभिजित्तारा।।१५।।

मघादि नक्षत्रों का फलपाक कहते हैं–

मघा से मूल तक के दस नक्षत्रों के योगतारा में उत्पात हो तो क्रम से एक, छः, छः, तीन, आधा मास, आठ, तीन, छः, एक, एक मास में, पूर्वाषाढ़ और उत्तराषाढ़ का फल चार मास में, अभिजित नक्षत्र का फल तत्काल प्राप्त होता है।।१५।।

पित्र्यं मघा। मघाया योगतारकोपसर्गे मासेन पाकः। पूर्वफल्गुन्याः षड्भिः। उत्तरफल्गुन्याश्चषड्भिरेव। हस्तस्य त्रिभिः। चित्राया अर्धमासेन पक्षेण। अष्टभिः स्वातेः। त्रिभिर्विशाखायाः। षड्भिरनुराधायाः। एकेन ज्येष्ठायाः। एकेन मूलस्य। अषाढे द्वे पूर्वोत्तराषाढे मासचतुष्के चतुर्भिर्मासैस्तयोः पाकः। अभिजित्तारा सद्यः पाका तस्मिन्नेवाहनि पाकं करोति।।१५।।

पित्र्य अर्थात् मघा नक्षत्र के योग तारा में उत्पात होने पर एक मास में फलपाक होता है। पूर्वा फाल्गुनी का छः मास में, उत्तराफाल्गुनी का छः मास में, हस्त का तीन मास में, चित्रा का आधा मास अर्थात् एक पक्ष में, स्वाती का आठ मास में, विशाखा का तीन मास में, अनुराधा का छः मास में, ज्येष्ठा का एक मास में, मूल का एक मास में, पूर्वाषाढ़ एवं उत्तराषाढ़, इन दोनों का चार मास में फलपाक होता है। अभिजित् नक्षत्र का तत्काल पाक अर्थात् उसी दिन फलपाक हो जाता है।।१५।।

अथ श्रवणादीनां पाककालज्ञानमाह–

सप्ताष्टावध्यर्द्धं त्रयस्त्रयः पञ्च चैव मासाः स्युः।

श्रवणादीनां पाको नक्षत्राणां यथासङ्ख्यम्।।१६।।

श्रवण आदि नक्षत्रों का फलपाक कहते हैं–

श्रवण से रेवती तक के छः नक्षत्रों के योगतारा में उत्पात हो, तो क्रम से सात, आठ, डेढ़, तीन, तीन और पाँच मास में फलपाक होता है।।१६।।

यथाक्रमेण श्रवणादीनां नक्षत्राणां पाकः। तद्यथा–सप्तभिर्मासैः श्रवणस्य

पाकः। अष्टभिर्धनिष्ठायाः अध्यर्धेन सार्धेन मासेन शतभिषजः। त्रिभिः पूर्वायाः। त्रिभिरुत्तरायाः। पञ्चभी रेवत्याः। एवमनेन क्रमेण श्रवणादीनां नक्षत्राणां पाकः।

अत्र पाकाध्याये येषामुत्पातानां पाको नोक्तस्तेषां भूकम्पाध्याये उक्तः। यथा–

[1]पक्षैश्चतुर्भिरनिलस्त्रिभिरग्निर्देवराट् च सप्ताहात्।

सद्यः फलति च वरुणो येषु न कालोऽद्भुतेषूक्तः।।इति।।१६।।

अद्भुते दृष्टे शान्त्यादिकं कृत्वाऽप्यद्भुतशान्तिं नयेत्; अन्यथा पाकभेदो भवत्येतज्ज्ञापयितुमाह–

श्रवण आदि नक्षत्रों का क्रम से फलपाक बतलाते हैं। जैसाकि श्रवण का सात मास में फलपाक होता है। धनिष्ठा का आठ मास में, शतभिषा का अध्यर्ध अर्थात् डेढ़ मास में, पूर्वभाद्रपद एवं उत्तरभाद्रपद का तीन-तीन मासों में और रेवती नक्षत्र का पाँच मास में फलपाक होता है। इस प्रकार श्रवणनक्षत्र से आरंभ कर रेवती नक्षत्र पर्यन्त नक्षत्रों का फलपाककाल कहा गया।

इस पाकाध्याय में जिन उत्पातों का पाककाल नहीं कहा गया है, उनका भूकम्पाध्याय में वर्णन है। यथा–

अङ्गस्फुरण आदि उपद्रवों में जिसका फलाफल नहीं कहा गया है, वह यदि वायव्यमण्डल में हो तो दो मास में, आग्नेय मण्डल में हो तो तीन पक्ष (डेढ़ मास) में, इन्द्र मण्डल में हो तो सात दिन में और वारुण मण्डल में हो तो उसी दिन फल देता है।।१६।।

अद्भुत विकार के प्रकट होने पर शान्ति-विधानों से अद्भुत-शान्ति करनी चाहिये।

पाकभेदों भवत्येतज्ज्ञापयितुमाह–

निगदितसमये न दृश्यते चे-
दधिकतरं द्विगुणे प्रपच्यते तत्।
यदि न कनकरत्नगोप्रदानै-
रुपशमितं विधिवद् द्विजैश्च शान्त्या।।१७।।

अन्यथा काल ज्ञात करने हेतु कहते हैं–

यदि पूर्वोक्त समय में फल दिखायी न दे तो उससे द्विगुणित तुल्य काल में अधिक फल होता है। परन्तु ब्राह्मणों के द्वारा सुवर्ण, रत्न और गोदान आदि शान्ति करने से शान्त नहीं होने पर भी द्विगुणित काल में फल होता है।।१७।।

निगदितसमये यथोक्तकाले चेद्यदि न दृश्यते पाकस्तदा तस्मात् पाकोऽधिकतरं

---

१. द्रष्टव्योऽस्यैव ग्रन्थस्य भूकम्पलक्षणाध्याये श्लोकः २७.

द्विगुणे काले प्रपच्यते पाकमायाति। यदि कनकप्रदानेन सुवर्णदानेन, रत्नानां मणीनां प्रदानेन, गवां धेनूनां प्रदानेन। एतैस्तथा द्विजैर्ब्राह्मणैश्च विधिवत् शान्त्या नोपशमितम् तदाऽधिकतरमतीवाधिकं काले समये। यस्याद्भुतस्य काल उक्तस्तस्मिन् द्विगुणे तत् प्रपच्यते पाकमायातीति।।१७।।

इति श्रीमभट्टोत्पलविरचितायां संहिताविवृतौ पाकाध्यायो नाम षण्णवतितमोऽध्यायः।।९६।।

पूर्वोक्त समय में यदि फलपाक न दिखायी पड़े, तब उसका फलपाक अधिकतर द्विगुणित काल में फलपाक होता है। यदि स्वर्णदान, रत्नदान, गोदान से और ब्राह्मणों द्वारा विधिवत् शान्तिकर्म करने से उत्पातों का उपशमन नहीं होता हो तो तब उससे प्राय: द्विगुणित काल में उन अद्‌भुत उत्पातों का फलपाक पूर्ण होता है॥१७॥

श्री भट्टोत्पलविरचित संहिताविवृति में पाकाध्याय नामक छानबे अध्याय की हिन्दी व्याख्या पूर्ण हुई॥९६॥

❑❑

अथ नक्षत्रकर्मगुणाध्यायो व्याख्यायते।।९७।।

तत्रादावेवाश्विन्यादीनां तारकाप्रमाणज्ञानमाह–

शिखिगुणरसेन्द्रियानलशशिविषयगुणर्तुपञ्चवसुपक्षाः।
विषयैकचन्द्रभूतार्णवाग्निरुद्राश्विवसुदहनाः।।१।।
[1]भूतशतपक्षवसवो द्वात्रिंशच्चेति तारकामानम्।
क्रमशोऽश्विन्यादीनां कालस्ताराप्रमाणेन।।२।।
नक्षत्रजमुद्वाहे फलमब्दैस्तारकामितैः सदसत्।
दिवसैर्ज्वरस्य नाशो व्याधेरन्यस्य वा वाच्यः।।३।।

आरम्भ में अश्विन्यादि नक्षत्रों के तारों की संख्या बतलाते हैं–

अश्विनी आदि नक्षत्रों के तारों की संख्या क्रमशः ३, ३, ६, ५, ३, १, ५, ३, ६, ५, ८, २, ५, १, १, ५, ४, ३, ११, २, ८, ३, ५, १००, २, ८, ३२ होती है॥१-२॥

विवाहदायक नक्षत्र में जो शुभाशुभ फल हो सकता है, वह तारा संख्या के वर्ष संख्या में कहना चाहिये। ज्वरादि रोग उत्पन्न होने वाले नक्षत्र में तारा की संख्या के प्रमाण में दिनों की संख्या होती है॥३॥

शिखिगुणेति। शिखिनोऽग्नयस्त्रयोऽश्विन्यास्तारकाप्रमाणम्। गुणास्त्रयः

---

१. भूतशरपक्षवसव इति पाठान्तरम्।

सत्त्वरजस्तमांसि भरण्यास्तारकाप्रमाणम्। रसाः षड्मधुरादयः कृत्तिकायाः। इन्द्रियाणि श्रोत्रादीनि पञ्च रोहिण्याः। अनलास्त्रयोऽग्नयो मृगशिरसः। शशी चन्द्र एक आर्द्रायाः।विषया शब्दादयः पञ्च पुनर्वसोः। गुणास्त्रयस्तिष्यस्य। ऋतवः, शिशिरादयः षडाश्लेषायाः। पञ्च मघायाः। वसवोऽष्टौ पूर्वफल्गुन्याः। पक्षौ द्वौ उत्तरफल्गुन्याः। विषयाः पञ्च हस्तस्य। एकश्चित्रायाः। चन्द्र एक एव स्वातेः। भूतानि पञ्च विशाखायाः। अर्णवाः समुद्राश्चत्वारोऽनुराधायाः। अग्नयस्त्रयो ज्येष्ठायाः। रुद्रा एकादश मूलस्य। अश्विनौ' द्वौ पूर्वाषाढायाः। वसवोऽष्ट उत्तराषाढायाः। दहना अग्नयस्त्रयः श्रवणस्य। भूतानि पञ्च पृथिव्यादीनि धनिष्ठायाः। शतं शतभिषजः। केचिच्छराः पञ्चेति पठन्ति। पक्षौ द्वौ पूर्वभद्रपदायाः। वसवोऽष्ट उत्तरभद्रपदायाः। द्वात्रिंशद् रेवत्याः। इत्येवंप्रकारं तारकामानम्। नक्षत्राणामेषां च क्रमशः परिपाट्या ताराप्रमाणेन तत्संख्यया कालो ज्ञेयश्चेत्याह– नक्षत्रजमुद्वाह इति। उद्वाहे विवाहे नक्षत्रस्य यत् फलं सदसच्छुभमशुभं वा तारकामितस्तारकासंख्यैरब्दैर्वर्षैर्वक्तव्यम्। यथा–''मृगशिरसि मघायाम्'' इति। यथा– ''बहुसुख सुतदासीवित्तसौभाग्ययुक्ता'' इति। यत् फलं सच्छोभनं तदार्द्राद्ये भचतुष्टये नेति। सदसत्फलं शुभं दुष्टं तत्तारकामितैस्तार-कासंख्यैरब्दैर्भवति। दिवसैर्ज्वरस्य नाश इति। तारकामितैर्दिवसैर्ज्वरस्योत्पन्नस्य नाशो वाच्यो वक्तव्यः। इति तारकामानम्।।१-३।।

।। नक्षत्रताराबोधक चक्र ।।

नक्षत्र	अश्विनी	भरणी	कृत्तिका	रोहिणी	मृगशिरा	आर्द्रा	पुनर्वसु	पुष्य	आश्लेषा
तारा सं.	३	३	६	५	३	१	५	३	६
नक्षत्र	मघा	पू.फा.	उ.फा.	हस्त	चित्रा	स्वाती	विशाखा	अनुराधा	ज्येष्ठा
ता.सं.	५	८	२	५	१	१	५	४	३
नक्षत्र	मूल	पू.षा.	उ.षा.	श्रवण	धनिष्ठा	शतभिषा	पू.भा.	उ.भा.	रेवती
ता.सं.	११	२	८	३	५	१००	२	८	३२

शिखी अर्थात् अग्नि की संख्या ३ तारे अश्विनी नक्षत्र के होते हैं। भरणी के तारे ३ होते हैं। गुण शब्द से सत्त्व-रज-तम नामक त्रिगुण की संख्या ३ होती है। कृत्तिका के रस अर्थात् ६ मधुरादि संख्या तुल्य प्रमाण है। श्रोत्र आदि ५ इन्द्रियों की संख्या तुल्य रोहिणी के तारे हैं। मृगशिरा के अनल संख्या तुल्य ३ तारे, आर्द्रा के चन्द्रतुल्य १ तारा, शब्दादि विषयों के तुल्य ५ तारे पुनर्वसु के, पुष्य के गुणवाचक ३ तारे, आश्लेषा के शिशिरादि ऋतु संख्यक ६ तारे, मघा के ५ तारे, पूर्वाफाल्गुनी के वसु अर्थात् ८ तारे, उत्तराफाल्गुनी के पक्ष अर्थात् २ तारे, हस्त के विषयसंख्यक ५ तारे, चित्रा का १ तारा, स्वाती का भी १ तारा, विशाखा के पञ्चमहाभूत संख्यक ५ तारे, अनुराधा के अर्णव अर्थात् समुद्र संख्यक ४, ज्येष्ठा के ३ और मूल के ११ तारे

हैं।पूर्वाषाढ़ के अश्विनी कुमार संख्यक २ तारे, उत्तराषाढ़ के वसु संख्यक ८ तारें, श्रवण के दहन अर्थात् अग्नि तुल्य ३ तारे, धनिष्ठा के पृथ्वी आदि महाभूतों के तुल्य ५ तारे, शतभिषा के १०० तारे होते हैं। कतिपय आचार्य शतभिषा के शर तुल्य ५ तारे कहते हैं। पूर्वभाद्रपदा के पक्ष तुल्य २ तारे, उत्तर-भाद्रपदा के वसु तुल्य ८ तारे, रेवती के ३२ तारे होते हैं। इस प्रकार से तारों की संख्या कही गयी है। इन नक्षत्रों का क्रमानुसार तारा प्रमाण तुल्य काल की संख्या जाननी चाहिये। यथा-उद्वाह अर्थात् विवाह दायिक नक्षत्र का जो शुभ अथवा अशुभफल होगा, वह उस नक्षत्र के तारा संख्या के तुल्य वर्षों में फलित होना कहना चाहिये। जैसा कि मृगशिरा और मघानक्षत्र के सम्बन्ध में कहा गया है–"विविधसुख, सन्तान, दासी, धन और सौभाग्य से युक्त" नारी होती है। इस प्रकार से यह शुभफल होता है। तथा आर्द्रा से चार नक्षत्रों में शुभफल नहीं होता है। इस प्रकार से शुभफल अथवा अशुभ (दुष्ट) फल उन नक्षत्रों के तारा संख्या के तुल्य वर्षों में होता है। तारा-संख्या तुल्य दिनों में, उत्पन्न ज्वर का उपशमन कहना चाहिये। इस प्रकार तारे का मान सप्रयोजन कहा गया॥१-३॥

।। नक्षत्रस्वामीबोधक चक्र ।।

नक्षत्र	अश्विनी	भरणी	कृत्तिका	रोहिणी	मृगशिरा	आर्द्रा	पुनर्वसु	पुष्य	आश्लेषा
देवता	अश्विनी कु.	यम	अग्नि	ब्रह्मा	चन्द्र	रुद्र	आदित्य	गुरु	सर्प
नक्षत्र	मघा	पू.फा.	उ.फा.	हस्त	चित्रा	स्वाती	विशाखा	अनुराधा	ज्येष्ठा
देवता	पितर	भग	अर्यमा	रवि	त्वष्टा	वायु	इन्द्राग्नी	मित्र	इन्द्र
नक्षत्र	मूल	पू.षा.	उ. षा.	श्रवण	धनिष्ठा	शतभिषा	पू. भा.	उ.भा.	रेवती
देवता	राक्षस	जल	विश्वेदेव	विष्णु	वसु	वरुण	अजपाद	अहिर्बुध्न्य	पूषा

अभिजित नक्षत्र के देवता ब्रह्मा माने गये हैं।

अथ नक्षत्रदेवता आह–

अश्वियमदहनकमलजशशिशूलभृददितिजीवफणिपितरः।
योन्यर्यमदिनकृत्त्वष्टृपवनशक्राग्निमित्राश्च ॥४॥
शक्रो निर्ऋतिस्तोयं विश्वे ब्रह्मा हरिर्वसुर्वरुणः।
अजपादोऽहिर्बुध्न्यः पूषा चेतीश्वरा भानाम्॥५॥

नक्षत्रों के देवता बतलाते हैं–

अश्विनी आदि नक्षत्रों के अधिपति देवता क्रमशः कहे जा रहे हैं। जैसा कि १. अश्विनी नक्षत्र के अश्विनीकुमार, २. भरणी के यमदेव, ३. कृतिका के अग्निदेव,

४ रोहिणी के कमल से उत्पन्न ब्रह्मा, ५. मृगशिरा के शशि अर्थात् चन्द्रमा, ६ आर्द्रा के शूलधारी रुद्रदेव, ७ पुनर्वसु के आदित्य, ८ तिष्य अर्थात् पुष्यनक्षत्र के जीव अर्थात् गुरु, ९ आश्लेषा के फणी अर्थात् नागदेव, १० मघा के पितृदेव, ११ पूर्वाफाल्गुनी के योनि अर्थात् भगदेव, १२ उत्तर-फाल्गुनी के (सूर्य/पितर) अर्यमादेव, १३ हस्त के दिवाकर, १४ चित्रा के त्वष्टादेव, १५ स्वाती के पवनदेव, १६ विशाखा के शक्राग्नि अर्थात् इन्द्राग्नि, १७ अनुराधा के मित्रदेव (सूर्य), १८ ज्येष्ठा के इन्द्रदेव, १९ मूल के निर्ऋती अर्थात् राक्षस, २० पूर्वाषाढ़ा के तोय अर्थात् वरुण देव, २१ उत्तराषाढ़ा के विश्व देव, २२ अभिजित् के ब्रह्मा, २३ श्रवण के विष्णु, २४ धनिष्ठा के वसुदेव, २५ शतभिषा के जलाधिपति वरुणदेव, २६ पूर्व भाद्रपदा के अजपाद अथवा अजैकपाद (सूर्य विशेष), २६ उत्तरभाद्रपदा के अहिर्बुध्न्य (सूर्यविशेष) २८ रेवती नक्षत्र के पूषा (सूर्यविशेष), देवता कहे गये हैं।।४-५।।

अश्वियमदहनेति। अश्व्यादीनां क्रमेण भानां नक्षत्राणामीश्वराः। तद्यथा– अश्विनावश्विन्याः। यमो भरण्याः दहनोऽग्निः कृत्तिकायाः। कमलजो ब्रह्मा रोहिण्याः। शशी चन्द्रो मृगशिरसः। शूलभृद्रुद्र आर्द्रायाः। आदित्यः पुनर्वसोः। जीवो बृहस्पतिस्तिष्यस्य। फणी सर्प आश्लेषायाः। पितरो मघायाः। योनिर्भगः पूर्वफल्गुन्याः। अर्यमा उत्तरफल्गुन्याः। दिनकृदादित्यो हस्तस्य। त्वष्टा चित्रायाः। पवनो वायुः स्वातेः। शक्राग्नी इन्द्राग्नी विशाखायाः। मित्रोऽनुराधायाः। शक्र इन्द्रो ज्येष्ठायाः। निर्ऋती राक्षसो मूलस्य। तोयं जलं पूर्वाषाढायाः। विश्वे देवा उत्तराषाढायाः। ब्रह्माऽभिजितः। हरिर्विष्णुः श्रवणस्य। वसुर्धनिष्ठायाः। वरुणोऽपाम्पतिः शतभिषजः। अजपादोऽजैकपात् पूर्वभद्रपदायाः। अहिर्बुध्न्य उत्तरभद्रपदायाः। पूषा रेवत्याः। चशब्दः समुच्चये। इत्येवं प्रकारा भानां नक्षत्राणामीश्वराः स्वामिनो नक्षत्रदेवताः।।४-५।।

अधुना ध्रुवाणि नक्षत्राणि तैश्च यानि कर्माणि क्रियन्ते तानि चाह–

त्रीण्युत्तराणि तेभ्यो रोहिण्यश्च ध्रुवाणि तैः कुर्यात्।
अभिषेकशान्तितरुनगरधर्मबीजध्रुवारम्भान् ।।६।।

ध्रुवसंज्ञक नक्षत्रों तथा उनके कार्यों को कहते हैं–

तीनों उत्तरा और रोहिणी नक्षत्र को ध्रुव नक्षत्र कहते हैं। इनमें अभिषेक, शान्ति-कर्म, वृक्ष, नगर, धर्मकृत्य तथा बीज-वपन का आरम्भ करना चाहिये।।६।।

तेभ्यो नक्षत्रेभ्यस्त्रीण्युत्तराणि उत्तरफल्गुनी उत्तराषाढोत्तरभाद्रपदा तथा रोहिण्यः। एतानि नक्षत्राणि चत्वारि ध्रुवाणि स्थिराणीत्यर्थः। तैश्च ध्रुवैः किं तत्? अभिषेको नृपादेः। शान्तिः शान्तिकमुत्पातप्रतीकारः। तरुर्वृक्षस्तस्य रोपणम्। नगरं पत्तनं तत्प्रतिष्ठादि। धर्मो धर्मक्रिया। बीजं बीजवपनम्। अन्येषां ध्रुवाणां स्थिराणां कर्मणामारम्भान् कुर्यादिति। तथा च पराशरः–

चत्वारो हि चतुष्का ध्रुवो मृदुर्दारुणस्तथा क्षिप्रः।
उग्राणि पञ्च, पञ्च चराणि साधारणे द्वे च।।

चत्वारि खलु नक्षत्रेषु ध्रुवाणि भवन्ति। प्राजापत्यं त्रीण्युत्तराणि। तेषु पुरनगरग्रामकाननोपवनभवनानि। वेशनतरुकुसुमबीजवपनस्थिरनिधिनिधानकृषिधनगोऽश्वमित्रसंग्रहणस्नपनालङ्करणपत्न्युद्वहनचरणाभिगमननृपतिनायकाभिषेकमन्त्रेज्याव्रतिनियमायुष्यपौष्टिकशान्तिकधान्यान्यन्यानि स्थिराणि कारयेत्। ऋणधनप्रयोगपथगमनमद्यवैरक्षौराणि च वर्जयेत्।।६।।

उत्तराफाल्गुनी, उत्तराषाढ़, उत्तरभाद्रपदा तथा रोहिणी; ये चारों नक्षत्र ध्रुव अर्थात् स्थिर कहे गये हैं। इन ध्रुवनक्षत्रों में क्या करना चाहिये? राजाओं का राज्याभिषेक, उत्पातों के शमन हेतु शान्तिकर्म तरु अर्थात् वृक्ष का रोपण, नगर (पत्तन) की स्थापना, धार्मिक कृत्य और बीजबोना तथा अन्य प्रकार के स्थिर कर्मों का आरम्भ करना चाहिये। जैसा कि पराशर मुनि ने कहा है–

चार-चार नक्षत्रों वाले ध्रुव, मृदु, दारुण तथा क्षिप्रसंज्ञक नक्षत्र होते हैं। पाँच-पाँच नक्षत्र उग्र और चरसंज्ञक तथा साधारण संज्ञक दो नक्षत्र होते हैं।

चार नक्षत्र ध्रुव संज्ञक होते हैं। उनमें रोहिणी और तीनों उत्तरों का ग्रहण किया गया है। उन नक्षत्रों में पुर, नगर, ग्राम, वन, उपवन, भवन बीज-वपन, स्थायी निधि, सम्पत्ति, कृषि, धन, गाय, घोड़ा, मित्र-संग्रह, स्नान, अलङ्करण, पत्नी-ग्रहण, शरणागति, राजा और सेनानायकों का अभिषेक, मन्त्र ग्रहण, यज्ञ, व्रत, नियम, आयुष्य कर्म, पौष्टिक एवं शान्ति कर्म, धान्य संग्रह आदि स्थिर कार्यों को करना चाहिये। इन नक्षत्रों में ऋण लेना धन का व्यवहार, यात्रा, मद्य-सेवन, शत्रु-कर्म और क्षौर कार्यों को नहीं करना चाहिये।।६।।

अथ तीक्ष्णानि नक्षत्राणि तैर्यानि कर्माणि क्रियन्ते तानि चाह–

मूलशिवशक्रभुजगाधिपानि तीक्ष्णानि तेषु सिद्ध्यन्ति।
अभिघातमन्त्रवेतालबन्धवधभेदसंबन्धाः।।७।।

तीक्ष्ण संज्ञक नक्षत्र एवं उनके कार्यों को कहते हैं–

मूल, आर्द्रा, ज्येष्ठा और आश्लेषा; ये चार नक्षत्र तीक्ष्ण संज्ञक हैं। इनमें आघात कार्य, मन्त्रप्रयोग, वेताल-साधन, बन्धन, वध तथा भेदनीति के कार्य सिद्ध होते हैं।।७।।

मूलं प्रसिद्धम्। शिवाधिपमार्द्रा। शक्राधिपं ज्येष्ठा। भुजगाधिपं सर्पदैवत्यमाश्लेषा। एतानि नक्षत्राणि तीक्ष्णानि दारुणानीत्यर्थः। तेषु तीक्ष्णेषु सिद्ध्यन्ति। के ते? अभिघात उपद्रवः। मन्त्रो मन्त्रसाधनप्रयोगः। वेताल वेतालोत्थापनादिकर्म। बन्धो बन्धनम्। वधस्ताडनम्। भेदः पृथक्करणं श्लिष्टयोर्द्वयोः। संबन्धो राजकुल आवेदनम्। एते

सिद्ध्यन्ति। तथा च पराशरः—

"चत्वारि नक्षत्रेषु दारुणानि भवन्ति। आर्द्रा श्लेषा ज्येष्ठा मूलमित्येतेष्वरिनगर-स्कन्धावारावरोधनमथ नरेन्द्राभिघातयुद्धकलहकूटसाहसोपधानभेदवञ्चनविवादचौर्यानृत-शपथकितवच्छलनपणयन्त्रायुधग्रहणकरदर्शनाभिचारगदवियोगवधभृत्यनिग्रहचतुष्पददमनभटनियोगान्। विशेषतो मूले मूलकर्म। रुद्रर्क्षेषु पीडनवपनधान्यतरुकुसुमबीजवेश्मप्रवेस्थिरनिधिनियोगांश्च कारयेत्। सर्वेषु च सर्वं दारुणं कर्म"।।७।।

मूलनक्षत्र, शिवाधिपत्य वाला आर्द्रानक्षत्र, इन्द्र का नक्षत्र ज्येष्ठा, सर्पाधिपत्य का आश्लेषानक्षत्र; ये सभी तीक्ष्ण और दारुण (भयंकर) होते हैं। अभिघात अर्थात् उपद्रव, मन्त्र अर्थात् मन्त्र साधन के प्रयोग, वेताल-कर्म अर्थात् वेताल उत्थापन (भूत जगाना) आदि कर्म, बन्ध अर्थात् बन्धन (कारागार भेजना) वध अर्थात् मारना, भेद अर्थात् दो के मध्य विद्वेष उत्पन्न करना, सम्बन्ध अर्थात् राजकुलों की पारस्परिक सन्धि; ये सभी कार्य इनमें सिद्ध होते हैं। जैसाकि आचार्य पराशर ने कहा है—

सभी नक्षत्रों में चार नक्षत्र दारुण होते हैं। आर्द्रा, श्लेषा, ज्येष्ठा और मूल। इन चार नक्षत्रों में शत्रु-नगर का घेराव, शत्रु अवरोध, राजा का अभिघात, युद्ध, कलह, कूटनीति, साहसकर्म, आसन भेद, ठगना, विवाद, चोरी करना, झूठी शपथ खाना, कपट कर्म, छलना, व्यापार, यन्त्र एवं शस्त्रों का ग्रहण, दर्शन, अभिचार कर्म, रोग दूर करना (शल्य क्रिया), वध, सेवक-ग्रहण, पशु को वश में करना, योद्धाओं का संग्रह करना चाहिये। इन सभी नक्षत्रों में सभी प्रकार के दारुण कर्म विहित हैं।।७।।

अथोग्राणि नक्षत्राणि तैश्च यत् कर्म कर्तव्यं तच्चाह—

उग्राणि पूर्वभरणीपित्र्याण्युत्सादनाशशाठ्येषु।
योज्यानि बन्धविषदहनशस्त्रघातादिषु सिद्ध्यै।।८।।

उग्र नक्षत्रों को तथा उनमें क्रियमाण कार्यों को कहते हैं—

तीनों पूर्वा, भरणी और मघा ये पाँच नक्षत्र उग्रसंज्ञक हैं। इनमें बन्धन, विष कर्म, अग्नि-दाह और शस्त्र-प्रहार आदि उग्र कर्म सिद्ध होते हैं।।८।।

पूर्वत्रयं पूर्वफल्गुनी पूर्वाषाढा पूर्वभद्रपदा इति। भरणी। पित्र्यं मघा। एतानि पञ्च नक्षत्राण्युग्राणि भवन्ति। तानि चोत्सादे उत्सादने। परस्यार्थादीनां नाशे। शाठ्ये शठभावे च। एतेषु कार्येषु योज्यानि। तथा बन्धे बन्धने। विषे शत्रूणां विषप्रयोगे। दहनेऽग्निदाहे। शस्त्रे शस्त्रप्रहरणे। घाते मारणे। आदिग्रहणादन्येषूपद्रवकरणेषु ज्वरातीसारोत्पादनेषु सर्वकर्मसु सिद्ध्यै सिद्ध्यर्थं योज्यानि प्रयोक्तव्यानि। तथा च पराशरः—

"पञ्च नक्षत्रेषूग्राणि भवन्ति। मघा भरणी त्रीणि पूर्वाणीति। एषु भटचौरगुल्मपुरुष-दूताकार-शौक्ल्यशाठिकक्षुद्रान् स्थापयेत्। तथा निभृतनियमनप्रणाधिसम्प्रयोग-

वैरोत्थानकलहकोला-हलसम्प्रहारवञ्चनविवादान्यद्रव्यहरणान्यदारगमनद्यूताभिसार-विलप्रवर्तनयुद्धयोद्धायुधग्रहणकरदर्शनारम्भाणि। नगरग्रामजनपदपुराभिघातयन्त्रोपकरण-दुर्गक्रियाणां परायिकप्रयोगान्। युद्धसंग्रामाभियोगेषु प्रथममरयोऽभिहन्तव्या इत्यादिषु विषप्रयोगानलविसर्गाभिचारं कारयेत्। विशेषतः पित्र्येपितृ पिण्डसम्प्रदानकोष्ठागार-विविधाकारनिधानानि। भाग्ये सौभाग्यकस्यावरणानि आप्ये जलवाहसुरासवकूपनदीवाह-कुल्याखननानि। सर्वेषु सर्वमुग्रं च''।।८।।

तीनों पूर्वा अर्थात् पूर्वाफाल्गुनी, पूर्वाषाढ और पूर्वभाद्रपदानक्षत्र तथा भरणी और पित्र्य अर्थात् मघानक्षत्र; ये पाँच नक्षत्र उग्रसंज्ञक होते हैं। इन नक्षत्रों में उत्सादन अर्थात् उच्छेद अर्थात् दूसरों की सम्पत्ति को विनष्ट करना। शठता का भाव इत्यादि कार्यों में इनका उपयोग करना चाहिये। बन्ध अर्थात् बन्धन कर्म (बाँधना), विष-प्रदान अर्थात् शत्रुओं पर विष का प्रयोग करना, दहन अर्थात् अग्निदाह, शस्त्रप्रहार अर्थात् दहन अर्थात् अग्निदाह, शस्त्रप्रहार अर्थात्' मृत्यु देना (मारण) आदि शब्द से ध्वनित होता है कि उपद्रवकारी अन्य कार्यों में भी, ज्वर-अतिसार उत्पन्न करने वाले सभी कार्यों को सफल करने हेतु इनका प्रयोग करना चाहिए। जैसा कि महर्षि पराशर ने कहा है–

मघा, भरणी और तीनों पूर्वा; ये पाँच नक्षत्र उग्र संज्ञक होते हैं। इन नक्षत्रों में मल्ल युद्ध, चौरकर्म, सिपाही, सन्देशवाहक, शुल्काधिकारी (चुंगी लेने वाला), कपटी और अधम की स्थापना करनी चाहिये। तथा निभृत अर्थात् गोपन, नियन्त्रण, अनुग्रह करना, शत्रुता करना, कलह, कोलाहल, ठगना, विवाद, दूसरे के धन का अपहरण, परस्त्रीगमन, जूआ खेलना, गुप्तमिलन, सुरंग खोदना, युद्ध करना, योद्धा और शस्त्रों का संग्रह, संरक्षण और दर्शन करना। नगर-ग्राम-जनपद और पुर पर चढ़ाई करना, आयुध-उपकरणों का प्रयोग। युद्ध, संग्राम और अभिलाञ्छित होने पर सर्वप्रथम शत्रुओं का वध करना चाहिये। इसके लिए विष का प्रयोग, अग्निप्रयोग एवं मान्त्रिक अभिचारों का प्रयोग करना चाहिये। विशेषतः मघा नक्षत्र में पितरों के लिए पिण्डदान, कोषागार तथा विविध प्रकार के धन संग्रह के योग्य भवनों का निर्माण करे। पूर्वाफाल्गुनीनक्षत्र में सौभाग्य वस्तुओं का गोपन, आप्य अर्थात् पूर्वाषाढ़ नक्षत्र में जल-प्रवाह, मदिरा तथा आसव, कूप, नदी, तालाब आदि का खनन करना चाहिये। इस प्रकार उग्र नक्षत्रों में इन कार्यों को करना चाहिये।।८।।

विशेष व्याख्या–

(१) गुल्म = सैन्यदल, अमरकोश २-४-९ "अप्रकाण्डेस्तम्बगुल्मौ" की व्याख्या में लिखा है–गुल्म रक्षायाम्, गुल्मः सेनाघट्टभिदोः सैन्यरक्षण रुग्भिदोः। इसका तात्पर्य सैन्य दल में भेद उत्पन्न करने वाला "गुप्तचर" है।

(२) प्रणधिः=चार, गूढ पुरुष,

अ. को. २-८-१३-यथार्हवर्णः, प्रणिधिरपसर्पश्चरः स्पशः। चारश्च गूढपुरुषः।

(३) निभृत = विनीत। नितरामभारि। विनीतस्तु निभृते। विभूतविनीत प्रश्रिताः समाः अमरकोश ३-१-२५.

अथ क्षिप्राणि नक्षत्राणि तैश्च यानि कर्माणि क्रियन्ते तानि चाह–

लघु हस्ताश्विनपुष्याः पण्यरतिज्ञानभूषणकलासु।
शिल्पौषधयानादिषु सिद्धिकराणि प्रदिष्टानि।।९।।

क्षिप्रसंज्ञक नक्षत्र एवं उसमें विहित कर्म–

हस्त, अश्विनी, पुष्य; ये लघुसंज्ञक नक्षत्र हैं। ये नक्षत्र पण्य (विक्रय), रति, ज्ञान (शास्त्र प्रारम्भ), भूषण, कला (चित्र, गीत, वाद्य एवं नृत्य), शिल्पकर्म, औषध (द्रव्य प्रयोग), यान (यात्रा) आदि कर्म सिद्ध करने वाले होते है।।९।।

हस्तः प्रसिद्धः। आश्विनमश्विनी। पुष्यस्तिष्यः। केचिदभिजिदत्रेच्छन्ति। एतन्नक्षत्रत्रयं चतुष्टयं वा लघु क्षिप्रमित्यर्थः। एतानि पण्ये विक्रये। रतौ पुंरतौ। ज्ञाने शास्त्रारम्भे। भूषणे अलङ्करणे। कलासु चित्रगीतवाद्यनृत्यादिषु। शिल्पकर्मणि तक्षककर्मलोहकारकर्मादौ। औषधे द्रव्यप्रयोगे। याने यात्रायाम्। आदिग्रहणादृणग्रहणे धनप्रयोगे च। एतेषु कार्येषु सिद्धिकराण्युक्तानि। तथा च पराशरः–

"चत्वारि नक्षत्राणि क्षिप्राणि भवन्ति। हस्तः पुष्योऽभिजिदश्विनमित्येतेषु विविधपण्यविक्रयधनप्रयोगगोऽश्वाश्वतरखरकरभदमनस्कन्धावारबलारसार्थनिर्याणदूतचर-सम्प्रेषणाध्वगमनयजनयाजनाध्ययनाध्यापनशिल्पारम्भध्वजपताकातपत्रवालव्यजनसमु-च्छ्रयस्नपनगजग्रहणारोहणभैषज्यरक्षोग्रगदगदौषधग्रहणधारणानि सर्वाण्येव चात्र क्षिप्राणि कर्मादि कारयेत्"।।९।।

हस्त, आश्विन अर्थात् अश्विनी, पुष्य तथा कुछ आचार्यों के मत से अभिजित् ये चार नक्षत्र पण्य अर्थात् विक्रय, रति अर्थात् पुरुष-स्त्री संयोग, ज्ञान अर्थात् किसी शास्त्र का आरम्भ करना, आभूषण धारण करना, चित्र-गीत-वाद्य-नृत्य आदि कलाकर्म, काष्ठकर्म, लौह कर्म आदि शिल्पकर्म, द्रव्यादि युक्त औषधियों का प्रयोग, यात्राकार्य, आदि शब्द से ऋण लेना तथा धन का प्रयोग-का अर्थ ग्राह्य है। ये सभी कार्य इन नक्षत्रों में सिद्धिकारक होते हैं। जैसा कि महर्षि पराशर ने कहा है–

हस्त, पुष्य, अभिजित्, अश्विनी; ये चार नक्षत्र क्षिप्रसंज्ञक होते हैं। इनमें विविध प्रकार के क्रय-विक्रय, धन-व्यवहार, गाय, घोड़ा, खच्चर, गर्दभ, हाथी इनका दमन, कन्धे के बल से कार्य करने वाले वृषभादि के कार्य, सैन्य-शक्ति, रथ-प्रेषण, राजदूत गुप्तचर को भेजना, मार्ग गमन, यजन करना, यज्ञ कराना, अध्ययन-अध्यापन, शिल्पकर्म का आरम्भ, ध्वज, पताका छत्र-चँवर का उत्थापन, स्नान,

हाथी का ग्रहण और आरोहण, औषधिकर्म, रक्षणकर्म, उग्ररोग और रोगशामक औषधि का ग्रहण तथा धारण; ये सभी प्रकार के कार्य क्षिप्रसंज्ञक नक्षत्र में करना चाहिए।।९।।

अथ मृदूनि नक्षत्राणि तैश्च यानि कर्माणि क्रियन्ते तानि चाह–

मृदुवर्गोऽनूराधाचित्रापौष्णैन्दवानि मित्रार्थे।
सुरतविधिवस्त्रभूषणमङ्गलगीतेषु च हितानि।।१०।।

मृदुसंज्ञक नक्षत्र और उसमें विहित कर्म–

अनुराधा, चित्रा, रेवती, मृगशिरा; ये नक्षत्र मृदुसंज्ञक है। ये सब मित्र, सुरत-क्रिया, वस्त्र, भूषण, मङ्गल कार्य और गाने में शुभ हैं।।१०।।

अनूराधा। चित्रा। पौष्णं रेवती। ऐन्दवं मृगशिरः। एतानि चत्वारि नक्षत्राणि मृदुवर्गः। तानि च मित्रार्थे मित्रवरणार्थं श्रवणादिप्रयोगे। सुरतविधौ सुरतकर्मणि। वस्त्रेषु वस्त्रकर्मादिषु। भूषणेष्वलङ्करणेषु। मङ्गलेषु विवाहोपनयन चूडाकरणेषु। गीते च। एतेषु च कर्मसु च हितानि श्रेष्ठानि। तथा च पराशरः–

''चत्वारि नक्षत्रेषु मृदूनि भवन्ति। मृगशिरश्चित्रानूराधा रेवतीत्येतेषूपनयनचूड़ाकरणगोदानादिव्रतनियमजप्यस्वस्त्ययनवहनवपनविस्मापनकौतुकमङ्गलयज्ञवाहनाध्ययनाध्यापनकन्यावरणपाणिग्रहणधनप्रयोगान् गुरुनरेन्द्राणां वाद्यगीतनृत्ताभिनयालापहास्योद्यानहर्षपरिवर्धनान्यारभेत। मणिरजतालङ्कराम्बरधारणकरणसंग्रहणविक्रयशिल्पप्रयोगगमनप्रयोगसुहृत्संबन्धिबान्धवसंबन्ध्यान्यायुष्यपौष्टिकधर्मार्थकामयुक्तानि सर्वाण्येव चात्र नयनाञ्जनसौभाग्यविचित्रचित्राणि विशेषतः सर्वेषु सर्वाणि मृदूनि कर्माणि कारयेत्।।१०।।

अनुराधा, चित्रा, पौष्ण अर्थात् रेवती, ऐन्दव अर्थात् मृगशिरा; ये चार नक्षत्र मृदुसंज्ञक हैं। इनमें मित्र-वरण, कीर्तन आदि का श्रवण, सुरतिविधि अर्थात् सुरत कर्म, वस्त्र-निर्माण, आभूषण-धारण, विवाह-उपयन-चूडाकरण (मुण्डन) आदि माङ्गलिक कार्य तथा गीत-गायन सम्बन्धी, ये सभी कार्य कल्याणकारी और श्रेष्ठ होते हैं। जैसाकि महर्षि पराशर ने कहा है–

मृगशिरा-चित्रा-अनुराधा और रेवती; ये चार नक्षत्र मृदु (कोमल) होते हैं। इन नक्षत्रों में उपनयन (यज्ञोपवीत), चूडाकरण (मुण्डन), गोदान आदि दान, व्रतारम्भ, नियम, जप, स्वस्त्ययन (शान्ति पाठ) वहन (ढोना), बीज-वपन, आश्चर्यकारी कृत्य, इन्द्रजाल, माङ्गलिक कार्य, यज्ञ, वाहन, अध्ययन-अध्यापन, कन्यावरण, पाणिग्रहण, धन का व्यवहार, गुरु एवं राजा सम्बन्धी कार्य, वाद्य-गीत-नृत्य-अभिनय-आलाप-हास्य-उद्यान-हर्ष-सम्बर्धन कार्यों का आरम्भ करे। मणि (रत्न) रजत (चाँदी), अलङ्कार, वस्त्र का धारण एवं संग्रहण, विक्रय, शिष्यकर्म, यात्रा कर्म, मित्र, सम्बन्धी-बान्धव तथा अन्य सम्बन्धों को, आयुवर्धक पौष्टिक, धर्म-अर्थ-काम

सहित सभी कार्य तथा नेत्राञ्जन, सौभाग्य, विशिष्ट चित्रकर्म इस प्रकार से सभी मृदु अर्थात् कोमल कार्यों को करना चाहिये॥१०॥

विशेष व्याख्या—मूल श्लोक में 'अनूराधा' शब्द है। विवृति में भी अनूराधा ही प्रयुक्त है। सम्प्रति सभी ग्रन्थों में 'अनुराधा' शब्द ही प्रचलित है। व्युत्पत्ति सिद्ध शब्द अनुराधा ही युक्तियुक्त है। अनु + राध्नोति साधयति कार्याणि = राध् + अच् + टाप्।

अथ साधारणे नक्षत्रे ताभ्यां यानि च कर्माणि कारयेत्, तथा चराणि नक्षत्राणि तैश्च यानि कर्माणि क्रियन्ते तानि चाह–

हौतभुजं सविशाखं मृदुतीक्ष्णं तद्विमिश्रफलकारि।
श्रवणत्रयमादित्यानिले च चरकर्मणि हितानि॥११॥

साधारण तथा चरसंज्ञक नक्षत्रों में विहित कार्यों को कहते हैं–

कृत्तिका, विशाखा; ये मृदुतीक्ष्ण संज्ञक नक्षत्र हैं। ये मिश्रितफल करने वाले हैं। अर्थात् इनमें मृदु, दारुण; दोनों को करे। श्रवण, धनिष्ठा, शतभिषा, पुनर्वसु, स्वाति; ये पाँच नक्षत्र चरसंज्ञक हैं। ये चरकार्य में शुभ हैं॥११॥

हौतभुजं कृत्तिका। हुतं भुङ्क्ते हुतभुगग्निः। हुतभुज इदं हौतभुजम्। तस्येदमित्यण्।[1] तद्धितेष्वचामादेरिति वृद्धिः।[2] तच्च सविशाखं विशाखासहितम्। एतन्नक्षत्रद्वयं मृदुतीक्ष्णं मृदुसाधारणमित्यर्थः। तच्च विमिश्रफलकारि विमिश्रफलं करोति। मृदूनि दारुणानि च कर्माणि कुर्यादित्यर्थः। तथा च पराशरः—

"द्वे नक्षत्रे साधारणे भवतः—कृत्तिका विशाखेति। तयोर्मृदूनि दारुणानि कर्माणि कुर्यात्। धातूत्पादनावर्तनभाण्डागारविपणिपण्योपकरणानि। यज्ञेष्टिदहनोपतापनेक्षुघृतविपाचनं वृषभोत्सर्गपशुसङ्कलनदमनान्यारभेत। सर्वप्रहरणानि कारयेत्। ग्रामशिविरपुरव्रजननगर-व्युत्पथबन्धम्। विशाखायां विशेषेणेक्षुवृक्षबीजलताकुसुमानि वापयेत्।"।

श्रवणत्रयमिति। श्रवणत्रयं श्रवणं धनिष्ठा शतभिषगिति। आदित्यं पुनर्वसुः। आनिलं स्वातिः। ते आदित्यानिले च। एतानि पञ्चनक्षत्राणि। तानि च चरकर्मण्यस्थिरे कर्मणि हितानि प्रशस्तानि। तथा च पराशरः।

"पञ्च नक्षत्राणि चराणि भवन्ति-स्वातिः पुनर्वसुः श्रवणं धनिष्ठा शतभिषगिति। एतेषु कुञ्जरमृगमहिषतुरगखरकरभगवां समावहनानि। विशेषेण पुनर्वसौ पुनर्भूर्गमनं विटकरणम्। वारुणे सुरासवन्धानसरःसरित्सेत्वौषधविधानानि। सर्वेषु विशेषेण सर्वं चरकर्म कुर्यात्"॥११॥

हौतभुज अर्थात् कृत्तिका नक्षत्र; जो हुत पदार्थ, हवनीय द्रव्य को खाता है। वह

---

१. पाणिनिव्याकरणस्य ४/३/१२० सूत्रम्।
२. पाणिनिव्याकरणस्य ७/२/११७ सूत्रम्।

हुतभुक् अर्थात् अग्नि। हुतभुज जिसका स्वामी हो उसको हौतभुज कहते हैं। यहाँ पर अण् प्रत्यय है। तद्धित में अत् की आदि वृद्धि होकर हुत शब्द का हौत शब्द बना है। विशाखा सहित ये दो नक्षत्र मृदु तीक्ष्ण अर्थात् मृदु साधारण कहे गये हैं। ये मिश्रित फल करते हैं। अर्थात् इनमें मृदु और दारुण (भयंकर); दोनों प्रकार के कार्य होते हैं। जैसाकि आचार्य पराशर ने कहा है–

दो नक्षत्र साधारण होते हैं–कृत्तिका और विशाखा। इनमें मृदु और दारुण कर्म करने चाहिये। धातुओं का उत्पादन, पिघलाना, भण्डार गृह तथा क्रय-विक्रय के उपकरण यज्ञ, इष्ट, दहन, उपतापन, इक्षुरस एवं घृत का परिपाक, वृषोत्सर्ग, पशुसंग्रह, तथा पशुदमन कार्यों को करे। सभी प्रकार के शस्त्रों का निर्माण करे। ग्राम-शिविर-पुर-व्रज-नगर में बाँध बाँधने का कार्य करे। विशाखा नक्षत्र में विशेष रूप से ईख बोना तथा वृक्ष लगाना और बीज वपन, लता तथा कुसुम (पुष्प) का आरोपण करना चाहिये।

श्रवण से तीन नक्षत्र अर्थात् श्रवण, धनिष्ठा और शतभिषा, आदित्य अर्थात् पुनर्वसु, अनिल अर्थात् स्वाती; इस प्रकार ये पाँच नक्षत्र होते हैं। इनमें चरकार्य अर्थात् जो स्थिर न हों वे प्रशस्त हितकारक होते हैं। जैसाकि महर्षि पराशर ने कहा है–

स्वाती, पुनर्वसु, श्रवण, धनिष्ठा और शतभिषा, ये पाँच नक्षत्र चरसंज्ञक होते हैं। इन नक्षत्रों में हाथी-मृग-महिष-अश्व-गदर्भ-ऊँट-वृषभ का संग्रहण करना चाहिये। विशेष रूप से पुनर्वसु नक्षत्र में विधवा विवाह और कामुकता सम्बन्धी कार्य करे। शतभिषा नक्षत्र में मद्य तथा आसव का निर्माण, नद-नदी-सेतु तथा औषधि कर्मों को करे। विशेष रूप से इन नक्षत्रों में चरकर्म करना चाहिये।।११।।

विशेष व्याख्या–पुनर्भू संस्कार किसी स्त्री का एक बार विवाह हो जाने के बाद पुनः द्वितीय विवाह को कहा जाता है। जैसाकि याज्ञवल्क्य (१/६७) ने कहा है। "अक्षता च क्षता चैव पुनर्भूः संस्कृता पुनः।"

(१) विट शब्द जार अथवा उपपति के लिए प्रयुक्त होता है। एक पति के रहते हुए दूसरा पति 'जार' अथवा 'विट' कहा जाता है। द्रष्टव्य-मातङ्गलीला ८/८, शिशुपालवध महाकाव्य ४/४८.

अथ क्षौरनक्षत्राण्याह–

हस्तत्रयं मृगशिराः श्रवणत्रयं च
पूषाश्विशक्रगुरुभानि पुनर्वसुश्च।
क्षौरे तु कर्मणि हितान्युदये क्षणे वा
युक्तानि चोडुपतिना शुभतारया च।।१२।।

क्षौर कर्म में विहित नक्षत्र

हस्त, चित्रा, स्वाती, मृगशिरा, श्रवण, धनिष्ठा, शतभिषा, रेवती, अश्विनी, ज्येष्ठा, पुष्य, पुनर्वसु इन नक्षत्रों में अथवा इन नक्षत्रों के उदयकाल मे या इन नक्षत्रों के देवता सम्बन्धी मुहूर्त के उदय में चन्द्र और तारा के अनुकूल रहने पर क्षौर कर्म करना चाहिये।।१२।।

हस्तात् प्रभृति नक्षत्रत्रयम्—हस्तः, चित्रा, स्वातिः, मृगशिराः। श्रवणत्रयं श्रवणात् प्रभृति नक्षत्रत्रयम्—श्रवणं घनिष्ठा शतभिषगिति। पूषभं रेवती। अश्विभमश्विनी। शक्र इन्द्रस्तद्भं ज्येष्ठा। गुरुभं तिष्यम्। एतानि। तथा पुनर्वसुश्च। एतानि नक्षत्राणि क्षौरे क्षुरकर्मणि तु हितानि शस्तानि। उदये च यथा, मेषलग्नोदये यावन्मेषस्य त्रयोदशत्रिंशद्भागतः सविंशतिलिप्ता उदयं यान्ति, तावदश्विनीनक्षत्रमुदयं याति। तत्परतो यावत् तावन्त एव भागा उदयं यान्ति, तावद्भरणीत्यनेन न्यायेन सर्वेषामुदयो योज्यः। तस्मिन्नुदये विहितानि। क्षणे च क्षणस्योदये। क्षणो मुहूर्तः। येन नक्षत्रेण क्षुरकर्म क्रियते तस्य या देवता तन्नामा यो मुहूर्तस्तस्योदये। यथा हस्तदेवता सूर्यस्तन्नामा यो मुहूर्तस्तस्योदये मित्रपूष्णोरुदये वेत्यादि। तद्यथा मुहूर्ता यात्रायामुक्ताः—

[1]शिवभुजगमित्रपितृवसुजलविश्वविरञ्चिपङ्कजप्रभवाः।
इन्द्राग्नीन्द्रनिशाचरवरुणार्यमयोनयश्चाह्नि।।
रुद्राजाहिर्बुध्न्याः पूषा दस्रान्तकाग्निधातारः।
इन्द्वदितिगुरुहरिरवित्वष्टृनिलाख्याः क्षणा रात्रौ।।
अह्नः पञ्चदशांशो रात्रेश्चैवं मुहूर्त इति।
स च विज्ञेयस्तज्ज्ञैश्छायायन्त्राम्बुभिर्युक्त्या।।इति।

तानि च नक्षत्राणि यद्युडुपतिना चन्द्रेण शोभनेन जन्मतृतीयषष्ठसप्तमदशमैकादशानामन्यतमेन युक्तानि भवन्ति तदा चन्द्रानुकूल्यं च भवति। शुभतारया च। तारा यदि शुभाऽनुकूला सम्पत्क्षेमसाधकमैत्राणामन्यतमा भवति। एतदुक्तं भवति—यदि चन्द्रानुकूल्यं तारानुकूल्यं च भवति तदेति।।१२।।

हस्त से लेकर तीन नक्षत्र हस्त, चित्रा, स्वाती तथा मृगशिरा। इसी प्रकार श्रवण से तीन नक्षत्र श्रवण, धनिष्ठा, शतभिषा और रेवती; अश्विनीनक्षत्र, शक्र अर्थात् इन्द्र उनका नक्षत्र ज्येष्ठा, गुरु का नक्षत्र तिष्य (पुष्य) तथा पुनर्वसु नक्षत्र; ये नक्षत्र क्षौरकर्म (चूड़ाकरण आदि) में विहित एवं प्रशस्त हैं, नवमांश लग्न के अनुसार इन नक्षत्रों का जब उदय हो, उस समय भी क्षौरकर्म विहित है। यथा मेषलग्न के उदय होने पर १३ अंश २० कला तक चतुर्थखण्ड रहेगा। यह चन्द्रमा का नवमांश होगा। तब तक अश्विनी नक्षत्र का उदय माना जायेगा। उसके बाद इसी क्रम से उन्हीं अंशों के मान

---

१. द्रष्टव्यमस्य ग्रन्थस्य अ. ४२ श्लोक सं. १२ विवृतौ इदं वचनं कुत्रचित् पाठान्तररूपम्।

के भरणी आदि अन्य नक्षत्रों का उदयकाल भी समझना चाहिये। जिस नक्षत्र का उदयकाल हो उसमें उसके विहित कर्म होते हैं। इसी प्रकार क्षण अर्थात् मुहूर्त के उदय पर भी विचार करना चाहिये। क्षण शब्द का अर्थ मुहूर्त है। जिन नक्षत्रों में क्षौर कर्म विहित है, उनके देवता वाचक जो मुहूर्त हो, उसके उदयकाल में क्षौरकर्म शुभ हैं, सूर्य के नाम से जब कोई मुहूर्त उदित हो तब क्षौर कर्म करना चाहिये। यथा मित्र और पूष्ण सूर्यवाचक मुहूर्त हैं। जैसाकि यात्रा प्रकरण में मुहूर्तों के नाम बतलाये गये हैं।

दिन के पन्द्रह मुहूर्तों के स्वामी क्रमशः १ शिव २ भुजग ३ मित्र ४ पितृ ५ वसु ६ जल ७ विश्व ८ विरञ्चि ९ पद्मयोनि १० इन्द्राग्नि ११ इन्द्र १२ निशाचर १३ वरुण १४ अर्यमा १५ योनि होते हैं। रात के पन्द्रह मुहूर्तों में क्रमशः १ रुद्र २ अज ३ अहिर्वुध्न्य ४ पूषा ५ दस्र ६ अन्तक ७ अग्नि ८ धाता ९ इन्दु १० अदिति ११ गुरु १२ हरि १३ रवि १४ त्वष्ट्रा १५ अनिल; ये स्वामी होते हैं। मुहूर्त एवं काल का ज्ञान दिन में छायायन्त्र से तथा रात में जलयन्त्र से किया जाता है।

ये नक्षत्र यदि शुभचन्द्रमा से अर्थात् १,३, ६, ७, १० तथा एकादश स्थानों में से कहीं भी स्थित हो, तब चन्द्रमा की अनुकूलता होती है। शुभतारा होने पर भी अर्थात् सम्पत् तारा, क्षेमतारा, साधकतारा और मैत्रतारा; इनमें से कोई भी तारा हो, तो अनुकूल तारा मानी जाती है। इसका अभिप्राय यह है कि चन्द्रमा की अनुकूलता तथा तारा की अनुकूलता हो, तब विहित कर्म करना चाहिए।।१२।।

अत्र क्षुरकर्मणि परिशेषार्थमाह–

न स्नातमात्रगमनोन्मुखभूषिताना-
मभ्यक्तभुक्तरणकालनिरासनानाम्।
सन्ध्यानिशाशनिकुजार्कतिथौ च रिक्ते
क्षौरं हितं [1]न नवमेऽह्नि न चापि विष्ट्याम्।।१३।।

स्नान करने के बाद, यात्रा (युद्धादि यात्रा) के समय, अलंकृत होने पर, तेल उबटन आदि लगाने के बाद, भोजन के पश्चात्, युद्धकाल में, आसन रहित होकर, सन्ध्या के समय, रात में, मंगल और रविवार को, रिक्ता (४,९,१४) तिथि में, पूर्व कृत क्षौर दिन से नौवें दिन तथा भद्राकाल में क्षौर करना कल्याणप्रद नहीं होता है।।१३।।

स्नातमात्रस्य कृतस्नानस्य क्षौरं न हितं न शस्तम्। गमनोन्मुखस्य गन्तुं प्रवृत्तस्य क्षौरं न हितम्। तथा भूषितस्यालङ्कृतस्य। अभ्यक्तस्य तैलादिना कृताभ्यङ्गस्य। भुक्तस्य कृताहारस्य। रणकाले सङ्ग्रामसमये। निरासनस्य आसनरहितस्य। तेषां क्षौरं न हितं न शोभनम्। तथा सन्ध्याकाले सन्ध्यासमये। सन्ध्यालक्षणं प्रागेवोक्तम्–

[2]अर्धास्तमितानुदितात् सूर्यादस्पष्टभं नभो यावत्।
तावत् सन्ध्याकालः।।....इति।

१. न च नवेऽह्नि न चापि विष्ट्यामीति पाठान्तरम्।

२. द्रष्टव्ययोऽस्य ग्रन्थस्य अध्याय सं. ३०/१ श्लोकः।

निशायां रात्रौ। शनिकुजार्कवारे—शनिवारे शनैश्चरवारे, कुजवारे भौमवारे, अर्कवारे आदित्यवारे च। केचिदप्यर्कबारे नेच्छन्ति। तिथौ च रिक्ते, चतुर्थी नवमी चतुर्दशी चेति रिक्ता तिथिः। तस्यां क्षौरं न हितम्। नवमेऽह्नि नवमे दिवसे न कार्यम्। विष्ट्यां करणे क्षौरं हितं न। नवमेऽह्नि न चापि विष्ट्यामित्यत्र केचिदन्यथा व्याख्यानं कुर्वन्ति। नवमदिवसग्रहणमत्यन्तनिषेधार्थम्। चतुर्थ्यां चतुर्दश्यामपि कार्यातिपत्तौ कर्तव्यं क्षुरम्, न नवम्याम्। तथा। च-न नवम्यङ्गारकवर्जमिति लोकवचनं प्रदर्शयन्ति। एतेन तिथौ च रिक्ते इत्यनेनैव गतार्थत्वाद् व्यासमहर्षिणा चतुर्थ्याद्या निषिद्धा, नवमी सामान्यनिषेधेनापि न निषिद्धा। तथा चाह—

चतुर्थीं चैव षष्ठीं च अष्टमीं च चतुर्दशीम्।
तथा पञ्चदशीं चैव ब्रह्मचारी भवेत् सदा।।
श्मश्रुकर्मशिरोऽभ्यङ्गमञ्जनं दन्तधावनम्।
पर्वस्वेतानि यः कुर्याल्लक्ष्मीस्तत्र न तिष्ठति।।

एतच्च यद्याचार्यस्य निषेध आधिक्येनाभ्युपगतं स्यात्, तदा रिक्तातिथि निर्देशं न कृतं स्यात्। एतावद्वक्तव्यं नवम्यामिति। तत्रापि परे चकारेण पाठान्तरं कृत्वा न च नवेऽह्नि न चापि विष्ट्यामिति प्रतिपद्दिवसमेव नेच्छन्ति। नवं च तदहो नवाहस्तस्मिन् नवेऽह्नि। तन्त्रान्तरोक्तं च निदर्शनं पठन्ति—

क्षौरं न निशि न भुक्ते न पक्षसन्धौ न जन्मनक्षत्रे।
न प्रसवनोपवासे न देवपितृकार्ययोरन्तः।।

अत्र रिक्ताग्रहणं नास्ति। तथा च पराशरोक्तम्—

"प्रतिपत्षष्ठ्योर्विवाहक्षेत्रासववास्तुबीजवपनमित्रधनसङ्ग्रहाभिषेकसत्रादि-स्थिरमिष्टमनिष्टमध्वाध्यापनमध्ययनं क्षुरकर्मेति"। तथा च लोके वचनम्—"प्रतिपत्सु न वापयेत्" इति। यद्याचार्येण नवदिवसग्रहणे प्रतिपन्निषिद्धा तदा षष्ठ्या सहास्य को विरोधो येन न निषेधः कृत इति। वयं तत्र ब्रूमः—यत्र क्षौरे कृते अनायुष्यं भवति तन्निषिद्धम्, न शेषम्। तथा च—"क्षौरं न निशि न भुक्ते न पक्षसन्धौ" इत्यनन्त-रोक्तश्लोकस्यानन्तरश्लोकः—

सन्ध्यायामशुभे चन्द्रे विष्ट्यां सोमदिनोदये।
क्षुरकर्म कृतं विन्द्यादनायुष्यकरं नृणाम्।।

नवमदिसवग्रहणेनापि क्षौरदिवसनवमदिवसो निषिद्धः। कथमेतदवगम्यत इति। उच्यते, आचार्येण प्रदेशान्तरेण प्रदर्शितम्—

राज्ञां कार्यं पञ्चमे पञ्चमेऽह्नि क्षौरर्क्षे वा श्मश्रु तस्योदये तु।

त्यक्ता तारा सप्तमी च त्रिपूर्वा यात्राकाले नैव कार्यं न युद्धे।।

तत्रानन्तरोक्तानन्तरश्लोकः—

मासादूर्ध्वमनायुष्यमधः पक्षान्न सम्पदः।

पञ्चमे पञ्चमे वाऽपि राज्ञः क्षौरं प्रशस्यते।।

तथा च वैदिकैः पठ्यते—

पञ्चमकं दशमकं वा प्रत्यायुष्यम्। आयुष्यं क्षौरपर्यायः। प्रति प्रति आयुष्यं प्रत्यायुष्यम्। पञ्चमे पञ्चमे दिवसे कर्तव्यम्। क्षौरदिवसात् पञ्चमे दिवसे यदि क्षौरं न कृतं ततस्तस्मात् प्रथमदिवसाद् दशमे दिवसे क्षौरं कर्तव्यम्। न नवमदिवसे। अस्मिन्नेवार्थे स्पष्टतरः श्लोकः—

क्षौरं राज्ञः सदा शस्तं पञ्चमे पञ्चमे दिने।

क्षौराहान्नवमे त्वह्नि नेष्टमात्ययिकेष्वपि।।

तथा च गृहप्रवेशादिष्वपि नवमदिवसो निषिद्धः। गृहप्रवेशदिवसान्नवमदिवसे निर्गमनं न कुर्यात्। तन्त्रान्तरे पठ्यते—

निर्गमान्नवमे त्वह्नि प्रवेशं चात्र वर्जयेत्।

शुभनक्षत्रयोगेऽपि प्रवेशाद्वापि निर्गमम्।।इति।

तस्मात् क्षौराहान्नवमेऽह्नि क्षौरं न कर्तव्यमिति स्थितमेतत्।।१३।।

क्षौरकर्म के अन्य विशेष बातों को कहते हैं—

स्नान कराने के पश्चात्, कहीं गमन करने के समय, तेल लगाने के अनन्तर, युद्ध के अवसर पर, आसन के बिना, सन्ध्यासमय, रात्रि समय, शनि-मंगल-रविवार के दिन, रिक्ता तिथि, नौवें दिन तथा विष्टिकरण; इनमें क्षौर करना शुभ नहीं होता है।।१३।।

स्नान करने के पश्चात् क्षौर कर्म हितकारी नहीं होता है। यात्रा के लिये प्रवृत्त व्यक्ति को भी क्षौर नहीं कराना चाहिए तथा अलंकार आदि धारण करने (सुसज्जित होकर) के पश्चात् क्षौर न करे। तैलादि अभ्यङ्ग लगाकर, भोजन करने के पश्चात्, युद्ध के समय, आसन पर बैठे बिना, क्षौर कर्म हितकारक अर्थात् शुभ नहीं होता है। सन्ध्या के समय भी क्षौरकर्म नहीं करना चाहिये। सन्ध्याकाल का लक्षण पहले ही कहा जा चुका है-

(अध्याय ३० श्लोक १)

अर्द्धास्त सूर्य बिम्ब के बाद आकाश में नक्षत्रगण भली-भाँति नहीं दिखायी देने तक सायंसन्ध्या होती है।

रात्रि के समय, शनिवार, भौमवार और रविवार को क्षौरकर्म न करे। कतिपय आचार्य रविवार का निषेध नहीं करते हैं। रिक्ता तिथि ४, ९, १४, को क्षौर कर्म निषिद्ध है। इनमें क्षौरकर्म नहीं होता है। नौवें दिवस को भी क्षौरकर्म निषिद्ध है। विष्टिकरण में क्षौरकर्म शुभ नहीं होता है। नौवें दिन तथा विष्टि में क्षौरकर्म हेतु कतिपय आचार्य अन्यथा मन्तव्य प्रकट करते हैं। नौवें दिन का ग्रहण अतिशय वर्जित है। चतुर्थी और चतुर्दशी में आवश्यक होने पर क्षौरकर्म किया जा सकता है, परन्तु नवमी तिथि में कथमपि नहीं। जैसाकि नवमी तिथि और मंगलवार विहित नहीं है, इस लोक वचन का उल्लेख किया जाता है। इससे रिक्तातिथि में निषेध वचन कह देने से ही समाधान हो जाता है। महर्षि व्यास ने चतुर्थी आदि तिथियों का निषेध किया है परन्तु नवमी का सामान्यतया निषेध होने पर भी निषिद्ध नहीं माना है। जैसा कि कहते हैं–

चतुर्थी, षष्ठी, अष्टमी, चतुर्दशी और पूर्णिमा में ब्रह्मचारी होकर रहना चाहिये। क्षौर कर्म, अभ्यंग, मंजन, दन्तधावन; इन कर्मों को इन पर्वतिथियों में जो करता है, उसके घर लक्ष्मी नहीं रहती है।

यदि आचार्य वराहमिहिर इन सभी का निषेध करते तब रिक्ता तिथि का निर्देश यहाँ पर नहीं होता। नवमी के सम्बन्ध में यही कहना है। तथापि परवर्ती चकार के द्वारा पाठान्तर न नौवें दिन और न भद्रा में यह अभिप्राय है, प्रतिपदा तिथि का नहीं। नौवे दिन को नवाह कहा जाता है। उस नौवें दिन को क्षौरकर्म नहीं करना चाहिये। जैसाकि अन्य शास्त्रों में इसका निर्देश मिलता है–

रात में तथा भोजन करने पर, दो पक्षों के सन्धिकाल में, जन्मनक्षत्र में, प्रसव-सूतक होने पर, व्रतोपवास में तथा देवकार्य और पितृकार्य के अन्त में क्षौरकर्म नहीं करना चाहिये।

यहाँ पर रिक्तातिथि का ग्रहण नहीं किया गया है। जैसाकि आचार्य पराशर ने कहा है–

प्रतिपदा और षष्ठीतिथि में विवाह, कृषिकर्म, आसव उतारना, वास्तुकर्म, बीजवपन, मित्र एवं धनसंग्रह, अभिषेक, सत्र (यज्ञीय अवधि जो प्राय: १३ से १०० दिन तक होने वाले यज्ञों में पायी जाती है) स्थिर, इष्ट, अनिष्ट, यात्रा, अध्यापन, अध्ययन और क्षौरकर्म नहीं करना चाहिये। इसी प्रकार लोकवचन भी प्राप्त होता है कि "प्रतिपदातिथि को बीज वपन नहीं करना चाहिये।" यदि आचार्य के द्वारा नवमदिन का ग्रहण कर प्रतिपदा तिथि का निषेध किया गया है, तब षष्ठी तिथि के साथ इसका कैसा विरोध किया गया है। जिससे इसका निषेध नहीं किया गया। इसके लिये हमारा कथन है कि इस तिथि में क्षौर करने से आयु की हानि होती है। उसका निषेध किया गया है। अन्य तिथियों का नहीं। जैसाकि "क्षौरकार्य रात्रि में,

भोजनोपरान्त और पक्षसन्धि में नहीं करना चाहिये।" इस श्लोक के आगे के श्लोक में इस प्रकार कहा गया है–

सन्ध्याकाल में, चन्द्रमा के अशुभ होने पर, भद्रा में, सोमवार के दिन होने वाले क्षौरकर्म करने से प्राणी की आयु का विघात होता है।

नवम दिवस के ग्रहण से भी क्षौर का नवमदिवस निषिद्ध होता है। इसका ज्ञान कैसे होता है? इस सम्बन्ध में कहते हैं। आचार्य ने अन्य स्थलों पर इसको प्रस्तुत किया है–

राजा क्षौरकर्म तथा श्मश्रुकर्तन दिन से पाँचवें-पाँचवें दिन करे। अशुभ तारा, सप्तमीतिथि, तीनों पूर्वानक्षत्र, यात्राकाल तथा युद्ध में भी क्षौरकर्म न करे।

इसके अनन्तर कहा गया श्लोक इस प्रकार है–

एक मास के पश्चात् अनायुष्यकारक, पक्षसन्धि में सम्पत्तिनाश एवं पाँचवें-पाँचवें दिन राजा का क्षौर कर्म शुभ होता है।

जैसा कि वैदिकों द्वारा कहा जाता है–

"पाँचवें और दसवें दिन क्षौरकर्म आयुष्यकारक होता है।" आयुष्यशब्द क्षौर शब्द का पर्यायवाचक है। प्रति-प्रति आयुष्य को प्रत्यायुष्य कहा गया है। पाँचवें-पाँचवें दिन क्षौरकर्म करना चाहिये। क्षौर कर्म सम्पन्न होने के दिन से पाँचवें दिन यदि और किसी कारणवश नहीं किया जा सका तब उस प्रथम क्षौरदिवस से दसवें दिन क्षौर करना चाहिये, न कि नवें दिन। इसी अर्थ को प्रतिपादित करते हुये स्पष्टरूप से कहा गया है–

राजा का क्षौरकर्म पाँचवें-पाँचवें दिन शुभ होता है। कृत क्षौरदिवस से नौवें दिन अत्यावश्यक होने पर भी क्षौर कर्म नहीं करना चाहिये।

इसके साथ ही गृहप्रवेश आदि भी नौवें दिन निषिद्ध होता है। गृह प्रवेश के दिन से नौवें दिन निर्गमन (यात्रा) नहीं करना चाहिये। अन्य शास्त्र में कहा गया है–

निर्गमन से नौवें दिन गृह प्रवेश यहाँ पर निषिद्ध माना गया है।

शुभ नक्षत्र एवं शुभयोग के होने पर भी गृह प्रवेश के पश्चात् नौवें दिन यात्रा (निर्गमन) नहीं करनी चाहिये।

इस प्रकार कृत क्षौरदिवस से नौवे दिन क्षौरकर्म नहीं करना चाहिये, यह अभिमत स्थिर हो गया।।१३।।

अथ सर्वनक्षत्रेषु क्षुरकर्माह–

नृपाज्ञया ब्राह्मणसम्मते च विवाहकाले मृतसूतके च।
बद्धस्य मोक्षे क्रतुदीक्षणासु सर्वेषु शस्तं क्षुरकर्म भेषु।।१४।।

अब सभी नक्षत्रों में क्षौरकर्म का विचार करते हैं-

राजाज्ञा होने पर, ब्राह्मण की सहमति से, विवाहकाल में, मृतक सूतक होने पर, कारागार से मुक्त होने पर, यज्ञ की दीक्षा में; सभी नक्षत्रों में क्षौरकर्म शुभ होता है॥१४॥

नृपाज्ञया राजाज्ञया। ब्राह्मणानां द्विजानां च सम्मतेऽभिमते। विवाहकाले उद्वाहसमये। मृतसूतके मृतस्य सूतको मृतसूतकस्तस्मिन्। बद्धस्य मोक्षे बन्धनमोक्षे। क्रतुषु यज्ञेषु। दीक्षणासु दीक्षासु। एतेषु कालेषु, सर्वेषु निःशेषेषु भेषु नक्षत्रेषु क्षुरकर्म शस्तं शोभनमित्यर्थः।।१४।।

राजाज्ञा से, ब्राह्मणों अर्थात् द्विजों की सहमति होने पर, विवाहकाल में, मृत्यु के बाद जो मृतसूतक लगने पर, कारागार में निरुद्ध व्यक्ति के मुक्त होने पर, क्रतु अर्थात् यज्ञ में, दीक्षाकाल में; इन सभी अवसरों पर सम्पूर्ण नक्षत्रों में क्षौरकर्म प्रशस्त अर्थात् शुभ होता है॥१४॥

अथ संस्कारनक्षत्राण्याह-

सावित्रपौष्णानिलमैत्रतिष्यत्वाष्ट्रे तथा चोडुगणाधिपर्क्षे।
संस्कारदीक्षाव्रतमेखलादि कुर्याद् गुरौ शुक्रबुधेन्दुयुक्ते।।१५।।

अब संस्कार के नक्षत्रों को कहते हैं-

हस्त, रेवती, स्वाती, अनुराधा, पुष्य, चित्रा, मृगशिरा; इन नक्षत्रों में तथा शुक्र, बुध, चन्द्र, गुरु; इन वारों में संस्कार, दीक्षा, उपनयन, मौञ्जी आदि कार्यों को करना चाहिये॥१५॥

सावित्रं हस्तः। पौष्णं रेवती। अनिलं स्वातिः। मैत्रमनुराधा। तिष्यः पुष्यः। त्वाष्ट्रं चित्रा। उडुगणाधिपर्क्षे मृगशिरसि। उडुगणो नक्षत्रसमूहस्तस्याधिपश्चन्द्रस्तद्दैवत्ये। एत- स्मिन्नक्षत्रगणे किं कुर्यादित्याह-संस्कारो नामकरणादि। दीक्षा यज्ञदीक्षा। व्रतं व्रतबन्धः। मेखला मौञ्जी। आदिग्रहणात् क्षुरकर्मविद्याग्रहणम्। गुरौ जीवे। कैर्ग्रहैर्युक्त इति शुक्रेण, बुधेन, इन्दुना चन्द्रेण च युक्ते। एतेषां दिनेष्वित्यर्थः।।१५।।

सावित्र अर्थात् हस्त नक्षत्र, पौष्ण अर्थात् रेवती, अनिल अर्थात् स्वाती, मैत्र अर्थात् अनुराधा, तिष्य अर्थात् पुष्य, त्वाष्ट्र अर्थात् चित्रा, नक्षत्राधिपति चन्द्रमा का नक्षत्र मृगशिरा। उडुगण अर्थात् नक्षत्रसमूह उसका अधिपति चन्द्रमा जिसका देवता है, वह नक्षत्र (मृगशिरा)। इन नक्षत्रों में क्या करना चाहिये? इसका समाधान करते हुये कहते हैं-नामकरण आदि संस्कारों को करना चाहिये। दीक्षा अर्थात् यज्ञदीक्षा, व्रत अर्थात् उपनयन मौञ्जी-बन्धन, आदि शब्द से क्षौरकर्म और विद्याग्रहण का भी विचार करना चाहिये। गुरु अर्थात् जीवग्रह के साथ शुक्र, बुध और इन्दु अर्थात् चन्द्रमा से युक्त होने पर। अर्थात् इन शुभग्रहों के शुभदिन में उक्त संस्कारों को करना

चाहिये॥१५॥

अधुना सर्वकर्मणां लग्नशुद्धिमाह–

शुद्धैर्द्वादशकेन्द्रनैधनगृहैः पापैस्त्रिषष्ठायगै-
र्लग्ने केन्द्रगतेऽथवा सुरगुरौ दैत्येन्द्रपूज्येऽपि वा।
सर्वारम्भफलप्रसिद्धिरुदये राशौ च कर्तुः शुभे
सग्राम्यस्थिरभोदये च भवनं कार्यं प्रवेशोऽपि वा॥१६॥

सभी कर्मों हेतु लग्न शुद्धि का विचार करते हैं–

लग्न से द्वादश, केन्द्र तथा अष्टम गृह में शुभग्रह हों तथा तृतीय, षष्ठ और एकादश में पाप ग्रह हों लग्न या केन्द्र में बृहस्पति अथवा शुक्र हो तो सब कार्यों की सिद्धि होती है। तथा कर्मकर्ता की जन्म राशि, ग्राम्यराशि अथवा स्थिर राशि लग्न में हो; तो गृह निर्माण और गृह प्रवेश शुभ होता है॥१६॥

शुद्धैर्द्वादशकेन्द्रनैधनगृहैरिति। द्वादशे प्रसिद्धम्। केन्द्राणि लग्नचतुर्थसप्तमदशमानि। नैधनगृहमष्टमस्थानम्। एतैः शुद्धैः सौम्यग्रहाधिष्ठितैः पापग्रहवियुतैः। तथा पापैः पापग्रहैरादित्याङ्गारकशनैश्चरैस्त्रिषष्ठायगैः तृतीयषष्ठेकादशस्थानस्थितैः। सुरगुरुर्जीवः, तस्मिन् लग्ने स्थितेऽथवा केन्द्रगते; वा दैत्यन्द्रपूज्येऽपि दैत्यानामिन्द्रा दैत्येन्द्रा दैत्यप्रधानाः, तेषां पूज्यो गुरुः शुक्रः, तस्मिन् लग्नगते केन्द्रगते वा। एवंविध उदये लग्ने सर्वारम्भाणां सर्वकार्यप्रारम्भाणां फलेऽभिमते प्रसिद्धिर्भवति। तथा च कर्तुः कर्मकर्तृ राशौ लग्ने शुभे जन्मलग्नस्य राशेः सर्वानुकूल्ये अनष्टमद्वादशे। तथा सग्राम्यस्थिरभोदये, ग्राम्या मेषमिथुन-कन्यातुलधन्विकुम्भाः स्थिरराशयः, ते च सग्राम्याः। यतः सिंहवृश्चिकौ स्थिरावपि न ग्राम्यौ। एतेषु यथोक्तेषु सग्राम्यस्थिरभेषु राशिषूदयं प्राप्तेषु भवनं गृहं कार्यं विधेयम्। प्रवेशोऽपि वा गृहप्रवेशोऽपि वा कार्यः। तथा च यवनेश्वरः–

लग्नेषु जीवैन्दवभार्गवेषु पश्यत्सु चैतेषु गृहर्क्षमंशम्।
राशावथो वा विचरे गृहस्थे गृहांशयोर्वा भृगुनन्दनेन्द्वोः॥
जलाशये वा गृहमागतेंऽशे गृहे स्वनाथाश्रितलक्षिते वा।
चन्द्रे शुभस्थे च शुभानि विन्द्याद् वास्तुप्रवेशादिनिवेशनानि। इति॥१६॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ नक्षत्रकर्मगुणो
नाम सप्तनवतितमोध्यायः॥९७॥

द्वादशवाँ भाव तथा केन्द्र १, ४, ७, १० स्थान मृत्युगृह अर्थात् अष्टम स्थान; इनके शुद्ध होने पर अर्थात् शुभग्रह से युक्त तथा पापग्रह से रहित होने पर। पापग्रह अर्थात् सूर्य, मंगल और शनि ३, ६, ११ स्थानों में अवस्थित हो; तब सुर गुरु अर्थात् बृहस्पति लग्न में स्थित हो अथवा केन्द्रस्थ हो अथवा दैत्यों के इन्द्र अर्थात्

दैत्यों में प्रधान (इन्द्र) का गुरु अर्थात् शुक्र, यह जब लग्नस्थ अथवा केन्द्रस्थ हो। इस प्रकार के उदय लग्न में सर्वारम्भ अर्थात् सभी कार्यों का प्रारम्भ करने पर अभिमत फल की प्राप्ति होती है। कर्ता अर्थात् उस कर्म को करने वाले की राशि अथवा जन्मलग्न की राशि सर्वथा अनुकूल हो तथा अष्टम और द्वादश स्थान ग्रह रहित हों। तथा कर्मकर्ता की जन्मराशि, ग्राम्यराशि अथवा स्थिरराशि का लग्न हो। मेष-मिथुन-कन्या-तुला और कुम्भ; ये स्थिर एवं ग्राम्य राशियाँ हैं। सिंह और वृश्चिक राशि स्थिर हैं परन्तु ग्राम्य नहीं हैं। इन कथित ग्राम्य सहित स्थिर राशियों के उदित होने पर गृह कार्य करना चाहिये। इनमें प्रवेश अर्थात् गृह प्रवेश भी करना चाहिये। जैसाकि आचार्य यवनेश्वर ने कहा है–

लग्नराशि गुरु-चन्द्र तथा शुक्र से दृष्ट हो तथा इनकी राशि, नक्षत्र एवं नवमांश हो। वा ये चरराशि में न हों, गृहपति तथा गृह के नवमांश में शुक्र और चन्द्रमा हो तो जलाशयकर्म यदि गृह के नवमांश में उसका स्वामी हो, अथवा उससे दृष्ट हो, चन्द्रमा शुभ हो; तब वास्तुप्रवेश-वास्तु स्थापन आदि कार्य करना चाहिये।।१६।।

श्री भटोत्पलविरचित संहिताविवृति में नक्षत्रकर्मगुणाध्याय नामक सत्तानबें अध्याय की हिन्दी व्याख्यापूर्ण हुई।।९७।।

❑❑

अथ तिथिकर्मगुणाध्यायो व्याख्यायते

कमलजविधातृहरियमशशाङ्कषड्वक्त्रशक्रवसुभुजगाः।
धर्मेशसवितृमन्मथकलयो विश्वे च तिथिपतयः।।१।।
पितरोऽमावस्यायां संज्ञासदृशाश्च तैः क्रियाः कार्याः।
नन्दा भद्रा विजया रिक्ता पूर्णा च तास्त्रिविधाः।।२।।
यत् कार्यं नक्षत्रे तद्दैवत्यासु तिथिषु तत् कार्यम्।
करणमुहूर्तेष्वपि तत् सिद्धिकरं देवतासदृशम्।।३।।

तिथियों के स्वामी तथा नन्दादि विचार–

प्रतिपदादि तिथियों के स्वामी क्रमशः १ ब्रह्मा २ विधाता ३ विष्णु ४ यम ५ चन्द्र ६ कार्तिकेय ७ इन्द्र ८ वसु ९ सर्प १० धर्म ११ रुद्र आदित्य १३ कामदेव १४ कलि १५ विश्वेदेव; ये शुक्लपक्ष के स्वामी होते हैं। कृष्णपक्ष की तिथियों में भी चतुर्दशी पर्यन्त ये ही अधिपति होते हैं। अमावस्या के स्वामी पितर होते हैं। इन तिथियों में संज्ञातुल्य कार्य करने चाहिये। नन्दा, भद्रा, विजया, रिक्ता, पूर्णा; ये तिथियाँ तीन प्रकार की होती हैं। जिस नक्षत्र में जो कार्य बतलाये गये हैं, वह उस नक्षत्र के देवता की तिथि में करना चाहिये। जिस नक्षत्र में जो कार्य कहे गये हैं,

उनको उस नक्षत्र के देवता के करण में भी करना चाहिये॥१-३॥

कमलजेति। कमलजादयः प्रतिपदादीनां तिथीनां पतयः कमलजो ब्रह्मा प्रतिपद्यधिपतिः। विधाता द्वितीयस्याम्। हरिर्विष्णुस्तृतीयस्याम्। यमश्चतुर्थ्याम्। शशाङ्कश्चन्द्रमाः पञ्चम्याम्। षड्वक्त्रः कुमारः षष्ठ्याम्। शक्र इन्द्रः सप्तम्याम्। वसवोऽष्टम्याम्। भुजगः सर्पो नवम्याम्। धर्मो दशम्याम्। ईशो रुद्र एकादश्याम्। सविता आदित्यो द्वादश्याम्। मन्मथः कामस्त्रयोदश्याम्। कलिश्चतुर्दश्याम्। विश्वेदेवाः पञ्चदश्यां पौर्णमास्यामित्यर्थः। एवं शुक्लपक्षे।।

कृष्णपक्षे एतास्वेव तिथिषु एत एवाधिपतयः, किन्तु पितरोऽमावस्यायाम्। अमावास्यायां पितरः। तैस्तिथिस्वामिभिः संज्ञासदृशा नामतुल्याः क्रियाः कार्याः। यथा प्रतिपदि ब्रह्मकर्म विवाहादि। द्वितीयस्यां भवननिवेशादि। तृतीयस्यां चौलकरणदमनादि। चतुर्थ्यां शत्रुमथनादि। पञ्चम्यां वमनौषधिपौष्टिकादि। षष्ठ्यां मित्रसंग्रहाभिषेकादि। सप्तम्यां शकटयानक्रियाध्वगमनादि। अष्टम्यामायुधग्रहणदुर्गोपकरणादि। नवम्यां परविघातमारणादि। दशम्यां धर्मब्राह्मणतर्पणादि। एकादश्यां स्थिरचरसौम्यमृदुकर्मादि। द्वादश्यामग्न्याधानादि। त्रयोदश्यां मित्रकरणकामानुसेवादि। चतुर्दश्यां विषरसप्रयोगादि। पञ्चदश्यां पितृतर्पणादि। तथा च पराशरः—

"तिथयस्तु नन्दा भद्रा जया रिक्ता पूर्णा मासा मित्रा महाबलोग्रसेना सुधन्वा सुनन्दा यमा जयोग्रा सिद्धिरिति। तासु कर्माणि। प्रतिपत्षष्ठ्योर्विवाहक्षेत्रासव-वास्तुबीजवपनमित्रधनसंग्रहाभिषेकसत्रादि स्थिरमिष्टमनिष्टमध्वाध्यापनमध्ययनं क्षुरकर्मेति। द्वितीयसमप्तमीत्रयोदशीषु पत्युद्वहनभवनशयनशकटयानक्रियाध्वगमनाम्बरालङ्कार-धारणशिल्पभैषज्यस्वत्त्ययनपौष्टिकव्रतायुष्याणि। विशेषतो मित्रायां मित्रकर्मनृपतिशासन-सन्धानानि। तृतीयायां बलकरणदमनानि। प्रतिपदि द्वितीयायां चतुर्थ्यामपि विषमथनदमनबन्धानि चारभेदकवाटाभियोगाग्निविषसम्प्रयोगक्रियोग्रोग्रसेनयोश्च। पञ्चमीदशम्येकादशीषु भवनशयन-स्वस्त्ययनौषधपौषिटकसुभगाध्वगमनकेदारव्यवहार-भूषणकन्यावरणोद्वहनस्थिरचरसौम्यमृदुकर्माणि। एकादश्यां स्त्रीभृत्यनिग्रहा विशेषेण। अष्टम्यां बलोपकरणदर्शनायुधग्रहणदुर्गोपकरणावरणपरिखाभिखननकेदारव्यवहारभूषण-कन्यावरणोद्वहनस्थिरचरसौम्यगुप्तिकरणानि। द्वादश्यां स्थिरचरकर्माग्न्याधानयज्ञोपन-यननिधि-निधानपाणिग्रहणानि। पञ्चदश्यां पितृ यज्ञदेवगोगुरुवल्युपवासेष्टिक्रियाः प्रशस्यन्ते। अपि च, ब्रह्मामरमन्त्रिजनार्दनयमसोमकुमारमुनिवसुपिशाचीधर्मरुद्ररविकामरुद्रपितर-स्तिथिदेवाः।"

नन्दा भद्रा विजया रिक्ता पूर्णा चेति। ताश्च तिथयो नन्दाद्यास्त्रिविधास्त्रिप्रकाराः, यथा—प्रतिपन्नन्दा, द्वितीया भद्रा, तृतीया विजया, चतुर्थी रिक्ता, पञ्चमी पूर्णा। एवं षष्ठ्याद्या एकादशाद्याश्च।

यत् कार्यमिति। नक्षत्रे यत् कार्यमुक्तं तस्यां या देवता सा यस्यां तिथौ देवता भवति तस्यामपि तदेव कर्म कार्यम्। यथा–रोहिण्या यत्कार्यमुक्तं तस्या या देवता ब्रह्मा तद्दैवत्यायां प्रतिपदि तदेव कार्यं कर्तव्यम्। एवं यदभिजिति तद्द्वितीयस्याम्। श्रवणे तृतीयस्याम्। भरण्यां चतुर्थ्याम्। मृगशिरशि पञ्चम्याम्। कृत्तिकासु षष्ठ्याम्। ज्येष्ठासु सप्तम्याम्। हस्ते द्वादश्याम्। पूर्वफल्गुन्यां त्रयोदश्याम्। श्लेषायां चतुर्दश्याम्। उत्तराषाढायां पञ्चदश्याम्। मघास्वमावस्यायामिति। तथा च गर्गः–

नन्दा प्रतिपदित्युक्ता प्रशश्ता ध्रुवकर्मसु।
ज्ञानस्य च समारम्भे प्रवासे च विगर्हिता।।
नाद्यादत्र तपः कुर्यात् पुष्टिसौभाग्यमेव च।
जन्म चात्रोत्तमं विन्द्यात् स्वयंभूर्देवता यतः।।
भद्रेत्युक्ता द्वितीया तु शिल्पिव्यायामिनां हिता।
आरम्भे भेषजानां च प्रवासे च प्रवासिनाम्।।
आवाहांश्च विवाहांश्च वास्तुक्षेत्रगृहाणि च।
पुष्टिकर्मकरश्रेष्ठा देवता च बृहस्पतिः।।
बलेत्युक्ता तृतीया तु बलसम्पच्च कारयेत्।
गोऽश्वकुञ्जरभृत्यानां दमनं मानसानि च।।
कुर्यादासवकर्माणि बीजान्यपि च वापयेत्।
बलकर्मारभेतैव विष्णुं विन्द्याच्च दैवतम्।।
रिक्ता प्रोक्ता चतुर्थी च क्षुद्रकर्म प्रयोजयेत्।
गोग्रहं दारुणं कुर्यात् कूटशास्त्रं समारभेत्।।
अत्र सम्मारणं कुर्यादभिघाताश्रयाणि च।
ध्रुवसेनाबधं कुर्याद्यमं विन्द्याच्च दैवतम्।।
पूर्णा च पञ्चमी प्रोक्ता प्रशस्ता ध्रुवकर्मणि।
नवान्नाग्रहणानां च शयनासनवेश्मनाम्।
जन्मक्षेत्रविभूषार्था व्यवहारौषधिक्रिया।
प्रशान्तं पौष्टिकं कर्म सोमं विन्द्याच्च दैवतम्।
षष्ठी मासा तिथिर्नाम प्रशस्ता ध्रुवकर्मसु।
क्षेत्रारम्भं गृहं कुर्याद् देवतायतनानि च।।
कारयेत् संक्रमद्वारगोपुराद्यालयानि च।
आधानं च न कर्तव्यं कुमारश्चात्र दैवतम्।।

सप्तमी मित्रनामा तु मित्रकार्याध्रुवाणि च।
कुर्याद्राज्ञो ध्वजं छत्रमासनं शयनानि च।।
रत्नानि मणिमुक्तादिवस्त्र्याण्याभरणानि च।
कारयेद् भूषणाद्यांश्च देवाः सप्तर्षयस्तथा।।
महाबलाष्टमी चैव कुर्याद् बालनिदर्शनम्।
अधिकारान् प्रयुञ्जीत यन्त्राकारधनूंषि च।।
कुर्याच्च नगरे गुप्तिं सुरङ्गान् परिखास्तथा।
हस्त्यश्वांश्च प्रयुञ्जीत वसवश्चात्र दैवतम्।
उग्रसेना तु नवमी बन्धने बधबन्धने।
अमित्रदमनार्थे च हिता शत्रुवधाय च।।
अध्वानं च न गच्छेत् प्रोष्यं न प्रविशेद् गृहम्।
संहरेत विषादीनि रुद्राणी चात्र दैवतम्।
सुधन्वा दशमीं प्राह ध्रुवं विन्द्याद्यशस्करम्।
कूपान् खनेन्नदीश्चैव कूपं पुष्करणीयुतम्।।
आरामान् नगरीश्चैव क्षेत्राणि च गृहाणि च।
पुण्यशालां सभां कुर्याद्धर्म विन्द्याच्च दैवतम्।।
सुनन्दैकादशीमाह ध्रुवं विन्द्यान्महानसम्।
निवेशनगरग्राम-यज्ञविप्रसभास्तथा।।
स्त्रीषु चोग्रं प्रवर्तेत दासकर्मकरेषु च।
गूढार्थं न प्रयुञ्जीत कामशत्रुश्च देवता।।
द्वादशीं तु यमामाह ध्रुवं विन्द्याद्यशस्करम्।
मङ्गल्यान्यत्र कुर्वीत चूडोपनयनानि च।।
कोष्ठागाराणि कुर्वीत निधानं च निधापयेत्।
ऋणं चात्र न गृह्णीयादादित्यश्चात्र देवता।।
जया त्रयोदशीमाह कर्तव्यं कर्म शोभनम्।
वस्त्रमाल्यमलङ्कारविप्राण्याभरणानि च।।
सौभाग्यकरणं स्त्रीणां कन्यावरणमेव च।
मुण्डनं युग्मवसनं कामं विन्द्याच्च देवताम्।।
उग्रां चतुर्दशीं विन्द्याद्दारुणान्यत्र कारयेत्।
बन्धनं रोधनं चैव घातनं च विशेषतः।।
पूर्वाभिहननं चैव दारुणं बधघातनम्।
ग्रामसेनावधं कुर्याद् विन्द्याद्रुद्रोऽत्र देवताम्।।

अमावस्या तु सिद्धार्था पितृयज्ञोऽत्र शस्यते।
देवकार्याणि कुर्वीत गोकुलं तु निवेशयेत्।।
पुरोहिताय वरणं कुर्याद् यज्ञक्रियां तथा।
बलिं चैवोपहारांश्च पितरश्चात्र देवता।।
कल्याणी पौर्णमासी तु देवकर्माधिकारिणी।
विप्रकार्येऽग्निकार्ये च गवां घोषे निवेशयेत्।।
राज्ञः पुरोहितं कुर्याद् यज्ञानि विविधानि च।
शुभं कर्म च कर्तव्यं सोमं विन्द्याच्च देवताम्।।इति।

करणमुहूर्त्तेष्वपि तत् सिद्धिकरं देवतासदृशं कार्यं सिद्धिकरम्। येन नक्षत्रेण यत् कार्यमभिहितं तस्य नक्षत्रस्य या देवता सैव यस्य करणस्य तस्मिंस्तत् कार्यम्। यथा ज्येष्ठायां यत् कार्यमभिहितं तद्बवेऽपि कर्तव्यम्। यतस्तस्य देवता शक्रः। एवं रोहिण्यां वालवस्य। अनुराधायां कौवलस्य। उत्तरफल्गुन्यां तैतिलस्य। गरस्य ज्येष्ठायाम्। श्रवणे वणिजः। विष्टेर्भरण्याम्। श्लेषायां शकुनेः। रोहिण्यां चतुष्पदस्य। नागस्य पुनराश्लेषायाम्। स्वातौ किंस्तुघ्नस्येति। तथा च पराशरः—

"शकुनौ शकुनिग्रहणप्रहरणभृत्ययोद्धृयुद्धोपकरणक्रियाः सर्वमुग्रं कुर्यात्। चतुष्पदे नृपतिविजयाभिषेकपितृदेवधर्मक्रियाचतुष्पददानानि। नागे सलिलोपकरणावेशनप्रवेशागदगदौषधधारणानि। किंस्तुघ्ने सुरगुरुतीर्थव्रतदीक्षाभिगमनस्नपनानि। ववे मणिकनकरजतालङ्कारवास्तुक्रियाभिप्रायाणासवकुसुमगन्धाधिकाराणि। वालवे व्रतोपवासनियमसत्रयज्ञद्विजगुरुसेवनानि। कौलवे पुरक्षेत्रलेख्यगन्धगान्धर्वपितृदेवधर्मक्रियाः। तैतिले निष्कर्मसाहसद्यूतयुद्धाभिषेकमङ्गलव्रतदीक्षागृहप्रवेशाः। गरे दारूद्यानवनाधिकारिकोपभोगा वैवाहिकादिकरणानि। वणिजि वणिक्प्रयोगाध्ययनशिल्पसंबन्धार्थाभिवादनवलिकर्मविधिभिर्यद्यथारभ्यते क्रिया काचित्। विष्ट्यां न किमपि समृद्धिमेति बीजमिव यथोषरप्राप्तम्" इति।

एवं मुहूर्तेष्वित्यपि। यस्मिन् नक्षत्रे यत् कार्यमुक्तं तस्य नक्षत्रस्य या देवता तस्या यो मुहूर्तस्तस्मिंस्तदेव कार्यं कर्तव्यम्। यथाऽऽर्द्रायां यत् कार्यं क्रियते तच्छिवे मुहूर्तेऽपि कार्यम्। यतस्तयोरेका देवता रुद्रः। एवं श्लेषायां भुजगे। अनुराधायां मित्रे। मघायां पितरि। धनिष्ठायां वसौ। पूर्वाषाढायां जले। उत्तराषाढायां विश्वे। अभिजिति विरञ्चौ। रोहिण्यां पङ्कजप्रभवे। विशाखायामिन्द्राग्नौ। मूले नैर्ऋते। शतभिषजि वारुणे। उत्तरफल्गुन्यामर्यम्णि। पूर्वफल्गुन्यां भाग्ये। पूर्वभद्रपदायामजैकपादे। उत्तरभद्रपदायामहिर्बुध्न्ये। रेवत्यां पूषणि। अश्विन्यां दस्रे। भरण्यामन्तके। कृत्तिकायामाग्नेये। मृगशिरसीन्दौ। पुनर्वसौ अदितौ। पुष्ये गुरौ। श्रवणे हरौ। हस्ते रवौ। चित्रायां त्वष्टरि। स्वातावनिलाख्ये। उक्तं च—

---

१. द्रष्टव्यमस्य ग्रन्थस्य अ. ४२ श्लोकः१२ विवृतौ इदं वचनं कुत्रचित् पाठान्तररूपम्।

[१]शिवभुजगमित्रपितृवसुजलविश्वविरञ्चिपङ्कजप्रभवाः।
इन्द्राग्नीन्द्रनिशाचरवरुणार्यमयोनयश्चाह्नि।।
रुद्राजाहिर्बुध्न्याः पूषा दस्रान्तकाग्निधातारः।
इन्द्वदितिगुरुहरिरवित्वष्ट्रनिलाख्याः क्षणा रात्रौ।
अह्नः पञ्चदशोंऽशो रात्रेश्चैवं मुहूर्त इति।
स च विज्ञेयस्तज्ज्ञैश्छायायन्त्राम्बुभिर्युक्त्या।।
नक्षत्रतत्क्षणानां परिघातादीश्वरैः समं चिन्त्यम्।
फलमपि तदेव दृष्टं गर्गाद्यपराशरश्लोकैः।
अहोरात्रं च सम्पूर्णं चन्द्रनक्षत्रयोजितम्।
तन्नक्षत्रमुहूर्ताश्च समकर्मगुणाः स्मृताः।।इति।।

तथा च पराशरः-

"रौद्रमितमैत्रसाधनसारभटात्मसहवैश्वदेवाभिजिद्रोहिणीन्द्रबलजयपित्र्यभाग्यवरुणनैर्ऋताग्नेययाम्यगन्धर्वध्यानपदराक्षसेन्द्राग्नेयप्राजापत्याश्विनेन्द्रब्रह्मगुरुसावित्र्यवैष्णवपौष्णाः। तेषां यत्समानदैवतनक्षत्रं तन्नक्षत्रवत् कर्माण्यारभेत। विशेषोपदेशमुपदेश्यामः-तत्र श्वेतमैत्रात्मसहरोहिणीषु रोहिणीव सर्वं साधनम् इष्टिव्रताधानाध्ययनानि। सारभटे अभिचारवधवादान्। अभिजितिसर्वकर्माणि। बले नृपतिबलसमारम्भाः। जयेऽन्नप्रमाणम्। गन्धर्वे गान्धर्वरतिविवाहाः। ध्यानपदेऽभिषेकभूषणमङ्गल्यानि। सन्ध्ययोस्तु पूर्वाऽग्निदेवता पश्चिमा रौद्री तयोर्न किञ्चित् कर्मारम्भो नान्यत्र नियमात् प्रयतमुपतिष्ठन्नोपासीत। पश्चिमायां विशेषतश्चाग्नौ न प्रविशेन्नाश्नीयान्न मैथुनमभिगच्छेत्"।।१-३।।

शुक्लपक्ष की प्रतिपदा आदि तिथियों के कमलज आदि देवता स्वामी होते हैं। प्रतिपदातिथि के कमलज अर्थात् ब्रह्मा अधिपति हैं। द्वितीया के विधाता, तृतीया के हरि अर्थात् विष्णु, चतुर्थी के यमराज, पञ्चमी के शशांक अर्थात् चन्द्रमा, षष्ठी के कुमार कार्तिकेय, सप्तमी के शक्र अर्थात् इन्द्र, अष्टमी के वसु नवमी के भुजग अर्थात् सर्प, दशमी के धर्मराज, एकादशी के ईश अर्थात् रुद्र, द्वादशी के सविता अर्थात् आदित्य (सूर्य), त्रयोदशी के मन्मथ अर्थात् कामदेव, चतुर्दशी के कलिदेव तथा पञ्चदशीतिथि अर्थात् पूर्णिमा के विश्वेदेव अधिपति हैं।

कृष्णपक्ष की तिथियों के भी ये ही स्वामी होते हैं, किन्तु अमावस्या तिथि के स्वामी पितृगण होते हैं। इन तिथियों में इन तिथि स्वामियों के नामानुसार विहित कार्यों को करना चाहिये। जैसे कि प्रतिपदा में ब्रह्मा का कर्म विवाह आदि करना चाहिये। द्वितीया में गृहारम्भ आदि, तृतीया में चूडाकरण तथा पशुदमन आदि, चतुर्थी तिथि में शत्रुदमन आदि, पञ्चमी में वमनकारी औषधि एवं पौष्टिकादि कर्म, षष्ठी में

मित्रसंग्रह तथा अभिषेक आदि, सप्तमी में शकट, यान क्रिया (गाड़ी से सम्बन्धित), यात्रा आदि, अष्टमी में शस्त्र संग्रह तथा दुर्ग से सम्बन्धित संसाधन आदि, नवमी में शत्रु विघात एवं मारण, दशमी में धार्मिक कार्य एवं ब्राह्मण भोजनादि, एकादशी में स्थिर-चर-सौम्य-मृदु (कोमल) कर्म, द्वादशी में अग्न्याधान एवं अग्नि सम्बन्धी कार्य, त्रयोदशी में मैत्रीकार्य एवं कामोपभोग, चतुर्दशी में विष एवं रासायनिक प्रयोग, पूर्णिमा में पितृतर्पण आदि। जैसाकि महर्षि पराशर ने कहा है–

मास में नन्दा भद्रा-जया-रिक्ता-पूर्णा तिथियाँ होती हैं। मित्रा-महाबला-उग्रसेना-सुधन्वा-सुनन्दा-यमा-जया-उग्रा तथा सिद्धि संज्ञक मास होते हैं। इन तिथियों में विहित कार्यों को कहते हैं। प्रतिपदा एवं षष्ठीतिथि में विवाह, कृषि, आसव, वास्तु, बीजवपन, मित्रकार्य, धनसंग्रह, राज्याभिषेक, यज्ञादि स्थिर कर्म, स्थिर अथवा अनिष्ट कर्म, यात्रा, अध्ययन-अध्यापन तथा क्षौर कर्म करना चाहिये। द्वितीया, सप्तमी एवं त्रयोदशी तिथियों में पाणिग्रहण, भवन, शयन, शकटादि से यात्रा क्रिया मार्ग गमन, वस्त्रालंकार धारण, शिल्पकर्म, चिकित्सा कर्म, शान्तिकर्म, पौष्टिककर्म, व्रतारम्भ एवं आयुष्य वृद्धि के कार्यों को करना चाहिये। विशेषतया मित्र अर्थात् अनुराधानक्षत्र मे मित्रकर्म, राज्य शासन, लक्ष्यसन्धान आदि कर्म शुभ होते हैं। तृतीयातिथि में शौर्य प्रदर्शन एवं शत्रुदमन आदि कार्य, प्रतिपदाद्वितीया और चतुर्थीतिथियों में विषकर्म, शत्रुदमन और दुष्टबन्धन, गुप्तचर, फूट डालना, दरवाजा लगाना, किसी पर अभियोग लगाना, अग्नि और विष का प्रयोग, उग्रक्रिया और सैनिकों में उग्रता लाना। पञ्चमी-दशमी एवं एकादशी तिथियों में भवन, शयन, शान्तिकर्म, औषधिकर्म, पौष्टिककर्म, सौभाग्यकर्म, मार्गगमन, कृषिकर्म, आभूषणधारण, कन्यावरण, विवाह तथा स्थिर-चर-सौम्य एवं मृदु कर्मों को करना चाहिये। एकादशी तिथि को विशेषरूप से स्त्री एवं सेवक का नियन्त्रण करना चाहिये। अष्टमी में शौर्य सामग्रियों का प्रदर्शन, शस्त्रग्रहण, दुर्ग सामग्री, आच्छादन, परिखा अर्थात् खाई का निर्माण, कृषिकर्म, अर्थ व्यापार, आभूषण, कन्यावरण स्थिर-चर-सौम्य कार्यों के साथ ही गोपनीय कार्यों को करना चाहिये। द्वादशी तिथि में स्थिर एवं चर कर्म अग्न्याधान, यज्ञ, उपनयन, धन-सम्पत्ति और पाणिग्रहण कर्म विहित हैं। पूर्णिमा तिथि में पितृ कर्म, यज्ञ, देव, पशु, गुरु, लतारोपण, उपवास, यागकर्म प्रशस्त होते हैं। तिथियों के क्रमशः देवता कहे गये हैं–ब्रह्मा, गुरु, जनार्दन, यम, चन्द्रमा, कुमार कार्तिकेय, मुनि, वसु, पिशाची, धर्म, रुद्र, सूर्य, काम, रुद्र तथा पितृगण।

ये तिथियाँ नन्दा आदि के भेद से तीन प्रकार की होती हैं। अर्थात् नन्दादि में तीन-तीन तिथियाँ होती हैं। जैसाकि प्रतिपदा नन्दा, द्वितीया भद्रा, तृतीया विजया, चतुर्थी रिक्ता, पञ्चमी पूर्णातिथि होती है। इसी प्रकार षष्ठी एवं एकादशी को

नन्दासंज्ञक समझना चाहिये।

नक्षत्रों में जो करणीय कार्य कहे गये हैं। इनके जो देवता हैं, वे जिस तिथि से सम्बन्धित हों, उसमें उन कार्यों को करना चाहिये। यथा-रोहिणी नक्षत्र में जो कार्य कहे गये हैं। उस नक्षत्र के देवता ब्रह्मा होते हैं। उस देवता से सम्बन्धित तिथि प्रतिपदा में वह कार्य करना चाहिये। इसी प्रकार अभिजित् नक्षत्र में जो कार्य कहा गया है। वह द्वितीयातिथि में, श्रवणनक्षत्र में जो कार्य कहा गया है वह तृतीया तिथि में, श्रवणनक्षत्र में जो कार्य कहा गया है वह तृतीयातिथि में, भरणी में जो कार्य कहा गया है वह चतुर्थी तिथि में, मृगशिरानक्षत्र में जो कार्य कहा गया है वह पञ्चमी तिथि में, कृत्तिका नक्षत्र में जो कार्य कहा गया है वह षष्ठी तिथि में, ज्येष्ठा नक्षत्र में जो कार्य कहा गया है वह सप्तमी तिथि में, हस्तनक्षत्र में जो कार्य कहा गया है वह द्वादशी में, पूर्वाफाल्गुनी नक्षत्र में जो कार्य कहा गया है वह त्रयोदशी तिथि में, आश्लेषानक्षत्र जो कार्य कहा गया है वह चतुर्दशी तिथि में, उत्तराषाढ़ नक्षत्र में जो कार्य कहा गया है वह चतुर्दशी तिथि में उत्तराषाढ़ नक्षत्र में जो कार्य कहा गया है वह पञ्चदशी (पूर्णिमा) तिथि में तथा मघा नक्षत्र में जो कार्य कहा गया है वह अमावस्या तिथि में करना चाहिए। जैसा कि आचार्य गर्ग ने कहा है–

ईषु अर्थात् दूसरे से द्वेष करने वाला, लुब्ध अर्थात् लोभग्रस्त, द्युतिमान, अर्थात् सुन्दर कान्ति वाला वचनपटु अर्थात् वार्तालाप में निपुण, झगड़ालू यह स्वभाव विशाखानक्षत्र में उत्पन्न जातक का होता है। जैसाकि आचार्य पराशर ने कहा है–

श्रीसम्पन्न, यज्ञकर्ता, बुद्धिमान, परोपकारी, धनी, मेधावी, स्वाभिमानी और

यशस्वी स्वभाव का विशाखानक्षत्र में उत्पन्नजातक होता है।

आढ्य अर्थात् धन-सम्पन्न, परदेश में निवास करने वाला क्षुधालु अर्थात् भूख से पीड़ित, अटन अर्थात् यायावर; इस प्रकार का स्वभाव अनुराधानक्षत्र में उत्पन्न जातक का होता है। जैसा कि आचार्य पराशर ने कहा है–

दृढ़ मित्रता वाला, तेजस्वी, सन्ततिवान, अत्यन्त सुखी, कुल में श्रेष्ठ और धनी; यह, स्वभाव अनुराधानक्षत्र में उत्पन्न जातक का होता है॥९॥

अथ ज्येष्ठामूलयोर्जातस्य स्वरूपमाह–

ज्येष्ठासु न बहुमित्रः सन्तुष्टो धर्मकृत् प्रचुरकोपः।
मूले मानी धनवान् सुखी न हिंस्रः स्थिरो भोगी॥१०॥

ज्येष्ठा और मूलनक्षत्र में उत्पन्न जातक का स्वभाव कहते हैं–

ज्येष्ठानक्षत्र में उत्पन्न जातक अधिक मित्रों से रहित, सन्तुष्ट, धर्म करने वाला और अधिक क्रोध करने वाला होता है। मूलनक्षत्र में उत्पन्न जातक मानी, धनवान सुखी, हिंसा कर्म से रहित, बुद्धि वाला तथा भोगी होता है॥१०॥

न बहुमित्रः स्वल्पसुहृत्। सन्तुष्टः सन्तोषशीलः। धर्मकृद्धर्मानुरतः। प्रचुरकोपः क्रोधशीलः। एवंविधो ज्येष्ठासु जातो भवति। तथा च पराशरः–

ज्ञातिषु गुणेषु राजसु पूजां प्राप्नोति नाशयति शत्रून्।
तेजोऽधिकोऽर्थभागी जातः स्यादिन्द्रदैवत्ये॥

मूले मानी धनवानिति। मानी गर्वितः। धनवान् वित्तवान्। सुखी सुखितः न हिंस्रोऽक्रूरः। स्थिर एकमतिः। भोगी भोगवान्। एवंविधो मूले जातो भवति। तथा च पराशरः–

धनधान्याढ्यो दाता परवित्तहरो नरः कलहशीलः।
क्रूरः परोपतापी मूले मूलोपजीवी च॥इति॥१०॥

अधिक मित्रों का अभाव, सन्तोष करने वाला, धार्मिक कार्यों में अनुरक्त, तथा प्रचुरकोप अर्थात् अधिक क्रोध करने वाला; यह स्वभाव ज्येष्ठा नक्षत्र में उत्पन्न जातक का होता है। जैसाकि आचार्य पराशर ने कहा है–

ज्येष्ठानक्षत्र में उत्पन्न जातक अपने कुल में तथा अपने गुणों के द्वारा राजाओं द्वारा पूजित होता है। शत्रुओं का संहार करता है। तेजस्वी तथा धनी होता है।

मूलनक्षत्र में उत्पन्न जातक अभिमानी और धनवान होता है। सुखी और अहिंसक, दृढ़ बुद्धिवाला तथा भोगी होता है। जैसा कि आचार्य पराशर ने कहा है–

---

१. मानी इति पाठान्तरम्।

मूलनक्षत्र में उत्पन्न जातक धन-धान्य से सम्पन्न, दयालु, पराये धन का अपहर्ता, कलहशील, क्रूर, दूसरों को कष्ट देने वाला, फल-मूल का सेवन करने वाला होता है॥१०॥

अथ पूर्वाषाढोत्तराषाढयोर्जातस्य स्वरूपमाह–

इष्टानन्दकल[1]त्रो वीरो दृढ़सौहृदश्च जलदेवे।
वैश्वे विनीतधार्मिकबहुमित्रकृतज्ञसुभगश्च॥११॥

पूर्वाषाढ़ तथा उत्तराषाढ़ नक्षत्र में उत्पन्न जातक का स्वभाव कहते हैं–

पूर्वाषाढ़ नक्षत्र में उत्पन्न जातक अपने अभीष्ट आनन्द को देने वाली स्त्री से युक्त, अभिमानी तथा घनिष्ठ मित्रों से युक्त होता है। उत्तराषाढ़ नक्षत्र में उत्पन्न जातक विशेष विनम्रस्वभाव वाला, धार्मिक, बहुत से मित्रों से युक्त, दूसरे द्वारा किये गये उपकार को मानने वाला तथा सबका प्रिय होता है॥११॥

इष्टं वल्लभं सानन्दं कलत्रं भार्या यस्य। वीरः सङ्ग्रामशूरः। केचिद् मानी गर्वीतीच्छन्ति। दृढसौहृदः स्थिरमित्रः। एवंविधो जलदेवे पूर्वाषाढायां जातो भवति। तथा च पराशर–

सलिलपथकर्मसिद्धः क्लेशसहिष्णुः परस्य दारेच्छुः।
नित्यमकल्पशरीरः प्रियमद्यः पूर्वषाढासु॥

वैश्वे विनीत इति। विनीतो विनयोपेतः। धार्मिको धर्मपरः। बहुमित्रः प्रभूतसुहृत्। कृतज्ञः प्रत्युपकारनिरतः। सुभगः सर्वजनप्रियः। एवविधो वैश्वे उत्तराषाढायां जातो भवति। तथा च पराशरः–

यानोद्यानवनरतिः प्रवाससुरतीर्थसाधुसेवी च।
बहुशिल्पार्थः प्रियवाग् जातः स्याद् वैश्वदेवे च॥११॥

इष्ट अर्थात् मनोनुकूल आनन्द को प्रदान करने वाली कलत्र अर्थात् पत्नीवाला, वीर अर्थात् युद्ध करने वाला; कतिपय आचार्य मानी अर्थात् अहंकारी कहते हैं। दृढ़ मित्रता वाला; इस प्रकार के स्वभाव का जातक पूर्वाषाढ़ नक्षत्र में उत्पन्न होता है। जैसाकि आचार्य पराशर ने कहा है–

जलयान कर्म में कुशल, दुःखों को सहने वाला, परस्त्रीगामी, निरोग शरीर वाला और मद्यपायी; यह स्वभाव पूर्वाषाढ़ नक्षत्र में उत्पन्न जातक का होता है।

वैश्व अर्थात् उत्तराषाढ़ नक्षत्र में उत्पन्न जातक विनम्र, धर्मपरायण, अनेक मित्रों वाला, कृतज्ञ अर्थात् परोपकार को मानने वाला तथा सुभग अर्थात् सर्वप्रिय होता है। जैसाकि आचार्य पराशर ने कहा है–

वाहन, उद्यान तथा वन में विचरण करने वाला, प्रवासी, देवता-तीर्थ एवं

साधुओं की सेवा करने वाला, विविध शिल्पों का ज्ञाता, मधुरभाषी; इस प्रकार के स्वभाव वाला जातक उत्तराषाढ़ में उत्पन्न होता है॥११॥

अथ श्रवणधनिष्ठयोर्जातस्य स्वरूपमाह–

श्रीमान् श्रवणे श्रुतवानुदारदारो धनान्वितः ख्यातः।
दाताऽऽढ्यशूरगीतप्रियो धनिष्ठासु धनलुब्धः॥१२॥

श्रवण तथा धनिष्ठा नक्षत्र में उत्पन्न जातक का स्वभाव कहते हैं–

श्रवणनक्षत्र में उत्पन्न जातक श्रीमान् पण्डित, उदार स्त्री से युत, धनी तथा विख्यात होता है। धनिष्ठा नक्षत्र में उत्पन्न जातक दानी, धनी, गीत-वाद्यादि का प्रेमी तथा लोभी होता है॥१२॥

श्रीमानीश्वरः श्रुतवाक् पण्डितः। उदारदार उदारेषु दारः। अथवोदारा दारा यस्य। उदारा दातारः। धनान्वितो धनसंयुक्तः। ख्यातः कीर्तियुक्तः। एवं श्रवणे जातो भवति। तथा च पराशरः–

ज्ञातिश्रेष्ठो धनवान् दानरुचिर्भवति दक्षिणो दक्षः।
नित्यमरोगशरीरः श्रवणे हतशत्रुपक्षश्च॥

दाताऽऽढ्यशूरेति। दाता दानशीलः। आढ्य ईश्वरः, शूरः सङ्ग्रामप्रियः, गीतप्रियो स्वरगीतरतिः। धनलुब्धा वित्तलोभाभिभूतः। एवंविधो धनिष्ठासु जातो भवति। तथा च पराशरः–

धनधान्यसञ्चयानामीशः स्यान्नृपतिसत्कृतो यज्वा।
अक्लेशभाग् जितरिपुः श्रविष्ठयाभीष्टतारश्च॥इति॥१२॥

श्रीमान् अर्थात् सम्पन्न, श्रुतवाक् अर्थात् वेद पण्डित, उदारदार अर्थात् स्त्रियों के प्रति दयालु अथवा जिसकी स्त्री उदार हो अथवा उदार होकर दान देने वाला, धनान्वित अर्थात् धन से सम्पन्न और विख्यात यशस्वी; इस प्रकार के लक्षणों वाला श्रवण नक्षत्र में उत्पन्न जातक होता है। जैसाकि आचार्य पराशर ने कहा है–

श्रवणनक्षत्र में उत्पन्न जातक कुल में श्रेष्ठ, धनी, दानी, दयालु, कुशल, निरोग और शत्रुदल का संहारक होता है।

दाता अर्थात् दान परायण, आढ्य अर्थात् धनी, शूर अर्थात् संग्रामप्रिय, गीतप्रिय अर्थात् शास्त्रीयस्वर-सन्धान का प्रेमी और धनका लोभी; इस प्रकार का स्वरूप धनिष्ठानक्षत्र में उत्पन्न जातक का होता है। जैसाकि आचार्य पराशर ने कहा है–

धनिष्ठा नक्षत्र में उत्पन्न जातक धन-धान्य का संग्रह करने में कुशल, राजा से सम्मानित, यज्ञकर्ता, सुखी और शत्रु पर विजय प्राप्त करने वाला और भाग्यवान्

होता है॥१२॥

अथ शतभिषक्पूर्वभद्रपदयोर्जातस्य स्वरूपमाह–

स्फुटवाग्व्यसनी रिपुहा साहसिकः शतभिषक्सु दुर्ग्राह्यः।
भद्रपदासूद्विग्नः स्त्रीजितधनपटुरदाता च॥१३॥

शतभिषा तथा पूर्वभाद्र पदनक्षत्र में उत्पन्न जातक का स्वरूप कहते हैं–

शतभिषानक्षत्र में उत्पन्न जातक स्पष्टवादी, अनेक व्यसनों में आसक्त, शत्रुओं का विनाशक, साहसी एवं कष्टपूर्वक किसी के वश में आने वाला होता है। पूर्वभाद्रपदनक्षत्र में उत्पन्न जातक दुःखी चित्तवाला,स्त्री के वशीभूत रहने वाला, धनी, पण्डित तथा कृपण होता है॥१३॥

स्फुटवाग् निष्ठुरभाषी। व्यसनी भूषणादिव्यसनोपेतः। रिपुहा शत्रुहर्ता। साहसिकः असमीक्षितवीर्यवान् दुर्ग्राह्यो दुराराध्यः। एवंविधः शतभिषक्सु जातो भवति। तथा च पराशरः–

परदारमद्यसेवी क्लेशसहो वारुणे नरो धीरः।
स्थिरसञ्चयः स्थिरसुहृद्भिषक्क्रियापण्डितो रोगी॥

भद्रपदास्विति। उद्विग्नो दुःखितः। स्त्रीजितधनः स्त्रिया जितं धनं यस्य स्त्रीभिर्वा। पटुः प्रवक्ता। अदाता च लुब्धः। एवंविधो भद्रपदासु जातो भवति। तथा च पराशरः–

दारुणकर्मा क्रोधी निशाचरस्तीक्ष्णविक्रमश्चपलः।
विषमः प्रसह्य हन्ता प्राक्प्रोष्ठपदे भवति जातः॥इति॥१३॥

स्फुटवाग् अर्थात् कठोर बोलने वाला, व्यसनी अर्थात् आभूषण वस्त्रादि का प्रेमी, शत्रुहन्ता, साहसी अर्थात् बिना विचारे शक्तिप्रयोग करने वाला, दुर्ग्राह्य अर्थात् कठिनाई से किसी की बात मानने वाला; इस प्रकार के लक्षणों वाला शतभिषा नक्षत्र में उत्पन्न जातक होता है। जैसाकि आचार्य पराशर ने कहा है–

शतभिषानक्षत्र में उत्पन्न जातक परदार अर्थात् दूसरे की स्त्री तथा मद्य अर्थात् सुरा का सेवन करने वाला, क्लेश को सहन करने वाला, धैर्यवान, स्थायी सम्पत्तिवाला, घनिष्ठ मित्रतावाला, आयुर्वेदशास्त्र का ज्ञाता तथा रोगी होता है।

पूर्वभाद्रपदनक्षत्र में उत्पन्न जातक उद्विग्न अर्थात् दुःखित, स्त्रीजितधन अर्थात् जिसका धन स्त्रियों के द्वारा जीत लिया जाता है, पटु अर्थात् प्रवक्ता, कृपण तथा लोभी स्वभाव का होता है। जैसाकि आचार्य पराशर ने कहा है–

भयंकर कर्मों को करने वाला, क्रोधी, रात्रि में विचरण करने वाला, क्रूर, पराक्रमी और चंचल, दुर्हन्ता; इस प्रकार का स्वभाव पूर्वभाद्रपद नक्षत्र में उत्पन्न जातक का होता है॥१३॥

अथोत्तरभद्रपदारेवत्योर्जातस्य स्वरूपमाह–

वक्ता सुखी प्रजावान् जितशत्रुर्धार्मिको द्वितीयासु।
सम्पूर्णाङ्गः सुभगः शूरः शुचिरर्थवान् पौष्णे।।१४।।

उत्तरभाद्रपद तथा रेवतीनक्षत्र में उत्पन्न जातक का स्वभाव कहते हैं–

उत्तरभाद्रपदानक्षत्र में उत्पन्न जातक वक्ता, सुखी, सन्ततिवान, शत्रुओं पर विजय प्राप्त करने वाला तथा धार्मिक होता है। रेवतीनक्षत्र में उत्पन्न जातक सम्पूर्ण अङ्गों से युक्त, सबका प्रिय, वीर, पवित्र तथा धनवान होता है।।१४।।

वक्ता सम्भाषणदक्षः। सुखी सुखभाक् प्रजावान् पुत्रपौत्रदौहितृसंयुक्तः। जितशत्रुर्जिताः शत्रवो रिपवो येन। धार्मिको धर्मरतः एवंविधो द्वितीयासूत्तरासु जातो भवति। तथा च पराशरः–

नृपसत्कृतो बहुसुतः प्रदानशीलो जले सततभीरुः।
ईज्याध्ययनरतिः स्यादाहिर्बुध्न्ये नरो जातः।।

सम्पूर्णाङ्ग इति सम्पूर्णाङ्गोऽविकलावयवः। सुभगः सौभाग्ययुक्तः। शूरः सङ्ग्रामप्रियः। शुचि; शौचयुक्तः परस्वाद्यलुब्धः। अर्थवान् धनोपेतः। एवंविधः पौष्णे रेवत्यां जातो भवति। तथा च पराशरः–

सर्वार्थभुक् प्रदाता प्रवासनिरतो विशुद्धकुलशीलः।
गोमाननल्पपुत्रः पौष्णे विद्वान् नरो जातः।।इति।[1]१४।।

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ नक्षत्रजातकं
नाम शततमोऽध्यायः।।१००।।

वक्ता अर्थात् वार्तालाप में निपुण, सुखी, प्रजावान अर्थात् पुत्र-पौत्र, दौहित्र आदि से युक्त जितशत्रु अर्थात् शत्रुओं को जीतने वाला तथा धार्मिक अर्थात् धर्मकार्य में निरत रहने वाला; इस प्रकार का स्वभाव उत्तरभाद्रपद नक्षत्र में उत्पन्न जातक का होता है। जैसाकि आचार्य पराशर ने कहा है–

राजाओं द्वारा सम्मानित, बहुत से पुत्रों वाला, दान देने वाला, सदैव भयभीत रहने वाला, यज्ञ करने वाला, अध्ययनशील; इस प्रकार का स्वभाव उत्तरभाद्रपद नक्षत्र में उत्पन्न जातक का होता है।

सम्पूर्णाङ्ग अर्थात् अविकल अवयवों वाला जिसके समस्त अङ्ग-प्रत्यंग पूर्ण हों), सुभग अर्थात् भाग्यवान, शूर अर्थात् युद्धप्रिय, शुचि अर्थात् पवित्रता से युक्त, दूसरे के धन का अलोभी, धनी; इस प्रकार का स्वभाव पौष्ण अर्थात् रेवती नक्षत्र में उत्पन्न जातक का होता है। जैसाकि आचार्य पराशर ने कहा है–

---

१. बृहज्जातकस्य १ अध्याये ४ श्लोकः।

सर्वार्थ भोगी, दानी, प्रवास करने वाला, श्रेष्ठ कुल एवं विचार का, गोपालक, अनेक सन्तानवाला और विद्वान्, रेवती नक्षत्र में उत्पन्न जातक होता है॥१४॥

श्रीभट्टोत्पल विरचित संहिताविवृति में नक्षत्रजातक नामक १००वें अध्याय की हिन्दी व्याख्या पूर्ण हुई॥१००॥

❑❑

अथ राशिविभागो व्याख्यायते १०१

तत्रादावेव मेषवृषयोर्नक्षत्रजातप्रविभागमाह–

अश्विन्योऽथ भरण्यो बहुलापादश्च कीर्त्यते मेषः।
वृषभो बहुलाशेषं रोहिण्योऽर्धं च मृगशिरसः॥१॥

राशिविभाग नामक १०१ अध्याय की हिन्दी व्याख्या की जाती है–

आरम्भ में मेष और वृष राशि के नक्षत्रों का विभाग बतलाते हैं–

अश्विनी के चार पाद, भरणी के चार पाद तथा कृत्तिका का आद्य पाद मेष राशि तथा कृत्तिका के शेष तीनपाद, रोहिणी के चार पाद तथा मृगशिरा नक्षत्र के प्रथम दो पाद वृषराशि हैं॥१॥

अश्विन्यः सकलाः पादचतुष्टयम्। अथशब्दश्चार्थे। भरण्यः सकला एव पादचतुष्टयम् बहुला कृत्तिका। तस्याश्चतुर्थमंशम्। एष मेष इति मेषराशिः कीर्त्यते कथ्यते। अत्र नक्षत्र चतुष्पादम्। पादमृक्षद्वयं राशिर्भवति। एवं नक्षत्र-नवपादाः प्रत्येकस्य राशेः प्रमाणम्। उक्तं च[1]–"मेषाश्विप्रथमा नवर्क्षचरणाश्चक्रस्थिता राशयः" इति। बहुलाशेषं कृत्तिकापादत्रयम्। रोहिणी सकला। अर्धं मृगशिरसो मृगशिरसः पादद्वयं वृषभो राशि; कीर्त्यते॥१॥

अश्विनीक्षत्र के सकल अर्थात् चारों पाद, यहाँ पर 'अथ' शब्द 'च' अर्थ में प्रयुक्त हुआ है। और भरणी के सकल अर्थात् चारों पाद, बहुला अर्थात् कृत्तिकानक्षत्र का चतुर्थ भाग अर्थात् प्रथमपाद; ये मेष राशि के मान कहे गये हैं। एक नक्षत्र के चार पाद होते हैं। दो नक्षत्रों और एक पाद की एक राशि होती है। इस प्रकार नक्षत्रों के नौ पाद (चरण) की एक राशि होती है। कहा गया है–अश्विनीनक्षत्र के प्रथम चरण से आरम्भकर नौ चरणों की मेषराशि होती है। शेष राशियाँ भी नौ-नौ चरणों की होती हैं। बहुला अर्थात् कृत्तिका नक्षत्र का अवशिष्ट तीन चरण सम्पूर्ण रोहिणी और मृगशिरा का पूर्वार्द्ध दो चरण मिलकर वृष राशि होती है॥१॥

---

१. बृहज्जातकस्य १ अध्याये ४ श्लोकः।

अथ मिथुनकर्कटयोर्नक्षत्रविभागमाह–

मृगशिरसोऽर्धं रौद्रं पुनर्वसोरंशकत्रयं मिथुनः।

पादश्च पुनर्वसुतस्तिष्यः श्लेषा च कर्कटकः।।२।।

मिथुन तथा कर्कराशि के नक्षत्रों का विभाग बतलाते हैं–

मृगशिरानक्षत्र के शेष दो चरण, आर्द्रा के चार चरण तथा पुनर्वसु के प्रथम तीन चरण मिथुन राशि तथा पुनर्वसु का शेष एक चरण, पुष्य के चार चरण तथा आश्लेषा के चार चरण कर्क राशि के होते हैं॥२॥

मृगशिरसोऽर्धं पादद्वयम्। रौद्रमार्द्रा सकला। पुनर्वसोरंशकत्रयम्। एष मिथुनराशिः। पादश्चेति। पुनर्वसुतः पुनर्वसोः पादः, तिष्यः सकलः। श्लेषा च सकला। एष कर्कटराशिः।।२।।

मृगशिरा नक्षत्र के उत्तरार्ध दो चरण, रौद्र अर्थात् आर्द्रानक्षत्र के सकल अर्थात् सम्पूर्ण चारों चरण तथा पुनर्वसु नक्षत्र के प्रथम तीन चरण; ये मिथुनराशि के नव चरण होते हैं। पुनर्वसु का अन्तिमचरण, तिष्य अर्थात् पुष्यनक्षत्र के चार चरण तथा आश्लेषनक्षत्र के चार चरण; ये कर्क राशि के कहे गये हैं॥२॥

सिंहकन्ययोर्नक्षत्रविभागमाह–

सिंहोऽथ मघा पूर्वा च फल्गुनीपाद उत्तरायाश्च।

तत्परिशेषं हस्तश्चित्राद्यर्धं च कन्याख्यः।।३।।

सिंह और कन्या राशि के नक्षत्रों का विभाग बतलाते हैं–

मघा के चार, पूर्वाफाल्गुनी के चार चरण तथा उत्तरफाल्गुनी का प्रथमचरण सिंह राशि का होता है। उत्तराफाल्गुनी के शेष तीन चरण, हस्त के चार चरण तथा चित्रानक्षत्र के पूर्वार्ध दो चरण कन्या राशि के होते हैं।।३।।

मघा सकला। पूर्वा च फल्गुनी सकला। उत्तरायाश्च पादः इति सिंहः। तत्परिशेषमिति। तदित्युत्तरायाः परामर्शः। तत्परिशेषमुत्तरापादत्रयम्। हस्तः सकलः। चित्राया अर्धं प्रथमं पादद्वयम्। इति कन्याराशिः॥३॥

मघानक्षत्र के चार चरण, पूर्वाफोल्गुनी के चार चरण तथा उत्तराफाल्गुनी का प्रथम चरण; ये सिंह राशि का तथा तद्शब्द से उत्तरानक्षत्र अवगम्य है। इसलिये तत्परिशेष का तात्पर्य है-

उत्तराफाल्गुनी के अवशिष्ट तीन चरण, हस्तनक्षत्र के चार चरण तथा चित्रा के प्रथम दो चरण; ये कन्या राशि के होते हैं॥३॥

अथ तुलावृश्चिकयोर्नक्षत्रविभागमाह–

तौलिनि चित्रान्त्यार्धं स्वातिः पादत्रयं विशाखायाः।

अलिनि विशाखापादस्तथानुराधान्विता ज्येष्ठा।।४।।

तुला तथा वृश्चिकराशि के नक्षत्रों का विभाग बतलाते हैं–

चित्रा के उत्तरार्ध के दो चरण, स्वाति के चार चरण तथा विशाखा के आद्य तीन चरण तुलाराशि के होते हैं। विशाखा का अन्तिम चरण, अनुराधा के चार चरण तथा ज्येष्ठानक्षत्र के चार चरण वृश्चिक राशि के हैं।।४।।

चित्राया अन्त्यमर्धं पश्चिमं पादद्वयम्। स्वातिः सकला। विशाखायाः पादत्रयम्। एतत्तौलिनि तुले स्थितम्। विशाखायाः पश्चिमः पादः। अनुराधा सकला। तथा तयान्विता संयुक्ता ज्येष्ठा सकलैव। एतदलिनि वृश्चिके।।४।।

चित्रा नक्षत्र के अन्त्यमर्ध अर्थात् उत्तरार्ध के दो चरण, स्वाति के चार चरण, विशाखा के तीन चरण; ये तुलाराशि के होते हैं। विशाखा नक्षत्र का अन्तिम चरण, अनुराधा के चारों चरण तथा ज्येष्ठा नक्षत्र के चारों चरण मिलकर वृश्चिक राशि होती है।।४।।

अथ धन्विमकरयोर्नक्षत्रविभागमाह–

मूलमषाढा पूर्वा प्रथमश्चाप्युत्तरांशको धन्वी।
मकरस्तत्परिषेशं श्रवणः पूर्वं धनिष्ठार्धम्।।५।।

धनु तथा मकराशि के नक्षत्रों का विभाग बतलाते हैं–

मूलनक्षत्र के चार चरण, पूर्वाषाढ़ के चार चरण तथा उत्तराषाढ का एक चरण धनुराशि का होता है। उत्तराषाढ़ के तीन चरण, श्रवण के चार चरण तथा धनिष्ठा के प्रथम दो चरण मकर राशि के होते हैं।।५।।

मूलं सकलम्। अषाढा पूर्वा सकलैव। उत्तरांशकः प्रथम आद्यपादः। एष धन्वी। मकरस्त्परिशेषमिति। तदित्युत्तरायाः परामर्शः। तत्परिशेषमुत्तरापादत्रयमन्त्यम्। श्रवणः सकलः। पूर्वं धनिष्ठार्धम्। धनिष्ठाया आद्यं पादद्वयम्। एष मकरः।।५।।

मूलनक्षत्र के चारों चरण, पूर्वाषाढा के चारों चरण तथा उत्तराषाढ़ा नक्षत्र का प्रथम अर्थात् आदि चरण; ये धनु राशि के हैं। तत्शब्द से उत्तराषाढनक्षत्र अभिप्रेत है। उसका शेष भाग अर्थात् उत्तराषाढ़ नक्षत्र के अन्तिम तीन चरण, श्रवण के चार चरण तथा धनिष्ठा के पूर्वार्ध दो चरण; ये मकर राशि के होते हैं।।५।।

अथ कुम्भमीनयोर्नक्षत्रविभागमाह–

कुम्भोऽन्त्यधनिष्ठार्धं शतभिषगंशत्रयं च पूर्वायाः।
भद्रपदायाः शेषं तथोत्तरा रेवती च झषः।।६।।

कुम्भ तथा मीनराशि के नक्षत्रों का विभाग बतलाते हैं–

धनिष्ठा के उत्तरार्ध के दो चरण, शतभिषा के चार चरण तथा पूर्वा भाद्रपद नक्षत्र के प्रथम तीन चरण कुम्भ राशि तथा पूर्वाभाद्रपद का अवशेष एक चरण

उत्तराभाद्रपद के चार चरण तथा रेवती के चार चरण मीन राशि के होते हैं॥६॥

धनिष्ठायामन्त्यमर्धं पश्चिमं पादद्वयम्। शतभिषक् सकला। पूर्वाया अंशत्रयमाद्यं पादत्रयम्। एषः कुम्भः। भद्रपदायाः शेषमिति। शेषमिति। भद्रपदायाः पूर्वभद्रपदायाः शेषमेकमंशम्। तथोत्तरा सकला। रेवती च सकलैव। एषः झषो मीन इति।।६।।

धनिष्ठानक्षत्र का उत्तरार्ध दो चरण, शतभिषा के चार चरण तथा पूर्व भाद्रपदनक्षत्र के आरम्भ के तीन चरण मिलकर कुम्भराशि होती है। भाद्रपदा का शेष अर्थात् पूर्वभाद्रपदनक्षत्र का अन्तिम चरण उत्तरभाद्रपद के चार चरण तथा रेवती नक्षत्र के चारों चरण मिलाकर मीन राशि होती है॥६॥

अथैतदेव संक्षेपेणाह–

अश्विनीपित्र्यमूलाद्या मेषसिंहहयादयः।
विषमर्क्षान्निवर्तन्ते पादवृद्ध्या यथोत्तरम्।।७।।

अब इसका संक्षिप्त सूत्र बतलाते हैं–

अश्विनी, मघा और मूल नक्षत्र के प्रथम चरण से आरम्भ होकर क्रमशः मेष, सिंह और धनुराशि प्रारम्भ होती है। तथा विषम नक्षत्र से एक-एक चरण वृद्धि करके समाप्त होती है॥७॥

मेषादयश्चत्वारः। सिंहादयश्चत्वारः। हयादयश्चत्वार एव। अश्विन्यादौ मेषस्यादि। पित्र्यादौ सिंहस्यादि। मूलादौ हयादि धनुषः प्रारम्भः। ते च यथोत्तरं पादवृद्ध्या स्थिताः। विषमर्क्षात् तृतीयपञ्चमसप्तमनवमनक्षत्राद्यथोत्तरं पादवर्धनेन स्थिताः। निवर्तन्ते निवृत्तिं यान्ति। यथा कृत्तिका गणनया अश्विन्यादितृतीयनक्षत्रम्। तत्प्रथमपादे मेषस्य निवृत्तिः समाप्तिः। मृगशिरो गणनया पञ्चमः। तत्पादद्वये वृषस्य निवृत्तिः। पुनर्वसुगर्णनया सप्तमः। तत्पादत्रये मिथुनस्य निवृत्तिः। श्लेषा गणनया नवमः। तत्पादचतुष्टये कर्कटस्य निवृत्तिः। एवं सिंहधनुषोर्योज्यमिति।।७।।

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ राशिविभागो नामैकशततमोऽध्यायः॥१०१॥

मेषादि चार, सिंहादि चार तथा धनु आदि चार' इन बारह राशियों में अश्विनी के प्रथम चरण से मेषराशि का आरम्भ होता है। मघानक्षत्र के प्रथमचरण से सिंहराशि का आरम्भ होता है। मूलनक्षत्र के प्रथम चरण से हय अर्थात् धनुराशि का आरम्भ होता है। ये सभी उत्तरोत्तर चरण वृद्धि के क्रम से होते हैं। विषम नक्षत्र अर्थात् ३,५,७,९ से उत्तरोत्तर एक-एक चरण की वृद्धि होती है। इस क्रम से इनकी निवृत्ति अर्थात् पूर्णता होती है। यथा–अश्विनीनक्षत्र से आरम्भकर गणना करने पर कृत्तिका तृतीयनक्षत्र है। कृत्तिका के प्रथम चरण में मेष राशि की निवृत्ति अर्थात् समाप्ति होती

है। क्रम गणना के अनुसार मृगशिरा पंचम नक्षत्र है। उसके दो चरण पर वृष राशि की समाप्ति होती है। अश्विन्यादि गणना क्रम में पुनर्वसु सप्तम नक्षत्र है। इसके तृतीय चरण पर मिथुन राशि की समाप्ति होती है। इसी क्रम गणना में श्लेषानक्षत्र नवम नक्षत्र है। इसके चतुर्थ चरण पर कर्कराशि की समाप्ति होती है। इसी विधि से सिंह और धनुषराशि के नक्षत्रों की भी योजना करनी चाहिये॥७॥

श्रीभट्टोत्पल विरचित संहिताविवृति में राशि विभाग नामक
१०१ वें अध्याय की हिन्दी व्याख्या पूर्ण हुई।

❑❑

अथ प्रसङ्गागतं विन्ध्यवासिकृतं विवाहपटलं व्याख्यायते—१०२

तत्रादावेव लग्नस्थितानां सर्वग्रहाणां फलान्याह—

मूर्तौ करोति दिनकृद्विधवां कुजश्च।
राहुर्विपन्नतनयां रविजो दरिद्राम्।
शुक्रः शशाङ्कतनयश्च गुरुश्च साध्वी-
मायुःक्षयं प्रकुरुतेऽथ विभावरीशः॥१॥

लग्न में स्थित सभी ग्रहों का फल बतलाते हैं—

यदि विवाहकालिक लग्न में सूर्य या मंगल बैठा तो विधवा, राहु हो तो मृतवत्सा, शनि हो तो दरिद्र; शुक्र, बुध अथवा गुरु बैठा हो, तो साध्वी तथा चन्द्रमा हो, तो नष्ट आयु वाली कन्या होती है॥१॥

दिनकृदादित्यो मूर्तौ वैवाहिके लग्ने स्थितो विधवां मृतभर्तृकां कन्यकां करोति। कुजोऽङ्गारकश्चशब्दाद्विधवामेव करोति। राहुः सैहिकेयो विपन्नतनयां मृतपुत्रां करोति। रविजो दरिद्रां निर्धनाम्। शुक्रो भार्गवः। शशाङ्कतनयो बुधः। गुरुश्च जीवः। एते साध्वीं सच्छीलां कुर्वन्ति। विभावरी रात्रिः, तस्या ईशश्चन्द्रः। आयुषो जीवितस्य क्षयं विनाशं प्रकुरुते॥१॥

दिनकृत् अर्थात् सूर्य विवाह कालिक लग्न में स्थित हो, तो कन्या विधवा, अर्थात् मृतपतिका होती है। कुज अर्थात् मंगल भी लग्नस्थ हो, तो विधवा बनाता है। लग्नस्थ राहु कन्या को मृतवत्सा बनाता है। रविज अर्थात् शनि के होने से निर्धनता रहती है। शुक्र, शशांकतनय अर्थात् बुध और गुरु; ये तीन ग्रह लग्नस्थ होकर, सुशीला बनाते हैं। विभावरी अर्थात् रात्रि उसका स्वामी (ईश) चन्द्रमा आयु का विनाश करता है॥१॥

अथ द्वितीयस्थानस्थितानां सर्वग्रहाणां फलान्याह—

कुर्वन्ति भास्करशनैश्चरराहुभौमा
दारिद्र्यदुःखमतुलं नियतं द्वितीये।
वित्तेश्वरीमविधवां गुरुशुक्रसौम्या
नारीं प्रभूततनयां कुरुते शशाङ्कः।।२।।

द्वितीय भाव में स्थित सभी ग्रहों का फल बतलाते हैं-

यदि विवाहकाल में लग्न से द्वितीय भाव में सूर्य, शनि, राहु या मंगल बैठा हो तो सदैव दारिद्र्य दुःख से युत; गुरु, शुक्र अथवा बुध हो तो धनवती, वैधव्यरहित तथा चन्द्रमा हो, तो अधिक सन्तान वाली स्त्री को करता है॥२॥

द्वितीये लग्नाद् द्वितीयस्थाने। भास्करः आदित्यः। शनैश्चरः सौरिः। राहुः सैहिकेयः। भौमोऽङ्गारकः। अतुलमक्षमं दारिद्र्यं दुःखं विगतधनेन क्लेशं नियतं सर्वकालं कुर्वन्ति। गुरुर्बृहस्पतिः। शुक्रः। सौम्यो बुधाः। वित्तेश्वरीं धनस्य स्वामिनीम् अविधवां जीवद्भर्त्तृकां च कुर्वन्ति। शशाङ्कश्चन्द्रः। नारीं कन्यां प्रभूततनयां बहुप्रजां कुरुते।।२।।

वैवाहिक लग्न के द्वितीयभाव में स्थित सूर्य, शनि, राहु और मंगल सदैव अत्यधिक दरिद्रताजन्य दुःख अर्थात् धनहीनता का क्लेश देता है। गुरु, शुक्र और बुध; ये धन की स्वामिनी और जीवितपतिका करते हैं। चन्द्रमा द्वितीय भाव का स्त्री को अधिक सन्ततिवती करता है॥२॥

अथ तृतीयस्थानस्थितानां सर्वग्रहाणां फलान्याह-

सूर्येन्दुभौमगुरुशुक्रबुधास्तृतीये
कुर्युः सदा बहुसुतां धनभागिनीं च।
व्यक्तां दिवाकरसुतः सुभगां करोति
मृत्युं ददाति नियमात् खलु सैहिकेयः।।३।।

तृतीयभाव में स्थित सभी ग्रहों का फल बतलाते हैं-

यदि विवाह काल में लग्न से तृतीय भाव में सूर्य, चन्द्र, मंगल, गुरु, शुक्र अथवा बुध हो तो अधिक सन्तानवाली और धन से युत होती है। शनि हो, तो कीर्ति से युत और सुभगा तथा राहु हो, तो निश्चय ही मृत्यु को पाने वाली स्त्री होती है॥३॥

तृतीये तृतीयस्थाने स्थिताः। सूर्य आदित्यः। इन्दुश्चन्द्रः। भौमोऽङ्गारकः। गुरुर्जीवः। शुक्रः। बुधः। एते सदा सर्वदा बहुसुतां प्रभूतपुत्राम्, धनभागिनीं च वित्तान्वितां कन्यकां कुर्युः। दिवाकरसुतः सौरिः। व्यक्तां कीर्तियुक्ताम्। सुभगां भर्तृवल्लभां च करोति। सैहिकेयो राहुः, नियमान्निश्चयान्मृत्युं मरणं ददाति खलुशब्दश्चार्थे वाक्यालङ्कारे वा।।३।।

तृतीय स्थान में स्थित सूर्य, चन्द्रमा, मंगल, गुरु, शुक्र और बुध; ये सदैवं अनेक सन्तानवान, धनवान बनाते हैं। दिवाकरसुत अर्थात् शनि व्यक्त अर्थात्

यशस्वी और पति का प्रिय बनाते हैं। सैहिकेय अर्थात् राहु निश्चय ही मृत्यु प्रदान करता है। यहाँ पर 'खलु' शब्द 'च' (और) अर्थ में अथवा वाक्यालंकार में प्रयुक्त है॥३॥

अथ चतुर्थस्थानस्थितानां सर्वग्रहाणां फलान्याह–

स्वल्पं पयः स्रवति सूर्यसुते चतुर्थे
दौर्भाग्यमुष्णकिरणः कुरुते शशी च।
राहुः सपत्नमपि च क्षितिजोऽल्पवित्तं
दद्याद्भृगुः सुरगुरुश्च बुधश्च सौख्यम्।।४।।

चतुर्थभाव में स्थित सभी ग्रहों का फल बतलाते हैं–

जिसके विवाह लग्न में चतुर्थ स्थान में शनि हो उसके स्तनों से बहुत थोड़ा दूध निकलता है। सूर्य या चन्द्र हो तो भाग्यरहित, राहु हो तो सौत (सौतिन) वाली, मंगल हो तो अल्प धनवाली तथा शुक्र, बृहस्पति या बुध हो तो सुख भोगने वाली स्त्री होती है॥४॥

अथ चतुर्थस्थाने। सूर्यसुते शनैश्चरे। स्वल्पं स्तोकम्। पयः क्षीरं स्रवति। उष्णकिरणः सूर्यो दौर्भाग्यं दुर्भगत्वं कुरुते। शशी च चन्द्रो दौर्भाग्यमेव कुरुते। राहुः सपत्नं शत्रुं करोति। सापत्न्यं करोतीत्यर्थः। क्षितिजोऽङ्गारकोऽल्पवित्तं स्वल्पधनं करोति। भृगुः शुक्रः। सुरगुरुर्जीवः। बुधश्च। सौख्यं दद्यात् ।।४।।

विवाह लग्न से चौथे भाव में स्थित सूर्यपुत्र अर्थात् शनि हो तो स्त्री के स्तनों से अत्यल्प दूध निकलता है। उष्णकिरण अर्थात् सूर्य स्थित हो तो भाग्यहीन बनाता है तथा शशि भाग्य हीन ही करता है। राहु सपत्न अर्थात् शत्रुता लाता है। अथवा सौतिन वाली बनाता है। मंगल अविस्थत हो तो अल्पधनवाली बनाता है। शुक्र, गुरु तथा बुध हो तो स्त्री सुख भोगने वाली होती है॥४॥

अथ पञ्चमस्थानस्थितानां सर्वग्रहणां फलान्याह–

नष्टात्मजां रविकुजौ खलु पञ्चमस्थे
चन्द्रात्मजो बहुसुतां गुरुभार्गवौ च।
राहुर्ददाति मरणं शनिरुग्ररोगं
कन्याविनाशमचिरात् कुरुते शशाङ्कः।।५।।

पञ्चमभभाव में स्थित सभी ग्रहों का फल बतलाते हैं–

जिसके विवाह में लग्न से पंचम स्थान में सूर्य हो या मंगल हो तो उसकी संतान मर जाती है। बुध, गुरु तथा शुक्र हो तो बहुत सन्तान, राहु हो तो मृत्यु, शनि हो तो कठोर रोग तथा चन्द्रमा हो तो शीघ्र कन्या का नाश करता है॥५॥

रविरादित्यः। कुजोऽङ्गारकः। एतौ पञ्चमस्थौ लग्नात् पञ्चमस्थाने स्थितौ नष्टात्मजां मृतापत्यां कन्यकां कुरुतः। खलुशब्द आगमद्योतनार्थः। चन्द्रात्मजो बुधो बहुसुतां प्रभूतपुत्रां करोति। गुरुर्बृहस्पतिः। भार्गवः शुक्रः। एतावपि चशब्दाद् बहुसुतामेव कुरुतः। राहुर्मरणं ददाति। शनिः सौरिः। उग्रं तीव्रं रोगं गदं ददाति। शशाङ्कश्चन्द्रोऽचिराच्छीघ्रमेव कन्याया विनाशं कुरुते करोति।।५।।

सूर्य और मंगल; ये दोनों लग्न से पञ्चम स्थान में हों तब स्त्री को मृतवत्सा बनाते हैं। यहाँ पर 'खलु' शब्द शास्त्रपरम्परा का द्योतक है। चन्द्रात्मज अर्थात् बुध प्रचुर सन्तान देता है। गुरु और शुक्र भी पर्याप्त सन्तान प्रदान करते हैं। राहु मृत्यु देता है, और शनि भयंकर व्याधि देता है। चन्द्रमा शीघ्र ही उस कन्या का विनाश करता है।।५।।

अथ षष्ठस्थितानां सर्वग्रहाणां फलान्याह-

षष्ठाश्रिताः शनिदिवाकरराहुजीवाः
कुर्युः कुजश्च सुभगां श्वसुरेषु भक्ताम्।
चन्द्रः करोति विधवामुशना दरिद्रा-
मृद्धां शशाङ्कतनयः कलहप्रियां च।।६।।

षष्ठभाव में स्थित सभी ग्रहों के फल बतलाते हैं-

विवाह काल में लग्न से षष्ठभाव में शनि, सूर्य, राहु, गुरु अथवा मंगल हो, तो श्वसुर की सेवा करने वाली, चन्द्र हो तो विधवा, शुक्र हो तो निर्धन तथा बुध हो तो धन से युत और कलह कारिणी स्त्री होती है।।६।।

शनिः सौरिः दिवाकर आदित्यः। राहुः सैहिकेयः। जीवो बृहस्पतिः। एते षष्ठाश्रिताः षष्ठस्थानस्थाः। कुजश्चाङ्गारकः षष्ठस्थानस्थ एव। सुभगां भर्तृवल्लभां श्वशुरेषु च भक्तां कन्यकां कुर्युः। चन्द्रः शशी विधवां मृतभर्तृकां करोति। उशनाः शुक्रो दरिद्रां निर्धनां करोति। शशाङ्कतनयो बुधः। ऋद्धां सधनां कलहप्रियां च करोति।।६।।

शनि, सूर्य, राहु और गुरु तथा मंगल; ये सभी विवाह लग्न से षष्ठभाव में स्थित हों, तो कन्या पतिप्रिया और ससुर की भक्त होती है। चन्द्रमा विधवा बनाता है। उशना अर्थात् शुक्र निर्धन करता है। चन्द्रमा का पुत्र बुध, धन-सम्पन्न और कलहकारिणी बनाता है।।६।।

अथ सप्तमस्थितानां सर्वग्रहाणां फलान्याह-

सौरारजीवबुधराहुरवीन्दुशुक्राः
कुर्युः प्रसह्य खलु सप्तमराशिसंस्थाः।

---

१. सुभगामिति पाठान्तरम्।

वैधव्यबन्धनवधक्षयमर्थनाश-
व्याधिप्रवासमरणानि यथाक्रमेण।।७।।

सप्तम भाव में स्थित सभी ग्रहों का फल बतलाते हैं-

विवाह काल में लग्न से सप्तम भाव में शनि, मंगल, गुरु, बुध, राहु, सूर्य, चन्द्र अथवा शुक्र हो तो क्रमशः विधवा, बन्धन, विनाश, धननाश, व्याधि, प्रवास, तथा मृत्यु करता है।।७।।

सौरादयः सप्तमस्थानस्था यथाक्रमं प्रसह्यात्यर्थं वैधव्यादीन् दोषान् कुर्वन्ति। तद्यथा—शनैश्चरः सप्तमे स्थितो वैधव्यं करोति। आरोऽङ्गारको बन्धनम्। जीवो बृहस्पतिर्वधं मरणम्। बुधः क्षयं विनाशं करोति। राहुरर्थनाशं वित्तक्षयम्। रविरादित्यो व्याधिम्। इन्दुश्चन्द्रः प्रवासं देशान्तरगमनम्। शुक्रो मरणम्। एवं सप्तमस्था यथाक्रमेण परिपाट्या कुर्युः। खलुशब्दोऽत्रागमद्योतनार्थः।।७।।

शनि आदि सभी ग्रह विवाह लग्न से सप्तम स्थान में स्थित होकर वैधव्य आदि दोषों को प्रसह्य अर्थात् प्रभूत रूप से क्रमशः करते हैं। यथा-सप्तमभाव में शनि स्थित होकर वैधव्य दोष उपस्थित करता है। आर अर्थात् मंगल बन्धन देता है। गुरु मृत्यु प्रदान करता है। बुध क्षय अर्थात् विनाश करता है। राहु धन का क्षय करता है। सूर्य रोग उत्पन्न करता है। चन्द्रमा प्रवास अर्थात् अन्य प्रदेशों में भ्रमण कराता है। तथा सप्तमस्थ शुक्र से मृत्यु होती है। इस प्रकार ये सभी ग्रह क्रमानुसार सप्तमस्थ होकर अपना फल देते हैं। यहाँ पर 'खलु' शब्द शास्त्रपरम्परा का द्योतक है।।७।।

अथाष्टमस्थितानां सर्वग्रहाणां फलान्याह-

स्थानेऽष्टमे गुरुबुधौ नियतं वियोगं
मृत्युं शशी भृगुसुतश्च तथैव राहुः।
सूर्यः करोत्यविधवां १ सरुजां महीजः
सूर्यात्मजो धनवतीं पतिवल्लभां च।।८।।

अष्टमभाव में स्थित सभी ग्रहों का फल बतलाते हैं-

विवाहकाल में लग्न से अष्टम भाव में गुरु या बुध हो तो पति से वियोग; चन्द्र, शुक्र या राहु हो तो मृत्यु, सूर्य हो तो सौभाग्यवती, मंगल हो तो रुग्णा तथा शनि हो तो धन से युत तथा पतिवल्लभा बनाता है।।८।।

गुरुर्जीवः। बुधश्च। एतौ लग्नादष्टमस्थानस्थितौ नियतं सर्वकालं निश्चितं वा वियोगं जायापत्योः कुरुतः। शशी चन्द्रो भृगुसुतः शुक्रश्च मृत्युं मरणं करोति। तथैव तेनैव प्रकारेण राहुर्मृत्युं करोति। सूर्य आदित्योऽविधवां जीवद्भर्तृकां करोति। महीजोऽङ्गारकः सरुजां पीडितदेहां करोति। केचित् सुभगां भर्तृवल्लभामिति पठन्ति। सूर्यात्मजः

सौरिः। धनवतीं वित्तान्विताम्। पतिवल्लभां भर्तृप्रियां च करोति।।८।।

गुरु और बुध; ये दोनों ग्रह विवाह लग्न से अष्टम स्थान में स्थित होकर अर्थात् सर्वदा के लिये अथवा कुछ नियत वर्षों के लिए पति-पत्नी में वियोग कराते हैं। शशि अर्थात् चन्द्रमा तथा भृगुपुत्र शुक्र मृत्यु कारक होता है। इसी प्रकार राहु भी मृत्यु देता है। सूर्य सौभाग्यवती अर्थात् जीवितपतिका बनाता है। महीज अर्थात् मंगल शरीर को रोग से पीड़ित करता है। कतिपय आचार्य सुभगा अर्थात् पति प्रिया बतलाते हैं। सूर्यपुत्र शनि कन्या को धन से परिपूर्ण और पतिवल्लभा बनाता है॥८॥

अथ नवमस्थानस्थितानां सर्वग्रहाणां फलान्याह–

धर्मे स्थिता भृगुदिवाकरभूमिपुत्रा
जीवश्च धर्मनिरतां शशिजस्त्वरोगाम्।
राहुश्च सूर्यतनयश्च करोति बन्ध्यां
कन्याप्रसूतिमटनां कुरुते शशाङ्कः।।९।।

नवमभाव में स्थित सभी ग्रहों का फल बतलाते हैं–

नवम स्थान में स्थित होकर सूर्य, मंगल और गुरु धर्मनिष्ठ बनाते हैं। बुध स्वस्थ रखथा है। राहु और शनि बन्ध्या बनाते हैं। चन्द्रमा कन्या सन्तति और भ्रमणशील बनाता है॥९॥

भृगुः शुक्रः। दिवाकर आदित्यः। भूमिपुत्रोऽङ्गारकः। जीवो बृहस्पतिश्च। एते सर्व एव धर्मे नवमस्थाने स्थिता धर्मनिरतां कन्यकां कुर्युः। शशिजो बुधः। अरोगां कल्याणीं करोति। राहुः सैंहिकेयः। सूर्यतनयः सौरिः। एतौ बन्ध्यामपुत्रां कुरुतः। शशाङ्कश्चन्द्रः कन्याप्रसूतिं कन्याजनयित्रीम्। अटनां भ्रमणशीलां च करोति।।९।।

भृगु अर्थात् शुक्र, भूमिपुत्र मंगल और गुरु धार्मिक कार्यों में तत्पर रखते हैं। शशिज अर्थात् बुध रोगरहित कल्याणी बनाता है। राहु और सूर्यपुत्र शनि; ये दोनों बन्ध्या अर्थात् पुत्रहीन बनाते हैं। शशांक अर्थात् चन्द्रमा से कन्या प्रसवित्री रहती है और वह भ्रमणशील भी रखता है॥९॥

अथ दशमस्थितानां सर्वग्रहाणां फलान्याह–

राहुर्नभःस्थलगतो विधवां करोति
पापे रतां दिनकरश्च शनैश्चरश्च।
मृत्युं कुजोऽर्थरहितां कुलटां च चन्द्रः
शेषा ग्रहा धनवतीं सुभगां च कुर्युः।।१०।।

दशमभाव में स्थित सभी ग्रहों का फल बतलाते हैं–

दशम स्थान में राहु के होने से कन्या विधवा होती है। सूर्य और शनि पापी

बनाते हैं। मंगल मृत्यु देता है। चन्द्रमा कुलटा एवं धनहीन बनाता है। शेष ग्रह धनवती और सौभाग्यवती बनाते हैं।।१०।।

नभ:स्थलं दशमस्थानम्। नभः स्थलगतो राहुर्विधवां मृतभर्तृकां करोति। दिनकर आदित्यः पापे रतां पापकर्मणि सक्तां करोति। शैनैश्चरः पापरतामेव। कुजोऽङ्गारको मृत्युं मरणं करोति। चन्द्रोऽर्थरहितां दरिद्रां कुलटां बन्धकीं च करोति। शेषा बुधबृहस्पतिशुक्रा धनवतीं वित्तान्वितां सुभगां भर्तृवल्लभां च कुर्युः।।१०।।

नभस्थल अर्थात् दशमस्थान, इसमें स्थित राहु विधवा अर्थात् मृतपतिका बनाता है। दिनकर अर्थात् सूर्य पापकर्म में आसक्त रखता है। शनि भी पापनिरत ही करता है। कुज अर्थात् मंगल मृत्यु (मरण) देता है। चन्द्रमा धनहीन और कुलटा (बन्धकी) बनाता है। शेष ग्रह बुध, गुरु और शुक्र दान से परिपूर्ण और सुभग अर्थात् पति की प्रियतमा बनाते हैं।।१०।।

अथैकादशस्थितानां सर्वग्रहाणां फलान्याह–

आये रविर्बहुसुतां सधनां शशाङ्कः
पुत्रान्वितां क्षितिसुतो रविजो धनाढ्याम्।
आयुष्मतीं सुरगुरुः शशिजः समृद्धां
राहुः करोत्यविधवां भृगुरर्थयुक्ताम्।।११।।

एकादश भाव में स्थित सभी ग्रहों का फल बतलाते हैं–

एकादश भाव में सूर्य अनेक सन्तति वाली, चन्द्रमा धनवती, मंगल पुत्रवती और शनि धनाढ्या बनाता है। गुरु आयुष्ययुक्ता, बुध धनसम्पन्ना, राहु जीवितपतिका और शुक्र धनवती बनाता है।।११।।

आये एकादशस्थाने रविरादित्यो बहुसुतां प्रभूतपुत्रां कन्यकां करोति। शशाङ्कश्चन्द्रः सधनां वित्तान्विताम्। क्षितिसुतोऽङ्गारकः पुत्रान्वितां सुतसंयुक्ताम्। रविजः सौरो धनाढ्यामीश्वरीम्। सुरुगुरर्जीव आयुष्मतीं चिरजीविनीम्। शशिजो बुधः समृद्धां सधनाम्। राहुरविधवां जीवद्भर्तृकाम्। भृगुः शुक्रोऽर्थयुक्तां सधनां करोति।।११।।

एकादश भाव में स्थित आदित्य अर्थात् सूर्य प्रचुर पुत्रयुक्ता बनाता है। शशांक अर्थात् चन्द्रमा सधना अर्थात् सम्पत्तियुक्त बनाता है। क्षितिसुत अर्थात् मंगल पुत्रसन्ततिवान बनाता है। रविज अर्थात् शनि धनाढ्य अर्थात् धनसम्पन्न, सुरुगुरु बृहस्पति आयुष्मती अर्थात् दीर्घायुषी बनाता है। शशिज अर्थात् बुध समृद्ध अर्थात् धनयुक्त बनाता है। राहु अविधवा अर्थात् जीवितपतिका और शुक्र अर्थयुक्ता अर्थात् धनवती बनाता है।।११।।

विशेष व्याख्या–(१) कुलटा = कुलस्य अटा, विविध कुलों में भ्रमण करने

वाली दुश्चरित्रा स्त्री। बन्धकी=पुंश्चल्या स्याच्च बन्धकी। बध्नाति मनोऽत्र। बन्ध बन्धने। इसके ८ पर्याय शब्द हैं–पुंश्चली चर्षणी बन्धक्यसती कुलटेत्वरी।

स्वैरिणी पांशुला च स्यात्–(अ. को. २/६/१०)

(२) सैंहिकेय=राहु। सिंहिकाया अपत्यम्। पर्याय शब्द हैं–

तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुन्तदः।

अमरकोश १/३/२६

अथ द्वादशस्थितानां सर्वग्रहाणां फलान्याह–

अन्ते गुरुर्धनवतीं दिनकृद्दरिद्रां
चन्द्रो धनव्ययकरीं कुलटां च राहुः।
साध्वीं भृगुः शशिसुतो बहुपुत्रपौत्रां
पानप्रसक्तहृदयां रविजः कुजश्च।।१२।।

द्वादशभाव में स्थित सभी ग्रहों का फल बतलाते हैं–

द्वादश स्थान में गुरु हो तो धनवती, सूर्य हो तो निर्धन, चन्द्रमा हो तो बहुत खर्च करने वाली, राहु हो तो कुलटा, शुक्र हो तो साध्वी, बुध हो तो बहुत पुत्रों वाली और शनि अथवा मंगल हो तो मद्य आदि पान करने वाली स्त्री होती है।।१२।।

अन्ते द्वादशस्थाने गुरुर्जीवो धनवतीं सधनां कन्यकां करोति। दिनकृदादित्यो दरिद्रां निर्धनाम्। चन्द्रः शशी धनव्ययकरीमर्थक्षयकरीम्। राहुः कुलटां बन्धकीम्। भृगुः शुक्रः साध्वीं सच्छीलाम्। शशिसुतो बुधो बहुपुत्रपौत्रां प्रभूतसुतां प्रभूतपौत्राम्। रविजः शनैश्चरः पानप्रसक्तहृदयां पाने प्रसक्तमनुरतं हृदयं यस्याः। कुजोऽङ्गारकश्चशब्दात् पानप्रसक्तहृदयामेव।।१२।।

अन्त में अर्थात् द्वादश स्थान में स्थित गुरु के होने पर कन्या धनवती होती है। दिनकृत् अर्थात् सूर्य दरिद्र बनाता है। चन्द्रमा धन का अपव्यय अर्थात् अधिक व्ययशीला बनाता है। राहु कुलटा अर्थात् चरित्रहीना (बन्धकी) बनाता है। शुक्र शीलवती, सदाचारिणी बनाता है। चन्द्रपुत्र बुध प्रचुर पुत्रों और पौत्रों से युक्त करता है। रविपुत्र शनि पानप्रसक्त हृदय अर्थात् मद्यपान में आसक्त चित्त बनाता है। कुज अर्थात् मंगल भी मदिरापान में आसक्त ही बनाता है।।१२।।

अथ गोधूलिप्रशंसार्थमाह–

गोपैर्यष्ट्याहतानां खुरपुटदलिता या तु धूलिर्दिनान्ते
सोद्वाहे सुन्दरीणां विपुलधनसुतारोग्यसौभाग्यकर्त्री।

---

१. अयमध्यायो वराहमिहिरकृतो न। अतोऽत्राध्यायसंख्या द्व्यधिकशततमतुल्या न समुचिता। सर्वपुस्तकेषूपलब्धत्वादस्माभिरुपन्यस्ता।

तस्मिन् काले न चर्क्षं न च तिथिकरणं नैव लग्नं न योगः
ख्यातः पुंसां सुखार्थं शमयति दुरितान्युत्थितं गोरजस्तु।।१३।।

गोधूलिवेला की प्रशंसा में कहते हैं–

दिनान्त (सायं सन्ध्या) में ग्वालों के द्वारा यष्टि से ताड़ित गायों के खुरों से खण्डित धूलि, सुन्दरियों (स्त्रियों) के विवाह में अत्यधिक धन, पुत्र, आरोग्य और सौभाग्य को करने वाली होती है। उस गोधूलि समय में नक्षत्र, तिथि, करण, लग्न और योग का कुछ भी विचार नहीं करना चाहिये। पुरुषों के सुख के लिये वह काल कहा गया है। यह गायों से उत्पन्न धूलि सब दुष्कृतों का नाश करने वाली होती है॥१३॥

अथ गोधूलिप्रशंसावशाद् गोपशब्दो व्यवह्रियते। गोपैर्गोपालकैर्यष्ट्या लगुडेनाहतानां ताडितानां गवां खुरपुटैः पादाग्रैर्या दलिता खण्डिता धूली रजो दिनान्ते सूर्यास्तमयकाले सा उद्वाहे विवाहे सुन्दरीणां विपुलं विस्तीर्णं धनं वित्तं सुतान् पुत्रानारोग्यमरोगत्वं सौभाग्यं भर्तृवाल्लभ्यं करोति। तस्मिन् सन्ध्यासमये न चर्क्षं नक्षत्रं, नच तिथिर्नन्दादिकाः, न करणं ववादि, नच योग आनन्दादिक उपयुज्यते। सुखार्थं पुंसां पुरुषाणां स कालः ख्यात उक्तः। उत्थितमुद्भूतं गोरजो गोधूलिर्दुरितानि दुष्कृतानि शमयत्युपशान्तिं नयति। तेन हेतुना न किञ्चित् तत्रोपयुज्यत इति।।१३।।

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ विन्ध्यवासिकृतं
[1]विवाहटलं नाम द्विशततमोऽध्यायः।।१०२।।

गोधूलिकाल की प्रशंसा के प्रसंग में यहाँ पर गोप शब्द का व्यवहार किया गया है। गोप अर्थात् गोपालक; इनकी यष्टि अर्थात् दण्ड (लगुड़) से प्रताड़ित होने पर गायों के पादाग्र खुरों के द्वारा खण्डित धूलि कण से युक्त जो दिनान्त अर्थात् सूर्यास्तकाल, उसको गोधूलिकाल कहा जाता है। इस काल में विवाह करने पर कन्याओं को प्रचुर धन, सन्तान, आरोग्य, सौभाग्य और पति का प्रेम प्राप्त होता है। इस शुभ सन्ध्याकाल में ऋक्ष अर्थात् नक्षत्र और नन्दादि तिथियाँ, ववादि करण और आनन्दादि योगों के विचार की आवश्यकता नहीं होती है। यह समय पुरुषों के सुख हेतु उपयुक्त होता है। गोचरण से उठी हुई धूल सभी प्रकार के अनिष्टों को दूर करती है। इस कारण यहाँ पर किसी नक्षत्रादि का प्रयोजन नहीं है॥१३॥

श्रीभट्टोत्पल विरचित संहिता विवृति में विन्ध्यावासीकृत विवाहपटल नामक १०२ अध्याय की हिन्दी व्याख्यापूर्ण हुई।

❑❑

अथ ग्रहगोचराध्यायो व्याख्यायते। १०३ तमोऽध्यायः।

तत्राचार्यः शिष्यजनवत्सलतया लाघवेन छन्दसां लक्षणमन्तर्भूतं करोति। तेषां च प्रस्तारविधौ गुरुलघुसंज्ञाविज्ञानेन विना न किञ्चिद् ज्ञायते। आचार्येण ग्रन्थविस्तरभयात् प्रसिद्धत्वाच्च लक्षणं नोक्तम्। तदस्माभिर्गुरुलघूनां लक्षणं प्रदर्श्यते। तथा-

मस्त्रिगुरुस्त्रिलघुश्च नकारो भादिगुरुश्च तथादिलघुर्यः।

जो गुरुमध्यगतो रलमध्यः सोऽन्तगुरुः कथितोऽन्तलघुस्तः॥

अत्र व्याख्या—मस्त्रिगुरुः, यत्र यत्र मकारग्रहणं भविष्यति तत्र तत्र त्रिगुरुः प्रस्तारः। नकारस्त्रिलघुः। भकार आदिगुरुः। आदौ गुरुरन्ते लघुद्वयम्। तथा यकार आदिलघुः आदौ लघुरन्ते गुरुद्वयम्। जो जकारो गुरुमध्यगतः मध्यगुरुराद्यन्तयोर्लघुद्वयम्। रलमध्यः, रेफो मध्यलघुराद्यन्तयोर्गुरुद्वयम्। सोन्तऽगुरुः, सकार आदौ लघुद्वयमन्ते गुरुः। तकारोऽन्तलघुः, आदौ तस्य गुरुद्वयमन्ते लघुरिति।

न्यासः-

म ऽऽऽ, न ।।।, भ ऽ।।, य ।ऽऽ, ज ।ऽ।, र ऽ।ऽ, स ।।ऽ, त ऽऽ। अत्राप्यपरेयं परिभाषा। अ, इ, उ, ऋ, ऌ- सामान्यव्यञ्जनानि कादीनि लघवस्ते चर्जवः प्रस्तार्याः। आ ई ऊ ॠ ॡ ए ऐ ओ औ अं अः। एते गुरवः कुटिलाश्च प्रस्तार्याः। पादान्ते स्थितो लघुरपि गुरुतां याति। वक्ष्यत्याचार्यः-

[1]प्रकृत्यापि लघुर्यश्च वृत्तबाह्ये व्यवस्थितः।

स याति गुरुतामिति।

यस्य वर्णस्य संयोगाक्षरः परः स गुरुर्भवति। प्रस्तारे गुरुर्लघुर्वाङ्गुष्ठपर्वप्रमाणः कार्यः।

ग्रहगोचर नामक १०३ अध्याय की हिन्दी व्याख्या

यहाँ पर आचार्य वराहमिहिर ने शिष्यों के कल्याणार्थ सरलतापूर्वक छन्दों के लक्षणों को अन्तर्निहित कर श्लोकों की संरचना की है। छन्दों का जब प्रस्तार किया जाता है, तब गुरुसंज्ञक एवं लघुसंज्ञक वर्णों के ज्ञान के बिना कुछ भी नहीं ज्ञात हो सकता। आचार्य वराहमिहिर ने ग्रन्थ के विस्तार के भय से तथा इन लक्षणों के प्रसिद्ध होने के कारण उनके विषय में नहीं कहा है। अतएव आचार्य भट्टोत्पल के द्वारा गुरु और लघु वर्णों के लक्षण प्रस्तुत किये जाते हैं। जैसा कि-

मगण में तीन गुरु होते हैं, तथा नगण में तीन लघु वर्ण होते हैं। भगण में आदि वर्ण गुरु तथा यगण में आद्यवर्ण लघु होता है। जगण में मध्य गुरु तथा रगण में मध्य लघु, सगण में अन्त्यगुरु तथा तगण में अन्त्य लघु होता है।

इसको व्याख्यायित करते हैं-मस्त्रिगुरु का तात्पर्य यह है कि जहाँ पर भी मगण

का ग्रहण किया जायेगा, वहाँ पर प्रस्तार में तीनों वर्ण गुरु होंगे। नकार अर्थात् नगण में तीन लघु, भगण में प्रथम गुरु अर्थात् आदि वर्ण गुरु तथा अन्त के दोनों वर्ण लघु होंगे। यकार में आदि लघु होता है। अर्थात् आदि में लघु तथा अन्त में दो वर्ण गुरु होते हैं। जकार (जगण) में गुरु वर्ण मध्यगत रहता है। अर्थात् मध्यवर्ण गुरु तथा आदि और अन्त के दोनों वर्ण लघु होते हैं। रगण में मध्यवर्ण लघु होता है अर्थात् रगण का मध्य वर्ण लघु तथा उसके आदि और अन्त्य के दोनों वर्ण गुरु होते हैं। सगण का अन्तिम गुरु होता है, अर्थात् सगण का आदि दो वर्ण लघु तथा अन्तिमवर्ण गुरु होता है। तगण का अन्तिम लघु होता है, अर्थात् आदि के दो वर्ण गुरु तथा अन्तिम वर्ण लघु होता है।

न्यास–

मगण ऽऽऽ, नगण ।।।, भगण ऽ।।, यगण ।ऽऽ, जगण ।ऽ।, रगण ऽ।ऽ, सगण ।।ऽ, तगण ऽऽ।; प्रयोग के लिये यह भी एक परिभाषा है। अ इ, उ, ऋ, ऌ ये स्वरवर्ण तथा ककारादि साधारण व्यञ्जनवर्ण लघु होते हैं। इनको ऋजु अर्थात् सरल सीधी रेखा से प्रदर्शित करना चाहिये। आ, ई, ऊ, ॠ, ॡ, ए, ऐ, ओ, औ, अं, अः; ये दीर्घस्वर गुरु वर्ण माने गये हैं। इनको कुटिल अर्थात् अवग्रह चिह्न ऽ से प्रदर्शित किया जाता है। पद के अन्त में स्थित लघु वर्ण भी गुरु वर्ण माना जाता है। जैसाकि आचार्य ने कहा है–

जो वर्ण स्वाभाविक लघु कहा गया है। वह भी वृत्त अर्थात् छन्द के अन्त में, बाह्य भाग में स्थित होकर गुरु वर्ण परिगणित होता है।

जिस वर्ण के बाद में संयुक्ताक्षर हो वह वर्ण गुरु होता है। प्रस्तार अर्थात् छन्द रचना को प्रदर्शित करने में गुरु अथवा लघु चिह्न (ऽ।) को अंगूठे के पर्व के तुल्य लम्बा बनाना चाहिये।

तत्रादावेव प्रयोजनप्रदर्शनार्थमाह–

प्रायेण सूत्रेण विनाकृतानि प्रकाशरन्ध्राणि चिरन्तनानि।
रत्नानि शास्त्राणि च योजितानि नवैर्गुणैर्भूषयितुं क्षमाणि।।१।।

बिना धागे में गूँथे हुये प्रकटित छिद्र वाले पुराने रत्न, नूतन धागे में योजित करने से प्रायः अलंकृत करने में समर्थ होते हैं। उसी प्रकार सूत्रों से वर्जित अर्थात् पद-बन्धों से रहित, दोष सम्प्राप्त पुरातन शास्त्र भी नवीन सूत्र (छन्दोबद्ध) से योजित होकर सुशोभित हो जाते हैं।।१।।

प्रायेण बाहुल्येन रत्नानि मणिविशेषाणि सूत्रेण विनाकृतानि वर्जितानि प्रकाशरन्ध्राणि प्रकटच्छिद्राणि चिरन्तनानि पुरातनानि च यानि, तानि नवैर्गुणैरभिनवैः सूत्रैर्योजितानि प्रोतानि, विभूषयितुमलङ्कर्तुं क्षमाणि योग्यानि भवन्ति। एवं शास्त्राणि सूत्रेण अक्षररचना-

वृत्तबन्धेन विनाकृतानि, वर्जितानि, प्रकाशरन्ध्राणि प्रकटदोषाणि, चिरन्तनानि पुरातनानि चिरन्तनत्वाद् जातापशब्दानि। अपशब्दत्वाच्च प्रकाशरन्ध्राणि तथाभूतानि च तानि नवैर्गुणैरभिनवैः सद्वस्तुभिर्द्रव्यवृत्तबन्धैर्योजितानि वचनस्थापितानि, भूषयितुं क्षमाणि योग्यानि भवन्ति, नान्यथेत्यर्थः।।१।।

प्रायेण अर्थात् अधिकतर रत्नविशेष सूत्र के बिना अर्थात् बिना गूँथे हुये प्रकाशरन्ध्र अर्थात् स्पष्ट छिद्र वाले, जो चिरन्तन अर्थात् प्राचीन होते हैं, वे नवीन गुणों अर्थात् नये धागों से गूँथे जाने पर विभूषित करने के योग्य अर्थात् अलंकृत करने के योग्य हो जाते हैं। इसी प्रकार शास्त्र भी अक्षररचना स्वरूप छन्दबद्धता के बिना सुस्पष्ट दोषों वाले प्राचीन (अपशब्दों से युक्त), अपशब्द के कारण प्रकटित दोषों वाले शास्त्र, नवीन गुणों अर्थात् शुद्ध विषय एवं नवीन छन्दरचना से युक्त होकर शोभा के योग्य हो जाते हैं, अन्यथा नहीं॥१॥

अधुना गोचरस्य कारणं मुखचपलार्ययाऽऽह–

प्रायेण गोचरो व्यवहार्योऽतस्तत्फलानि वक्ष्यामि।
नानावृत्तैरार्या मुखचपलत्वं क्षमध्वं नः।।२।।

अब गोचर के कारण को मुखचपला आर्याछन्द में कहते हैं–

बहुधा इस संसार में ग्रहगोचर का व्यवहार किया जाता है। इसलिए अनेक छन्दों के द्वारा उसके फलों को कहता हूँ। विद्वज्जन हमारे मुख चापल्य को क्षमा करें।।२।।

प्रायेण बाहुल्येन गोचरो ग्रहगोचरो व्यवहार्यो व्यवहरणाय शीलमस्य व्यवहार्यः। यः कश्चित् लोके ग्रहसंस्थां पृच्छति। अतोऽस्माद्धेतोस्तत्फलानि गोचरफलानि वक्ष्यामि कथयिष्यामि। नानावृत्तैर्विचित्रैर्वृत्तबन्धैः सम्पाद्य। आर्याः साधवः पण्डिता अस्माकं मुखचपलत्वं बहुभाषित्वं क्षमध्वं सहत–इत्यर्थः। आर्याणामग्रे मुखचपलत्वमयोग्यमतः क्षम्यतामिति। मुखचपलेयमार्या।।२।।

अस्या लक्षणं व्याख्यायते। तत्र चार्यालक्षणेन विना तस्या लक्षणमुपदेष्टुं न युज्यते, तस्मादार्यालक्षणं तावद् व्याख्यायते–

द्व्यान्तान्तरादिगुरुभिः सोदिधिलैः सप्तभिर्गणैर्गुरुणा।
आर्याधरं नात्रायुजि जः षष्ठोऽयं नलघुको वा॥

आर्या मात्राभिः परिमीयन्ते। पथ्यादीनामार्याणां त्रिंशन्मात्राः पूर्वमर्धं भवति। अपरं सप्तविंशतिः। चतुर्भिर्लघुभिर्गणो भवति। द्वौ गुरू यस्य द्विगुरुः। अन्तेऽवसाने गुरुर्यस्यासावन्तगुरुः। अन्तरगुरुर्मध्यगुरुः। आदौ गुरुर्यस्यासावादिगुरुः। तैर्गणैः। कीदृशैः? सोदधिलैः, उदधिसमसंख्याश्चत्वारो ला लघवो यस्य स उदधिलः, सह उदधिसंख्येन लेन गणेन वर्तन्ते इति सोदधिलाः। तैः सोदधिलैरुक्तविकल्पैः। चतुर्भिलघुभिरित्यर्थः।

एवमेष पञ्चविकल्पो गणस्तन्न्यास उक्त:-ऽऽ, ।।ऽ, ।ऽ।, ऽ।।, ।।।।, तै: सप्तभिर्गणैर्गुरुणा चाष्टमेनार्धगणेनार्याणां पथ्यादिकानां पूवमर्धं प्रथमदलं भवति। नात्रास्यामार्यायामयुजि प्रथमतृतीयपञ्चमसप्तमगणस्थानेषु जो गणश्च भवति। षष्ठोऽयं तु जकारो भवति। अथ वा षष्ठो गणो नलघुको यो नलघूं भजते जकाराभावात्। अन्यदप्याह-

ले लात् पदं द्वितीयात् प्रथमात् परकेऽथ विषमयुजि चरमे।
षष्ठो लोऽग्रेऽन्त्ये त्रिषु पादो भवति भवति तु पथ्या।।

ले सर्वलघौ षष्ठे गणे सति द्वितीयाल्लात् पदं कार्यम्। प्रथमात् परक इति। षष्ठात् परकै: सप्तमगणे सर्वलघौ प्रथमाल्लात् पदं कार्यम्। षष्ठस्थानान्ते यति: कार्येत्यर्थ:। अथ विषमयुजि चरमे। पश्चादर्धे विषमयुजि पञ्चमस्थानभाजि ले सति प्रथमाक्षरमारभ्य पदं विधेयम्। षष्ठो ल इति पश्चिमेऽर्धे षष्ठो गण एकलघुरेव कार्य:। अग्रेऽन्त्ये च त्रिषु गणेषु यदि पादो यतिर्भवेत् तदा पथ्यानाम्न्यार्या भवतीत्यार्याद्वयस्यार्थ:। द्वयान्तान्तरादिगुरुभिरित्यस्य न्यास:। ले लात् पदमित्यस्य पथ्याया न्यासश्च प्रसिद्ध:।

।।।।	।।।।	ऽऽ	ऽऽ	ऽऽ	ऽऽ	।।ऽ	।।ऽ
ऽऽ	ऽऽ	ऽऽ	।।।।	ऽऽ	ऽऽ	।ऽ।	ऽऽ
।।ऽ	।।ऽ	ऽ।।	ऽ।।	ऽऽ	ऽऽ	ऽऽ	ऽऽ
।ऽ।	ऽऽ	ऽऽ	।।ऽ	।।ऽ	।।।।	।।।।	।ऽ।
ऽऽ	ऽऽ	ऽऽ	।।ऽ	ऽऽ	ऽऽ	ऽऽ	ऽऽ
।ऽ।	।।।।	।।।।	।।।।	।ऽ।	।।।।	।।।।	।ऽ।
।।ऽ	ऽ।।	।।ऽ	।।।।	।।ऽ	ऽ।।	ऽऽ	ऽऽ
ऽ	ऽ।	ऽ	ऽ	ऽ	ऽ	ऽ	ऽ

एवमादय:।

अथविपुलाचपलयोर्लक्षणम्-

विपुला तु याऽन्यथा पादभाग् जकारौ द्वितीयकचतुर्थौ।
गुरुमध्यगौ भवेतां भवेत् तदा सर्वतश्चपला।।

पथ्यातो याऽन्यथा पादं भजते त्रिषु गणेषु यस्या यतिर्नास्तीत्यर्थ:, सा विपुला, यत्र तु जकारौ मध्यगुरुगणौ द्वितयीकचतुर्थौ द्वितीयस्थाने चतुर्थे च स्थिथौ तौ च गुरुमध्यगौ गुर्वोर्मध्यगौ भवेतां स्याताम्। सर्वतोऽर्धद्वयेऽपि तदा चपला भवति।

न्यास:-

	ज		ज				
।।ऽ	।ऽ।	ऽऽ	।ऽ।	ऽऽ	।ऽ।	ऽऽ	ऽ
	ज		ज				
ऽऽ	।ऽ।	ऽऽ	।ऽ।	ऽऽ	।	ऽऽ	ऽ

अथ मुखचपलाया लक्षणम्–

अर्धे यदग्रिमे लक्षणं भवेत् केवले तु चपलायाः।
मुखचपलाऽसौ गदिता शेषे पूर्वोक्तलक्षणिका।।

चपलाया अग्रिमे प्रथमेऽर्धे केवले च एकस्मिन्नेव लक्षणमुक्तं जकारौ द्वितीयकचतुर्थकौ गुरुमध्यगौ भवेतामित्यर्थः। तथाभूतं प्रथमे यदि भवेत् स्यात् शेषे पश्चिमे त्वर्धे पूर्वोक्तलक्षणिका पूर्वोक्तं सामान्यार्यालक्षणं भवति। तदाऽसावार्या मुखचपला गदितोक्ता। न्यासः प्रसिद्धः। एवमियं मुखचपलार्येति।

प्रायः अर्थात् अधिकांशतः ग्रहगोचर का व्यवहार होता है। लोक में कोई भी ग्रहों की स्थिति के सम्बन्ध में प्रश्न करता है। इसलिए ग्रहगोचर के फलों को यहाँ पर कहा जायेगा। यह अनेक प्रकार के वृत्त अर्थात् छन्दोबन्ध के माध्यम से कहा जायेगा। आर्य अर्थात् सज्जन पण्डितगण मेरी चपलता को अर्थात् बहुभाषिता को क्षमा करेंगे। श्रेष्ठ विद्वानों के सामने वाणी की चपलता उचित नहीं होती है, इसलिये विद्वज्जन क्षमा करें। यह श्लोक मुखचपला आर्याछन्द में निबद्ध है।।२।।

इसका लक्षण बतलाते हैं। आर्याछन्द के लक्षण को उपस्थित किये बिना उसके सम्बन्ध में उपदेश करना उचित नहीं है। इसलिये आर्याछन्द के लक्षण को कहा जा रहा है–

दो गुरु (ऽऽ), अन्त्य गुरु (।।ऽ), अन्तरगुरु (।ऽ।) और आदि (ऽ।।) गुरु के अनन्तर चार लघु गण (।।।।); इस प्रकार से सात गणों के साथ अष्टम गुरु संहित आर्याछन्द का प्रथम अर्धपाद बनता है। इसके अयुज (विषम) पाद (१,३,५,७) में जगण (।ऽ।) नहीं होता है।

आर्या छन्द में मात्राओं की गणना की जाती है। पथ्यादि आर्या के पूर्वार्ध में तीस मात्रा तथा उत्तरार्ध में सत्ताइस मात्रा होती है। चार लघु मात्रा का एक गण होता है। दो गुरु मात्रा को द्विगुरु कहा जाता है। अन्त में गुरु होने पर अन्तगुरु कहा जाता है। दो मात्राओं के मध्य में स्थित गुरु को मध्यगुरु कहते हैं। आदि में गुरु होने पर आदिगुरु होता है। ये गण किस प्रकार के होते हैं? सोदधिला अर्थात् उदधि (सागर), तुल्य संख्या ४ लघु जिसमें होते हैं, उस गण को सोदधिला कहा गया है। इन सोदधिलगण अर्थात् ४ लघु मात्राओं का यह गण होता है। इस प्रकार पाँच प्रकार के गणों से यह छन्द बनता है। इसका न्यास इस प्रकार है- ऽऽ, ।।ऽ, ।ऽ।, ऽ।।, ।।।।, इस प्रकार सात गुरु गणों से तथा आठवें अर्ध गण (लघु) द्वारा पथ्यादि आर्या का प्रथमार्ध होता है। इस आर्याछन्द में विषम अर्थात् १, ३, ५, ७ गणों में जगण नहीं होता है। षष्ठगण में जगण रहता है। अथवा न लघुक अर्थात् जगण के अभाव में लघु नहीं होता है। और भी कहते हैं–

षष्ठ लघु होने पर द्वितीय लघु से पद करना चाहिए। षष्ठ के पश्चात् सप्तम गण में सभी लघु होने पर प्रथम लघु से पद करें। विषम पद पञ्चम स्थान में लघु होने पर प्रथमाक्षर से आरम्भकर पद करें। षष्ठभाग में एक लघु करें। इसके अनन्तर और अन्त के तीन में यदि पाद (यति) हो तब वह पथ्या-आर्याछन्द होता है।

ले अर्थात् षष्ठ गण में सम्पूर्ण लघु होने पर द्वितीय लघु से पद करना चाहिये। अर्थात् प्रथम लघु के पश्चात्। षष्ठ के अनन्तर सप्तम गण में सम्पूर्ण लघु होने पर प्रथम लघु से पद बनाना चाहिये। अभिप्राय यह है कि षष्ठ स्थान के अन्त में यति (विराम) होती है। विषम पद अर्थात् उत्तरार्ध के पञ्चम स्थान में लघु होने पर प्रथमाक्षर से प्रारम्भकर पद निर्मित होता है। षष्ठ 'ल' अर्थात् लघु रखना चाहिये। अन्तिम तीन गणों में यदि पाद और यति हो तब पथ्यासंज्ञक आर्या होती है। दो, अन्त, अन्तर, तथा आदि गुरु से सम्बन्धित, सूत्र का न्यास प्रदर्शित किया जा रहा है। 'ले लातपद' इस सूत्र में पथ्या आर्या का न्यास प्रसिद्ध है।

विशेष व्याख्या–विवृति मे स्थापित न्यास द्रष्टव्य है कुल आठ कोष्ठकों में ऊपर से नीचे की ओर विभिन्न क्रम में मात्राओं का न्यास किया गया है। प्रत्येक कोष्ठक में ३० मात्राएँ हैं। इनकी गणना का उदाहरण प्रस्तुत है–

।।।।	ऽऽ	।।ऽ	।ऽ।	ऽऽ	।ऽ।	।।ऽ	ऽ	मात्रा चिह्न
४	४	४	४	४	४	४	२	मात्रा संख्या

एक ऋजु रेखा (।) लघु (ह्रस्व) मात्रा कहलाती है। जो कि एक मात्रा का द्योतक है। अवग्रह सदृश कुटिल आकृति (ऽ) गुरु (दीर्घ) मात्रा कही जाती है। दीर्घ में दो मात्रा होती है। इस विधि से न्यास के प्रत्येक कोष्टक में ३० मात्रा होती है।

विपुला और चपला आर्या का लक्षण कहते हैं–

जिस आर्या में पथ्या छन्द से भिन्न पद हो उसको विपुला आर्या कहा जाता है। जिस आर्या के द्वितीय और चतुर्थ स्थान में जगण हो और इन दोनों जगण के मध्य में दो गुरु हों; उसको चपला आर्या कहा जाता है।

पथ्या छन्द से भिन्न स्वरूप में जिस आर्या का पाद बनता है। अर्थात् तीन गणों के अन्त में यति न हो उसको विपुला आर्या कहा जाता है। जिस आर्या के द्वितीय और चतुर्थ स्थान में जगण स्थित हो तथा इनके मध्य में दो गुरु हों तो चपला आर्या होती है। इस आर्या के प्रथमार्ध तथा उत्तरार्ध में ये लक्षण घटित होते हैं।

२. विशेष-व्याख्या–

छन्दोमञ्जरी में विपुला का लक्षण है–

"संलघ्य गणत्रयमादिमं शकलयोर्द्वयोर्भवति पादः।

यस्यास्तां पिङ्गलनागा विपुलमिति समाख्याति।।"

द्वयोः शकलयोरुभयोरपि अर्धयोः आदिमं प्राग्भवे गणत्रयं संलघ्य विहाय पादो भवति।

न्यास–ऽऽ ऽऽ ।।ऽ, इसमें ४-४ मात्रा के तीन गण हैं।

चपला–"दलयोर्द्वितीयतुर्यौ गणौ जकारौ तु यत्र चपला सा।"

दलयोः द्वयोरप्यर्धयोः द्वितीयचतुर्थौ गणौ जकारौ जगणौ स्याताम्।

न्यासः–द्वितीय-।ऽ।, चतुर्थ ।ऽ।

मुखचपलाआर्या का लक्षण कहते हैं–

जिस आर्या का प्रथम अर्धभाग 'चपला आर्या' के समान हो और दूसरा सामान्य 'आर्या' के समान हो, उसे मुखचपला आर्या कहते हैं।

चपला आर्या के अग्रिम अर्थात् प्रथमार्ध का जो लक्षण कहा गया है–द्वितीय और चतुर्थ में जगण हों तथा दोनों जगण के मध्य में दो गुरु हों; इस प्रकार प्रथम प्रथमार्ध हो। शेष उत्तरार्ध में पूर्वोक्त लक्षण वाली सामान्य आर्या का लक्षण होता है। इस प्रकार आचार्य ने मुखचपला का लक्षण कहा है। इस मुखचपला आर्या के लक्षण का न्यास प्रसिद्ध है।

अथात्मनो नम्रतां प्रदर्शयंस्तद्द्वारेण च जघनचपलार्यामाह–

माण्डव्यगिरं श्रुत्वा न मदीया रोचतेऽथवा नैवम्।
साध्वी तथा न पुंसां प्रिया यथा स्याज्जघनचपला।।३।।

अपनी नम्रता को प्रदर्शित करते हुये जघनचपला आर्या छन्द में कहते हैं–

जिन्होंने माण्डव्य आचार्य की वाणी सुनी है, उनको मेरी वाणी अच्छी नहीं लगेगी। अथवा इस तरह कहना भी उचित नहीं है। क्योंकि अपनी साध्वी स्त्री उस प्रकार पुरुषों को प्रिय नहीं लगती जिस प्रकार जघनचपला (असाध्वी=वेश्या) प्रिय होती है।।३।।

माण्डव्यस्य संबन्धिनीं गिरं वाचं श्रुत्वाऽऽकर्ण्य मदीया वाग् न रोचते, न प्रतिभाति विदुषाम्। तथा च माण्डव्यः–

सर्वेऽप्याकाशवासाः स्फटिकविसलताशङ्खकार्पासभासा-
स्ते लग्नं वर्द्धयन्तो नरपतितिलकं तं समुत्पादयन्ति।
यत्सेनोत्तालवाजिव्रजखुरजरजोव्याप्तमालोक्य विम्बं
मुच्यन्ते प्रेयसीभिर्दुरनुभवनिशाशङ्कया चक्रवाकाः।।
कौपैरन्यत्र मुक्ताविचकिलधवलो रोहिणीप्राणनाथः

सर्वैः संवीक्ष्यमाणः खवलयनिलयैस्तं समुत्पादयेद्धि।
नीतं यस्य प्रगाढैर्घनमलिनमपि श्वेतिमानं यशोभि-
र्विभ्राणा शम्भुशङ्कां मधुमथनमहो मन्दमालिङ्गति श्रीः।।इति।।

अथ नैव मदीयैवं वाग्रोचते। पुंसां पुरुषाणां साध्वी सच्छीला स्वस्त्री प्रिया प्रियालापा न भवति, यथा जघनचपला असाध्वी वेश्या प्रिया। अनेनाभिप्रायेण मदीया नीरसापि रोचत एव। इयमार्या जघनचपला। तल्लक्षणम्–

पूर्वार्धं पूर्वसमं चपलाया लक्षणं निरवेशषम्।
पाश्चात्त्यमर्धमाश्रित्य वर्तते जघनचपला सा।।

अत्र व्याख्या–यत्र पूर्वार्धं पूर्वसमं सामान्यार्यार्धतुल्यं द्व्यान्तान्तरादिगुरुभिरित्या-दिलक्षणोपेतं प्रथमदलं पाश्चात्त्यं पुनर्द्वितीयमर्धं चपलाया संबन्धि लक्षणं निरवशेषं सकलमाश्रित्य संगृह्य वर्तते तिष्ठति। जकारौ द्वौ द्वितीयकचतुर्थौ गुरुमध्यगौ भवेतामिति। जघनचपला सा। सा जघनचपलार्या। न्यासः प्रसिद्धः।।३।।

माण्डव्य आचार्य द्वारा कथित वाणी को सुनकर मेरा कथन विद्वानों को रुचिकर नहीं लगेगा। जैसा कि आचार्य माण्डव्य ने कहा है–

सर्वव्यापी आकाश का वसन, स्फटिक मणि, कमलनाल से उत्पन्न तन्तु, शंख और कपास, इनकी कान्ति के सदृश राजा के मस्तक पर सुशोभित तिलक निर्मलता को उत्पन्न कर रहा है। जिसकी सेना के उन्मत्त अश्वों की गति से खुर के द्वारा उत्पन्न धूलिकणों से आकाश व्याप्त हो रहा है। जिसको देखकर रात्रि की आशंका से प्रेमिकाओं द्वारा चक्रवाल दूर कर दिये जाते हैं। वृश्चिकराशि से भिन्न राशि में रोहिणीपति चन्द्रमा मोती के समान उज्ज्वल हो जाता है। आकाशमण्डल में स्थित उस चन्द्रमा को देखने वाले सभी लोगों में उज्ज्वलता उत्पन्न हो जाती है। सघन मेघों से जिसमें मलिनता आ जाती है तथापि आपके (राजा के) यश की उज्ज्वलता और भी अधिक धवलित हो रही है। इस उज्ज्वलता को देखकर भगवान शिव के प्रकट होने की आशंका से भीत होकर भगवती लक्ष्मी भगवान विष्णु का शिथिल आलिंगन करने लगती है।

यहाँ पर मेरी वाणी रुचिकर नहीं होगी। क्योंकि पुरुषों को साध्वी अर्थात् शीलवती अपनी स्त्री प्रिय नहीं होती है, जैसी कि जघनचपला अर्थात् असाध्वी वेश्यास्त्री होती है। इस अभिप्राय से मेरी नीरसवाणी भी सज्जनों को रुचिकर लगेगी। यह जघनचपला नामक आर्या छन्द है। इसका लक्षण इस प्रकार कहा गया है–

जो प्रथमार्ध में 'आर्या' के सदृश तथा द्वितीयार्ध में 'चपला' के समान हो उसको जघनचपला आर्या कहते हैं।

इसकी व्याख्या करते हैं-जिसका पूर्वार्ध पूर्व के सदृश अर्थात् सामान्य आर्या के अर्ध तुल्य द्वयान्तरादि लक्षणों से युक्त हो और पाश्चात्य अर्थात् द्वितीयार्ध चपला सम्बन्धी पूर्ण लक्षणों से निर्मित हो अर्थात् द्वितीय, चतुर्थ के मध्य में दो गुरु हों; उसको जघनचपलाआर्या समझना चाहिये। इस जघन-चपलाआर्या का न्यास सर्वविदित (प्रसिद्ध) है।।३।।

विशेष व्याख्या–(१) कौर्पि वृश्चिक राशि और अष्टम का पर्याय है। अल्पमष्टमं वृश्चिककौर्पि कीटाः-जातकपारिजात १/६

२. विचकिल = चमेली, मदनवृक्ष, आप्टेकोश। मदन = धतूरा, अ.को २/४/७८.

कनकं हेम्नि पुंसि स्यात् किंशुके नागकेसरे।

धत्तूरे काञ्चनारे च कालीये चाम्पकेऽपि च (इति मेदिनी)।।

अधुना शार्दूलविक्रीडितेन सर्वग्रहाणां गोचरफलं संक्षेपेण दर्शयन्नाह–

सूर्यः षट्त्रिदशस्थितस्त्रिदशषट्सप्ताद्यगश्चन्द्रमा
जीवः सप्तनवद्विपञ्चमगतो वक्रार्कजौ षट्त्रिगौ।
सौम्यः षड्द्विचतुर्दशाष्टमगतः सूर्योऽप्युपान्ते शुभाः
शुक्रः सप्तमषड्दशर्क्षसहितः शार्दूलवत् त्रासकृत्।।४।।

सभी ग्रहों का संक्षिप्त गोचरफल शार्दूल विक्रीडितछन्द में प्रदर्शित करते हैं–

जन्म राशि से छठीं, तीसरी या दशवीं राशि में सूर्य; तीसरी, दशवीं, छठी, सातवीं या पहली राशि में चन्द्रमा; सातवीं, नववीं, दूसरी अथवा पाँचवी राशि में गुरु; छठवीं या तीसरी राशि में मंगल और शनि; छठवीं, दूसरी, चौथी दशवीं या आठवीं राशि में बुध तथा ग्यारहवीं राशि में सभी ग्रह शुभ होते हैं। सातवीं, छठी और दशवीं राशि में स्थित शुक्र सिंह की तरह भयदायक होता है। यह शार्दूलविक्रीडितछन्द में विरचित पद है।।४।।

सूर्य आदित्यः। षट् त्रिदशस्थितः, यस्य जन्मराशेः षष्ठतृतीयदशमस्थो गोचरेण शुभः। अर्थादेव परिशेषस्थानेष्वशुभः। त्रिदशषट् सप्ताद्यगश्चन्द्रमाः, चन्द्रमास्तृतीयस्थाने दशमे, षष्ठे, सप्तमे, आद्ये जन्मनि, च गतः स्थितः शुभः। शेषेष्वशोभनः। जीवः सप्तनवद्विपञ्चमगतः, जीवो बृहस्पतिः सप्तमे स्थाने नवमे द्वितीये पञ्चमे च गतः प्राप्तः शुभः। शेषेष्वशुभः। वक्रार्कजौ षट्त्रिगौ, वक्रोऽङ्गारकः। अर्कजः शनैश्चरः। एतौ षट्त्रिगौ षष्ठतृतीयस्थानप्राप्तौ शुभौ। अन्यस्थानेष्वशुभाविति। सौम्यः षड्द्विचतुर्दश-शाष्टमगतः, सौम्यो बुधः, षष्ठद्वितीयचतुर्थदशमाष्टमस्थानगतः शुभः। शेषेष्वशुभः। सर्वेऽप्युपान्ते शुभाः। अन्त्यस्य द्वादशस्य समीपमुपान्त्यमेकादशस्थानम्। तत्राप्युपान्ते सर्व एव सूर्यादयः शुभाः। शुक्रः सप्तमषड्दशर्क्षसहित इति। शुक्रः सप्तमे स्थाने,

षष्ठे दशमे ऋक्षे दशमे राशौ सहितः स्थितः शार्दूलवत् सिंहवत् त्रासकृद् भयं कोरति। यथा सिंहो दर्शनादेव भयं जनयति, तद्वदेतेषु स्थानेषु स्थितः, शुक्रः, अथदिवान्यस्थानेषु स्थितः शुक्रः शुभ इति। शार्दूलविक्रीडितं वृत्तमेतत्। तल्लक्षणम्–

म्सौ ज्सौ तौ गुरुकं च सूर्यतुरगैः शार्दूलविक्रीडितम्।

अत्र मस्त्रिगुरुः। सोऽन्तगुरुः। जो गुरुमध्यगतः। सः पुनरन्तगुरुः। अन्तलघुस्तः। द्वौ तकारौ। अन्ते गुरुश्च। सूर्या द्वादश। तुरगा अश्वाः सप्त। अस्य सूर्यतुरगैर्द्वादशभिः सप्तभिश्च, यतिर्भवति॥४॥

न्यासः–	म	स	ज	स	त	त	गु
	ऽऽऽ	।।ऽ	।ऽ।	।।ऽ	ऽऽ।	ऽऽ।	ऽ

सूर्य जिस जातक की जन्मराशि में गोचर से ६, ३, १० स्थान में स्थित हो; तब शुभफल दायक होता है। इसका अर्थ यह है कि शेष सभी स्थानों में अशुभफल देता है। चन्द्रमा जन्मराशि से ३, १०,६, ७, १ स्थानों में स्थित होकर शुभफल देता है। शेष स्थान में अशुभफल समझना चाहिये। जीव अर्थात् गुरु २,५,७,९ स्थानों में होने पर शुभफलदायक तथा शेष स्थानों में अशुभ फलदायक होता है। वक्र अर्थात् मंगल, अर्कज अर्थात् शनि; ये दोनों तृतीय तथा षष्ठ स्थानों में होकर शुभफल देते हैं। शेष सभी स्थानों में इनका अशुभफल होता है। सौम्य अर्थात् बुध, २,४,६,८,१० स्थानों में शुभफल तथा शेष स्थानों में अशुभफल देता है। सभी ग्रह उपान्त में शुभ करते हैं। अन्त्य स्थान अर्थात् द्वादश स्थान के समीप उपान्त अर्थात् एकादशस्थान होता है। सूर्यादि सभी ग्रह उपान्त (एकादशभाव) में शुभकारक होते हैं। शुक्र ६,७,१० ऋक्ष अर्थात् राशि में स्थित होकर शार्दूल अर्थात् सिंह के समान त्रास अर्थात् भय देता है। जिस प्रकार सिंह के दर्शनमात्र से भय उत्पन्न हो जाता है। उसी प्रकार इन स्थानों में स्थित शुक्र जातक को भयभीत रखता है। अर्थात् अन्य स्थानों में शुभदायक होता है। यह श्लोक शार्दूलविक्रीडित छन्द में विरचित है।

शार्दूल विक्रीडित का लक्षण–

मगण अर्थात् तीन गुरु, सगण अर्थात् अन्त्यगुरु, जगण अर्थात् मध्यगुरु, सगण अन्त्य गुरु, दो तगण अर्थात् दोनों के अन्त्य लघु और अन्त में गुरु। इसमें सूर्य अर्थात् द्वादश और तुरग अर्थात् सात; इन दोनों वर्णों पर यति होती है॥४॥

विशेष–न्यास विवृति में द्रष्टव्य है।

---

१. मनसि च न सुखमिति पाठान्तरम्।

इदानीमाचार्यः पृथक् पृथग् विस्तरेण गोचरफलं चिकीर्षुस्तत्रादावेवार्कस्य जन्मद्वितीयतृतीयचतुर्थस्थानेषु गोचरफलं स्रग्धरावृत्तेनाह–

जन्मन्यायासदोऽर्कः क्षपयति विभवान् कोष्ठरोगाध्वदाता
वित्तभ्रंशं द्वितीये दिशति१ च न सुखं वञ्चनां दृग्रुजं च।
स्थानप्राप्तिं तृतीये धननिचयमुदा कल्यकृच्चारिहर्ता
रोगान् दत्ते चतुर्थे जनयति च मुहुः स्रग्धराभोगविघ्नम्।।५।।

अब आचार्य विस्तारपूर्वक गोचरफल बतलाने की कामना से पृथक्-पृथक् फल का विचार करेंगे। प्रथम, द्वितीय, तृतीय तथा चतुर्थ स्थानगत सूर्य का गोचरफल स्रग्धरा छन्द में कहते हैं–

यदि सूर्य जन्म राशि में हो तो उपद्रव, धन-हानि, उदररोग तथा मार्ग में भ्रमण; द्वितीय राशि में हो तो धन का विनाश, दुःखी, सभी कार्यों का नाश तथा नेत्र रोग करता है तृतीयराशि में हो तो स्थान लाभ, धन समूह से युत, रोगदाता और शत्रु का विनाशक होता है चतुर्थराशि में सूर्य हो तो रोग देता है। वह माला को धारण करने वाली स्त्री के उपभोग में बार-बार विघ्न उत्पन्न करता है। यह स्रग्धरा छन्द है।।५।।

अर्क आदित्यो जन्मनि जन्मराशौ आयासमुपद्रवं ददाति। विभवानैश्वर्यान् क्षपयति नाशयति। कोष्ठरोगाध्वदाता, कोष्ठरोगं हृदयरोगमुदरामयमध्वानं च ददाति। वित्तभ्रंशं द्वितीय इति। द्वितीयस्थाने वित्तभ्रंशं धननाशं दिशति ददाति। न सुखं, सुखं च न ददाति। केचिन्मनसि च न सुखं पठन्ति। वञ्चनामुपशमनं सर्वकार्याणाम्। दृग्रुजं नेत्रपीडां च दिशति। स्थानप्रप्तिं तृतीय इति। तृतीये स्थानप्राप्तिं स्थानलाभं तथा धननिचयमुदा कल्यकृत्, धनस्य वित्तस्य निचयः समूहः, तेन या मुद्धर्षस्तया कल्यमरोगित्वं करोति। अरिहर्ता शत्रुघाती च भवति। रोगान् दत्ते चतुर्थ इति। चतुर्थस्थाने रोगान् गदान् दत्ते ददाति। मुहुः क्षणं क्षणं स्रग्धराभोगविघ्नं जनयति उत्पादयति। स्रजं मालां धारयतीति स्रग्धरा स्त्री तस्या भोगे उपभोगे पीडित्वाद्विघ्नं जनयति। स्रग्धरावृत्तमेतत्। तल्लक्षणम्–

म्रौ भ्नौ याश्च त्रयः स्युः स्वरमुनितरुगैः स्रग्धरा स्याद्विरामैः।

अत्र मस्त्रिगुरुः। रो लमध्यः। भ आदिगुरुः। नः सर्वलघुः। य आदिलघुः। ते च त्रयो यकराः। स्वराः समस्ताः सप्त मुनयस्तुरगाश्च सप्त एतैर्विरामैर्यतिभिः स्रग्धरा स्याद् भवेत्।।५।।

अर्क अर्थात् सूर्य जन्मराशि में हो तब आयास अर्थात् उपद्रव देता है। विभव अर्थात् ऐश्वर्य का विनाश करता है। कोष्ठरोग अर्थात् हृदयरोग और उदरोग करता है।

तथा यह अध्वान अर्थात् भ्रमण कराता है। द्वितीय स्थान में स्थित वित्तभ्रंश अर्थात् धन का नाश करता है, और सुख नहीं देता है। कतिपय आचार्य मानसिक सुख का अभाव बतलाते हैं। सभी प्रकार के कार्यों की हानि करता है। दृग्-रुज अर्थात् नेत्रों को पीड़ित करता है। तृतीय स्थान में स्थित सूर्य स्थान का लाभ तथा धनसंग्रह सम्बन्धी उत्कर्ष के कारण कल्य अर्थात् निरोगिता दिलाता है, तथा शत्रुओं का संहारक होता है। चतुर्थ स्थान में स्थित सूर्य अनेक रोगों को उत्पन्न करता है। बार-बार स्रग्धरा के भोग में विघ्न उत्पन्न, करता है। स्रज अर्थात् माला को धारण करने वाली स्त्री को स्रग्धरा कहते हैं। इस स्रग्धरा स्त्री के भोग में विघ्न उत्पन्न करता है। यह श्लोक स्रग्धरा छन्द में विरचित है।

स्रग्धरा छन्द का लक्षण–

इसके आरम्भ में मगण अर्थात् तीन गुरु अक्षर, पुनः रगण अर्थात् मध्य लघु, तत्पश्चात् क्रमशः भगण अर्थात् आदि गुरु, नगण अर्थात् सर्व लघु,. यगण अर्थात् आदि लधु, ये यगण तीन बार होते हैं। इनमें सर्वत्र सात-सात वर्णों पर विराम (यति) होने पर स्रग्धरा छन्द समझना चाहिये।।५।।

न्यासः–	म	र	भ	न	य	य	य
	ऽऽऽ	ऽ।ऽ	ऽ।।	।।।	।ऽऽ	।ऽऽ	।ऽऽ

विशेष व्याख्या–

१. स्रग्धरा के प्रत्येक पाद में २१ वर्ण होते हैं।

२. 'कल्य' शब्द का अर्थ प्रभात, उषा-काल तथा निरोगिता है।

अमरकोश २/६/५६.

वर्तो निरामयः कल्य उल्लाघो निर्गतो गदात्।
कल्यं प्रभाते मधुनि सज्ये दक्षे निरामये।

अथ पञ्चमषष्ठसप्तमाष्टमेषु फलं सुवदनावृत्तेनाह–

पीडाः स्युः पञ्चमस्थे सवितरि बहुशो रोगारिजनिताः
षष्ठेऽर्को हन्ति रोगान् क्षपयति च रिपून् शोकांश्च नुदति।
अध्वानं सप्तमस्थो जठरगदभयं दैन्यं च कुरुते।
रुक्त्रासौ चाष्टमस्थे भवति सुवदना न स्वापि वनिता।।६।।

पञ्चम, षष्ठ, सप्तम और अष्टमस्थ रवि का गोचरफल सुवदनावृत्त में कहते हैं–

यदि सूर्य जन्मराशि से पञ्चमराशि में हो तो रोग और शत्रुजनित बहुत प्रकार की पीड़ा; षष्ठ में हो तो रोग, शत्रु और शोक का नाश; सप्तम में हो तो मार्ग में भ्रमण, उदर के रोग का भय तथा दुःख देता है। अष्टम में हो तो रोग और भय होता

है। तथा अपनी स्त्री भी सुवदना, अच्छी तरह सुन्दरी नहीं लगती है। यह पद्य सुवदनाछन्द में है॥६॥

पीडाः स्युरिति। पञ्चमस्थे पञ्चमस्थानस्थिते सवितर्यादित्ये बहुशो बहुप्रकारा रोगारिजनिता रोगजनिताः शत्रुजनिताश्च शत्रुभिरुत्पादिताः पीडा व्यथाः स्युर्भवेयुः। षष्ठेऽर्क इति। षष्ठे स्थानेऽर्कः सूर्यो रोगान् हन्ति नाशयति; रिपून् शत्रूंश्च क्षपयति विनाशयति; शोकान् चित्तसन्तापांश्च नुदति प्रेरयति नाशयतीत्यर्थः। अध्वानं सप्तमस्थ इति। सप्तमस्थोऽर्कोऽध्वानं कुरुते। तथा च जठरगदभयम्, जठरमुदरम्, गदो रोगः, जठररोगभयम्। दैन्यं दीनतां च कुरुते। रुक्त्रासौ चाष्टमस्थ इति। अष्टमस्थेऽर्के रुकत्रासौ रोगभये भवतः। स्वापि वनिता आत्मीयापि स्त्री सुवदना शोभनमुखी सस्नेहा न भवति। वृत्तमिदं सुवदना। तल्लक्षणम्—

म्रौ भ्नौ य्भौ ल्गौ मुनिव्योमगरसविरतिः ख्याता सुवदना।

अत्र मस्त्रिगुरुः। रो लमध्यः। भ आदिगुरुः। नस्त्रिलघुः। यकार आदिलघुः। भ आदिगुरुः। अन्ते लघुगुरू। मुनयः सप्त। व्योमगाः सप्त। रसाः षट्। एतैर्विरतिर्विरामो यतिर्यस्याः सा सुवदना कथिता इति॥६॥

न्यासः—	म	र	भ	न	य	भ	ल	गु
	ऽऽऽ	ऽ।ऽ	ऽ।।	।।।	।ऽऽ	ऽ।।	।	ऽ

सविता अर्थात् सूर्य के पञ्चमस्थान में स्थित होने पर विविध प्रकार के रोगजनित तथा शत्रुजनित उपद्रवों से पीड़ा होती है। छठे स्थान में स्थित सूर्य रोगों का हनन अर्थात् विनाश करता है और शत्रुओं को भी विनष्ट करता है, शोक अर्थात् चित्त के अन्तः कष्टों का नुद अर्थात् विनाश करता है। सप्तमस्थ रवि अध्वान अर्थात् पथ-भ्रमण कराता है, और यह जठर अर्थात् उदर का गद अर्थात् रोग उत्पन्न करता है। तथा दीनता लाता है। अष्टमस्थ रवि रोग तथा भय करता है। अपनी स्त्री सुवदना अर्थात् सुमुखी होती हुई भी स्नेहशीला नहीं रहती है। यह श्लोक सुवदना छन्द में विरचित है—

सुवदनाछन्द का लक्षण—

आरम्भ में मगण अर्थात् तीन गुरु, पुनः रगण अर्थात् मध्य लघु, पुनः भगण अर्थात् आदि गुरु, तत्पश्चात् क्रमशः नगण अर्थात् तीन लघु, यगण अर्थात् आदि लघु, भगण अर्थात् आदि गुरु तथा अन्त में लघु-गुरु वर्ण होते हैं। इसमें ७,७,६ पर यति अर्थात् विराम होता है। यह सुवदनाछन्द का लक्षण है॥६॥

विशेष—सुवदनावृत्त का न्यास विवृति में द्रष्टव्य है।

अथ नवमैकादशद्वादशस्थानस्थेऽर्के फलं सुवृत्तयाऽऽह—

रवावापद्दैन्यं रुगिति नवमे वित्तचेष्टाविरोधो
जयं प्राप्नोत्युग्रं दशमगृहगे कर्मसिद्धिं क्रमेण।

जयस्थानं मानं विभवमपि चैकादशे रोगनाशं
सुवृत्तानां चेष्टा भवति सफला द्वादशे नेतरेषाम्।।७।।

नवम-दशम-एकादश-द्वादशस्थ रवि का गोचरफल सुवृत्ताछन्द में कहते हैं।

गोचर का नवमस्थ रवि विपत्ति-दीनता, रोग देता हुआ आर्थिक प्रयत्नों का विरोधी होता है। दशमस्थ होकर असंभव विजय दिलाता है और क्रमिक रूप से कार्यो को सिद्ध कराता है। एकदाश स्थानस्थ होकर जय, भूमि, प्रतिष्ठा, समृद्धि और रोग का नाश करता है। द्वादशस्थ रवि उत्तम आचरण वाले को सफलता देता है। परञ्च शेष सभी के लिए विफलता देता है।।७।।

रवावापदैन्यमिति। रवावादित्ये नवमे नवमस्थानस्थे आपदार्तिर्दैन्यं दीनता। रुग्रोगः। वित्तस्य धनस्य चेष्टया क्रियया विरोधो विघ्नो भवति। इतिशब्दः प्रकाराय। जयं प्राप्नोत्युग्रमिति। दशमगृहगे दशमस्थानस्थेऽर्के जयं विजयमुग्रं कठिनं प्राप्नोति लभते। क्रमेण परिपाट्या कर्मसिद्धिं कार्याणां निष्पत्तिम्। जयस्थानमिति। एकादशे जयं विजयं स्थानं स्थानलाभं मानं पूजां विभवमैस्वर्यं रोगनाशं गदोपशमनं च प्राप्नोति। सुवृत्तानामिति। द्वादशे सूर्ये सुवृत्तानां शोभनं वृत्तं शीलं येषां तेषां चेष्टा क्रिया सफला फलसंयुक्ता भवति। तथा चोक्तम्–

मङ्गलाचारयुक्तानां नित्यं च प्रयतात्मनाम्।
जपतां जुह्वतां चैव विनिपातो विनश्यते।।इति।।

नेतरेषाम्। दुर्वृत्तानां चेष्टा सफला न भवति। वृत्तमिदं सुवृत्ता। तल्लक्षणम्–

यमौ न्सौ रौ गश्चेद् द्विरसमुनिभिः स्याद्विरामैः सुवृत्ता।

य आदिलघुः। मस्त्रिगुरुः। नस्त्रिलघुः। सोऽन्तगुरुः। रलमध्यः। द्वौ रेफौ। सोऽन्ते गुरुः। द्वे यती रसैः षड्भिर्भवतः। तृतीया मुनिभिः सप्तभिः। एतैर्विरामैः सुवृत्ता स्याद् भवेत्। अन्येषां मेघविस्फूर्जिता।

न्यासः–	य	म	न	स	र	र	गु
	।ऽऽ	ऽऽऽ	।।।	।।ऽ	ऽ।ऽ	ऽ।ऽ	ऽ

तथा च यनवेश्वरः–

हृद् रोगशोकाध्वविवाहदैन्यक्रोधक्षयव्याधिभयार्तिदोषान्।
स्थाने शशाङ्कस्य रविः करोति व्यर्थश्रमोद्वेगमपि द्वितीये।।
तृतीयसंस्थो धनमानधर्मस्थानासनप्रीतिसुखप्रदोऽर्कः।
चतुर्थगस्तु क्षतजप्रवृत्तिर्ज्वरामयो भेदविवादकारी।।
नृपावमर्दात्मजबन्धुशोकव्याधिप्रदः पञ्चमसंस्थितोऽर्कः।।
आरोग्यसौख्यारिविनाशहर्षख्यातिक्रियासिद्धिकरश्च षष्ठः।।

जामित्रसंस्थो रुधिरप्रवृत्तिर्ज्वरक्लमाजीर्णविषाध्वकारी।
सूर्योऽष्टमे स्त्रीसुतबन्धुदुःखव्याधिप्रदोपद्रवमृत्युकृत् स्यात्॥
दैन्यस्थितिभ्रंशगुरुस्वबन्धुप्रद्वेषकृत् स्यान्नवमाश्रितोऽर्कः।
मेषूरणस्थो द्विचतुष्पदस्त्रीहिरण्यरौप्याम्बरलाभकर्ता॥
एकादशे स्थानयशः प्रहर्षमिष्टाशनारोग्यसुखप्रदोऽर्कः।
स्थाने निरुक्तं शशिनो विधिज्ञैः क्रियाफलाघातकृदन्त्यराशौ॥इति॥७॥

रवि अर्थात् सूर्य नवम स्थान में हो, तब आपदा अर्थात् विपत्ति, दैन्य अर्थात् दीनता, रुज अर्थात् रोग देता हुआ धनार्जन के प्रयत्न में विघ्नकारक होता है। दशम स्थान में स्थित सूर्य कठिनतापूर्वक विजय प्रदान करता है। क्रमशः कार्यों को निष्पादित करता है। एकादश स्थान में स्थित सूर्य विजय, स्थानलाभ, सम्मान तथा ऐश्वर्य के साथ ही रोगों का शमन करता है। द्वादश स्थान में स्थित सूर्य सुवृत्त अर्थात् सच्चरित्र लोगों की क्रियाओं को सफल करता है। जैसाकि कहा गया है-

शुभ आचार में संयुक्त, प्रतिदिन आत्मोत्थान में प्रयत्नशील, यज्ञ तथा हवन करने वाले सज्जनों का अनिष्टफल समाप्त हो जाता है।

अन्य लोगों का अर्थात् दुश्चरित्रों की क्रियायें सफल नहीं होती हैं। यहाँ पर सुवृत्ताछन्द है।

सुवृत्ताछन्द का लक्षण-

यगण अर्थात् आदि लघु, मगण अर्थात् तीन गुरु, नगण अर्थात् तीन लघु, सगण अर्थात् अन्त्य गुरु, रगण अर्थात् मध्य लघु, दो बार तथा अन्त में गुरु वर्ण होता है। इसमें २, ६ और ७ वर्णों पर यति (विराम) होती है। कतिपय विद्वानों के अनुसार यह मेघविस्फूर्जितछन्द का लक्षण है।

विशेष—सुवृत्ताछन्द का न्यास विवृति में द्रष्टव्य है।

जैसा कि आचार्य यवनेश्वर ने कहा है-

चन्द्रराशि से प्रथम स्थान में स्थित गोचरीय सूर्य हृदयरोग, शोक, भ्रमण, विवाह, दरिद्रता, क्रोध, हानि, रोग और भय सम्बन्धी दोषों को देता है। द्वितीय स्थान में स्थित रवि निरर्थक श्रम तथा मनोद्वेग देता है। तृतीय स्थान में स्थित सूर्य धन, सम्मान, धर्मकार्य, स्थान प्राप्ति, पद, प्रेम और सुख को प्रदान करता है। चतुर्थस्थान में स्थित रवि व्रण, ज्वर, विभेद और विवाद को उत्पन्न करता है। पञ्चमस्थान में स्थित सूर्य राज-हानि, पुत्र एवं बन्धु का शोक तथा रोगदायक होता है। षष्ठस्थ रवि निरोग, सुखी, शत्रुविनाशक, प्रसन्नता, कीर्ति और कार्यों को सिद्ध करने वाला होता है। सप्तम स्थान का सूर्य व्रणकारी, ज्वर, थकान, अपच, विषदोष तथा मार्ग में

भ्रमणकारी बनाता है। गोचरीय अष्टम रवि अपनी पत्नी, पुत्र तथा बन्धुजनों से दुःखित रखता है। यह रोगप्रदायक, उपद्रव और मृत्युकारक होता है। नवमस्थ सूर्य दीनता, स्थान नाश, गुरु और बन्धुओं में द्वेष उत्पन्न करता है। दशमस्थान में स्थित रवि मनुष्य, पशु, स्त्री, सुवर्ण, रजत तथा वस्त्रों का लाभ कराता है। एकादशस्थान में स्थित सूर्य पद, प्रतिष्ठा, प्रसन्नता, अभिलषित भोजन, स्वास्थ्य एवं सुखप्रदायक होता है। द्वादशभावस्थ रवि कर्मफलों में विघ्न उपस्थित करता है। इस प्रकार ज्योतिषशास्त्रज्ञ विद्वानों ने चन्द्रराशि से सूर्य की स्थिति के अनुसार विचार किया है।।७।।

अथ चन्द्रमसो जन्मद्वितीयतृतीयचतुर्थस्थस्य फलं शिखरिण्याऽऽह–

शशी जन्मन्यन्नप्रवरशयनाच्छादनकरो
द्वितीये मानार्थान् ग्लपयति सविघ्नश्च भवति।
तृतीये वस्त्रस्त्रीधनविजयसौख्यानि लभते
चतुर्थेऽविश्वासः शिखरिणि भुजङ्गेन सदृशः।।८।।

चन्द्रमा का प्रथम, द्वितीय, तृतीय तथा चतुर्थ स्थान का फल शिखरिणी छन्द में कहते हैं–

जन्मराशि का चन्द्र, भोजन-शयन का उत्तम प्रबन्ध कराता है। द्वितीय स्थानगत, धन-सम्मान की हानि के साथ ही विघ्नदायक होता है। तृतीय स्थान का चन्द्र, वस्त्र स्त्री-धन-शत्रुपर विजय तथा सुख देता है। चतुर्थस्थ चन्द्रमा, सर्प के समान भय तथा अविश्वास उत्पन्न करता है।।८।।

शशी जन्मनीति। शशी चन्द्रः। जन्मनि जन्मराशौ स्थितः। अन्नप्रवराणि प्रधानानि शयनानि आस्तरणानि आच्छादनानि वस्त्राणि करोति। द्वितीय इति। द्वितीये स्थाने मानं पूजा। अर्था धनादयः। तान् ग्लपयति नाशयति। सविघ्नो विघ्नुयक्तश्च भवति। तृतीय इति। तृतीये स्थाने वस्त्राण्यम्बराणि स्त्री योषित् धनं वित्तं विजयो विशेषेण जयः सौख्यं सुखभावः। तानि च लभते प्राप्नोति। चतुर्थे चन्द्रे अविश्वासः, विश्वासो न भवति; अपि तु सर्वस्मादाशङ्का जायते। कीदृशोऽविश्वासः? शिखरिणि भुजङ्गेन सदृशः, शिखरिणी पर्वते भुजङ्गेन सर्पेण हेतुना यथा विश्वासो जनानाम्। यस्मिन् पर्वतस्थाने सर्पो भवति तत्र न कस्यचिद्विश्वासो भवतीति। शिखरिणीवृत्तमेतत्। तल्लक्षणम्–

यमौ न्सौ भो ल्वन्ता रसहरविरामा शिखरिणी।

य आदिलघुः। मस्त्रिगुरुः। न स्त्रिलघुः। सोऽन्तगुरुः। भ आदिगुरुः। लघुगुरू अन्ते। रसाः षट्। हरा रुद्रा एकादश। एतैर्विरामो यस्याः सा शिखरिणी।।८।।

न्यासः–	य	म	न	स	भ	ल	गु
	।ऽऽ	ऽऽऽ	।।।	।।ऽ	ऽ।।	।	ऽ

शिखरिणीछन्द के द्वारा प्रथम, द्वितीय, तृतीय तथा चतुर्थगत चन्द्रमा का फल कहते हैं–

शशि अर्थात् चन्द्रमा जन्म राशि में स्थित होकर श्रेष्ठ अन्न एवं शय्या को प्रदान करता है। द्वितीयस्थ चन्द्र मान अर्थात् पूजा, अर्थ अर्थात् धन-सम्पत्ति का ग्लपन अर्थात् विनाश करता है, और अनेक प्रकार के विघ्नों से युक्त रखता है। तृतीय स्थान में स्थित चन्द्रमा के द्वारा वस्त्र, स्त्री, धन और शत्रु विजय के द्वारा श्रेष्ठ सुख प्राप्त होता है। अर्थात् इन वस्तुओं को प्राप्त कराता है। चतुर्थस्थ चन्द्रमा में अविश्वास अर्थात् विश्वास का अभाव और सभी लोगों से भय उत्पन्न होता है। यह अविश्वास किस प्रकार का होता है? जिस प्रकार शिखर अर्थात् पर्वत पर रहने वाले भुजङ्ग अर्थात् सर्प (पहाड़ी साँप) से लोगों में अविश्वास रहता है। तात्पर्य यह है कि पर्वत पर जिस स्थान पर सर्प होता है, वहाँ पर कोई भी विश्वास नहीं करता है। यह शिखरिणी छन्द है।

शिखरिणी छन्द का लक्षण–

यगण अर्थात् आदि लघु, मगण अर्थात् तीन गुरु, नगण अर्थात् तीन लघु, सगण अर्थात् अन्त्य गुरु, भगण अर्थात् आदि गुरु और अन्त में लघु-गुरु वर्ण होते हैं। रस अर्थात् छः, हर अर्थात् एकादश वर्णों पर जिसका विराम (यति) होता है। वह शिखरिणीछन्द है॥८॥

विशेष–शिखरिणीछन्द का न्यास विवृति में द्रष्टव्य है।

अधुना पञ्चमषष्ठसप्तमाष्टमस्थस्य चन्द्रमसः फलं मन्दाक्रान्तयाऽह–

दैन्यं व्याधिं शुचमपि शशी पञ्चमे मार्गविघ्नं
षष्ठे वित्तं जयनति सुखं शत्रुरोगक्षयं च।
यानं मानं शयनमशनं सप्तमे वित्तलाभं
मन्दाक्रान्ते फणिनि हिमगौ चाष्टमे भीर्न कस्य॥९॥

मन्द्राक्रान्ताछन्द के द्वारा पञ्चम, षष्ठ, सप्तम और अष्टम राशिगत चन्द्रमा का फल कहते हैं–

चन्द्रमा जन्म राशि से पंचम स्थान का दीनता, रोग, शोक तथा यात्रा में विघ्न करता है। षष्ठ स्थान का धन तथा सुख देकर शत्रु और रोग का शमन करता है। सप्तमस्थ चन्द्र, वाहन, सम्मान, शयन, भोजन एवं धन का लाभ देता है। अष्टम चन्द्र, मन्दगामी सर्प के समान होता है, सर्वतः भय देता है॥९॥

---

१. सम्प्रति ज्योतिषे लोकशब्देन त्रयो गृह्यन्ते।

दैन्यं व्याधिमिति। शशी चन्द्रः पञ्चमे स्थाने स्थितो दैन्यं दीनतां व्याधिं पीडां शुचं शोकम्। अपि तथा मार्गे पथि विघ्नमसिद्धिं जनयत्युत्पादयति। षष्ठ इति। षष्ठे स्थाने वित्तं धनं सुखं च जनयति। तथा शत्रूणामरीणां रोगाणां गदानां च क्षयं विनाशं जनयति। यानं मानमिति। सप्तमे यानं वाहनं मानं पूजां शयनं शय्याऽशनं भोजनं वित्तलाभं धनप्राप्तिं च जनयति। मन्द्राक्रान्त इति। अष्टमे हिमगौ चन्द्रे फणिनि सर्पे मन्दाक्रान्ते। मन्दमप्रयत्नं कृत्वाक्रान्तो गृहीतो यः सर्पः स कस्य भीर्भयं न करोत्यपि तु सर्वस्यैव। अष्टमे चन्द्रे मन्दाक्रान्ते च फणिनि भयं भवतीत्यर्थः। वृत्तमिदं मन्दाक्रान्ता। तल्लक्षणम्—

मन्दाक्रान्ता मभनततगा गः समुद्रर्तुलोकैः।

मस्त्रिगुरुः। भ आदिगुरुः। नः सर्वलघुः। तोऽन्तलघुः। द्वौ यत्र तकारौ। अन्ते गुरुद्वयम्। समुद्राश्चत्वारः। ऋतवः षट्। लो [1]का भूर्लोकादयः सप्त। एतैर्विरामैर्मन्दाक्रान्ता॥९॥

न्यासः–	म	भ	न	त	त	गु
	ऽऽऽ	ऽ।।	।।।	ऽऽ।	ऽऽ।	ऽऽ

पञ्चम स्थान में स्थित चन्द्रमा दैन्य अर्थात् निर्धनता, रोगकष्ट और शुच अर्थात् शोक देता है। यह मार्ग अर्थात् यात्रा में विघ्न और असफलता को उत्पन्न करता है। षष्ठ स्थान में स्थित चन्द्रमा धन और सुख लाता है तथा शत्रुओं और रोगों का क्षय करता है। सप्तमस्थ चन्द्रमा यान अर्थात् वाहन, मान-सम्मान, शय्या, अशन अर्थात् भोजन और धनलाभ कराता है। अष्टमस्थ हिमगु अर्थात् चन्द्रमा फणि अर्थात् सर्प के मन्दाक्रान्त सदृश भय उत्पन्न करता है। मन्द,अर्थात् अनायास जो आक्रान्त अर्थात् आक्रमण कर देता है, वह सूर्य किसके लिये भयकारक नहीं, होता है? अर्थात् सभी के लिये भयदायक होता है। तात्पर्य यह है कि चन्द्रमा के अष्टमस्थ होने पर अनायास आक्रामक सर्प के समान भय होता है। यह मन्दाक्रान्ताछन्द है।

मन्दाक्रान्ताछन्द का लक्षण—

मगण अर्थात् तीन गुरु, भगण अर्थात् आदि गुरु, नगण अर्थात् तीन लघु, तगण अर्थात् अन्त्य लघु, दो बार तथा अन्त्य में गुरु; समुद्र अर्थात् चार, ऋतु अर्थात् छः, सात पृथ्वी आदि लोक अर्थात् सात वर्णों पर विराम होता है। यह मन्दाक्रान्ता छन्द का लक्षण है॥९॥

विशेष—मन्दाक्रान्ता छन्द का न्यास विवृति में द्रष्टव्य है।

नवमदशमद्वादशस्थचन्द्रमसः फलं वृषभचरितेनाह–

नवमगृहगो बन्धोद्वेगश्रमोदररोगकृद्
दशमभवने चाज्ञाकर्मप्रसिद्धिकरः शशी।
उपचयसुहृत्संयोगार्थप्रमोदमुपान्त्यगो
वृषभचरितान् दोषानन्त्ये करोति च सव्ययान्॥१०॥

नवम, दशम, एकादश तथा द्वादशस्थ चन्द्रमा का फल वृषभचरितछन्द में कहते हैं–

गोचर में नवम चन्दन, बंधन, उद्वेग, श्रम तथा उदररोग देता है। दशमस्थ होकर प्रमुख तथा उत्तम कार्य देता है। वह एकादश का धन, मित्र, और वित्त देता है। द्वादशस्थ चन्द्र पशु से हानि और व्यय कराता है॥१०॥

नवमगृहग इति। शशी चन्द्रमा नवमगृहगः। जन्मराशेर्नवमस्थानप्राप्तो बन्धो बन्धम्। चलवृत्तिरुद्वेगः। श्रमः खेदः। उदररोगान् जठररोगांश्च करोति। दशमभवन इति। उपचयसुहृदिति। उपान्त्यग एकादशस्थः। उपचयोऽर्थानाम्। सुहृत्संयोगी मित्रसमागमः। अर्थानां धनानां प्रमोदो हर्षम्। एतान् करोति। वृषभ-चरितान् इति। अन्त्ये द्वादशे स्थाने वृषभचरितान् दोषान्। वृषभस्य बलीवर्दस्येव चरितं स्वरूपं येषां दोषाणां दुःखानाम्। स्वखुरेण भूमिताडनात् स्ववक्षोहननम्। भूमेर्मृद्विदारणात् स्वविषाणोपघात इत्यादिकम्। अथवा वृषभेण चरितानुत्पादितान् दोषान् शृङ्गाणां हननेन खुराभिघातेन चोपतापान्। तांश्च सव्ययान् व्ययेनार्थक्षत्या युक्तान् करोति। वृषभचरितं वृत्तम्। एतल्लक्षणम्–

वृषभचरितं न्सौ म्रौ स्लौ गो रसोदधिसप्तकैः।

नस्त्रिलघुः। सोऽन्तगुरुः। मस्त्रिगुरुः। रलमध्यः। सोऽन्तगुरुः। लघुगुरू अन्ते। रसा षट्। उदधयश्चत्वारः। सप्त प्रसिद्धाः। एतैर्विरामैर्वृषभचरितम्। अन्येषां हरिणी।

न्यासः–	न	स	म	र	स	ल	गु
	।।।	।।ऽ	ऽऽऽ	ऽ।ऽ	।।ऽ	।	ऽ

तथा च यवनेश्वरः–

स्वस्थानगो भोजनगन्धमाल्यनारीसुहृद्वस्त्ररतिप्रदः स्यात्।
चन्द्रो द्वितीयर्क्षगतस्तु तस्माद् बहुव्ययायासविवादकारी॥
तृतीयगो वस्त्रहिरण्ययोषित्सुहृद्यशोभोजनदो हिमांशुः।
स्वबन्धुपीडधननाशजानि कुर्वीत दुःखानि चतुर्थसंस्थः॥
धनक्षयाजीर्णरुगध्वदैन्यविक्षोभकृत् पञ्चमगः शशाङ्कः।
शत्रुक्षयारोग्यसुखार्थसिद्धिं स्निग्धागमप्रीतिकरश्च षष्ठः॥
जामित्रगः स्त्रीजनबन्धुशय्याहिरण्यभोज्याम्बरदः शशाङ्कः।
क्षुड्व्याधिचिन्ताकलहार्थनाशो मृत्युक्षयोपद्रवदोऽष्टमस्थः॥
धनक्षयारिव्ययमानभङ्गरोगादिकारी नवमः शशाङ्कः।
मेषुरणस्थो बहुमानहर्षचेष्टाफलौदार्यविरोधकारी॥
एकादशः स्निग्धविवाहशय्यास्त्रीभोजनप्राप्तिसुखार्थकारी।

निशाकरो द्वादशगस्तु दैन्यमालस्यमीर्ष्यापचयं च कुर्यात् ।।इति।।१०।।

शशि अर्थात् चन्द्रमा जन्म राशि से नवम स्थान में स्थित हो तब बन्ध अर्थात् बन्धन, मन की चंचलता से उद्वेग, परिश्रम से कष्ट, उदररोग तथा अपचयरोग करता है। दशमभाव में स्थित चन्द्रमा आज्ञा-प्रधान प्रभुत्व, कार्यसिद्धि में साधनयुक्त करता है। उपान्त्य अर्थात् एकादश स्थान में स्थित चन्द्रमा धन का उपचय (वृद्धि) और मित्रों से मिलन तथा धनागम से मन को आनन्दित करता है। अन्त्य, अर्थात् द्वादश स्थान में स्थित चन्द्रमा वृषभ के आचरण सदृश दोषों को करता है। वृषभ (बलीवर्द) के आचरण के सदृश दोष अर्थात् दुःखों को करता है। अपने खुर से भूमि का प्रताड़न, अपने वक्ष का स्वयं हनन तथा भूमि को विदारित करने के फलस्वरूप अपने विषाण अर्थात् सींग को क्षतिग्रस्त करना, आदि दोष उत्पन्न करता है। अथवा वृषभ द्वारा किये गये शृङ्गों का आघात तथा खुर से चोटिल हो कर कष्टों को प्राप्त करता है। यहाँ पर वृषभ का अभिप्राय साँड़ है। यह आर्थिक अपव्यय से हानि कराता है। यह वृषभचरित छन्द है।

वृषभचरित छन्द का लक्षण–

नगण अर्थात् तीन लघु, सगण अर्थात् अन्त्य गुरु, मगण अर्थात् तीन गुरु, रगण अर्थात् मध्य लघु, सगण अर्थात् अन्त्यगुरु तथा अन्त में लघु गुरु होता है। रस अर्थात् छः, उदधि अर्थात् चार तथा सात वर्णों पर यति होने से यह वृषभचरित छन्द निर्मित होता है। अन्य आचार्यों ने इसको हरिणी छन्द कहा है।

विशेष–इस छन्द का न्यास विवृति में द्रष्टव्य है।

जैसाकि आचार्य यवनेश्वर ने भी कहा है–

प्रथमस्थान में स्थित चन्द्रमा भोजन, सुगन्धपदार्थ, माला, स्त्री, मित्र, वस्त्र और सुरतिदायक होता है। द्वितीय स्थान में स्थित चन्द्रमा अधिक व्ययकारी, श्रम तथा विवाद को उपस्थित करता है। तृतीयस्थान का चन्द्रमा वस्त्र, सुवर्ण, स्त्री, मित्र, यश और भोजन देता है। चतुर्थ स्थान में स्थित चन्द्रमा अपने कुटुम्ब को पीड़ा, सम्पत्ति का विनाश और विविध दुःखों को देता है। पञ्चममस्थ चन्द्रमा, धनहानि, अपचयरोग मार्ग-कष्ट, दीनता और उद्वेगकारक होता है। षष्ठस्थान में स्थित चन्द्रमा, शत्रु पर विजय, आरोग्य, सुख, धन प्राप्ति, सुन्दर पदार्थों का आगमन और प्रीतिकारक वस्तु को प्रदान करता है। सप्तमस्थ चन्द्रमा स्त्री, बन्धु, शय्या, सुवर्ण, भोज्य पदार्थ और नूतन वस्त्रों को देता है। अष्टम स्थान का चन्द्रमा क्षुधा, रोग, चिन्ता, कलह, धन-हानि, मृत्यु, हानि और उपद्रव उपस्थित करता है। नवमस्थ चन्द्रमा धन-हानि, शत्रु,

---

१. द्रष्टव्याऽस्यैवाध्यायस्य ३४ श्लोकटीका।

व्यय, प्रतिष्ठा की हानि और रोगों को उत्पन्न करता है। दशमस्थान का चन्द्रमा सम्मान, प्रसन्नता, अभीष्ट सिद्धि और दयालु स्वभाव तथा विरोध कराता है। एकादश स्थान का चन्द्रमा प्रिय पदार्थ, विवाह, शय्या, स्त्री, भोजन, सुख और धन का कारक होता है। द्वादशस्थ चन्द्रमा दीनता, आलस्य, ईर्ष्या और अपव्यय कराता है॥१०॥

अथ भौमस्य जन्मद्वितीयगतस्य फलमुपेन्द्रवज्रयाऽऽह–

कुजेऽभिघातः प्रथमे द्वितीये नरेन्द्रपीडाकलहारिदोषैः।

भृशं च पित्तानलचौररोगैरुपेन्द्रवज्रप्रतिमोऽपि यः स्यात्॥११॥

प्रथम तथा द्वितीय स्थानगत मंगल का फल उपेन्द्र वज्रा छन्द में कहते हैं–

जन्मराशिस्थ भौम अनेक उपद्रव करता है। द्वितीय स्थानगत राजपीड़ा, कलह, शत्रुता और पित्त, अग्नि, चोर तथा रोगों से विष्णु के तुल्य व्यक्ति को भी अत्यधिक पीड़ित करता है॥११॥

कुजे भौमे जन्मराशिगते अभिघात उपद्रवो भवति। द्वितीये कुजे नरेन्द्रपीडा राजपीडा। कलहारिदोषैः, कलहदोषः। शत्रुदोषः। एतैः। तथा पित्तेन धातुदोषेण। अनलेनाग्निना। चौरैस्तस्करैः। रोगैर्गदैश्च। भृशमत्यर्थम्। उपघातः। अपिशब्दः सम्भावनायाम्। उपेन्द्रवज्रप्रति-मोऽपि, उपेन्द्रो नारायणः, तत्प्रतिमस्तत्सदृशः। वज्रं कुलिशम्, तत्प्रतिमोऽपि यदि स्याद्भवेत् तथाप्युपघातो भवतीति। वृत्तमिदमुपेन्द्रवज्रा। तल्लक्षणम्–

उपेन्द्रवज्रा तु जतौ जगौ गः।

जो गुरुमध्यगतः तोऽन्तलघुः। पुनरपि जकारः। अन्ते गुरुद्वयम्॥११॥

न्यासः–	ज	त	ज	गु
	।ऽ।	ऽऽ।	।ऽ।	ऽऽ

चन्द्रमा से प्रथमराशि (जन्म राशि) में स्थिर गोचर का मंगल हो तो अभिघात होता है। द्वितीय स्थान में स्थित मंगल राजपीड़ा, कलह से कष्ट तथा शत्रु से कष्ट देता है। पित्त सम्बन्धी धातु का उपद्रव, अनल अर्थात् अग्नि से, चोर अर्थात् तस्करों से और रोगों से अत्यन्त पीड़ित करता है। यदि व्यक्ति उपेन्द्र अर्थात् भगवान् नारायण के प्रतिम अर्थात् सदृश तथा वज्र (कुलिश) के सदृश भी हो, तब भी उसको आघात पहुँचता है। यह उपेन्द्रवज्राछन्द है।

उपेन्द्रवज्राछन्द का लक्षण–

जगण अर्थात् मध्यगुरु, तगण अर्थात् अन्त्य लघु, जगण अर्थात् मध्य गुरु तथा अन्त में दो गुरु हो तो, उपेन्द्रवज्राछन्द समझना चाहिये॥११॥

विशेष–इस छन्द का न्यास विवृति में द्रष्टव्य है।

अथ तृतीयस्थभौमस्य फलमुपजात्याऽऽह–

तृतीयगश्चौरकुमारकेभ्यो
भौमः सकाशात् फलमादधाति।
प्रदीप्तिमाज्ञां धनमौर्णिकानि
धात्वाकराख्यानि किलापराणि।।१२।।

तृतीय स्थानगत मंगल का फल उपजातिछन्द में कहते हैं–

तृतीय स्थानगत भौम चोर एवं कुमार-वय के व्यक्तियों से फल प्रदान करता है। मुख-कान्ति तथा स्वामित्व, धन, ऊनी वस्त्र, धातु पदार्थ और अन्य प्रकार की वस्तुओं को प्रदान करता है।।१२।।

तृतीयगो भौमः। चौरेभ्यस्तस्करेभ्यः। कुमारकेभ्योऽष्टवर्षेभ्यः। सकाशाद्धेतोः। फलमादधाति करोति। प्रदीप्तं कान्तिम्। आज्ञामादेशम् प्रभुत्वं धनं वित्तम्। और्णिकानि कम्बलादयः। धात्वाकराख्यानि। धातवः सुवर्णादीनि। तेषामाकर उत्पत्तिस्थानम्। धात्वाकर इत्याख्या येषां तानि। अपराण्यन्यानि। आदधाति। किलशब्द आगमार्थः। अपराण्यन्यानि वृत्तानि। उपजातिकाख्येत्यर्थः। यतः सा सम्मिश्रा उपेन्द्रवज्रेन्द्रवज्रपादैर्मिश्रैर्भवति। तल्लक्षणम्–

अनन्तरापादितलक्ष्मशोभौ पादौ भवेतां विविधैर्विकल्पैः।
यासामिमौ श्रव्ययतिप्रपञ्चौ स्मृताः स्मृतीशैरुपजातयस्ताः।।

यासां पादावनन्तरापादितलक्ष्मशोभौ। अनन्तरमापादितमुक्तं यद् लक्ष्म लक्षणम्।[१] तौ जो गुरू चेद्भवतीन्द्रवज्रा। उपेन्द्रवज्रा तु जतौ जगौ गः। अनयोर्यल्लक्षणमापादितमुक्तम्। तेन लक्षणद्वयेन शोभा चारुता ययोः पादयोस्तौ तथाभूतौ पादौ भवेतां स्याताम्। इमौ च पादौ श्रव्ययतिप्रपञ्चौ श्रव्यःकर्णसुखजनको यतिप्रपञ्चो यतिविस्तारो ययोस्तौ तथाभूतौ। तत् स्मृतीशैः पण्डितैः स्मरणं स्मृतिः। तस्या ईशाः स्वामिनः तैः। ता उपजातय इति स्मृता उक्ताः।।१२।।

न्यासः–	ज	त	ज	गु
	।ऽ।	ऽऽ।	।ऽ।	ऽऽ
	त	त	ज	गु
	ऽऽ।	ऽऽ।	।ऽ।	ऽऽ

जन्म राशि से तृतीय स्थान में स्थित मंगल चोर अर्थात् तस्करों से, कुमार अर्थात् अष्टवर्षीय बालकों द्वारा फल प्राप्त कराता है। प्रदीप्त अर्थात् कान्तिमान मुखमण्डल, आज्ञा अर्थात् आदेश देने में समर्थ स्वामित्व, धन (वित्त) और कम्बल आदि ऊनी वस्त्र, सुवर्णादि धातु तथा उनकी खदानें उपलब्ध कराता है। यह अन्य धातुओं को भी देता है। यहाँ पर 'किल' शब्द शास्त्र परम्परा का सूचक है। यह उपजाति संज्ञक छन्द है। इसको उपेन्द्रवज्रा और इन्द्रवज्रा छन्दों का सम्मिश्रण समझना

चाहिये।

उपजातिछन्द का लक्षण–

एक चरण के अनन्तर अन्य चरणों में विविध विकल्पों के साथ सुशोभित, कर्णप्रिय यति से युक्त, रचना को शास्त्रकारों ने उपजाति छन्द कहा है।

जिस श्लोक के दो चरण एक दूसरे से भिन्न रूप में सुशोभित हो। इन्द्रवज्रा का लक्षण-दो तगण, जगण तथा दो गुरु है। तथा उपेन्द्रवज्रा का लक्षण जगण, तगण, जगण तथा दो गुरु है। इन दोनों के लक्षणों से संयुक्त होकर जो शोभा प्राप्त होती है, तथा श्रव्य अर्थात् कर्णप्रिय और यति (विराम) से युक्त विन्यास होता है, इस प्रकार के छन्द को स्मृतीश अर्थात् विद्वज्जन उपजाति छन्द कहते हैं। स्मृति का तात्पर्य स्मरण है और उसके ईश अर्थात् स्वामी को स्मृतीश (शास्त्रज्ञ) कहा जाता है॥१२॥

विशेष–इस छन्द का न्यास विवृति में द्रष्टव्य है।

अथ चतुर्थस्थस्य भौमस्य फलं प्रसभेनाह–

भवति धरिणजे चतुर्थगे ज्वरजठरगदासृगुद्भवः।
कुपुरुषजनिताच्च सङ्गमात् प्रसभमपि करोति चाशुभम्।।१३।।

चतुर्थस्थानगत मंगल का फल प्रसभच्छन्द में कहते हैं–

गोचर से चतुर्थ स्थान में भौम हो; तब ज्वर, उदर-रोग, रक्तज रोग उत्पन्न होते हैं। दुष्टजनों के कुसंग से आकस्मिक अनिष्ट होने लगते हैं॥१३॥

यदि मंगल चतुर्थ राशि में स्थित हो तो ज्वर, उदर रोग, रक्त विकार तथा निन्दित पुरुष के साथ समागम से दृढ़तापूर्वक अशुभ करता है। यह प्रसभछन्द है॥१३॥

धरणिजे भौमे चतुर्थगे। ज्वरो रोगविशेषः। जठरगद उदररोगः। असृग् रक्तम्। एषामुद्भाव उत्पत्तिर्भवति। तथा कुपुरुषः कुत्सितः पुरुषः। तज्जनितात् तदुत्पन्नात् सङ्गमात् संयोगात् प्रसभं प्रसह्य बलात्कारादेवाशुभमभद्रं करोति। वृत्तमेतत् प्रसभम्। तल्लक्षणम्–

प्रसभमपि ननौ रलौ गुरुः।

नस्त्रिलघुः। द्वौ नकारो। रलमध्यः। लघुगुरू अन्ते॥१३॥

न्यासः–	न	न	र	ल	गु
	।।।	।।।	ऽ।ऽ	।	ऽ

धरणिज अर्थात् मंगल, चतुर्थ स्थान में गया हो तब ज्वर, जठर अर्थात् उदर का रोग, असृग् अर्थात् रक्तविकार की उत्पत्ति होती है। तथा कुपुरुष अर्थात् दुष्ट पुरुष

१. छन्दोमञ्जर्यां तु "तच्चेन्द्रवंशा प्रथमाक्षरे गुरौ"।

से प्राप्त समागम से अर्थात् बलात्कार के द्वारा अभद्र अर्थात् अशुभ अवसर उपस्थित करता है। यह प्रसभच्छन्द है।

प्रसभ छन्द का लक्षण–

दो नगण अर्थात् तीन-तीन लघु, रगण अर्थात् मध्य लघु तथा अन्त में लघु-गुरु हो तो प्रसभछन्द समझना चाहिए।।१३।।

विशेष–प्रसभछन्द का न्यास विवृति में द्रष्टव्य है।

अथ पञ्चमस्थस्य भौमस्य फलं मालत्याऽऽह–

रिपुगदकोपभयानि पञ्चमे
तनयकृताश्च शुचो महीसुते।
द्युतिरिपि नास्य चिरं भवेत् स्थिरा
शिरसि कपेरिव मालती यथा।।१४।।

पञ्चम स्थानगत मंगल का फल मालतीछन्द में कहते हैं–

गोचर का पंचम मंगल शत्रु, रोग, क्रोध और भय देता है। संतान-शोक देता है। शरीर का तेज उसी प्रकार स्थिर नहीं रहता है, जिस प्रकार वानर के सिर पर मालती की माला।१४।।

महीसुते भौमे पञ्चमस्थे। रिपुः शत्रुः। गदो रोगः। कोपः क्रोधः। भयं भीतिः। एतानि भवन्ति। तनयकृता पुत्रकृताश्च शुचः शोका भवन्ति। अस्य जन्तोर्द्युतिरपि शरीरकान्तिरपि स्थिरा स्थायिनी चिरं बहुकालं च न भवति। यथा कपेर्वानरस्य शिरसि मूर्धनि। मालती पुष्पविशेषः। स्थिरा न भवति, चापल्यात्। वृत्तमिदं मालती। अस्या लक्षणम्–

[१]नजजरकैरपि मालती मता।

नस्त्रिलघुः। जो गुरुमध्यः। द्वौ जकारौ। रलमध्यः। एतैर्मालती मताऽभिमता।।१४।।

न्यासः–	न	ज	ज	र
	।।।	।ऽ।	।ऽ।	ऽ।ऽ

महीसुत अर्थात् मंगल पञ्चमस्थान में स्थित हो, तब रिपु अर्थात् शत्रु, गद अर्थात् रोग, क्रोध तथा भय उत्पन्न होता है। सन्तान के द्वारा उत्पन्न शोक को भी झेलना पड़ता है। इस जातक की द्युति अर्थात् शरीर की कान्ति बहुत समय तक स्थिर नहीं रहती है। जिस प्रकार कपि अर्थात् वानर के सिर पर मालती संज्ञक पुष्प विशेष उसकी चञ्चलता के कारण स्थिर नहीं रहता है। यह मालती छन्द है।।१४।।

मालती छन्द का लक्षण–

नगण अर्थात् तीन लघु, दो जगण अर्थात् मध्यगुरु दो बार तथा अन्त मे रगण

अर्थात् मध्य लघु हो तो मालतीछन्द समझना चाहिये।

विशेष–मालती छन्द का न्यास विवृति में द्रष्टव्य है।

विशेष व्याख्या–"माँ लक्ष्मीं ललति" अर्थात् जो लक्ष्मी को आवेष्टित करता उस पुष्प विशेष का नाम मालती है। इसी को जातिपुष्प तथा चमेली का फूल भी कहा जाता है। सुमनापुष्प के नाम से भी यह प्रसिद्ध है। यथा–अमरकोष २/४/७२.

'सुमना मालती जातिः'।

अथ षष्ठस्थस्याङ्गारकस्य फलमपरवक्त्रेणाह–

रिपुभयकलहैर्विवर्जितः सकनकविद्रुमताम्रकामगः।
रिपुभवनगते महीसुते किमपरवक्त्रविकारमीक्षते।।१५।।

षष्ठ स्थानगत मंगल का फल अपरवक्त्र छन्द में कहते हैं–

जन्मराशि से षष्ठ स्थान में मंगल हो तो शत्रुभय और कलह से रहित, सुवर्ण, प्रवाल और ताँबे का लाभ होता है। तथा उसको क्या दूसरे मनुष्य के मुखविकार को देखना पड़ता है? कभी नहीं। यह अपरवक्त्रा छन्द है।।१५।।

महीसुते भौमे रिपुभवनगते षष्ठस्थानस्थे। रिपुः शत्रुः। भयं भीतिः। कलहो विरोधः। एतैर्विवर्जितो रहितः। कनकस्य कनकेन सुवर्णेन सहितस्य विद्रुमस्य प्रवालस्य ताम्रस्य शुल्बस्य चागमो लाभो भवति। एवंविधे सति नरोऽपरस्यान्यस्य वक्त्रविकारं मुखविकृतिं किमीक्षते किमिति पश्यति; अपि तु न पश्यतीत्यर्थः। अत्याढ्यत्वात्। वृत्तमिदमपरवक्त्रम्। तल्लक्षणम्–

ननरलगयुतौ नजौ जरौ भवति सदा परवक्त्रमीदृशम्।

नस्त्रिलघुः। द्वौ नकारौ। रलमध्यः। लघुगुरू। एतैर्युक्तौ। नजौ जरौ। नकारस्त्रिलघुः। जो गुरुमध्यः। द्वौ जकारौ। रलमध्यः। एवंविधं सदा सर्वकालमपरवक्त्रं भवति।।१५।।

न्यासः–	न	न	र	ल	गु
	॥।	॥।	ऽ।ऽ	।	ऽ
	न	ज	ज	र	
	॥।	।ऽ।	।ऽ।	ऽ।ऽ	

महीसुत अर्थात् मंगल षष्ठस्थान में स्थित हो तब शत्रु-भय और कलह से विवर्जित अर्थात् मुक्त रहता है। कनक अर्थात् सुवर्ण से युक्त, विद्रुम अर्थात् प्रवाल (मूँगा) एवं शुल्ब अर्थात् ताँबा का लाभ प्राप्त कराता है। इस प्रकार की स्थिति रहने पर क्या वह व्यक्ति किसी दूसरे का वक्त्रविकार अर्थात् मुख विकार को देखता है? अर्थात् वह किसी के मुखविकार को नहीं देखता है। तात्पर्य यह है कि वह स्वयं

अपनी सम्पन्नता के कारण परमुखापेक्षी नहीं होता है।

अपरवक्त्राछन्द का लक्षण—दो नगण अर्थात् तीन लघु दो बार, रगण अर्थात् मध्य लघु, लघु, गुरु। नगण अर्थात् तीन लघु, दो जगण अर्थात् मध्य गुरु दो बार तथा रगण अर्थात् मध्य लघु हो तो अपरवक्त्राछन्द समझना चाहिये।।१५।।

विशेष—अपरवक्त्राचन्द का न्यास विवृति में द्रष्टव्य है।

विशेष व्याख्या—अपरवक्त्र छन्द का लक्षण प्रस्तुत करते हुये आचार्य भट्टोत्पल ने पाद-भेद का उल्लेख नहीं किया है। वस्तुतः विषम पद (१,३) में न-न-र-ल-गु तथा सम (२,४) पद में न-ज-ज-र गण होते हैं। जैसा कि विवृति के न्यास से स्पष्ट है। छन्दोमञ्जरी में इसका लक्षण स्पष्टतया उपस्थापित है-

अयुजि ननरला गुरुः समे,
तदपरवक्त्रमिदं नजौ जरौ।।

अथ सप्तमाष्टमनवमस्थस्य भौमस्य फलं विलम्बितगतिनाह–

कलत्रकलहाक्षिरुग्जठररोगकृत् सप्तमे
क्षरत्क्षतजरूक्षितः क्षपितवित्तमानोऽष्टमे।
कुजे नवमसंस्थिते परिभवार्थनाशादिभि-
र्विलम्बितगतिर्भवत्यबलदेहधातुक्लमैः।।१६।।

सप्तम, अष्टम और नवम स्थानगत मंगल का फल विलम्बितगति छन्द में कहते हैं–

यदि मंगल जन्म राशि से सप्तम स्थान में हो तो स्त्री के साथ विरोध, नेत्ररोग तथा उदररोग होता है। अष्टम में हो तो निकलते हुए रुधिर से विवर्ण शरीर, धन और मान का नाश होता है। जिसके नवम में मंगल हो वह पराभव, अर्थ नाश आदि से शरीर में निर्बलता तथा धातुओं के क्षय से मन्दगति वाला हो जाता है। यह विलम्बितगति छन्द है।।१६।।

कलत्रकलहाक्षिरुगिति। कुजे भौमे सप्तमे कलत्रं भार्या तेन सह कलहो विरोधः। अक्षिरुक् चक्षुष्पीडा। जठररोग उदररोगः। एतान् करोति। क्षरत्क्षतजरुक्षित इति। अष्टमे अष्टमस्थे भौमे। क्षरत् स्रवत् क्षतजं रक्तं तेन रूक्षितो विवर्णीकृतः। क्षपितवित्तमानः। वित्तं धनं मानं पूजा ते क्षपिते नष्टे यस्य। कुजे नवमसंस्थित इति। कुजे भौमे नवमस्थानस्थे परिभवैरभिभवनैः। अर्थनाशैर्वित्तक्षयैः। आदि ग्रहणात् पीडाभिः। एवमादिभिर्दोषैः। तथा अबलत्वेन निष्प्रामाणाण्यत्वेन देहस्य शरीरस्य।

---

१. छन्दोमञ्जर्यां तु "अयुजि नयुगरेफतो यकारो युजि तु नजौ जरगाश्च पुष्पिताग्रा"।

तथा धातूनां क्लमेन ग्लानत्वेन।

वसासृग्मांसमेधोऽस्थिमज्जाशुक्राणि धातवः।

एतैर्विलम्बितगतिर्भवति। विलम्बिता विघ्निता गतिर्गमनं यस्य। अशक्तित्वात्। वृत्तमिदं विलम्बितगतिः। तल्लक्षणम्–

विलम्बितगतिर्जसौ जसयलैर्गयुक्तैर्भवेत्।

जो गुरुमध्यगतः। सोऽन्तगुरुः। पुनरपि जकारसकारौ। यकार आदिलघुः। अन्ते लघुगुरू। एतैर्विलम्बितगतिः।।१६।।

न्यासः:–	ज	स	ज	स	य	ल	गु
	।ऽ।	।।ऽ	।ऽ।	।।ऽ	।ऽऽ	।	ऽ

मंगल सप्तम स्थान में हो तब कलत्र अर्थात् पत्नी के साथ कलह होता है। अक्षिरुक् अर्थात् नेत्रपीड़ा और जठर अर्थात् उदर का रोग करता है। अष्टमस्थान में मंगल के होने पर क्षरत् अर्थात् स्रवित रक्त के कारण व्यक्ति विकृत वर्ण का हो जाता है। क्षपित वित्त अर्थात् धन और मान-सम्मान नष्ट हो जाता है। नवम-स्थान में गया हुआ मंगल परिभव अर्थात् पराजय और धननाश करता है। 'आदि' शब्द से इनसे सम्बन्धित अन्य दोषों को भी समझना चाहिये। इसके (मंगल के) निर्बल होने के कारण शरीर का और धातुओं का क्षय होने से कष्ट होता है।

वसा, रक्त, मांस, मेद, अस्थि, मज्जा और शुक्र; ये सात प्रकार की धातुयें शरीरगत होती हैं।

इनसे विलम्बित अर्थात् विघ्नपूर्ण गति अर्थात् यात्रा (गमन) होती है। इससे उसका असमार्थ्य सिद्ध होता है। यह श्लोक विलम्बित-गतिसंज्ञक छन्द में विरचित है।

विलम्बितगतिछन्द का लक्षण–

जगण अर्थात् मध्य गुरु, सगण अर्थात् अन्त्य गुरु, जगण अर्थात् मध्य गुरु, सगण अर्थात् अन्त्य गुरु, यगण अर्थात् आदि लघु तथा अन्त में लघु गुरु हो तो विलम्बितगति छन्द समझना चाहिये।।१६।।

अथ दशमैकादशस्थस्य कुजस्य फलं पुष्पिताग्रयाऽऽह–

दशमगृहगते समं महीजे
विविधधनाप्तिरुपान्त्यगे जयश्च।
जनपदमुपरि स्थितश्च भुङ्क्ते
वनमिव षट्चरणः सुपुष्पिताग्रम्।।१७।।

यदि जन्म राशि से दशम स्थान में मंगल हो तो मध्यम फल तथा एकादशस्थान में हो तो अनेक प्रकार के धन की प्राप्ति होती है। वह पुष्पित अग्रभाग वाले वृक्षों से युत वन में भ्रमर की तरह लोगों में प्रधान होकर भोग करता है। यह सुपुष्पिताग्रा

(पुष्पिताग्रा) छन्द है॥१७॥

महीजेऽङ्गारके दशमगृहगते दशमस्थानं प्राप्ते। समं न शुभं नाप्यशुभं फलम्। उपान्त्यगे एकादशस्थे विविधानां नानाप्रकारणां धनानां वित्तानामाप्तिः प्राप्तिश्च भवति। उपरि मूर्ध्नि सर्वेषां जनानां प्राधान्येन स्थितो जनपदं लोकान् भुङ्क्तेऽश्नाति उपजीवति। यथा सुपुष्पिताग्रं वनं षट्चरणो भ्रमर उपरि स्थितो भुङ्क्ते। शोभनं कृत्वा पुष्पितानि सञ्जातकुसुमानि अग्राणि प्रान्तानि यस्मिन् वने। वृत्तमिदं सुपुष्पिताग्रम्। तल्लक्षणम्–

भवति जगति नौ ततश्च रो यो नजसहितैर्जरगैश्च पुष्पिताग्रा।

नस्त्रिलघुः। द्वौ नकारौ। ततः परमनन्तरं रलमध्यः। य आदिलघुः। पुनर्नकारः। जो गुरुमध्यः। आभ्यां सहितैर्जरगैः। जो गुरुमध्यः। रलमध्यः। अन्ते गुरुः। एतैर्जगति सुपुष्पिताग्रा भवति।।१७।।

न्यासः–	न	न	र	य	
	।।।	।।।	ऽ।ऽ	।ऽऽ	
	न	ज	ज	र	गु
	।।।	।ऽ।	।ऽ।	ऽ।ऽ	ऽ

महीज अर्थात् मंगल दशम स्थान में होकर समफल अर्थात् शुभाशुभ से रहित होता है। उपान्त्य अर्थात् एकादश स्थान का मंगल विविध प्रकार की धन-सम्पत्ति को देता है। सभी लोगों की मूर्धा अर्थात् शीर्ष पर प्रधान पुरुष के रूप में स्थित होकर लोगों का उपभोग करता है। वह सुन्दर पुष्पित अग्रभाग वाले वन में षट्चरण अर्थात् भ्रमर द्वारा भोग किये जाने के समान, भोग करता है। शोभायमान समुत्पन्न पुष्प के अग्रभाग चतुर्दिक् हों, इस प्रकार के वन में भ्रमर के भोग करने के सदृश यह भोगता है। सुपुष्पिताग्रछन्द (पुष्पिताग्रा) है।

पुष्पिताग्राछन्द का लक्षण–

दो नगण अर्थात् दो बार तीन लघु, रगण अर्थात् मध्य लघु, यगण अर्थात् आदि लघु, नगण अर्थात् तीन लघु, जगण दो बार अर्थात् मध्यगुरु दो बार, रगण अर्थात् मध्य लघु तथा अन्त में गुरु हो तो पुष्पिताग्राछन्द समझना चाहिये॥१७॥

विशेष–पुष्पिताग्राछन्द का न्यास विवृति में द्रष्टव्य है।

अथ द्वादशस्थस्य भौमस्य फलमिन्द्रवंशयाऽऽह–

नानाव्ययैर्द्वादशगे महीसुते
सन्ताप्यतेऽनर्थशतैश्च मानवः।
स्त्रीकोपपित्तैश्च सनेत्रवेदनै–
र्योऽपीन्द्रवंशाभिजनेन गर्वितः।।१८।।

द्वादश स्थानगत मंगल का फल इन्द्रवंशा छन्द में कहते हैं–

जिसकी जन्म राशि से व्ययस्थान में मंगल हो वह इन्द्र के वंश में उत्पत्ति के गर्व से युत होने पर भी अनेक प्रकार के व्यय, अनेक प्रकार के उपद्रव, स्त्री के ऊपर क्रोध, पित्त और नेत्र रोग से पीड़ित होता है। अर्थात् श्रेष्ठ कुल में उत्पन्न मनुष्य भी अनेक प्रकार के व्यय आदि से पीड़ित होता है। यह इन्द्रवंशा छन्द है॥१८॥

महीसुते भौमे द्वादशगे मानवः पुरुषो नानाप्रकारैर्व्ययैरर्थक्षतिभिरनर्थशतैश्चोपद्रवैर्बहुभिः सन्ताप्यते सोपतापं क्रियते। स्त्रीकोपैः स्त्रियां कोपैः। पित्तेन च। एतैःस्त्रीकोपपित्तैः। सनेत्रवेदनैश्चक्षुष्पीडासहितैरपि मानवः सन्ताप्यते। अपिशब्दः सम्भावनायां वर्तते। इन्द्रवंशाभिजनेनापि गर्वितः। इन्द्रवंशः कुलम्। इन्द्रवंशोऽभिजनः। पूर्ववंशो यस्य तेन यो गर्वितः साभिमानः सोऽपि सन्ताप्यते, किमुतान्ये। वृत्तमिदमिन्द्रवंशा। तल्लक्षणम्–

[१]ताविन्द्रवंशा जरसंहितौ मता।

तोऽन्तलघुः। तौ द्वौ। तकारौ जरसंहितौ जो गुरुमध्यः रलमध्यः। तौ जरसहितौ जराभ्यां संयुक्तौ इन्द्रवंशाभिमता।

न्यासः–	त	त	ज	र
	ऽऽ।	ऽऽ।	।ऽ।	ऽ।ऽ

तथा च यवनेश्वरः–

नृपानलव्यालविषाग्निशस्त्रव्याध्यर्थनाशी क्षयभङ्गकारी।
भौमः शशिस्थानगतो द्वितीये त्वनर्थसूयामिषवञ्चनाकृत्॥
ऐश्वर्यमानद्युतिहर्षकारी तृतीयसंस्थोऽन्नसुवर्णदश्च।
चतुर्थगस्तूदररुग्जरासृक्प्रवृत्तिनिर्वेदकरो धराजः॥
सुतार्थनाशक्षतवैरमोषव्याधिप्रदः पञ्चमराशिसंस्थः।
षष्ठे कुजेऽरिक्षयमानहर्षप्रख्यापनारोग्यसमृद्धिकारी॥
जामित्रसंस्थो धनमित्रनाशक्लेशोदराक्ष्यामयरोगकृत् स्यात्।
भौमेऽष्टमे रुग्विषशत्रुशस्त्रक्षतक्षयोपद्रवदैन्यकारी।
शस्त्रक्षत्ताक्षेमसुवर्णनाशखेदाध्वकारी नवमो महीजः।
मेषूरणे व्याध्यरिशस्त्रचौरव्रणार्तिकृत् सिद्धिकरश्च पश्चात्॥
मानात्मजाज्ञाक्षितिताम्रहेमद्युतिप्रदो रुद्रपदेऽरिजिच्च।
स्त्रीविग्रहोद्वेजनपादरोगस्वप्रावभङ्गश्रमदः कुजोऽन्त्ये॥इति॥१८॥

महीसुत अर्थात् मंगल के द्वादश स्थान में होने पर मनुष्य विविध प्रकार के व्यय, धन हानि और सैकड़ों प्रकार के उपद्रवों से सन्ताप प्राप्त करता है। स्त्री के क्रोध से तथा पित्त की वृद्धि से और नेत्रपीड़ा से वह पीड़ित होता है। 'अपि' शब्द सम्भावना

---

१. छन्दोमञ्जर्यां तु "स्वागता रनभगैर्गुरुणा च"।

वाचक है। इन्द्रवंश अर्थात् इन्द्र के कुल में उत्पन्न व्यक्ति भी अर्थात् जिसके पूर्वज इन्द्र के वंश के हों, इस अभिमान से युक्त व्यक्ति भी सम्पीडित रहता है। फिर अन्य कुलोत्पन्न व्यक्ति का क्या कहना? यह इन्द्रवंशासंज्ञक छन्द है।

इन्द्रवंशाछन्द का लक्षण–

तगण दो बार अर्थात् दो बार अन्त्य लघु, जगण अर्थात् मध्य गुरु तथा अन्त में रगण अर्थात् मध्य लघु हो तो इन्द्रवंशाछन्द समझना चाहिए।

विशेष–इन्द्र वंशाछन्द का न्यास विवृति में द्रष्टव्य है।

जैसाकि आचार्य यवनेश्वर ने कहा है–

चन्द्रराशि से प्रथम स्थान में स्थित मंगल राजा, अग्नि, सर्प, विष की अग्नि, शस्त्र, व्याधि तथा धन के द्वारा कष्ट देता है। यह धनहानि और मानभंग कराता है। द्वितीय स्थान में स्थित मंगल अनर्थ, ईर्ष्या, आहार आदि की वञ्चना करता है। तृतीय स्थान में स्थित मंगल ऐश्वर्य, सम्मान, कान्ति और प्रसन्नता देता है और अन्न तथा सुवर्ण प्रदान करता है। चतुर्थस्थान का मंगल उदररोग, वार्धक्य, रक्तस्राव आदि से पीड़ित करता है। पञ्चम स्थान में स्थित मंगल सन्तान और धन का नाश, दुर्घटना, वैर,चोरी तथा रोग देता है। षष्ठस्थान में स्थित मंगल शत्रु-संहार, सम्मान, प्रसन्नता, प्रतिष्ठा, आरोग्य और उन्नति देता है। सप्तमस्थ मंगल धन और मित्र का विनाश, दुःख तथा उदर और नेत्ररोग देता है। अष्टमस्थ मंगल रोग, विष, शत्रु, शस्त्राघात से विघ्न लाता है। तथा दीनता लाता है। नवमस्थ मंगल शस्त्राघात, अमंगल, सुवर्ण-हानि, दुःख और परिभ्रमण कराता है। दशम स्थान में स्थित मंगल रोग, शत्रु, शस्त्र, चौर और व्रण देता है। अन्त में कार्य सिद्धि करता है। एकादश स्थान में स्थिति मंगल सम्मान, सन्तान, राज्य, भूमि, ताम्र और सुवर्ण-सदृश कान्ति देता है। द्वादशस्थ मंगल स्त्री-विवाद, व्याकुलता, पैर का रोग, दुःस्वप्न, मानभङ्ग और क्लेश कारक श्रम कराता है॥१८॥

अथ बुधस्य फलानि विवक्षुस्तत्र जन्मराशिस्थस्यास्य फलं स्वागतयाऽऽह–

दुष्टवाक्यपिशुनाहितभेदैर्बन्धनैः सकलहैश्च हृतस्वः।
जन्मगे शशिसुते पथि गच्छन् स्वागतेऽपि कुशलं न शृणोति॥१९॥

जन्मराशिगत बुध का फल स्वागताछन्द में कहते हैं–

जिसकी जन्म राशि में बुध हो वह मनुष्य कठोर वाणी, चुगलखोरी, शत्रुता और पारस्परिक भेद से नष्ट धन वाला होता है। तथा उसके शुभागमन में भी कुशलवार्ता कोई नहीं सुनता। यह स्वागता छन्द है॥१९॥

---

१. छन्दोमञ्जर्यां तु "ननमयययुतेयं मालिनी भोगिलोकैः"।

जन्मगे जन्मराशिस्थे शशिसुते बुधे। दुष्टवाक्यैरप्रियाभिधायिभिर्वाक्यैर्वचनैः पैशुन्येन सूचकत्वेन अहितेन विप्रियेण भेदेन पृथक्करणेन। एतैर्दोषैः। तथा बन्धनैः। किंभूतैः? सकलहैः कलहयुक्तैश्च। हृतस्वोऽपहृतधनो भवति। पथि गच्छन् अध्वनि व्रजन् स्वागतेऽपि स्वागतं शोभनमागतं तस्मिन्नपि कुशलं न शृणोति। न तस्य स्वागतेऽपि कुशलवार्ता भवति, किं पुनः फलत इति। वृत्तमिदं स्वागता, तल्लक्षणम्–

[१]स्वागता रनभगैर्गुरुतोऽन्ते।

रलमध्यः। नस्त्रिलघुः। भ आदिगुरुः। गुरुश्च। पुनरपि गुरुरन्ते। एतैः स्वागता भवति।।१९।।

न्यासः–	र	न	भ	गु	गु
	ऽ।ऽ	।।।	ऽ।।	ऽ	ऽ

जन्मग अर्थात् जन्मराशि में स्थित शशिसुत अर्थात् चन्द्रमा का पुत्र बुध स्थित हो तब दुष्ट वाक्य अर्थात् अप्रिय कटु शब्दों से, पिशुनता अर्थात् चुगल खोरी के द्वारा, कष्टकारी विभेद से कष्ट मिलता है। तथा बन्धन, विवाद, धनहानि तथा धनापहरण होता है। मार्ग में चलता हुआ स्वागत के अवसर पर भी कुशलता सुनने को नहीं मिलती है। अर्थात् स्वागत में भी कोई कुशलवार्ता नहीं करता है। पुनः उसके आगे प्राप्तव्य फल का क्या विचार किया जाये। यह स्वागता छन्द है।

स्वागताछन्द का लक्षण–

रगण अर्थात् मध्य लघु, नगण अर्थात् तीन लघु, भगण अर्थात् आदि गुरु तथा अन्त में दो बार गुरु वर्ण हो तो स्वागताछन्द समझना चाहिये।।१९।।

विशेष–स्वागताछन्द का न्यास विवृति में द्रष्टव्य है।

अथ द्वितीयतृतीयस्थानस्थस्य बुधस्य फलं द्रुतपदेनाह–

परिभवो धनगते धनलब्धिः सहजगे शशिसुते हृदयाप्तिः।
नृपतिशत्रुभयशङ्कितचित्तो द्रुतपदं व्रजति दुश्चरितैः स्वैः।।२०।।

द्वितीय और तृतीय स्थानगतबुध का फल द्रुतपदछन्द में कहते हैं–

यदि जन्म राशि से द्वितीय स्थान में बुध हो तो पराजय तथा धन का लाभ, तृतीयस्थान में हो तो मित्र का लाभ कराने वाला होता है। राजा और शत्रु के भय से शङ्कित होकर अपने दुश्चरित्रों के कारण भागने वाला होता है। यह द्रुतपद छन्द है।।२०।।

धनगते द्वितीयस्थानस्थे शशिसुते बुधे। परिभवोऽसम्मानो भवति। सहजगे तृतीयस्थानस्थे बुधे सुहृदयाप्तिर्मित्रलाभो भवति। स्वैरात्मीयैर्दुश्चरितैः। नृपति-

---

१. छन्दोमञ्जर्यामपीदमेव।

शत्रुभयशङ्कितचित्तः। नृपति राजा। शत्रुररिः। तद्भयैः शङ्कितं सञ्जातशङ्कं चितं मनो यस्य। तथाभूतो द्रुतपदं त्वरितपदं व्रजति गच्छति। सापराधत्वात् सभयत्वाच्च। वृत्तमेतद् द्रुतपदम्। तल्लक्षणम्–

द्रुतपदं नभझयैः कथितं तत्।

नस्त्रिलघुः। भ आदिगुरुः। जो गुरुमध्यः। आदिलघुर्यः। एतैर्द्रुतपदमेतद् वृत्तं कथितम् ॥२०॥

न्यासः–	न	भ	ज	य
	।।।	ऽ।।	।ऽ।	।ऽऽ

धन अर्थात् द्वितीय स्थान में स्थित बुध के द्वारा परिभव अर्थात् पराजय (असम्मान) होता है। तृतीय स्थान में स्थित बुध मित्र लाभ कराता है। अपने दुराचरण के कारण राजा और शत्रु से भय के साथ ही मन सदैव भयभीत रहता है। इस स्थिति में वह भाग-दौड़ करता रहता है। क्योंकि वह अपराधबोध से भयाक्रान्त होता है। यह द्रुतपद छन्द है।

द्रुतपदछन्द का लक्षण–नगण अर्थात् तीन लघु, भगण अर्थात् आदि गुरु, जगण अर्थात् मध्य गुरु तथा अन्त में यगण अर्थात् आदि लघु वर्ण हो तो द्रुतपदछन्द समझना चाहिए॥२०॥

विशेष व्याख्या–द्रुत पद के लक्षण में आचार्य ने नगण, भगण, जगण और यगण का पाठ किया है। जबकि छन्दोमञ्जरी में श्री गंगादास ने नगण, भगण, नगण, यगण का क्रम रखा है। तृतीय गण नगण और जगण की भिन्नता प्राप्त होती है। जैसाकि छन्दोमञ्जरी में द्रुत पद का लक्षण निम्नलिखित है–

द्रुतपदं भवति नभनयाश्चेत्।

न	भ	न	य
।।।	ऽ।।	।।।	।ऽऽ

विशेष–द्रुतपदछन्द का न्यास विवृति में द्रष्टव्य है।

अथ चतुर्थपञ्चमस्थस्य बुधस्य फलं रुचिरयाऽऽह–

चतुर्थगे स्वजनकुटुम्बवृद्धयो
धनागमो भवति च शीतरश्मिजे।
सुतस्थिते तनयकलत्रविग्रहो

---

१. छन्दोमञ्जर्यां तु "त्रयाशाभिर्मनजरगाः प्रहर्षणीयम्"।

२. कुथास्तरणं च इति पाठान्तरम्।

३. छन्दोमञ्जर्यां तु "दोधकमिच्छति भत्रितयादगौ"।

निषेवते न च रुचिरामपि स्त्रियम्।।२१।।

चतुर्थ-पञ्चमस्थ बुध का फल रुचिराछन्द में कहते हैं–

यदि जन्म राशि से चतुर्थ स्थान में बुध हो तो अपने जन और बन्धुओं की वृद्धि तथा धन की प्राप्ति कराता है। पञ्चमस्थान में हो तो पुत्र तथा पत्नी के साथ कलह एवं अपने उद्वेग के कारण सुन्दरी स्त्री का भी उपभोग नहीं करने देता है। यह रुचिराछन्द है।।२१।।

चतुर्थगे शीतरश्मिजे चन्द्रपुत्रे बुधे। स्वजनकुटुम्बवृद्धः स्वजना आत्मीय जनाः। कुटुम्बा ज्ञातयः एषां वृद्धयः। धनागमश्च भवति। सुतस्थिते पञ्चमस्थानस्थिते बुधे। तनयकलत्रविग्रहः। तनयाः पुत्राः। कलत्रं भार्या। तैः सह विग्रहः कलहः। रुचिरां शोभनामपि स्त्रियं रामां न निषेवते नोपभुङ्क्ते। सोद्वेगत्वात्। वृत्तमिदं रुचिरा। तल्लक्षणम्–

जभौ[1]सजौ गिति रुचिरा चतुर्ग्रहैः।

जो गुरुमध्यः। भ आदिगुरुः। सोऽन्तगुरुः। पुनर्जकारः। अन्ते गुरुः। इत्येवंप्रकारः। चतुर्ग्रहैः। चतुर्थवर्णैर्नवमवर्णैश्च विरामः।।२१।।

न्यासः–	ज	भ	स	ज	गु
	।ऽ।	ऽ।।	।।ऽ	।ऽ।	ऽ

शीतरश्मिज अर्थात् चन्द्रपुत्र बुध चतुर्थ स्थान में स्थित हो तब अपने आत्मीयजनों का तथा कुटुम्ब, परिवार का उन्नयन होता है। साथ ही धनार्जन भी होता है। पञ्चमस्थान में स्थित बुध, पुत्र तथा पत्नी के साथ विग्रह अर्थात् कलह कराता है। सुन्दरी कामिनी स्त्री का भी उपभोग नहीं कर पाता है, क्योंकि वह स्वयं उद्विग्न रहता है। यह रुचिरा छन्द है।

रुचिरा छन्द का लक्षण–

जगण अर्थात् मध्य गुरु, भगण अर्थात् आदि गुरु, सगण अर्थात् अन्त्य गुरु, जगण अर्थात् मध्य गुरु तथा अन्त में गुरु हो तो रुचिराछन्द समझना चाहिये।।२१।।

विशेष–रुचिराछन्द का न्यास विवृति में द्रष्टव्य है।

अथ षष्ठसप्तमाष्टमस्थस्य बुधस्य फलं प्रहर्षण्याऽऽह–

सौभाग्यं विजयमथोन्नतिं च षष्ठे वैवर्ण्यं कलहमतीव सप्तमे ज्ञः।
मृत्युस्थे जयसुतवस्त्रवित्तलाभा नैपुण्यं भवति मतिप्रहर्षणीयम्।।२२।।

षष्ठ, सप्तम तथा अष्टम स्थानगत बुध का फल प्रहर्षणी छन्द में कहते हैं–यदि बुध जन्मराशि से छठी राशि में हो तो सौभाग्य, विजय तथा उन्नति कराता है। सातवीं राशि में हो तो विवर्णता एवं कलह कराता है। आठवीं राशि में हो तो विजय, पुत्र वस्त्र तथा धन का लाभ एवं हर्षित करने वाली निपुणता का लाभ कराता है। यह

१. छान्दोमञ्जर्याम् ''वेदैरन्ध्रैम्तौ'' यसना मत्तमयूरम्''।

प्रहर्षणी छन्द है॥२२॥

षष्ठे षष्ठस्थाने ज्ञो बुधः। सौभाग्यं सर्वजनवाल्लभ्यम्। विजयं विशेषजयम्। अथशब्दः पादपूरणे। उन्नतिं। शत्रूणामजितत्वं च कुरुते। सप्तमे सप्तमस्थाने। ववैर्ण्यं विवर्णताम्। अतीवात्यर्थम्। कलहं विरोधं च करोति। मृत्युस्थेऽष्टमस्थानस्थे। जयः। सुताः पुत्राः। वस्त्राण्यम्बराणि। वित्तं धनम्। एतेषां लाभा भवन्ति। मतिप्रहर्षणीयम्। येन बुद्धेः प्रहर्षमुत्पद्यते तथाभूतं नैपुण्यं कलासु सूक्ष्मदर्शितत्वं भवति। प्रहर्षणीयं वृत्तमेतत्। तल्लक्षणम्—

म्नौ ज्रौ गस्त्रिकदशकैः प्रहर्षणीयम्।

मस्त्रिगुरुः। नस्त्रिलघुः। जोगुरुमध्यः। रलमध्यः। अन्ते गुरुः। त्रिकदशकैर्विरामः, त्रिभिर्दशभिश्च यतिर्यस्य तत् प्रहर्षणीयम्॥२२॥

न्यासः—	म	न	ज	र	गु
	ऽऽऽ	।।।	।ऽ।	ऽ।ऽ	ऽ

षष्ठ स्थान में ज्ञ अर्थात् बुध सौभाग्य अर्थात् सर्वजनप्रियता दिलाता है। विजय उन्नति तथा शत्रुओं में अजेय बनाता है। यहाँ पर 'अथ' शब्द पादपूर्ति के लिये है। सप्तमस्थ बुध विवर्ण अर्थात् कुरूप बनाता है। यह अत्यधिक विरोध उत्पन्न करता है। अष्टमस्थ बुध विजय, सन्तान-लाभ, वस्त्रलाभ तथा धन का लाभ कराता है। जिस कार्य से प्रसन्नता मिलती है, उस प्रकार के कला-कर्म में निपुणता दिलाता है। यह प्रहर्षणी छन्द है—

प्रहर्षणीछन्द का लक्षण—मगण अर्थात् तीन गुरु, नगण अर्थात् तीन लघु, जगण अर्थात् मध्य गुरु, रगण अर्थात् मध्यलघु हो तथा अन्त में एक गुरु हो तो प्रहर्षणीछन्द समझना चाहिये॥२२॥

विशेष—प्रहर्षणीछन्द का न्यास विवृति में द्रष्टव्य है।

अथ नवमदशमस्थस्य बुधस्य फलं दोधकेनाह—

विघ्नकरो नवमः शशिपुत्रः कर्मगतो रिपुहा धनदश्च।
सप्रमदं शयनं च विधत्ते तद् गृहदोऽथ२कथां स्तरणं च॥२३॥

नवम तथा दशमस्थानगत बुध का फल दोधकछन्द में कहते हैं—

बुध यदि नवम स्थान में स्थित हो तो विघ्नकारक, दशवीं राशिगत हो तो शत्रुनाशक, धन देने वाला एवं स्त्री, शय्या, स्त्री के शयन का सुन्दर गृह, ऐतिहासिक वार्ता तथा सुन्दर बिछौना प्रदान करता है। यह दोधक छन्द है॥२३॥

नवमस्थानस्थः शशिपुत्रो बुधो विघ्नकरः सर्वकार्याणां विघ्नं करोति। कर्मगतो दशमस्थानस्थो रिपुहा शत्रुहर्ता धनदश्च भवति। सप्रमदं सस्त्रीकं शयनं शय्यां च

१. छन्दोमञ्जर्यामपीदमेव।

२. छन्दोमञ्जर्याम्। "अयुजि प्रथमेन विवर्जिता। द्रुतविलम्बिता हरिणप्लुता"।

विधत्ते ददाति। तद्गृहदः, तस्याः प्रमदाया यद्गृहं वेश्म तद्ददाति। अथशब्दश्चार्थे। कथां चैतिहासिकां ददाति। स्तरणं शय्यापृष्ठं च ददाति। केचित् कुथास्तरणमितीच्छन्ति। कुथो वारणकम्बलस्तदेवास्तरणम्। वृत्तमेतद्दोथकम् । तल्लक्षणम्–

भौ तु भगौ गिति दोथकमेतत्।

भ आदिगुरुः द्वौ भकारौ। पुनर्भकारः। अन्ते गुरुद्वयम्॥२३॥

न्यासः–	भ	भ	भ	गु
	ऽ।।	ऽ।।	ऽ।।	ऽऽ

चन्द्रपुत्र बुध नवम स्थान में स्थित होकर सभी कार्यों के लिये विघ्नकर होता है। कर्मस्थान दशम में स्थित होकर शत्रुनाशक और धन प्रदायक होता है। यह स्त्री सहित शय्या प्रदान करता है। यह स्त्री को गृह को भी प्रदान करता है। यहाँ पर 'अथ' शब्द 'च' शब्द के अर्थ में प्रयुक्त है। यह पौराणिक आख्यानों का श्रवण करने का अवसर देता है। अस्तरण अर्थात् शय्या का उत्तम आच्छादन (बिछौना) देता है। कतिपय आचार्यों ने पलंग का गद्दा प्राप्त होना बतलाया है। 'कुथ' शब्द का अर्थ श्रेष्ठ कम्बल का बिछौना होता है। यह दोथक छन्द है।

विशेष व्याख्या–अमरकोष २/४/१६६ के अनुसार 'कुथ' शब्द कुश का पर्यायवाची है। यथा–'कुश कुथो दर्भः पवित्रम्'। 'कुथ' शब्द का मेदिनीकोष में कम्बल अर्थ किया गया है।

छन्दोमञ्जरी ग्रन्थ में 'दोथक' संज्ञक छन्द है। इसका लक्षण भी उपर्युक्त दोथक के सदृश ही है। द्रष्टव्य छन्दोमञ्जरी द्वितीय स्तबक का श्लोक सं. ११.

दोथक छन्द का लक्षण–दो भगण अर्थात् दो बार आदि गुरु, पुनः भगण अर्थात् पुनः एक बार आदि गुरु तथा अन्त में दो गुरु हों तो दोथक छन्द समझना चाहिए॥२३॥

विशेष–दोथक छन्द का न्यास विवृति में द्रष्टव्य है।

अथैकादशद्वादशस्थस्य बुधस्य फलं मालिन्याऽऽह–

धनसुतसुखयोषिन्मित्रवाहाप्तितुष्टि-
स्तुहिनकिरणपुत्रे लाभगे मृष्टवाक्यः।
रिपुपरिभवरोगैः पीडितो द्वादशस्थे
न सहति परिभोक्तुं मालिनीयोगसौख्यम्॥२४॥

एकादश तथा द्वादश स्थानगत बुध का फल मालिनीछन्द में कहते हैं–

यदि बुध जन्मराशि से ग्यारहवें स्थान में स्थित हो तो धन, पुत्र, सुख, स्त्री, मित्र तथा वाहन की प्राप्ति कराने वाला होता है। मधुरभाषी होता है। यदि बारहवें

---

१. छन्दोमञ्जर्यामिदं तामरसम्, तल्लक्षणं च "इह वद तामरसं नजजा यः"।

स्थान में बुध अवस्थित हो तो शत्रु, अनादर तथा रोग से पीड़ित होता है। माला को धारण करने वाली स्त्री के समागम का सुख भोगने के लिये समर्थ नहीं होता है। यह मालिनी छन्द है॥२४॥

क्रौर्यचौर्याभिघाताटवीदुर्गसेनाधिकारास्तथा
रक्तपुष्पद्रुम रक्ता मन्यच्च तिक्तं कटुद्रव्यकूटा-
हिपाशार्जितस्वाः कुमारा भिषक्छाक्यभिक्षु-
क्षपावृत्ति१ कोशेशशाठ्यानि सिद्ध्यन्ति दम्भास्तथा।।

अब मंगलवार को करणीय कर्मों को दण्डकछन्द के तृतीयचरण में कहते हैं–

मंगलवार के दिन धातुओं के आकर (खदान) आदि से सम्बन्धित समस्त कार्य, सोना, अग्नि, मूँगा, शस्त्र, क्रूरता, चोरी, दूसरे के प्रति उपद्रव, वन, दुर्ग, सेनाधिप, रक्तपुष्प वाले वृक्ष, लाल पदार्थ, तिक्त (नीम आदि), कटुद्रव्य (मरीचादि), कूट, सर्प के बन्धन से उपार्जित धन वाले, कुमार, वैद्य, शाक्यभिक्षु (संन्यासी), रात्रि में कार्य करने वाले, कोषाध्यक्ष (खजानची), शठता, दम्भ; इन सब वस्तुओं से

---

१. कौशेय इति पाठान्तरम्।

सम्बन्धित कर्मों की सिद्धि होती है।

क्षितितनयदिन इति। क्षितितनयोऽङ्गारकस्तस्मिन् दिने प्रसिद्ध्यन्ति धात्वाकरादीनि धातूनामाकार उत्पत्तिस्थानम्। धात्वाकरादीनि सर्वाणि धातु द्रव्याणि। आदिग्रहणात् क्षालनं पाचनं च। चामीकरं सुर्वणम्। अग्निः प्रसिद्धः। प्रवालं विद्रुमम्। आयुधं खड्गादि। क्रौर्यं क्रूरत्वम्। चौर्यं स्तेयत्वम्। अभिघातः परोपद्रवः। अटवी अरण्यम्। दुर्गं गिरिजलदुर्गादि। सेनाधिकारास्तथा। तथा तेनैव प्रकारेण सेनाधिपत्यम्। रक्तपुष्पद्रुमा रक्तानि पुष्पाणि लोहितानि कुसुमानि येषां द्रुमाणां वृक्षाणाम्। रक्तं लोहितवर्णं यत्किञ्चित्। तिक्तं निम्बादि। कटुद्रव्यं मरिचादि। कूटैर्दम्भैः। अहिपाशैः सर्पबन्धैरर्जितं स्वं धनं यैः। कुमाराः प्रसिद्धाः। भिषग् वैद्यः। शाक्यभिक्षुः श्रमणकः। क्षपावृत्ती रात्रिवर्तनम्। कोशेशः, कोशो गञ्जस्तस्येशो नायकः केचित् कौशेयं पट्टमितीच्छन्ति। शाठ्यं शठभावः, परकार्यविमुखत्वम्। एतदाश्रितानि सर्वाणि कार्याणि सिद्ध्यन्ति संसिद्धिमायान्ति, तथा तैनैव प्रकारेण दम्भाः सिद्ध्यन्ति। तथा च समाससंहितायाम्—

दुर्गग्रहणकर्माणि हेमकर्माणि यानि च।
तथा च पशुकमार्णि कुर्याद् भौमदिने नरः।।

तथा च यनवेश्वरः—

वधावरोधावृतडिम्बभेदाः स्तेयादिशस्त्रादिविषप्रयोगाः।
दिने कुजस्य ध्वजिनीनिवेशाः कार्याः सुवर्णाजपशुक्रियाश्च।।

तथा च गर्गः—

आयुधं कारयेत् प्राज्ञः पापकर्म तथैव च।
बन्धनाद्यानि कर्माणि लुण्ठनं तु क्षयादिकम्।।
षण्मुखस्यात्र कर्तव्या पूजा च शिखिकुक्कुटैः।
पूजयेदनलं चात्र यन्त्रकार्यं समारभेत।।
मन्त्रकर्म विवाहं च दिने भौमस्य वर्जयेत्।

क्षितितनय अर्थात् मंगल के दिन में ये कार्य सिद्ध होते हैं—धातुओं के आकर अर्थात् उद्‌भव स्थान, सभी प्रकार की धातुएँ, 'आदि' शब्द से शोधन और परिपाक संस्कार, चामीकर अर्थात् सुवर्ण, अग्निकर्म, प्रवाल अर्थात् मूँगा, तलवार आदि शस्त्र, क्रूरकर्म, चौरकर्म, अभिघात अर्थात् परपीडन, अटवी अर्थात् वन, दुर्ग अर्थात् पर्वतीय एवं जलीय राजप्रासाद, सेनाधिकरण तथा सेनाधिपत्य, रक्तपुष्प एवं रक्त पुष्प के वृक्ष, रक्तवर्णीय पदार्थ, निम्बादि तिक्त पदार्थ, मरिचादि कटु द्रव्य, कूट अर्थात् दाम्भिक कर्म, अहिपाश अर्थात् साँपों को पकड़ कर धन अर्जित करने वाले (सपेरे), कुमारों से सम्बन्धित कार्य, भिषक् अर्थात् चिकित्सक, शाक्यभिक्षु अर्थात् बौद्ध

संन्यासी, क्षपावृत्ति अर्थात् रात्रिसेवा, कोशेश अर्थात् कोषाध्यक्ष, कुछ लोगों के मत में कौशेय वस्त्र, शठता का भाव अर्थात् परोपकार रहित; इनसे आश्रित सभी कार्य सिद्ध अर्थात् सफल होते हैं। इस दिन अहंकार प्रवर्धक कार्य भी सिद्ध होते हैं। जैसाकि समास संहिता में कहा गया है–

इस कथन का अभिप्राय यह है कि विजय की कामना से सर्वथा ग्रहों के सुस्थित होने पर अल्प सैन्य बल रहने पर भी विजय प्रयाण करना चाहिये। सुभसमय में प्रयाण करने पर मान, यश और धन का लाभ होता है। जैसाकि यात्रा ग्रन्थकार आचार्य सिद्धार्थ ने कहा है–

मान, विजय, यश और धन का लाभ अनुकूल ग्रह स्थितियों में प्रयाण करने पर मिलता है। ग्रहों की दुःस्थिति होने पर इसके विपरीत परिणाम भोगने पड़ते हैं।

ग्रहों के अशुभ स्थान में स्थित होने पर प्रचुर सैन्य बल के होने पर भी प्रयाण नहीं करना चाहिये। इसी अभिप्राय को आचार्य नन्दी ने भी व्यक्त किया है–दैव से अर्थात् ग्रहयोग से बाधित होने पर किञ्चिद् यात्रा भी राजा के लिये अमंगलकारी और सर्वनाश करने वाली होती है। इसलिये पूर्ण सामर्थ्य होने पर भी दैवबल (ग्रहबल) नहीं रहने पर अपने सुख एवं विजय की कामना करने वाले राजा को प्रयाण (यात्रा) नहीं करना चाहिये।

यह औपछन्दिसिक नामक छन्द है।

औपछन्दिसिक छन्द का लक्षण–

रेफ और यकार अन्त में होते हैं। रेफ अर्थात् रगण अर्थात् मध्य लघु, यगण अर्थात् आदि लघु। शेष लक्षण वैतालीयछन्द के सदृश होते हैं। विषम पाद में छः मात्रा तथा समपाद में आठ मात्रा होने पर सन्त अर्थात् पण्डित प्रवर औपछन्दिसिक छन्द की रचना मानते हैं। इसका न्यास प्रसिद्ध है।।६०।।

दुर्ग का अधिग्रहण, सुवर्ण, संग्रह, पशु कर्मों को मंगलवार के दिन करना चाहिये।

इसी प्रकार, आचार्य यवनेश्वर ने कहा है–

हिंसा, घेरेबन्दी, झड़प, छोटे-मोटे झगड़े, चोरी, शस्त्र और विषप्रयोग, ध्वजारोहण, सुवर्ण तथा बकरे आदि पशु से सम्बन्धित कार्यों को मंगलवार में करे।

जैसाकि आचार्य गर्ग ने कहा है–

शस्त्रकर्म, पापकर्म, बन्धन, लूट-पाट और विनाश कार्य, बुद्धिमान पुरुष

---

१. पिङ्गलच्छन्दःसूत्रे ७ अध्यायस्य ३३ सूत्रानुसारेणास्य 'चण्डदृष्टिप्रपात' इति नाम।

२. पिङ्गलच्छन्दःसूत्रे ७ अध्यायस्य ३४ सूत्रानुसारेण ''राजमाण्डव्यौ'' इति पाठःसाधुः।

मंगलवार को करे। इस दिन षड्मुख अर्थात् भगवान कार्तिकेय की पूजा मयूर और मुर्गे के द्वारा करे। इस दिन अग्नि की पूजा तथा यान्त्रिक कार्यों का आरम्भ करे। मंगलवार के दिन मन्त्रग्रहण तथा विवाह संस्कार कथमपि नहीं करने चाहिये।

अथ बुधस्य दिने यानि कार्याणि क्रियन्ते तानि दण्डकचतुर्थपादेनाह–

हरितमणिमहीसुगन्धीनि वस्त्राणि साधारणं
नाटकं शास्त्रविज्ञानकाव्यानि सर्वाः कलायुक्तयो
मन्त्रधातुक्रियावादनैपुण्यपुण्यव्रतायोगदूता-
स्तथाऽऽयुष्यमायानृतस्नानह्रस्वाणि दीर्घाणि
मध्यानि च च्छन्दतश्चण्डवृष्टिप्रयातानुकारीणि
कार्याणि सिद्ध्यन्ति सौम्यस्य लग्नेऽह्नि वा।।६१।।

अब बुधवार को करणीय कर्मों को दण्डकछन्द के चतुर्थचरण में कहते हैं–

बुधवार के दिन अथवा लग्न में हरितमणि (पन्ना), पृथ्वी, सुगन्धद्रव्य, वस्त्र, साधारण कार्य, नाटक, शास्त्र, विज्ञान, काव्य, समस्त कलाएँ, द्रव्यों का संयोग, मन्त्रक्रिया, धातुक्रिया किसी के साथ विवाद, निपुणता, पुष्य, व्रत ग्रहण, दूत, आयु के लिए हितकार्य, माया, मिथ्या, स्नान (पुण्यस्नान आदि) शीघ्र होने वाला कार्य, परचित्त ग्रहणपूर्वक प्रचण्ड वृद्धि में पदन्यास के अनुकरण करने वाला कार्य अर्थात् कोई ह्रस्व कोई दीर्घ और कोई मध्यम कार्य; इन सब वस्तुओं से सम्बन्धित कर्म की सिद्धि होती है।।६१।।

हरितमणीति। हरितमणीनां संबन्धः। अथवा हरितद्रव्याणां मणीनां च मही भूः। सुगन्धीनि सुगन्धद्रव्याणि। वस्त्राण्यम्बराणि। साधारणमुग्रं सौम्यं च। नाटकं नर्तनम्। शास्त्रं प्रसिद्धम्। विज्ञानमध्यात्मिकम्। काव्यानि प्रसिद्धानि। सर्वा निःशेषाः कला गीतवाद्यनृत्तचित्रलेपकर्मादि। युक्तयो द्रव्याणां योजनम्। मन्त्रक्रिया मन्त्रसाधनम्। धातुक्रिया धातुवादः। वादः परस्परं केनचित् सह वदनम्। नैपुण्यं निपुणता। पुण्यं धर्मक्रियानुसेवनम्। व्रतायोगो व्रतग्रहणम्। दूतो गमागमिकः। तथाऽऽयुष्यमायुषो हितं रसायनवाजीकरणनि। माया व्याजव्यवहरणम्। अनृतमसत्यम्। स्नानं मलापहं पुष्यस्नानादि वा। तथा यानि कार्याणि ह्रस्वाणि क्षिप्रकालकरणीयानि। दीर्घाणि चिरकालकरणीयानि। मध्यानि च शीघ्रं न चिरकालं करणीयानि। तथा छन्दतः परिचित्तग्रहणपूर्वकाणि चण्डवृष्टिप्रयातानुकारीणि कार्याणि। चण्डा चासौ वृष्टिः चण्डवृष्टिः। चण्डवृष्टौ प्रयातं गमनं यत् तदनुकारीणि तत्सदृशानि। तस्यां गमनं पदविन्यासः। कश्चिद्ध्रस्वः, कश्चिद् दीर्घः, कश्चिन्मध्यो भवति। मार्गस्य जलावृतत्वाच्छिथिलत्वात् पदविन्यासस्तथाविधो भवति। तदनुकारीणि कार्याणि सिद्ध्यन्ति। सौम्यस्य बुधस्य लग्नेऽह्नि वा। तथा च समाससंहितायाम्–

स्वाध्यायशिल्पव्यायामकलाकर्मरतानि च।

तानि सौम्यदिने कुर्याद् यदि पापैर्न सङ्गतः।।

तथा च यवनेश्वरः–

स्वाध्यायसेवालिपिलेख्यशिल्पव्यायामनैपुण्यकलाविशेषाः।
इष्टिक्रियाः काञ्चनधातुयुक्तिवाग्युक्तिसन्धिप्रभुता बुधेऽह्नि।।

तथा च गर्गः–

बन्धयोधवधं सर्वं व्यायामं च विशेषतः।
नृपसेवा च यात्रा च तथैव क्रयविक्रयौ।।
वीरांश्च योजयेत् प्राज्ञो बद्धान् पाशांश्च मोचयेत्।
एवं मित्रं च शिष्यं च बन्धुभिः सह सङ्गमम्।।
आश्रमे च तथा भूमौ केदारे वपने तथा।
शिक्षेत रूपकर्माणि दिने चन्द्रसुतस्य च।।

आचार्येण चण्डवृष्टिप्रयातानुकारिणीत्यनेन चण्डवृष्टिप्रयातानां सर्वदण्डकानां लक्षणं प्रदर्शितम्। तथा च–

प्रथमक इह दण्डकश्चण्डवृष्टिप्रयातो भवेन्नद्वयेनाथ रैः सप्तभिः।
प्रतिपदमिह रेफवृद्धाः स्युरर्णार्णवव्यालजीमूतलीलाकरोद्दामशङ्खादयः।।

उत्कृतेरधिकाक्षरो दण्डकः। दण्डका नाम समासवृत्तविशेषा भवन्ति। येषां पादो द्वाभ्यां नकाराभ्यां सप्तभिश्च रेफैर्भवति। नस्त्रिलघुः। रलमध्यः। इहास्मिन् छन्दोलक्षणे प्रथमको दण्डकश्चण्डवृष्टिप्रयातसंज्ञः सप्तविंशत्यक्षरपादो भवति पिङ्गलादीनामाचार्याणां मतेन राजमाण्डव्यौ वर्जयित्वा। तयोस्तु मते एष सुवर्णाख्यः। तथा च तावूचतुः–

सुवर्णश्चण्डवेगश्च प्लवो जीमूत एव च।
बलाहको भुजङ्गश्च समुद्रश्चेति दण्डकाः।।

तथा च पाठान्तरम् –

अर्णोऽर्णवः प्लवश्चैव जीमूतोऽथ बलाहकः।
समुद्रश्च भुजङ्गश्च सप्तैते दण्डकाः स्मृताः।।

एवं नद्वयेन सप्तभिश्च रेफैश्चण्डवृष्टिप्रयातः। प्रतिपदमिह रेफवृद्धाः। इहास्मिन् लक्षणे पदं पदं प्रति प्रतिपदम्। रेफवृद्धा अन्ये स्युर्भवेयुः। एवं नद्वयेन अष्टभिश्च रेफैरर्णः। नवभिरवर्णवः। दशभिर्व्यालः। एकादशभिर्जीमूतः। द्वादशभिर्लीलाकरः। त्रयोदशभिरुद्दामः। चतुर्दशभिः शङ्खः। आदिग्रहणाद् रेफवृद्ध्याऽन्ये कल्पनीयाः। जलदं पद्मादि।

प्रचित इति कविभिवर्णितोऽस्मादिहोपान्तशेषात् त्रिकैरुत्तरैर्नद्वयाद्यैः।

इहास्मिन् लक्षणे प्रचित इति वर्णित उक्तः। अस्मात् पूर्वोक्ताल्लक्षणात् कविभिः

पण्डितैरिहास्मिन् प्रथमदण्डके उपान्ता गृहीता: त्रिका रेफा:। तैस्त्रिकै: शेषान्नकारद्वयादुत्तरै: परत: स्थित: सप्तभिर्यकारै:। अन्वर्थसंज्ञा चेयम्। प्रतिपदं रेफादिवृद्ध्योपचितत्वात् प्रचित इत्युच्यते। शेषरेफतोऽन्यैस्त्रिक: सप्तक:। आचार्येण नद्वयाद् रेफद्वात्रिंशता दण्डक उक्त:। अथ उपचयभवनोपयातस्येत्यस्य न्यास:। नद्वयं रेफा द्वात्रिंशत्।।६१।

हरितमणि अर्थात् रत्न सम्बन्धी कार्य अथवा हरित द्रव्यों और मणियों से सम्बन्धित भूमि, सुगन्ध द्रव्य, वस्त्र, सामान्यतया उग्र एवं सौम्य कार्य, नृत्य-नाटक, शास्त्राभ्यास, आध्यात्मिकज्ञान, काव्यशास्त्र, गीत-वाद्य नृत्य-चित्र-लेपनादि सम्पूर्ण कलाकर्म, युक्ति अर्थात् विविध द्रव्यों का संयोजन, मन्त्रसाधना, धातुकर्म, वाद अर्थात् परस्पर वार्तालाप, नैपुण्य अर्थात् किसी कार्य में महारथ प्राप्त करना, धार्मिक क्रियाओं से पुण्यार्जन, व्रतसंकल्प, गुप्तचरकर्म, आयुष्यवर्धक रसायन एवं वाजीकरण कर्म, माया अर्थात् धन प्रपञ्च, असत्य व्यवहार, स्नान अर्थात् शरीर शुद्ध्यर्थ पुष्यस्नानादि कार्य तथा जो कार्य ह्रस्व अर्थात् शीघ्र करने योग्य हों, दीर्घ अर्थात् अधिक काल में पूर्ण होने वाले कार्य, मध्यकार्य अर्थात् जो शीघ्र अथवा बहुत समय तक न चलने वाले कार्य हों तथा चण्डवृष्टि अर्थात् प्रचण्ड वर्षाकाल में यात्रा करने के सदृश, जिस स्थिति में गमन अथवा पदविन्यास विषम होता है। कुछ पर ह्रस्व कुछ दीर्घ तथा कुछ मध्यम पद प्रयुक्त होते हैं। अभिप्राय यह है कि मार्ग में पानी भर जाने से तथा पिच्छिल मार्ग के कारण पदविन्यास (पद संचरण) ह्रस्व, दीर्घ एवं मध्यम स्वरूप में होता है। इस प्रकार के कार्य बुधवार के दिन तथा बुध ग्रह के लग्न (३,६) में सिद्ध होते हैं। जैसाकि समास संहिता में कहा गया है–

स्वाध्याय, शिल्पकर्म, व्यायाम, कलाकारिता को बुधवार के दिन करना चाहिये। यह विचार लेना चाहिये कि उस समय बुध पापग्रह से युत न हो।

आचार्य यवनेश्वर ने कहा है–

स्वाध्याय, सेवाकार्य, लेखन, शिल्प, व्यायाम, नैपुण्य, विशिष्ट कला, यज्ञकर्म, सुवर्ण, धातु शोधन, वाणी का प्रयोग, सन्धि तथा राजकार्यों को बुधवार के दिन करना चाहिये।

इस सम्बन्ध में आचार्य गर्ग ने कहा है–

बन्धन, युद्ध, बध, व्यायाम, राजसेवा, यात्रा, व्यापारकार्य बुधवार के दिन करना चाहिये। इस दिन शौर्यकर्म, बन्धनों का विमोचन, मित्रों, शिष्यों तथा बन्धुओं के साथ सम्मेलन आश्रम-भूमि तथा खेतों में बीजवपन और शृङ्गार कार्यों का अभ्यास; ये सभी कार्य बुधवार के दिन करने चाहिये।

आचार्य (वराहमिहिर) ने "चण्डवृष्टि-प्रयातानुकारिणी" इस वाक्य का प्रयोग कर दण्डक छन्द के सभी लक्षणों को प्रदर्शित किया है।

यदि दो नगण के पश्चात् सात रगण हों तो उसे "चण्डवृष्टि प्रयात" नामक दण्डकछन्द कहते हैं। सभी दण्डकों के आरम्भ में दो नगणों का होना आवश्यक है। उन दो नगणों के अनन्तर सात से अधिक एक-एक रगण बढ़ाते जायें तो क्रमशः अर्ण, आर्णव, व्याल, जीमूत, लीलाकर, उद्दाम और शङ्ख आदि संज्ञक दण्डकछन्द होते हैं। द्रष्टव्य छन्दोमञ्जरी द्वितीय स्तबक श्लोक संख्या १-२।

उत्कृतिछन्द से अधिक अक्षर दण्डकछन्द में होते हैं। दण्डकछन्द में सामासिक पद प्रयोग अधिक होते हैं। पाद में दो नगण तथा सात रगण होते हैं। नगण अर्थात् तीन लघु, रगण अर्थात् मध्य लघु। यहाँ पर दण्डकछन्द का प्रथम भेद चण्डवृष्टिप्रयात संज्ञक होता है। इसमें सत्ताइस अक्षरों का एक चरण होता है। पिङ्गलादि आचार्यों के मतानुसार राजमाण्डव्य छन्द इससे भिन्न होता है। उनके अनुसार यह सुवर्णसंज्ञक छन्द है। इनका कथन है–

सुवर्ण, चण्डवेग, प्लव, जीमूत, बलाहक, भुजङ्ग और समुद्र; ये दण्डकछन्द के भेद हैं।

इसमें पाठभेद निम्नलिखित मिलता है–

अर्ण, अर्णव, प्लव, जीमूत, बलाहक, समुद्र और भुजङ्ग नामक सात प्रकार के दण्डकछन्द होते हैं।

इस प्रकार दो नगण और सात रगण से चण्डवृष्टि प्रयात नामक दण्डकछन्द निर्मित होता है। प्रत्येक पद में रगण की वृद्धि होती है। इस लक्षण में पद-पद को प्रतिपद कहा गया है। रगण की वृद्धि से अन्य पद निर्मित होते हैं। इस प्रकार से दो नगण तथा आठ रगण से अर्ण, नौ रगण से अर्णव, दस रगण से व्याल, एकादश रगण से जीमूत, द्वादश रगण से लीलाकर, त्रयोदश रगण से उद्दाम तथा चतुर्दश रगण के द्वारा शङ्ख नामक दण्डक छन्द होता है। "आदि" शब्द के प्रयोग से रगण की वृद्धि होने पर अन्य जलज तथा पद्मादि दण्डकछन्दों की परिकल्पना करनी चाहिये।

इस लक्षण में प्रचित शब्द का अर्थ वर्णित है। पूर्वोक्त लक्षण में विद्वानों ने इस प्रथम दण्डक में उपान्त का ग्रहण किया है। तीन रगण के पूर्व दो नगण के पश्चात् स्थित सात यगण से छन्द निर्मित होता है। इनकी नामानुसार संज्ञा है। प्रत्येक पद में रगण की वृद्धि अर्थात् उपचित होने से इसको 'प्रचित' कहा गया है। शेष रगण से अन्य त्रिक अर्थात् सप्तक बनता है। आचार्य ने दो नगण के पश्चात् बत्तीस रगण के प्रयोग पर्यन्त दण्कछन्द कहा है। पूर्व में "उपचयभवनोपयातस्य" के कथन में इसका न्यास प्रदर्शित किया गया है। इसमें दो नगण तथा बत्तीस रगण प्रयुक्त है॥६१॥

अथ बृहस्पतिदिने यानि कर्माणि क्रियन्ते तानि वर्णकदण्डकेनाह–

सुरगुरुदिवसे कनकं रजतं तुरगाः
करिणो वृषभा भिषगौषधयः।
द्विजपितृसुरकार्यपुरःस्थितघर्म-
निवारणचामरभूषणभूपतयः।।
विबुधभवनधर्मसमाश्रयमङ्गल-
शास्त्रमनोज्ञबलप्रदसत्यगिरः।
व्रतहवनधनानि च सिद्धिकराणि
तथा रुचिराणि च वर्णकदण्डकवत्।।६२।।

अब बृहस्पतिवार को करणीय कर्मों को वर्णक दण्डकछन्द के द्वारा कहते हैं–

बृहस्पतिवार के दिन सोना, चाँदी, घोड़ा, हाथी, बैल, वैद्य, औषधि, ब्राह्मणों का तर्पण, पितृश्राद्ध, देवताओं का कार्य, पुरःस्थित (पदाति), छत्र, चामर, भूषण, राजा, देवगृह, देव-प्रतिष्ठा, गृह प्रतिष्ठा धर्माश्रय, मंगल, शास्त्र, सुन्दर, बलप्रद, सत्यवचन, व्रत (चान्द्रायण आदि आकृति) हवन, धन; इन सभी वस्तुओं से सम्बन्धित कार्य वर्णक (सर्प आदि) से युत मनोहर दण्ड की तरह सिद्ध और सुन्दर होते हैं। यह वर्णकदण्डकछन्द है।।६२।।

सुरगुरुदिवस इति। सुरुगुरुदिवसे बृहस्पतिदिने कनकं सुवर्णम्। रजतं रौप्यम्। तुरगा अश्वाः। करिणो हस्तिनः। वृषभा दान्ताः। भिषग्वैद्यः। ओषधयः प्रसिद्धाः। अथवा भिषगोषधयो वैद्यप्रणीतानि द्रव्याणि। द्विजानां ब्राह्मणानां तपर्णम्। पितृणां श्राद्धम्। सुराणां देवानां च कार्याणि। पुरःस्थितोऽग्रस्थितः पदातिः। धर्मनिवारणं छत्रादिकम्। चामरं वालव्यजनम्। भूषणमलङ्करणम्। भूपतयो राजानः। विबुधभवनं देवगृहम्। अथवा विबुधानां प्रतिष्ठा। भवनानां गृहाणां च प्रतिष्ठा। धर्मसमाश्रयो धर्मश्रयणम्। मङ्गलं शुभकार्यम्। शास्त्रं प्रसिद्धम्। मनोज्ञश्चित्ताह्लादकः। बलप्रदं मांसाद्याहारः। सत्यगिरः सत्ययुक्ता वाचः। व्रतं चान्द्रायणादि। हवनमग्नौ। धनं वित्तम्।एवमादिकानि संबन्धीनि यानि कर्माणि सिद्धिकराणि सिद्धिप्रदानि। तथा रुचिराणि श्रेष्ठानि चान्यानि। कथं रुचिराणि? वर्णकदण्डकवत्। वर्णकेन नागादिना यथा रुचिरं स्फुटतरं दण्डकं तद्वद्यानि रुचिराणि। एतद्वर्णकदण्डकं नाम दण्डकं नद्वयेन सप्तभिर्भैर्गुरुणा च।

न्यासः–	न	न	भ	भ	भ	भ	भ	भ	भ	गु
	।।।	।।।	ऽ।।	ऽ।।	ऽ।।	ऽ।।	ऽ।।	ऽ।।	ऽ।।	ऽ

तथा च समाससंहितायाम्–

शान्तिपौष्टिककर्माणि तथा ज्ञानाश्रितानि च।
तानि कृत्स्नं विधेयानि दिने देवगुरोः शुभे।।

तथा च यवनेश्वर:-

दिने गुरोर्धार्मिकपौष्टिकेज्याबोध्याभिधेयक्रतुमुण्डनादि।
क्रियाश्रिता धर्मसुवर्णवस्त्रदेहाश्रयाश्वाश्वरथाश्रयाश्च॥

तथा च गर्ग:-

यज्ञं च विविधं कुर्यात् तपांसि च विशेषत:।
यज्ञे यज्ञे तपस्तेपे छादयेत् कारयेद् गृहम् ॥
आरभेद् भारतं चेदं ज्यौतिष च विशेषत:।
ग्राहयेन्नववस्त्राणि यात्रां दद्यान्नृपस्य च।
आदिशेच्च व्रतं पुत्रे बीजान् सर्वांश्च वापयेत्।
योजयेच्छकटं चात्र दिने देवगुरो: शुभे॥इति॥६२॥

सुरगुरुदिवस अर्थात् बृहस्पतिवार के दिन सुवर्ण, रजत, अश्व, हाथी, बैल, चिकित्सक, औषधि अथवा वैद्य द्वारा निर्मित औषधीय द्रव्य, ब्राह्मणों का सत्कार, पितरों का श्राद्ध तथा देवता सम्बन्धी कार्य, पदसेना का प्रयाण, धार्मिक कार्य, छत्र, चँवर, अलंकरण, राजदर्शन, विबुधभवन अर्थात् देवालय अथवा देव-प्रतिष्ठा, गृह-प्रतिष्ठा, धार्मिक आयोजन मांगलिक शुभ कार्य, शास्त्र-स्वाध्याय, मनोरंजन, शक्तिवर्धक आहार, सत्यकथन, चान्द्रायणादि व्रतग्रहण, हवन कर्म और धन से सम्बन्धित कार्य; इन सभी वस्तुओं से सम्बन्धित कार्य गुरुवार के दिन सिद्ध होते हैं। तथा अन्य रुचिकर श्रेष्ठ कर्म सिद्ध होते हैं। किस प्रकार के रुचिकर वर्णकदण्डक के समान, वर्णक अर्थात् नागदन्तादि के द्वारा सुशोभित दण्ड के समान रुचिकर। यह वर्णकदण्डक नामक छन्द है। जिसमें दो नगण, सात भगण तथा अन्तिम गुरु वर्ण होता है।

विशेष—वर्णदण्डक छन्द का न्यास विवृति में द्रष्टव्य है। जैसाकि समास संहिता में कहा गया है-

गुरुवार के दिन शान्तिक एवं पौष्टिक कर्म तथा अध्ययन सम्बन्धी कार्य; इन सभी शुभकर्मों को करना चाहिये।

जैसा कि आचार्य यवनेश्वर ने कहा है-

गुरुवार के दिन धार्मिक, पौष्टिक, यज्ञ, ज्ञानाभिधेय (ज्ञानविषयक), हवन, मुण्डन, कार्यारम्भ, धर्म, सुवर्ण, वस्त्र, शरीर-शोधन और घोड़ा तथा रथ से आश्रित कार्यों को सम्पादित करे।

जैसा कि आचार्य गर्ग ने कहा है-

विविध प्रकार के यज्ञ तथा तपस्या कर्म, अनेक यज्ञ तथा तप:क्रिया और गृह का आच्छादन सम्बन्धी कार्य करे। महाभारत का पाठ, विशेष रूप से ज्योतिष शास्त्र

का कार्य आरम्भ करे। नतून वस्त्र धारण, यात्रा और राजदर्शन, पुत्रों का यज्ञोपवीत, सभी प्रकार के बीजों का वपन करे। साथ ही बृहस्पति के शुभ दिन में हवन सम्बन्धी कार्य करे॥६२॥

अथ शुक्रदिने यानि कार्याणि क्रियन्ते तानि समुद्रदण्डकप्रथमार्द्धेनाह–

भृगुसुतदिवसे च चित्रवस्त्रवृष्यवेश्य-
कामिनीविलासहासयौवनोपभोगरम्यभूमयः।
स्फटिकरजतमन्मथोपचारवाहनेक्षुशारद-
प्रकारगोवणिक्कृषीवलौषधाम्बुजानि च॥

भृगुसुतदिवस इति। भृगुसुतदिवसे शुक्रदिने च। चित्रं चित्रकर्म। वस्त्रमम्बरम्। वृष्यप्रयोगो रेतोवृद्धिकरः। वेश्या पण्यस्त्री। कामिनी कामसक्ताङ्गना। विलासः क्रीडनम्। हास उपहासः। यौवनोपभोगा रतादिः। रम्या रमणीया भूमय उपवनादि। स्फटिकः स्फटिकोपलम्। रजतं रौप्यम्। मन्मथोपचारः कामोपचरणम्। वाहनमश्वादि। इक्षुः प्रसिद्धः। शारदप्रकारो धान्यानि। वणिक्कर्माणि। कृषिकर्माणि। औषधं प्रसिद्धम्। अम्बुजं जलजं पद्मादि। एतानि कार्याणि। तथा च समाससंहितायाम्–

कलागन्धर्वकर्माणि रत्नकर्माणि यानि च।
तानि कार्याणि दिवसे सदा दैत्यगुरोः शुभे॥

तथा च यवनेश्वरः-

गान्धर्वविद्यामणिरत्नगन्धगोभूमिशय्याम्बरभूषणानाम्।
स्त्रीपण्यकोशोत्सवनन्दनानां क्रियाविधिः शुक्रदिने प्रशस्तः॥

तथा च गर्गः–

गजमश्वं प्रयुञ्जीत कर्णबन्धे नियोजयेत्।
पिबेत् सुरां च मद्यं च प्रचरेत् कुसुमाम्बरम्॥
गन्धांश्च विविधानद्यात् कामयेच्च वराङ्गनाः।
द्यूते च सहसा प्रीतिं तिलं तैलं च योजयेत्॥
मङ्गलं स्थापयेदेव रोपयेच्चैव पादपान्।
सर्वमेतद्यथोदिष्टं कुर्याच्छुक्रदिने शुभे॥

अब शुक्रवार को करणीय कर्मों को समुद्रदण्डक छन्द के प्रथमार्ध द्वारा कहते हैं–

शुक्रवार के दिन में चित्रकर्म, वस्त्र, वीर्यवृद्धि के लिए प्रयोग, वेश्या, कामासक्त स्त्री, विलास, उपहास, यौवनोपभोग (स्त्री प्रसङ्ग आदि), चाँदी, कामदेव का उपचार, वाहन, इक्षु (गन्ना), शारदीय धान्य, वाणिज्य, खेती, औषध, जलज

(कमल आदि); इन वस्तुओं से सम्बन्धित कार्य सिद्ध होते हैं॥

भृगुसुत अर्थात् शुक्र के दिन में चित्रकर्म, वस्त्र, वृष्यप्रयोग अर्थात् शुक्र वृद्धिकारक कर्म, वेश्या, स्त्री, हास-विलास, रति आदि यौवनोपभोग, उद्यान आदि रमणीय क्षेत्र, स्फटिक रत्न, रजत, कामोपचार, अश्वादि वाहन, इक्षु (गन्ना), शरद् ऋतु में उत्पन्न धान्य, व्यापार कर्म, कृषिकर्म, औषधि, अम्बुज अर्थात् जलीय उत्पाद कमल आदि; इनसे सम्बन्धित कार्यों को करे। जैसाकि समाससंहिता में कहा गया है–

कलाकर्म, गीत-वादन आदि गन्धर्वकर्म तथा रत्न सम्बन्धी कार्यों को शुक्रवार में करना चाहिये।

जैसा कि आचार्य यवनेश्वर ने कहा है–

गन्धर्वविद्या, मणि, रत्न, गन्ध, गो, भूमि, शय्या, वस्त्र, आभूषण, स्त्री, व्यापार, कोषागार, जन्मोत्सव आदि कार्यों को शुक्रवार के दिन प्रशस्त कहा गया है।

जैसा कि आचार्य गर्ग ने कहा है–

हाथी, घोड़े का प्रयोग एवं उनका कर्णबन्धन सुसज्जित करे। सुरा और मद्य का पान तथा पुष्प एवं वस्त्र को धारण करे। विविध प्रकार के गन्धों का अनुलेपन एवं कामिनी स्त्री का साहचर्य करे। द्यूतक्रीड़ा में आसक्ति और तिल के तेल का उपयोग करे। माङ्गलिक चिह्नों की स्थापना एवं वृक्षारोपण इत्यादि सभी कथित कार्यों को शुक्रवार के शुभ दिन में करे॥

अथ सौरस्य दिने यानि कर्माणि क्रियन्ते तानि समुद्रदण्कापरार्धेनाह–

सवितृसुतदिने च कारयेन्महिष्यजोष्टकृष्ण-
लोहदासवृद्धनीचकर्मपक्षिचौरपाशिकान् ।
च्युतविनयविशीर्णभाण्डहस्त्यपेक्षविघ्नकारणानि
चान्यथा न साधयेत् समुद्रगोऽप्यपां कणम् ।।६३।।

अब शनिवार को करणीय कर्मों को समुद्र दण्डकछन्द के अपरार्ध द्वारा कहते हैं–

शनिवार के दिन भैंस, बकरा, ऊँट, कृष्ण लोह (शस्त्र, आयुध आदि),भृत्य वृद्ध, नीच, पक्षी, बन्धन आदि को जानने वाले, नम्रता से रहित, खण्डित पात्र, हाथी का ग्रहण आदि, विघ्न के कारण; इनसे सम्बन्धित सभी कार्यों की सिद्धि होती है। इन पूर्वोक्त विषयों को छोड़कर समुद्र में जाने पर भी जल बिन्दु की प्राप्ति का प्रयास न करे यह समुद्र दण्डक छन्द है॥६३॥

सवितृसुतदिन इति। सवितृसुतदिने शनैश्चरदिवसे च कर्माणि कारयेत्। महिषी

---

१. द्रष्टव्यास्य ग्रन्थस्य १०३ अध्याये २ श्लोकस्य टीका।

प्रसिद्धा। अजश्छागः। उष्ट्रः करभः कृष्णलोहः शस्त्रायुधादि। दासः कर्मकरः। वृद्धो गतवयाः। नीचः कुलाधमकर्मकृत्। पक्षी श्येनादि। चौरस्तस्करः। पाशिकाः पाशबन्धनादिविदः। च्युतविनयो नीचः। विशीर्णभाण्डं भिन्नभाण्डम्। हस्त्यपेक्षा हस्तिनोऽपेक्षा। हस्त्यपेक्षा ग्रहणादि। विघ्नकारणानि यानि निमित्तानि च कार्याणि एतदाश्रितानि च सर्वाणि सिद्ध्यन्ति। एतानि वर्जयित्वाऽन्यथाऽन्येन प्रकारेण समुद्रगोऽपि सागरप्राप्तोऽप्यपां कणं जलबिन्दुमपि तस्मात् सागरान्न साधयेत्। समुद्रसंज्ञं दण्डकमेतत्।

अत्र नद्वयात् परतः पञ्च रेफा जकारान्तरिता भवन्त्यन्ते लघुगुरू।

न्यासः–

न	न	र	ज	र	ज	र	ज	र
।।।	।।।	ऽ।ऽ	।ऽ।	ऽ।ऽ	।ऽ।	ऽ।ऽ	।ऽ।	ऽ।ऽ

ज	र	ल	गु
।ऽ।	ऽ।ऽ	।	ऽ

तथा च समाससंहितायाम्–

शस्त्राणि पाशकर्माणि पशुकर्माणि यानि च।
तानि सौरदिने कुर्याल्लोहकर्माणि यानि च।।
संवत्सरे तथा मासे होरायामुदये तथा।
उक्तानि यानि कर्माणि तथा कुर्याद् ग्रहस्य च।।

तथा च यवनेश्वरः–

विषाश्मशस्त्रत्रपुसीसलोहप्राकारबन्धावृतमारणानि।
सर्वं च पापात्मकमर्कजाह्नि कार्पासवप्रव्रजितानि चेष्टम्।।

तथा च गर्गः–

नियोगान् विविधान् कुर्याद्वेश्म चापि प्रवेशयत्।
कर्म चौर्यं मृतिं चैवाश्वरथेष्वश्वयोजनम्।।
हस्त्यपेक्षा विघ्नकर्म द्रव्यं दम्भाश्रितं तथा।
वर्जयेच्चैव यात्रां च दिने सूर्यसुतस्य च।। इति।।६३।।

सवितृसुत अर्थात् शनि के दिन में अग्रकथित कार्यों को करना चाहिये–महिषी (भैंस), अज अर्थात् बकरा, करभ अर्थात् ऊँट, कृष्णलोह अर्थात् शस्त्रादि में प्रयुक्त होने वाला लौह, दास अर्थात् कार्य करने वाले सेवक, वृद्ध अर्थात् जिनकी अवस्था बीत चुकी हो, नीच अर्थात् अधमकर्म करने वाला, श्येन (बाज आदि पक्षी), चोर, पाशिक अर्थात् बन्धन कर्म का ज्ञाता, विनय से रहित नीच, विशीर्ण भाण्ड अर्थात् टूटे हुये भाण्ड, हस्त्यपेक्षा अर्थात् हाथी से अपेक्षितकार्य (हाथी का ग्रहण आदि), विघ्नकारण अर्थात् उपद्रवकारक, इन पूर्वोक्त सभी वस्तुओं से सम्बन्धित कार्य

शनिवार के दिन में करने चाहिए। इन कार्यों को छोड़कर यदि कोई अन्य कार्य इस दिन किया जाये तब समुद्र के पास गया हुआ व्यक्ति, जल का एक कण मात्र भी उस सागर से प्राप्त नहीं कर पाने जैसा होता है। यह समुद्र संज्ञक दण्डक छन्द है।

इस छन्द में दो नगण के पश्चात् पाँच रगण के मध्यवर्ती जगण होते हैं और अन्त में लघु और गुरु रहते हैं।

विशेष—समुद्रदण्डक छन्द का न्यास विवृति में द्रष्टव्य है।

जैसाकि समास संहिता में कहा गया है—

शस्त्रकर्म, पाश (बन्धन) कर्म, पशुकर्म तथा लौह कर्म से सम्बन्धित सभी कार्यों को शनिवार के दिन करे। शनि ग्रह के वर्षपति, मासपति, होरापति और लग्नेश होने पर पूर्वकथित सभी कर्मों को करना चाहिये।

जैसाकि आचार्य यवनेश्वर ने कहा है—

विषप्रयोग, पत्थर, शस्त्र, रांगा, सीसा, लोहा, खाई, बन्धन, आच्छादन, मारण; ये सभी तथा अन्य पापकर्म शनिवार के दिन करने चाहिये। कपास, आसव, सन्यासके कर्म; ये कार्य शनिवार के दिन अनुकूल रहते हैं।

जैसा कि आचार्य गर्ग ने कहा है—

विविध प्रकार के नियोग (निरोध), गृहप्रवेश, चौरकर्म, मारण, रथ में घोड़ों को जोतना, हाथी का ग्रहण, विघ्न कर्म, द्रव्यसंग्रह, दाम्भिक कार्य शनिवार के दिन सफल होते हैं। शनिवार को यात्रा न करे॥६३॥

अधुनात्र प्रशंसार्थं विपुलामार्यामाह—

विपुलामपि बुद्ध्वा छन्दोविचितिं भवति कार्यमेतावत्।
श्रुतिसुखदवृत्तसंग्रहमिममाह वराहमिहिरोऽतः॥६४॥

छन्दःशास्त्र की प्रशंसा विपुलाआर्या छन्द में करते हैं—

बहुत विस्तृत छन्दों के प्रस्तारों को जान कर भी इतने ही व्यवहृत होते हैं। अत: आचार्य वरामिहिर ने कर्ण सुखजनक यह छन्द-संग्रह कहा है। यह विपुला आर्या छन्द है॥६४॥

विपुलां विस्तीर्णामपि छन्दोविचितिं छन्दसां प्रस्तारं बुद्ध्वा ज्ञात्वा एतावत् कार्यं भवति। यावन्ति छन्दांस्यत्र प्रदर्शितानि तावन्ति ज्ञायन्ते। अतोऽस्माद्धेतोर्वराहमिहिर इमं वृत्तसमुच्चयं श्रुतिसुखदं कर्णसुखजनकमाहोक्तवान्। बहुभिराचार्यैश्छन्दोलक्षणमुक्तं तच्च दुर्विज्ञेयमश्रव्यं च। वराहमिहिरेण पुनः श्रव्यं सुखबोधं व्यापकं संक्षिप्तमुक्तमिति। विपुलेयमार्या। अस्या लक्षणम्—

---

१. द्रष्टव्योऽस्य ग्रन्थस्य १०३ अध्याये २ श्लोकस्य टीका।

[1]विपुला तु यान्यथा पादभागित्यादि।
वराहमिहिरीयेऽस्मिन् छन्दसां सारसंग्रहे
उत्पलो गोचरे टीकां चक्रे शिष्यहितावहाम्।।६४।।

इति श्रीभट्टोत्पलविरचितायां संहिताविवृत्तौ ग्रहोचरो
नाम त्र्यधिकशततमोऽध्याय:।।१०३।।

विपुल अर्थात् विस्तृत छन्दोविचिति अर्थात् छन्दों के विन्यास को जानकर आगे वर्णित कार्य होते हैं। जितने भी छन्दों को यहाँ पर प्रस्तुत किया गया है, उन सभी छन्दों का विशेषतया प्रयोग होता है। इसी कारण वराहमिहिर के इस छन्दसंग्रह को जो कर्णसुख को उत्पन्न करने वाले हैं, उनको कहा है। अन्य बहुत से आचार्यों ने छन्दों का लक्षण कहा है। परञ्च उनका कथन क्लिष्ट और कर्कश है। एतावता वराहमिहिर ने फिर से उन छन्दों को कर्णप्रिय, सुखप्रदायक और अव्यापक अर्थात् संक्षिप्त स्वरूप में कहा है। यह विपुला आर्या छन्द है।।६४।।

विपुला आर्याछन्द का लक्षण—इस छन्द का लक्षण इसी अध्याय के श्लोक संख्या २ में बतलाया गया है।

वराहमिहिर द्वारा रचित छन्दों के सारसंग्रह को गोचर प्रकरण में जो विचार किया गया है, उसको आचार्य उत्पल ने शिष्यों के कल्याणार्थ इसकी टीका रची है।।६४।।

।।श्री भट्टोत्पल विरचित संहिताविवृति में ग्रहगोचर नामक १०३ अध्याय की हिन्दी व्याख्या पूर्ण हुई १०३।।

❑❑

अथ रूपसत्रं व्याख्यायते। १०४ अध्यायः

आदौ नक्षत्रपुरुषस्याङ्गविभागं तन्नक्षत्रावस्थितिं चाह–

पादौ मूलं जङ्घे च रोहिणी जानुनी तथाश्विन्यः।
ऊरु चाषाढाद्वयमथ गुह्यं फल्गुनीद्वितयम्।।१।।
कटिरपि च कृत्तिका पार्श्वयोश्च यमला भवन्ति भद्रपदाः।
कुक्षिस्था रेवत्यो विज्ञेयमुरोऽनुराधा च।।२।।
पृष्ठं विद्धि धनिष्ठां भुजौ विशाखा स्मृतौ करौ हस्तः।
अङ्गुल्यश्च पुनर्वसुराश्लेषासंज्ञिताश्च नखाः।।३।।
ग्रीवा ज्येष्ठा श्रवणं श्रवणौ पुष्यो मुखं द्विजाः स्वातिः।
हसितं शतभिषगथ नासिका मघा मृगशिरो नेत्रे।।४।।
चित्रा ललाटसंस्था शिरो भरण्यः शिरोरुहाश्चार्द्रा।
नक्षत्रपुरुषकोऽयं कर्तव्यो रूपमिच्छद्भिः।।५।।

आरम्भ में नक्षत्र पुरुष के अङ्ग विभाग में नक्षत्रों की स्थिति बतलाते हैं–

नक्षत्रपुरुष के दोनों पाँव में मूल-नक्षत्र, दोनों जंघाओं में रोहिणी, दोनों जानुओं में अश्विनी, दोनों ऊरू में पूर्वाषाढा और उत्तराषाढ़ा, गुह्य (लिङ्ग और गुदा) में पूर्वफाल्गुनी और उत्तराफाल्गुनी, कटिप्रदेश में कृत्तिका, दोनों पार्श्व में पूर्वभाद्रपदा एवं उत्तरभाद्रपदा, पेट में रेवती, छाती में अनुराधा, पीठ में धनिष्ठा, दोनों भुजाओं में विशाखा, दोनों हाथों में हस्त, अंगुलियों में पुनर्वसु, नखों में श्लेषा, ग्रीवा में ज्येष्ठा, दोनों कानों में श्रवण, मुख में पुष्य, दाँतों में स्वाती, हास्य में शतभिषा, नासिका में मघा, दोनों आँखों में मृगशिरा, ललाट में चित्रा, शिर में भरणी और केशों में आर्द्रा को स्थापित करे। सुन्दर रूप की इच्छा करने वाले पुरुषों को यह नक्षत्र चक्र बनाना चाहिये॥१-५॥

पादौ मूलमिति। नक्षत्रपुरुषस्य पादौ चरणौ मूलम्। एवं जंघे द्वे रोहिणी। जानुनी तथाऽश्विन्यः। ऊरु द्वावाषढाद्वयम्। पूर्वाषाढोत्तराषाढे। अथशब्दश्चार्थे। गुह्यं लिङ्गं गुदश्च फल्गुनीद्वितीयं पूर्वफल्गुन्युत्तरफल्गुनीति।।१।।

कटिरपि चेति। कृत्तिका कटिर्जघनम्। पार्श्वयोश्च यमला भद्रपदा भवन्ति। पूर्वभद्रपदोत्तरभद्रपदौ। रेवत्यः कुक्षिस्थाः। अनुराधा उरो वक्षो विज्ञेयं ज्ञातव्यम् ।।२।।

पृष्ठमिति। धनिष्ठां पृष्ठं विद्धि जानीहि। विशाखा भुजौ द्वौ स्मृतावुक्तौ। हस्तौ द्वौ करौ हस्त एव। पुनर्वसुरङ्गुल्यः करशाखाः। आश्लेषासंज्ञिताश्च नखाः कररुहाः।।३।।

ग्रीवा ज्येष्ठेति। ग्रीवा शिरोधरा ज्येष्ठा। श्रवणं श्रवणौ द्वौ कर्णौ। पुष्यो मुखं वक्त्रम्। स्वातिर्द्विजा दशनाः। हसितं शतिभषगथ। अथशब्दश्चार्थे। नासिका मघा।

नेत्रे द्वे चक्षुषी मृगशिरः।।४।।

चित्रा ललाटसंस्थेति। ललाटे मुखपृष्ठे संस्था चित्रा। भरण्यः शिरः। आर्द्रा शिरोरुहाः केशाः। अयं नक्षत्रपुरुषको रूपमिच्छद्भिः शोभनं रूपमभिलषद्भिः पुंभिः कर्तव्यः।।५।।

इस अध्याय के आरम्भ में नक्षत्रपुरुष की परिकल्पना कर उसके विभिन्न अंगों में सत्ताइस नक्षत्रों की स्थापना की जा रही है। तात्पर्य यह है कि एक पुरुषाकृति की रचनाकर उसके पैर से लेकर शीर्ष पर्यन्त सभी अंगों में नक्षत्रों का विन्यासकर नक्षत्र पुरुष की रचना की गयी है।

मूलनक्षत्र नक्षत्रपुरुष के दोनों पैरों में एवं दोनों जंघे में रोहिणी, जानु अर्थात् घुटने पर अश्विनी, ऊरु (घुटने के उपरी भाग) पर पूर्वाषाढ़ एवं उत्तराषाढ़, गुप्तेन्द्रिय अर्थात् लिंग और गुदा प्रदेश पर पूर्वाफाल्गुनी एवं उत्तराफाल्गुनी को स्थापित करे।।१।।

कटि प्रदेश पर कृत्तिका, दोनों पार्श्व भाग पर दोनों भद्रपदा अर्थात् पूर्वाभाद्रपद एवं उत्तराभाद्रपद, कुक्षि (कोख) पर रेवती और वक्षस्थल पर अनुराधानक्षत्र को स्थापित करे।।२।।

पृष्ठभाग में धनिष्ठा नक्षत्र, दोनों भुजाओं में विशाखानक्षत्र, दोनों हाथों पर हस्त, हाथ की उङ्गलियों पर पुनर्वसु, हाथ के नखों पर आश्लेषानक्षत्र स्थापित करे।।३।।

ग्रीवा अर्थात् कण्ठ पर ज्येष्ठानक्षत्र, दोनों कानों पर श्रवण, मुख पर पुष्य, दाँतों पर स्वाती, हसित अर्थात् ओठों पर शतभिषा नाक पर मघा तथा दोनों नेत्रों पर मृगशीर्ष' नक्षत्र का न्यास करे।।४।।

चित्रानक्षत्र को ललाट अर्थात् मुखपृष्ठ पर। सिर पर भरणी, शिरोरुह अर्थात् केशों पर आर्द्रा को स्थापित करे। सुन्दर स्वरूप की कामना करने वाले पुरुषों के द्वारा इस नक्षत्रपुरुष की रचना करनी चाहिये।।५।।

अथ कस्मिन् काले रूपसत्राख्यं व्रतं गृहीतव्यमित्येतदाह–

चैत्रस्य बहुलपक्षे ह्यष्टम्यां मूलसंयुते चन्द्रे।
ह्युपवासः कर्तव्यो विष्णुं सम्पूज्य धिष्ण्यं च।।६।।

रूपसत्र नामक व्रत को आरम्भ करने का समय–

चैत्र कृष्ण अष्टमी में यदि मूल-नक्षत्र और चन्द्रवार हो तो उस दिन विष्णु और नक्षत्र की पूजा करके प्रथम उपवास आरम्भ करके जैसे-जैसे रोहिणी आदि आता जाये वैसे-वैसे आर्द्रा तक उपवास करना चाहिये।।६।।

चैत्रमासस्य बहुलपक्षे कृष्णपक्षे अष्टम्यां तिथौ मूलसंयुते चन्द्रे चन्द्रवासरे। मूलं नक्षत्रं तत्र यदि भवति तस्मिन् दिने प्रथमत उपवासः कर्तव्यः। विष्णुं नारायणं धिष्ण्यं नक्षत्रं च सम्पूज्याभ्यर्च्य, ततो यथा यथा रोहिण्यादीनि नक्षत्राणि भवन्ति तथा तथोपवासः कर्तव्यो यावदार्द्राम्। तथा च गर्गः—

अष्टम्यां मधुमासस्य कृष्णपक्षे तु नैर्ऋते।
नक्षत्रे चन्द्रवारे तु मुहूर्ते तु गुणान्विते।।
प्रारम्भेद्रूपसत्राख्यं व्रतं धर्मात्मकः पुमान्।
येन पूर्णेन मनुजो रूपशोभामवाप्नुयात्।।इति।।६।।

चैत्र मास के बहुलपक्ष अर्थात् कृष्णपक्ष में मूलनक्षत्र से युक्त चन्द्रमा हो और सोमवार हो अर्थात् उस दिन मूलनक्षत्र अवश्य हो, तब सर्वप्रथम उपवास (व्रत) करना चाहिये। उस समय विष्णु भगवान का और धिष्ण्य अर्थात् नक्षत्र (मूल) का पूजन करना चाहिये। तत्पश्चात् रोहिणी आदि नक्षत्र से आर्द्रानक्षत्र पर्यन्त उपवास (व्रत) रखना चाहिये जैसाकि आचार्य गर्ग ने कहा है—

चैत्रमास के कृष्णपक्ष में मूलनक्षत्र युक्त सोमवार के दिन, इन शुभ गुणयुक्त मुहूर्त के प्राप्त होने पर धर्मनिष्ठ पुरुष रूपसत्र नामक व्रत का आरम्भ करे। व्रत को पूर्ण कर मनुष्य रूप और धन को प्राप्त करता है।।६।।

विशेष व्याख्या—१. मूल से आर्द्रापर्यन्त १५ नक्षत्र होते हैं। अतः यह व्रत १५ दिनों का मानना चाहिए। यद्यपि मूल नक्षत्र से आर्द्रा पर्यन्त नक्षत्र पुरुष का अंग-विन्यास किया है। परञ्च कितने दिनों का व्रत होगा, यह स्पष्ट नहीं है। विवृति से यह स्पष्ट होता है।

२. बहुला पक्ष का अर्थ कृष्ण पक्ष है। यथा, अमर कोश-३/३/१९९-

बहुलाः कृत्तिका गावो बहुलोऽग्नौ शितौ त्रिषु।"
बहुला नीलिकायां स्यादेलायां गवि योषिति।
कृत्तिकासु स्त्रियां भूम्नि विहायसि न पुंसकम्।।
पुंस्यग्नौ कृष्णपक्षे च वाच्यवत् प्राज्य कृष्णयोः"।

(—मेदिनी)

अथ व्रतार्थं यत् कर्तव्यं तदाह—

दद्याद् व्रते समाप्ते घृतपूर्णं भाजनं सुवर्णयुतम्।
विप्राय कालविदुषे सरत्नवस्त्रं स्वशक्त्या च ।।७।।

व्रत के लिए बतलाये गये नियम को कहते हैं—

व्रत समाप्त होने के बाद अपनी शक्ति के अनुसार कालज्ञ ब्राह्मण के लिये

सुवर्ण, रत्न और वस्त्रों के साथ घृत से परिपूर्ण पात्र दान करे॥७॥

ततो व्रते रूपसत्राख्ये समाप्ते निष्पन्ने घृतपरिपूर्णं भाजनमाज्यपरिपूर्णं पात्रं सुवर्णयुक्तं काञ्चनसंयुक्तं विप्राय ब्राह्मणाय कालविदुषे कालज्ञाय दद्यात् प्रतिपादयेत्। सरत्नवस्त्रं रत्नवस्त्रसहितम्, स्वशक्त्याऽऽत्मीयशक्त्या विभवानुसारेण दद्यात्॥७॥

तत्पश्चात् रूपसत्रनामक व्रत के समाप्त होने पर घृत से परिपूर्ण भाजन अर्थात् पात्र तथा सुवर्ण के साथ कालविदुष अर्थात् कालज्ञ ज्योतिषी ब्राह्मण को रत्नसहित वस्त्र का अपनी शक्ति-सामर्थ्य और वैभव के अनुरूप दान करे॥७॥

अन्यत् किं कुर्यादित्याह–

अन्नैः क्षीरघृतोत्कटैः, सह गुडैर्विप्रान् समभ्यर्चयेद्
दद्यात् तेषु सुवर्णवस्त्ररजतं लावण्यमिच्छन्नरः।
पादर्क्षात् प्रभृति क्रमादुपवसन्नङ्गर्क्षनामस्वपि
कुर्यात् केशवपूजनं स्वविधिना धिष्ण्यस्य पूजां तथा॥८॥

और क्या करना चाहिये? यह बतलाते हैं–

लावण्य की इच्छा करने वाला मनुष्य दूध, घृत और गुड़ से मिश्रित अन्नों से ब्राह्मणों की पूजा करे तथा उन ब्राह्मणों को सोना, वस्त्र और चाँदी देवे। पाँव के नक्षत्र से आरम्भ करके उपवास करता हुआ विष्णु तथा अङ्ग के नक्षत्रों की पूजा करे॥८॥

अन्नैर्भोजनविशेषैः। क्षीरघृतोत्कटैः, क्षीरेण दुग्धेन घृतेनाज्येन चोत्कटैराधिक्येन सहितैस्तैश्च सह गुडैः, गुडेनेक्षुविकारेण युक्तैः, विप्रान् ब्राह्मणान् समभ्यर्चयेत् पूजयेत्। तेषु च ब्राह्मणेषु, सुवर्णं कनकम्, वस्त्रमम्बरम्, रजतं रूप्यम्, नरो मनुष्यो लावण्यमिच्छन् रूपमभिलषन् दद्यात् प्रतिपादयेत्। पादर्क्षाच्चरणनक्षत्राद् मूलाद् प्रभृत्यारभ्य क्रमादनुक्रमेणोपवसन् भुञ्जन् अङ्गर्क्षनामस्वपि स्वविधिनाऽऽत्मीयविधानेन वैष्णव्येन पञ्चरात्रविहितेन पूजाक्रमेण वैदिकेन वा केशवपूजनं नारायणार्चनं कुर्याद्विदध्यात्। तथा तेनैव प्रकारेण धिष्ण्यस्य नक्षत्रस्य। यथा भगवतो हरेस्तथा नक्षत्रस्यापि पूजां कुर्यात्॥८॥

अन्न अर्थात् विशेष प्रकार के भोजन द्वारा, क्षीर अर्थात् दुग्ध और घृत अर्थात् आज्य (घी) की उत्कटता अर्थात् आधिक्य पूर्वक गन्ने के रस से निर्मित गुड़ के साथ ब्राह्मणों की अभ्यर्थना अर्थात् पूजा करे। उन ब्राह्मणों को सुवर्ण (कनक), वस्त्र (अम्बर), रजत (चाँदी) को, लावण्य अर्थात् सुन्दर रूप की अभिलाषा करता हुआ मनुष्य दान दे। नक्षत्र पुरुष के पादस्थ मूलनक्षत्र से आरम्भ कर क्रमानुसार अङ्गों पर स्थित अन्य नक्षत्रों की भी अपनी परम्परागत विधि से पञ्चरात्रादि वैष्णव विधानानुसार अथवा वैदिक विधि से केशव अर्थात् भगवान विष्णु को, जिस प्रकार भगवान् विष्णु की पूजा की जाती है उसी प्रकार नक्षत्र की भी पूजा करे॥८॥

अथ चरितव्रतः पुरुषः कीदृगन्यजन्मनि भवतीत्याह–

प्रलम्बबाहुः पृथुपीनवक्षाः क्षपाकरास्य, सितचारुदन्तः।
गजेन्द्रगामी कमलायताक्षः स्त्रीचित्तहारी स्मरतुल्यमूर्तिः।।९।।

इस प्रकार व्रत करने से अन्य जन्म में कैसा होता है–

पूर्व कथित पूजा करने से मनुष्य लम्बी भुजाओं से युत, विस्तीर्ण और पुष्ट छाती वाला, चन्द्र के समान मुख वाला, सफेद सुन्दर दाँतों से युत, गजेन्द्र के समान गति वाला, कमल के समान विस्तीर्ण नेत्र वाला, स्त्री के चित्त को हरने वाला और कामदेव के समान स्वरूप वाला होता है।।९।।

मनुष्यः पुरुषः कृतरूपसत्रव्रत ईदृग् भवति–प्रलम्बवाहुः, प्रलम्बौ दीर्घौ बाहु भुजौ यस्य। आजानबाहुरित्यर्थः। पृथुपीनवक्षाः, पृथु विस्तीर्ण पीनं मांसलं च वक्ष उरो यस्य। क्षपाकरास्यश्चन्द्रवदनः। सिताचारुदन्तः शुक्लशोभनदन्तः। गजेन्द्रगामी, गजेन्द्रों मत्तहस्तीव सविलासं गच्छति। कमलायताक्षः, कमलं पद्मं तद्वद् आयते विस्तीर्णे चाक्षिणी नेत्रे यस्य। स्त्रीचित्तहारी, स्त्रीणां योषितां चित्तं मनो हरति तच्छीलः। स्मरतुल्यमूर्त्तिः, कामसदृशदेहः।।९।।

रूपसत्र व्रत करने वाला मनुष्य व्रत के प्रभाव से इस प्रकार का हो जाता है– प्रलम्बबाहु अर्थात् लम्बी भुजाओं वाला (आजानुबाहु), पृथु अर्थात् विस्तृत, पीन अर्थात् मांसल वक्षस्थल, क्षपाकर अर्थात् चन्द्रमा के समान मुखवाला, श्वेत सुन्दर दाँतों वाला, गजेन्द्रगामी अर्थात् मतवाले हाथी के समान विलासपूर्वक गतिवाला, कमल के समान विस्तृत दोनों नेत्रों वाला, स्त्रियों के चित्त अर्थात् मन का हरण करने वाला और स्मर अर्थात् कामदेव के सदृश शरीर वाला हो जाता है।।९।।

अथ स्त्री कीदृशी भवति–

शरदमलपूर्णचन्द्रद्युतिसदृशमुखी सरोजदलनेत्रा।
रुचिरदशना सुकर्णा भ्रमरोदरसन्निभैः केशैः।।१०।।
पुंस्कोकिलसमवाणी ताम्रोष्ठी पद्मपत्रकरचरणा।
स्तनभारानतमध्या प्रदक्षिणावर्तया नाभ्या।।११।।
कदलीकाण्डनिभोरुः सुश्रोणी वरकुकुन्दरा सुभगा।
सुश्लिष्टाङ्गुलिपादा भवति प्रमदा मनुष्यश्च।।१२।।

पूर्वोक्त व्रत करने से स्त्री कैसी होती है–

यदि पूर्वोक्त व्रत को स्त्री करती है तो वह शारदीय चन्द्र के समान मुखकान्ति, कमलदल के समान नेत्र, सुन्दर दाँत, सुन्दर कान, भ्रमरोदर के समान केश, पुंस्कोकिल के समान वाणी, ताम्रवर्ण के ओंठ, कमल के समान हाथ और पाँव, स्तनों

के भार से नत मध्यभाग, दक्षिणावर्त नाभि से युत, केले के खम्भे के समान ऊरु, सुन्दर, नितम्ब कूप, स्वामिप्रिया और मिली हुई अँगुलियों से युत पाँव वाली होती है। इसी तरह इस व्रत को करने से पुरुष, भी होता है॥१०-१२॥

शरदमलपूर्णचन्द्रेति। स्त्री कृतरूपसत्रव्रता कीदृशी भवति? शरदमलपूर्णचन्द्रद्युतिसदृशमुखी, शरत्काले योऽसावमलो निर्मलः पूर्णचन्द्रः शशी। तस्य द्युतिः कान्तिः। तत्सदृशं मुखं वदनं यस्याः। सरोजदलनेत्रा पद्मपत्रसदृशाक्षी। रुचिरदशना सुशोभनशुक्लदन्ता। सुकर्णा शोभनकर्णा। केशैर्मूर्धजैर्भ्रमरोदरसन्निभैर्द्विरेफजठरकान्तिभिः। अतिनीलवर्णैरित्यर्थः॥१०॥

पुंस्कोकिलेति। पुंस्ककोकिलस्य। पुमांश्चासौ कोकिलः पुंस्कोकिलः प्रधानकोकिलस्य समा तुल्या वाणी स्वरो यस्याः। ताम्रोष्ठी लोहितदन्तच्छदा। पद्मपत्रकरचरणा पद्मपत्राभौ करौ हस्तौ चरणौ पादौ च यस्याः। स्तनभारानतमध्या, स्तनभारेण कुचयुगलोद्वहनेन नतं विनतं मध्यं यस्याः। तथा नाभ्या प्रदक्षिणावर्ततया संयुक्ता। प्रदक्षिणेनावर्तो यस्याः॥११॥

कदलीकाण्डनिभोरूः, कदली रम्भा तस्याः काण्डं शाखा, तन्निभो तत्सदृशावुरू यस्याः। सुश्रोणी शोभनवराङ्गा, वरकुकुन्दरा, वरौ शोभनौ कुकुन्दरौ नितम्बरूपकौ यस्याः। यथा च–

नितम्बरूपकौ यौ तु तौ कुकुन्दरसंज्ञितौ।

सुभगा सौभाग्योपेता। भर्तृबल्लभेत्यर्थ, सुश्लिष्टाङ्गुलिपादा। सुश्लिष्टाः संहिता अङ्गुलयो ययोस्तादृशौ पादौ यस्याः। एवंविधा प्रमदा स्त्री। मनुष्यः पुरुषश्च भवति॥१२॥

रूपसत्रव्रत को करने वाली स्त्री किस प्रकार की होती है? शरद्कालिक जो अमल अर्थात् निर्मल, पूर्ण चन्द्रमा होता है। उसकी द्युति अर्थात् कान्ति के समान सुन्दर मुख वाली, सरोजदल अर्थात् कमलपत्र के सदृश नेत्रों वाली, रुचिरदशना अर्थात् सुशोभित श्वेत दाँतोंवाली, सुन्दर कानोंवाली, भ्रमरोदर अर्थात् भँवरे के उदर के सदृश कृष्ण केशोंवाली अर्थात् अत्यन्त नीलवर्णी केशोंवाली स्त्री होती है॥१०॥

पुंस्कोकिल अर्थात् नर–कोकिल (प्रधान कोकिल) के समान मधुर स्वरवाली, ताम्रोष्ठी अर्थात् रक्तिम ओठोंवाली, पद्मपत्र के सदृश होठों और पैरों वाली, स्तन के भार से झुके हुये मध्यभागवाली तथा प्रदक्षिणावर्ती नाभि प्रदेश वाली स्त्री होती है॥११॥

कदली अर्थात् केले के काण्ड अर्थात् शाखा के समान उरू प्रदेश अर्थात् जंघेवाली, सुन्दर नितम्बोंवाली तथा शोभित कुकुन्दर अर्थात् नितम्बगर्तों वाली स्त्री होती है। जैसाकि कहा गया है–

नितम्ब के दोनों पार्श्वों में जो रूपक (निम्न भाग) होते हैं उनकी कुकुन्दर संज्ञा

है।

सुभगा अर्थात् वह सौभाग्ययुक्ता, पति की प्रियतमा, सुश्लिष्ट अर्थात् सघन अङ्गुलियों से युक्त चरणोंवाली स्त्री होती है। भावार्थ यह है कि इस व्रत को करने वाले पुरुष अथवा स्त्री वर्णित लक्षणों से सम्पन्न हो जाते हैं॥१२॥

अथ रूपसत्राचरितस्य प्रशंसार्थमाह–

यावन्नक्षत्रमाला विचरति गगने भूषयन्तीह भासा
तावन्नक्षत्रभूतो विचरति सह तैर्ब्रह्मणोऽह्नोऽवशेषम्।
कल्पादौ चक्रवर्ती भवति हि मतिमांस्तत्क्षयाच्चापि भूयः
संसारे जायमानो भवति नरपतिर्ब्राह्मणो वा धनाढ्यः॥१३॥

रूपसत्रव्रत करने वाले की प्रशंसा–

इस लोक में अपनी कान्ति से शोभा पैदा करती हुई नक्षत्रमाला जब तक आकाश में रहती है, तब तक स्त्री या पुरुष नक्षत्ररूप होकर नक्षत्रों के समान कल्पान्त तक विचरण करता है। फिर दूसरे कल्प के आदि में बुद्धिमान चक्रवर्ती राजा होता है। चक्रवर्तित्व का नाश होने के पश्चात् संसार में जन्म लेकर राजा या धनाढ्य ब्राह्मण होता है॥१३॥

गगने नभसि नक्षत्राणामृक्षाणां माला पंक्तिर्यावद्विचरति तिष्ठति। इहास्मिन् लोके भासा कान्त्या भूषयन्ती शोभामुत्पादयन्ती। तावत् पुरुषः स्त्री वा तैरेव नक्षत्रैः सह साकं नक्षत्रभूतस्तारकरूपो विचरति तिष्ठति। ब्रह्मणः पितामहस्याह्नो दिनस्यावशेषं कल्पान्तं यावत्। अन्यस्मिन् कल्पादौ पुन कल्पप्रारम्भे चक्रवर्ती सार्वभौमो राजा मतिमान् पण्डितश्च भवति। भूयः पुनस्तत्क्षयाच्चक्रवर्त्तिविनाशात् संसारे मनुष्यो जायमान उत्पद्यमानो नरपती राजा भवति, अथवा ब्राह्मणो द्विजो धनाढ्यो बहुवित्तो भवति॥१३॥

इति रूपसत्रम्

गगन अर्थात् आकाश में नक्षत्रों की माला अर्थात् नक्षत्रपंक्ति जब तक विचरण करती रहती है तथा स्थित रहती है और इस लोक में प्रभाकान्ति से विभूषित करती है अर्थात् शोभा उत्पन्न करती है। तब तक पुरुष अथवा स्त्री उन्हीं नक्षत्रों के साथ अर्थात् नक्षत्र का रूप धारण कर विचरण करते हैं। ब्रह्मा अर्थात् पितामह के दिन के अवशेष भाग अर्थात् कल्पान्त पर्यन्त नक्षत्र रूप में रहते हैं। पुनः जब दूसरे कल्प का प्रारम्भ होता है तब सार्वभौम चक्रवर्ती राजा और बुद्धिमान पण्डित के रूप में जन्म लेते हैं। तत्पश्चात् चक्रवर्त्तित्व के विनष्ट हो जाने पर वह मनुष्य संसार में उत्पन्न होकर राजा होता है अथवा धन-धान्य से सम्पन्न ब्राह्मण होता है॥१३॥

रूपसत्रव्रतविधान सम्पूर्ण हुआ।

अथ द्वादशमासनामानि व्याख्यायन्ते।

तत्र मार्गशीर्षमासात् प्रभृति द्वादशमासानां नामान्याह–

मृगशीर्षाद्याः केशवनारायणमाधवाः सगोविन्दाः।
विष्णुमधुसूदनाख्यौ त्रिविक्रमो वामनश्चैव।।१४।।
श्रीधरनामा तस्मात् सहृषीकेशश्च पद्मनाभश्च।
दामोदर इत्येते १मासाः प्रोक्ता यथासंख्यम्।।१५।।

मार्गशीर्ष आदि बारह मासों के नाम–

केशव, नारायण, माधव, गोविन्द, विष्णु, मधुसूदन, त्रिविक्रम, वामन, श्रीधर, हृषीकेश, पद्मनाभ, दामोदर; ये क्रम से मार्गशीर्ष आदि बारह मासों के नाम हैं। जैसे मार्गशीर्ष का केशव, पौष का नारायण इत्यादि ॥१४-१५॥

मृगशीर्षाद्या इति। मार्गशीर्षमासात् प्रभृति। द्वादशानां मासानां द्वादश नामानि। तद्यथा–केशवो मार्गशीर्षः। नारायणः पौषः। माधवो माघः। गोविन्दः फाल्गुनः। विष्णुश्चैत्रः। मधुसूदनाख्यो वैशाखः। त्रिविक्रमो ज्येष्ठः, वामन आषाढः।।१४।।

तस्मादुत्तरः श्रीधरनामा श्रावणः। हृषीकेशो भाद्रपदः। पद्मनाभ आश्वयुजः। चकारः समुच्चये। दामोदरः कार्तिकः। इत्येवंप्रकारा यथासंख्यं यथाक्रमं मासाः प्रोक्ताः कथिताः। भगवन्नाम्ना मासाः क्रमेणैते ज्ञेया इति।। केचित् पठन्ति "मासेशाः स्युर्यथासङ्ख्यम्" इति। यथासङ्ख्यं यथाक्रममेते द्वादशानां मासानामीशाः स्वामिनः स्युर्भवेयुः।।१५।।

मार्गशीर्ष मास से आरम्भकर द्वादश मासों के नाम इस प्रकार हैं–(१) केशव-मार्गशीर्ष (२) नारायण-पौष (३) माधव-माघ (४) गोविन्द-फाल्गुन (५) विष्णु-चैत्र (६) मधुसूदन-वैशाख (७) त्रिविक्रम-ज्येष्ठ (८) वामन-आषाढ़॥१४॥

तत्पश्चात् (९) श्रीधर-श्रावण (१०) हृषिकेश भाद्रपद (११) पद्मनाभ-आश्विन। चकार का प्रयोग समुच्चयवाचक है। (१२) दामोदर-कार्तिक। इस प्रकार क्रमानुसार मास कहे गये हैं। मासों के ये नाम क्रमशः भगवान के नाम पर अभीष्ट हैं। कतिपय आचार्य कहते हैं कि "ये यथाक्रम से मासपति कहे गये हैं।" अर्थात् क्रमशः बारहमासों के अधिपति होते हैं॥१५॥

अथ द्वादशीप्रशंसार्थमाह–

मासनामसमुपोषितो नरो द्वादशीषु विधिवत् प्रकीर्तयन्।
केशवं समभिपूज्य तत्पदं याति यत्र नहि जन्मजं भयम्।।१६।।

द्वादशी की प्रशंसा–

---

१. मासेशाः स्युर्यथासङ्ख्यमिति पाठान्तरम्।

मनुष्य विधिपूर्वक द्वादशी में मास के नाम के साथ व्रत रख कर केशव, नारायण आदि की पूजा के बाद उनके नाम का संकीर्तन करता हुआ, उनके पद को प्राप्त होता है, जहाँ पर पुनर्जन्म का भय नहीं है॥१६॥

नरो मनुष्यो मासनाम्ना समुपोषितः कृतोपवासो द्वादशीषु विधिवद्विधानेन प्रकीर्तयन् स्मरन् केशवं नारायणमित्यादि। यथा मार्गशीर्षद्वादश्यां केशवम्। पौषस्य द्वादश्यां नारायणम्। एवमन्येष्वपि। तथा च समभिपूज्य समभ्यर्च्य तस्य पदं स्थानं याति प्राप्नोति। यत्र पुनर्नहि जन्मजं भयं भवति, संसारे भूयो न जायते। परमेश्वरसायुज्यतां गच्छतीति।।१६।।

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ रूपसत्रद्वादश-
नामानुकीर्तनं नाम चतुरधिकशततमोऽध्यायः॥१०४॥

मनुष्य को इन मासों के नामानुसार समुपोषित अर्थात् उपवास कर, द्वादशीतिथि में विधिपूर्वक कीर्तन अर्थात् केशव, नारायण आदि का स्मरण करना चाहिए। जैसा कि मार्गशीर्ष मास की द्वादशी तिथि में केशव को, पौष की द्वादशी में नारायण को तथा इसी प्रकार अन्य मासों में भी अभ्यर्चना कर, उनके पद अर्थात् देवलोक को प्राप्त करता है, जहाँ पर पुनर्जन्म का भय नहीं रहता है। वह संसार में जन्म न लेकर, परमेश्वर की सायुज्यता प्राप्त कर लेता है॥१६॥

श्री भट्टोत्पल विरचित संहिताविवृति में रूपसत्र द्वादशनामानुकीर्तन नामक १०४ अध्याय की हिन्दी व्याख्या पूर्ण हुई॥१०४॥

❑❑

अथोपसंहाराध्यायो व्याख्यायते।।१०५।।

तत्रादावेव शास्त्रमत्योर्माहात्म्यमाह–

ज्योतिःशास्त्रसमुद्रं प्रमथ्य मतिमन्दराद्रिणाऽथ मया।
लोकस्यालोककरः शास्त्रशशाङ्कः समुत्क्षिप्तः।।१।।

आरम्भ में ज्योतिषशास्त्र एवं बुद्धि के माहात्म्य को कहते हैं–

मेरे द्वारा ज्योतिष शास्त्र रूपी समुद्र को बुद्धि रूपी मन्दराचल के द्वारा भली भाँति मथकर, संसार में प्रकाश करने वाला, बृहत्संहिता रूपी चन्द्रमा स्थापित किया गया है॥१॥

ज्योतिःशब्देन प्रधाननक्षत्राण्युच्यन्ते। ज्योतिषां शास्त्रं ज्योतिःशास्त्रम्। तदेव दुर्विज्ञेयत्वात् समुद्रं सागरम्। मतिमन्दराद्रिणा, मतिर्बुद्धिरेव मन्दरः पर्वतः, तेन मतिमदराद्रिणा प्रमथ्य निर्मथ्य लोकस्य जगतः आलोककरः प्रकाशकरः, शास्त्रशशाङ्कः शास्त्रचन्द्रः समुत्क्षिप्त उद्धृतः।।१।।

ज्योति: शब्द प्रधान नक्षत्रों का बोध कराता है। ज्योतिष का शास्त्र अर्थात् प्रमुख नक्षत्रों से सम्बन्धित शास्त्र ही ज्योति:शास्त्र कहलाता है। यह बहुत कठिनाई से ज्ञेय होने के कारण समुद्र अर्थात् सागर के समान विस्तृत और गहन है। मति अर्थात् बुद्धिरूपी मन्दरपर्वत के द्वारा मन्थन कर संसार के लिये प्रकाश करने वाला, यह चन्द्रमा के सदृश शास्त्र निकाला गया है। तात्पर्य यह है कि जिस प्रकार सृष्टि के आदि में मन्दराचल पर्वत को मथानी बनाकर देव-दानवों के द्वारा क्षीरसागर का मंथन किया गया था। तथा उसमें से चौदह रत्न (१) लक्ष्मी (२) कौस्तुभमणि (३) पारिजात वृक्ष (४) सुरा (मदिरा) (५) रम्भा (अप्सरा) (६) वाजिश्रवा (सप्तमुख अश्व) (७) विष (कालकूट) (८) धन्वन्तरी (११) चन्द्रमा (१२) कामधेनु (१३) ऐरावत हाथी (१४) अमृत; निकले थे। उसी प्रकार आचार्य वराहमिहिर ने ज्योतिषशास्त्र रूपी समुद्र में अपनी बुद्धिरूपी मथानी से मथकर बृहत्संहिता रूपी चन्द्रमा को प्रकट किया, जो कि सम्पूर्ण संसार को प्रकाशित करने में समर्थ है॥१॥

अन्यत् प्रतिपादयितुमाह–

पूर्वाचार्यग्रन्था नोत्सृष्टाः कुर्वता मया शास्त्रम्।
तानवलोक्येदं च प्रयतध्वं कामतः सुजनाः।।२।।

अन्य भी प्रतिपादित करते हैं–

इस शास्त्र को बनाते हुये मैंने पूर्वाचार्यकृत ग्रन्थों के आशयों को नहीं छोड़ा है। अत: उन पूर्वाचार्यकृत ग्रन्थों को और इस शास्त्र को यत्नपूर्वक देखकर पण्डितों को प्रयत्न करना चाहिये। अर्थात् जो अच्छा हो उसको ग्रहण करना चाहिये॥२॥

पूर्वोक्तानि यानि शास्त्राणि तानि न सन्त्यक्तानि। तान्येव दृष्ट्वा सर्वथा संक्षेपेण सुवृत्तैः कृतम्। तान् पूर्वाचार्योक्तान् इदं मदीयं च शास्त्रमवलोक्य दृष्ट्वा कामतो यथेच्छं सुजनाः साधवो बुधाः प्रयतध्वम्। यच्छोभनं तदेव ग्राह्यमित्यर्थः॥२॥

इस ग्रन्थ में इससे पूर्ववर्ती सभी शास्त्रों के अभिमत का परित्याग नहीं किया गया है। उन सभी को देखकर अर्थात् आलोडन कर संक्षिप्त एवं सुन्दर छन्दों में यह ग्रन्थ ग्रथित है। उन सभी पूर्ववर्ती आचार्यों के कथन और मेरे (वराहमिहिर के) इस शास्त्र (बृहत्संहिता) का सम्यक् अवलोकन कर सुजन अर्थात् सुपण्डित जन अपनी इच्छानुसार अर्थ ग्रहण करने का प्रयत्न करें। अभिप्राय यह है कि जो समुचित हो उसी का ग्रहण करें॥२॥

अधुना सज्जनानां दुर्जनानां च चेष्टितमाह–

अथवा कृशमपि सुजनः प्रथयति दोषार्णवाद् गुणं दृष्ट्वा
नीचस्तद्विपरीतः प्रकृतिरियं साध्वसाधूनाम्।।३।।

सज्जन और दुर्जन के कृत्य को कहते हैं–

सुजन मनुष्य दोषरूपी समुद्र में भी थोड़ा-सा गुण देखकर उसका विस्तार करते हैं। परन्तु नीच पुरुष इससे विपरीत स्वभाव के होते हैं। अर्थात् गुणों को छिपाते हैं तथा स्वल्प दोष का भी विस्तार करते हैं। यही साधु और असाधु का लक्षण है।।३।।

अथवा सुजनः प्रधानजनो दोषार्णवाद् दोषसागरात् कृशमपि स्वल्पमपि गुणं दृष्ट्वा तमेव प्रथयति प्रख्यापयति, दोषान् प्रच्छादयति, नीचस्तद्विपरीत इति। नीचो गुणसागरात् स्वल्पं दोषं दृष्ट्वा गुणान् प्रच्छाद्य तमेव दोषं प्रख्यापयति। इयं साध्वसाधूनां सज्जनदुर्जनानां प्रकृतिः स्वभाव इति।।३।।

सुजन अर्थात् सम्मानीय व्यक्ति, दोष रूपी समुद्र में कृश अर्थात् स्वल्प गुण को भी देखकर उसका भी गुणगान करता है। वह दोषों को ढक देता है। परञ्च नीच पुरुष इसके विपरीत स्वभाव का होता है। नीच पुरुष गुणों के सागर में थोड़ा भी दोष देखकर गुणों को ढककर दोष का ही प्रकाशन करता है। यह साधु और असाधु अर्थात् सज्जन एवं दुर्जन लोगों का स्वभाव (प्रकृति) होता है।।३।।

काव्यमभिनवं सर्वथा दुर्जनानां प्रदर्शयितव्यमित्येतत् प्रतिपादयितुमाह–

दुर्जनहुताशतप्तं काव्यसुवर्णं विशुद्धिमायाति।
श्रावयितव्यं तस्माद् दुष्टजनस्य प्रयत्नेन।।४।।

नवीन काव्य दुर्जनों को दिखाना चाहिये–

काव्य रूप सुवर्ण, दुर्जन रूप अग्नि में तपाये जाने पर विशुद्धि को प्राप्त होता है। इसलिये दुर्जन मनुष्य को यत्नपूर्वक शास्त्र सुनाना चाहिये।।४।।

दुर्जनहुताशेन दुर्जनाग्निना काव्यसुवर्णं काव्यमेव सुवर्णं तप्तं तापितं विशुद्धिं निर्मलतामायाति प्राप्नोति। यथा कनकं वह्नितप्तं शुद्धं भवत्येवं दुर्जनमुखपतितं काव्यं शुद्धं भवति। यतः स दोषतत्परो भवति, न गुणग्राही। तस्मात् प्रयत्नेन दुष्टजनस्य दुर्जनस्य काव्यं श्रावयितव्यं प्रदर्शनीयमिति।।४।।

दुर्जनहुताश अर्थात् दुर्जन रूपी अग्नि के द्वारा काव्य रूपी सुवर्ण को परितप्त करने से विशुद्धि अर्थात् निर्मलता आ जाती है। जिस प्रकार अग्नि से परितप्त सुवर्ण शुद्ध हो जाता है उसी प्रकार दुर्जन के मुख में गया हुआ काव्य भी शुद्ध हो जाता है। क्योंकि वह दोषान्वेषण में तत्पर होता है न कि गुणों के ग्रहण में। अतएव प्रयत्नपूर्वक दुष्ट लोगों को अपना काव्य सुनाना चाहिये।।४।।

अधुना विदुषः प्रार्थयन्नाह–

ग्रन्थस्य यत् प्रचरतोऽस्य विनाशमेति
लेख्याद् बहुश्रुतमुखाधिगमक्रमेण।

यद्वा मया कुकृतमल्पमिहाकृतं वा
कार्यं तदत्र विदुषा परिहृत्य रागम्।।५।।

विद्वानों से आत्मनिवेदन—प्रचारोन्मुख इस ग्रन्थ में लेखन दोष से जो अशुद्धियाँ रह जायें, अथवा जो मुझसे आगम विरुद्ध किया गया हो अथवा छूट गया हो, वे सब दुराग्रहों को छोड़कर, बहुश्रुत मनुष्यों के मुख से सुनकर, पण्डितों को यहाँ पर ठीक कर लेना चाहिये।।५।।

अस्य ग्रन्थस्य प्रचरतः प्रचरमाणस्य यद्विनाशमेत्यपशब्दतां गच्छति। लेख्याद् लेखकदोषाद् बहुश्रुतमुखाधिगमक्रमेण बहुश्रुता ये जनास्तन्मुखेभ्योऽधिगमः प्राप्तिस्तस्य क्रमेण परिपाट्या पूर्वापरपर्यालोचनयाऽर्थासङ्गोत्पत्तेर्येऽपशब्दं जानन्ति तदत्रास्मिन् शास्त्रे विदुषा रागं परिहृत्य कार्यम्। तन्मुखेभ्योऽधिगम्य विदुषा पण्डितेन रागं मात्सर्यं परिहृत्य त्यक्त्वा कार्यं कर्तव्यम्। तथा यद्वा मया कुकृतं कुत्सितमनागमेन कृतं विरचितमल्पं वा परिमितव्यापकं कृतं वा इहास्मिन् शास्त्रे मूलादेवाकृतं यन्न कृतं तदत्रास्मिन् शास्त्रे विदुषा रागं परिहृत्य कार्यमिति।।५।।

इस ग्रन्थ के प्रचार क्रम में जो विनाश अर्थात् अपशब्दों का समावेश हो जाये अथवा लेखनकर्ता के दोष से अशुद्धियाँ रह जायें, बहुश्रुतमुखाधिगम अर्थात् बहुश्रुत लोगों के मुख से सुनकर जो सदोष ज्ञान प्राप्त हो। उसको क्रम अर्थात् परम्परा द्वारा पूर्वापर का विचार करते हुये समुचित संगति पूर्वक अपशब्दों के ज्ञाता विद्वान द्वेष एवं राग छोड़कर अर्थ का ग्रहण करें। अर्थात् उनके मुख से जानकर विद्वज्जन ईर्ष्याद्वेष से रहित होकर समुचित अर्थ ग्रहण करे। अथवा मेरे द्वारा कोई कुकृत अर्थात् अशास्त्रीय अनुचित बात कही गयी है, अथवा अल्प अर्थात् न्यून मात्रा में संक्षिप्त कर दी गयी हो, अथवा इस ग्रन्थ में मूल विषय को ही न कहा गया हो; इन सभी का विद्वान् पुरुष द्वेष रहित होकर समुचित परिहार (संशोधन) करेंगे।।५।।

सतां प्रमाणपूर्वकाणि शास्त्राणि प्रमाणितानि भवन्त्येतदेव प्रदर्शयन्नाह—

दिनकरमुनिगुरुचरणप्रणिपातकृतप्रसादमतिनेदम्।
शास्त्रमुपसङ्गृहीतं नमोऽस्तु पूर्वप्रणेतृभ्यः।।६।।

पूर्वाचार्यों के नमस्कारपूर्वक ग्रन्थ की पूर्णता को कहते हैं—

सूर्य, मुनिगण और गुरुजनों के चरणों में नमस्कारजन्य अनुग्रह से उत्पन्न बुद्धि के द्वारा इस ग्रन्थ का संग्रह मैंने किया है। अतः पूर्वाचार्यों के लिए मेरा कृतज्ञता पूर्वक नमस्कार है।।६।।

दिनकर आदित्यः। ताराभाः सर्व एव ग्रहाः। मुनयो वसिष्ठादयः।

गुरुरादित्यदासाख्यः स्वपिता। दिनकरमुनिगुरूणां चरणाः पादाः। तेषां प्रणिपातो नमस्कारः। तत्कृतात् तत्करणाज्जातः प्रसादोऽनुग्रहो यस्ततो मतिर्बुद्धिर्यस्य तेन दिनकरमुनिगुरुचरणप्रतिपातकृत-प्रसादमतिना मयेदं शास्त्रं ज्यौतिषग्रन्थमुपसङ्गृहीतं संक्षिप्तीकृतम्। तस्मात् तेभ्यः पूर्वप्रणेतृभ्यः पूर्वाचार्येभ्यो नमोऽस्तु नमस्कारो भवतु।।६।।

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतावुपसंहारो नाम
पञ्चाधिकशततमोऽध्यायः।।१०५।।

दिनकर अर्थात् सूर्य और तारा सदृश प्रकाशमान सभी ग्रह, वशिष्ठादि मुनिगण, गुरु अर्थात् आदित्यदास नामक अपने पिता; उन सभी के चरणों में प्रणिपातपूर्वक प्रणाम करता हूँ। उनके लिये किये गये प्रणाम से जो अनुग्रह प्राप्त हुआ उससे उत्पन्न बुद्धि के कारण मेरे द्वारा यह ज्योतिष शास्त्र अर्थात् बृहत्संहिता नामक ज्योतिषग्रन्थ का संग्रह कर संक्षिप्त स्वरूप में प्रस्तुत किया गया है। अतएव उन सभी प्रणेता अर्थात् पूर्वाचार्यों को मेरा नमस्कार हो।।६।।

श्रीभट्टोत्पलविरचित संहिता विवृति में उपसंहार नामक १०५ अध्याय की हिन्दी व्याख्या पूर्ण हुई।।१०५।।

❑❑

अथ शास्त्रानुक्रमणी व्याख्यायते।।१०६।।

कदाचिदादर्शदोषाल्लेखदोषाच्चाध्यायव्यत्ययो भवत्यतोऽनुक्रमणी सद्भिः क्रियते। तत्रादावेवाध्यायसंग्रार्थमाह–

शास्त्रोपनयः पूर्वं सांवत्सरसूत्रमर्कचारश्च।
शशिराहुभौमबुधगुरुसितमन्दशिखिग्रहाणां च।।१।।

कदाचित् दृष्टिदोष अथवा लेखन दोषों के कारण अध्यायों में व्यतिक्रम हो जाता है, इसलिए सज्जन पुरुष अनुक्रमणिका बनाते हैं–

आरम्भ में (१) उपनयनाध्याय (२) साम्वत्सरसूत्राध्याय (३) आदित्यचाराध्याय (४) चन्द्रचाराध्याय (५) राहुचाराध्याय (६) भौमचाराध्याय (७) बुधचाराध्याय (८) बृहस्पतिचाराध्याय (९) शुक्रचाराध्याय (१०) शनैश्चरचाराध्याय तथा (११) केतुचाराध्याय है।।१।।

गतार्थेयमार्या। शिखिग्रहाः केतवः। चारशब्दोऽत्र सम्बध्यते।।१।।

यह आर्याछन्द है। गतार्थ अर्थात् पूर्व में इसका विचार किया जा चुका है। शिखिग्रह अर्थात् केतु समझना चाहिये। यहाँ पर चार शब्द से ग्रह चार का सम्बन्ध

है॥१॥

अन्दयप्याह–

चारश्चागस्त्यमुनेः सप्तर्षीणां च कूर्मयोगश्च।
नक्षत्राणां व्यूहो ग्रहभक्तिर्ग्रहविमर्दश्च॥२॥

और भी कहते हैं–

(१२) अगस्त्यचाराध्याय (१३) सप्तर्षिचाराध्याय (१४) नक्षत्र कूर्माध्याय (१५) नक्षत्रव्यूहाध्याय (१६) ग्रहभक्तियोगाध्याय तथा (१७) ग्रहयुद्धाध्याय है॥२॥

